ग्रंथकर्त्ता



साहित्योपाध्याय कविरत्न त्रिपाठि पं० शिवदत्त काव्यतीर्थः (अजमेर)

* ॐ *

॥ श्रीदधिमथ्यै नमः ॥

भूमिका

करारविन्देन पदारविन्दं, मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं, बालं मुकुन्दं सततं स्मरामि ॥

विहाय पीयूषरसं महात्मनो, ममांघ्रिपीयूषरसं पिबंति किम् ?
इति स्वपादांबुजपानकौतुकी, स गोपबालः श्रियमातनोतु नः ॥

महानुभावाः ! नवखण्डमण्डितेऽस्मिन् भूमण्डले श्रीवेद-सदृशो धर्मग्रंथः, श्रीहिमालयतुल्योऽद्रिराजः, श्रीमतीगंगासदृशी नदी, श्रीकृष्णसदृशोऽवतारो, भारतवर्षतुल्यो देशश्च क्व श्रूयते क्व चाऽवलोक्यते । तत्राऽप्यगणितवीरवीरांगनानां शरच्चन्द्रोज्वलेन यशसा धवलितेऽस्मिन् राजस्थानप्रांतेऽजयमेरुनगरम्, अर्बुदा-चलसुतो नागपर्वतः, तीर्थगुरुसंज्ञकं च श्रीब्रह्मपुष्करमेतानि त्रीणि महापुण्यफलप्रदानि भण्यंते । अत्र श्रीपुष्करमाहात्म्यम्—

स्वच्छं चन्द्रावदातं करिकरमकरक्षोभसंजातशंकम्,
ब्रह्मोद्गीथप्रसक्तैर्जपनियमरतैः सेवितं विप्रमुख्यैः ।
ओंकारालंकृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टपूर्वम्,
संभोगाभोगरम्यं जलमशुभहरं पौष्करं नः पुनातु ॥

तस्योत्तरे तटे वर्तते मम परमपूज्यायाः श्रीजानकीनामिकाया मातुः स्मारकं 'श्रीजानकी निवासाभिधानं' स्थानम् । यत्र वि० सं० १९९४ मिताऽब्दस्य कार्तिकीपूर्णिमायामास्तिकसमाजस्याऽधिवेशनमभूत् । तस्मिन्नवसरे श्रीभरतपथानुसारी ममाऽनुजस्त्रिपाठि श्रीरामदत्त विद्याभूषणोऽवदत्—ज्येष्ठभ्रातः! यथा 'गद्यरामायण-गद्यभारते' रचिते तथा यदि श्रीकृष्णचरित्रमपि विरच्यते, तदाऽतीवशोभनं भवेत् । तच्छ्रुत्वा श्रीमद्ब्रह्ममन्दिरस्थः स्वामि श्रीकृष्णानंदगिरिः वेदान्तभूषणः, श्रीनृसिंहमंदिराधिष्ठाता विद्वद्वर्य महंतपदवाच्यः श्रीहरिदासः, इतिहासविद्यानिधिः योधपुरीय विद्वद्रत्न श्रीरामकर्णदाधीचः, 'श्रीदधिमथी' संपादकः पंडितवर्यः श्रीगोविन्दनारायणः (बी० ए०), श्रीराजपुत्रपाठालयप्रधान-पंडितः आशुकविः श्रीनित्यानंद शास्त्री, जयपुरप्रान्तशिक्षाविभाग-निरीक्षकः श्रीरूडमल्लशर्मा (बी० ए०), आशुकविः प्रधान-संस्कृताध्यापकः श्रीहरिशास्त्री जयपुरीयः, महोपदेशकः श्रीधर शर्मा, मरुभूषणश्चेत्याद्या मनीषिणस्तत्कथनमभ्यनन्दन । ततोऽहं प्रणम्य वाणीविनायकौ ध्यात्वा च गुरुवर्यं शनैः शनैर्लिखितु-मारब्धवान् श्रीमद्भगवतो वासुदेवस्य श्रीकृष्णस्य चरित्रम् । चिरात् सपुत्रविदग्धांगनाविरहदुःखदुःखितस्तु प्रागेवाऽऽसम् । समयेऽस्मिन् दुर्दैवेन दग्धस्योपरि लवणमुष्टिक्षेप इव ममाऽऽज्ञा-कारिभ्राता ग्रंथस्य सम्मतिदाताऽपि सहसाऽपहृतः । अनेन "श्रेयांसि बहुविघ्नानीति" लोकोक्तिः सत्याऽभवत् । ततश्चित्तस्य

वैक्लव्यात् कार्येषु मंदादरोऽहमभूवम् । ततो गच्छत्सु दिनेषु हरिमायामोहितोऽहं विस्मृत्य क्लेशं श्रीमच्छ्रीधरस्वामिकृतां श्रीमद्भागवतटीकामवलंब्य श्रीगिरिधराचार्यकृतां व्याख्यां च विलोक्य पुनर्यत्नपरायणोऽभवम् । अथ पंचतंत्रवासवदत्तादशकुमारचरित्रयशास्तिलकचम्पूशिवराजविजयादीनां साहाय्येन शब्दकल्पद्रुमशब्दार्थचिन्तामणिशब्दस्तोममहानिधिप्रभृतीनां कोशानां विलोकनेन चाऽस्य 'श्रीकृष्णचरितस्य' कलेवरं रचयितुं समर्थोऽभवम् । यथा भक्तिमती शबरी श्रीमते रामचन्द्राय बदरीफलान्यर्पितवती, विप्रवर्यः सुदामा यथा यशोदानंदनाय नंदकुमाराय तण्डुलकणमुष्टिं समर्पयामास, यथा महामतिर्विदुरश्च श्रीयदुपुंगवाय शाकं न्यवेदयत्तथाऽहमपि स्वल्पमतिः श्रीमते रामानुजाय देवकीहृदयखंडाय वासुदेवायैतत् पुष्पांजलिकल्पं 'श्रीकृष्णचरितं' सादरं समर्पयामि । भक्तवत्सलो द्वारकाधीश्वरोऽङ्गीकृत्योपहारं पूरयत्वकिंचनस्य मम मनोरथम् । किं बहूक्त्या—

कृष्ण ! त्वदीयपदपंकजपंजरान्ते,
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः,
कंठाऽवरोधनविधौ स्मरणं कुतस्ते ॥

अतः परं विदुषामग्रेऽपि निवेदनम् । यथामति मयाऽत्र भगवद्यशो वर्णितम् । समयोपयुक्ताश्च मानसभावा अपि प्रकटीकृताः । अतोऽत्र यत् काऽपि त्रुटिर्भवेत् सा भवद्भिः संशोधनीया ।

सर्वः सर्वं न जानातीति लोकोक्तिः प्रसिद्धैव। अपरं च भ्रान्तिर्मनुष्यस्य जन्मना सहैव जायते। सर्वथा निर्भ्रान्तस्तु स एक एव जगन्नियन्ता जगदीश्वरः। स सर्वज्ञः स सर्ववित् इति श्रुतिः। कार्येऽस्मिन् मम वंशक्रमागता यजमाना श्रीराजोपाधिभूषिताः सबांधवा श्रीरत्नावताराजस्थानाध्यक्षाः श्रीकल्याणसिंहलक्ष्मणसिंहकल्याणसिंहकृष्णसिंहजवानासिंहाः पुस्तकप्रदानेन साहाय्यं दत्तवन्तोऽतो धन्यवादार्हाः। ततश्च मुद्रणसमये विद्यावाचस्पतिः श्रीमहेन्द्र शास्त्री, श्रीसत्यदेव शास्त्री 'अशोकः', श्रीरामदयालुर्भाषाकोविदश्चैतेऽपि धन्यवादार्हा ये दूरवर्तिनोऽपि मम पत्रादिशोधनद्वारा हितमकुर्वन्। अनेकाऽनेकधन्यवादयोग्यः स दीनदयालुः श्रीकृष्णचन्द्रो यो देवाऽसुरसंग्रामसदृशोऽस्मिन् शार्मण्यजयपर्णचीनवृत्रह्वंशजप्रभृतीनां घोरसंग्रामसमयेऽपि मम कार्यं यथाकथंचित् पूर्णं कृतवान्। अन्यथा सर्वोपायाऽसमर्थस्य मम का शक्तिः? किं बहुना—

कृष्णेनोक्तं भागवतं यत्र कृष्णस्य कीर्तनम्।
कृष्णाऽर्पितस्य कृष्णत्वं कृष्ण एवाऽपकर्षतु॥

निवेदकः—

माघीपूर्णिमा रविवासरः वि. सं. १९९८ ता० १-२-४२ } साहित्योपाध्याय, त्रिपाठि शिवदत्तः, काव्यतीर्थः
(भूतपूर्व प्रधान संस्कृताध्यापकः गवर्नमेन्ट हाईस्कूल, अजमेर)

॥ श्रीरस्तु ॥

अथ विषय-सूची

स्तवकः	विषयः	पृष्ठ-संकेतः
२३	कालियदमनम्	६३—६७
२४	कालियप्रवासकारणम्	६७—६८
२५	दावाऽनलपानम्	६८—६९
२६	प्रलंबवधः	६९—७२
२७	गोप-रक्षा	७२—७३
२८	प्रावृड्वर्णनम्	७३—७६
२९	शरद्वर्णनम्	७६—७७
३०	वेणुगीतम्	७७—७९
३१	चीरहरणकारणम्	८०—८३
३२	स्त्रीणामास्तिक्यम्	८३—८७
३३	गोवर्द्धनपूजा	८७—९०
३४	गोवर्द्धनोद्धारणम्	९०—९३
३५	गोविन्दाभिषेकः	९३—९५
३६	हरिविभवदर्शनम्	९५—९७
३७–३९	रासक्रीडा	९७—११३
४०	सुदर्शनोद्धारः	११३—११५
४१	शंखचूडवधः	११५—११७
४२	अरिष्टवधः	११७—११९
४३	केशिव्योमासुरयोर्वधः	११९—१२१
४४	रामकृष्णयोर्गुरुकुलवासः	१२१—१२५
४५	श्रीराधाविवाहः	१२५—१२९
४६–४८	अक्रूरागमनम्	१२९—१४०
४९	हरिमथुराप्रवेशः	१४०—१४३
५०	धनुर्भंगः	१४३—१४७
५१	कुवलयापीडवधः	१४७—१५०
५२	कंसवीरगतिः	१५१—१५४

स्तवकः	विषयः	पृष्ठ-संकेतः



भगवान् श्रीकृष्णचन्द्रो विजयतेतराम् ।

* ॐ नमः शिवाय *

श्रीकृष्ण-चरितम्

हरिः ॐ ॥ गणानान्त्वा गणपतिꣳ हवामहे
प्रियाणान्त्वा प्रियपतिꣳ हवामहे
निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ।
आहमजानि गर्भधमात्वमजासि गर्भधम् ॥
यजु० अ० २३ । मं० १९ ॥

श्रीराधामाधवौ वन्दे वृन्दावनविहारिणौ ।
यत्पादपङ्कजध्यानं कलौ कल्पद्रुमायते ॥ १ ॥
श्रीमद्भागवतच्छायामवलम्ब्य यथामति ।
धर्मलाभाय श्रीकृष्णचरितं रचयाम्यहम् ॥ २ ॥

अस्ति खल्विहैव वसुन्धरायां सप्तद्वीपायां पुण्यपवित्रदेशो भारतवर्षः । विराजते यत्र नन्दनवनोपमं व्रजमण्डलम् । श्रीमती पुण्यसलिला यमुना प्रदेशस्यास्य नीलमणिमालेव विभाति ।

त्रेतायुगे यत्र प्रतापनिधिः शत्रुघ्नो रघुकुलतिलकस्य श्रीमद्भगवतो रामचन्द्रस्याज्ञां शिरसि निधाय रणे शूलेन लवणासुरं जघान । सोऽथ सनातनधर्मानुयायिनामार्यमुनीनां धर्मरक्षां विधाय सर्वासामेव च प्रजानां सर्वथैव त्राणमकरोत् ।

अथ विजयहृष्टो दाशरथिः मनुवंशजानां महीपालानां कीर्तिरक्षणाय रवितनयातटे—उपेताम् आम्रवणैः, सजलां सुधासलिलैः, वेष्टितां गम्भीरपरिखाभिः, शोभितां कपाटतोरणपताकाभिः, दुरासदां दुर्गरचनाभिः, दीप्तां द्विजातिभिः, सेवितां शिल्पिभिः, राजमानां राजमार्गैः, प्रतिबिम्बितां प्रासादपंक्तिभिः, सुशोभितां सामन्तैः, विभूषितां विभूतिभिः, वादितां वीणामृदङ्गपणवैः, युक्तां युवतिनाट्यशालाभिः, सङ्कुलाञ्च शतघ्नीभिः—समावासयामास मथुराभिधानां नगरीम् । यत्र च राजनीतिनिपुणे सुमित्रानन्दने शासति वसुमतीम्—वृषोत्सर्गः पितृकार्ये, कन्यातुलारोहणं शशाङ्कस्य, शूलचिन्ता योगे, दानविच्छेदः करिकपोलेषु, शरभङ्गो दधिषु, शृङ्खलाबन्धो वर्णरचनासु, आक्षेपः काव्यालङ्कारेषु, लक्ष्यदानच्युतिः सायकानाम्, सर्वविनाशः क्षिपाम्, कोशसङ्कोचः कमलाकरेषु, मलिनाम्बरत्वं निशासु न जनेषु, चलरागता गीतेषु न विदग्धेषु, द्विजाघातः क्रीडासु न प्रजासु, कर्तनमलकेषु न पुरन्ध्रीषु, किं बहूक्त्या निस्त्रिंशत्वम् असीनामेवाऽऽसीत् न च पुरुषाणाम् ।

अथ व्यतीतेषु हायनेषु यदाऽभवद् द्वापरयुगान्तस्तदा स्वजन्मना अलञ्चकार शशिवंशमुग्रसेनः। योऽलङ्कारो भूमण्डलस्य, सहृदयः सद्धर्मस्य, पतिर्वीरतावनितायाः, सखा सुशीलतायाः, धर्ता धीरतायाः आह्लादकारी विश्वस्य, सिन्धुश्च सद्गुणानाम्।

ततः प्राप्तयौवनो राजा ललनारत्नं पवनरेखामुपयेमे। श्रीमती दमयन्ती यथा नैषधं नलं पर्यचरत्तथा साऽपि सर्वदा पतिमसेवत। अथ गच्छता कालेन बभूव गर्भिणी सा वरवर्णिनी। समये महापराक्रमिणं हिरण्याक्षोपमं सुतं च सुषुवे। ततः सुतजन्महर्षितो राजा समाहूय दैवज्ञान् सविनयमपृच्छत्। भूदेवाः! कृपयाऽस्य पुत्रस्य जन्मकुण्डलीफलं ब्रूत। एतदुपाकर्ण्य भूपवचनं विलोक्य च ग्रहान् विप्राः प्रत्यवदन्। पृथ्वीनाथ! भवदीयोऽयं पुत्रो महाबलवान्, अत्युग्रस्वभावः कंसनामको भविता। निजपौरुषान्महतीम् ख्यातिं समवाप्यायं निष्कण्टकं राज्यं करिष्यति। निशम्यैवं ब्राह्मणवाक्यानि सन्तुष्टो नरपतिः दक्षिणाभिर्विप्रान्, पारितोषिकैः सूतमागधबन्दिचारणगणान्, पुष्कलधनैर्याचकान्, वस्त्रालङ्कारादिभिश्च सुवासिनीवर्गं परितोषयामास। ततो मातापित्रोर्मुदं जनयन् क्रमशोऽवर्धत राजकुमारः कंसः। सोऽथ स्वभावेन शूरः, युद्धरुचिः, शस्त्रविद्याप्रवीणश्च बभूव। सिंहव्याघ्रवराहादिहिंस्रजन्तुहननन्तु तस्य वामहस्तस्य क्रीडाऽऽसीत्। एकदाऽयं सम्मुखागतं गजं हुंकारेणैव निर्भर्त्स्य

दण्डप्रहारैस्तं परावर्तितवान् । एवमालोक्य पौराः भूयो भूयोऽस्य पराक्रमं प्रशशंसुः । किं बहुना भुवनविश्रुतो मगधाधिपतिर्जरासन्धोऽप्यस्य शौर्यादिगुणगणैर्विमोहितःसन् मत्यवसरे रूपलावण्यसम्पन्नेऽस्तिप्राप्तिसंज्ञिके स्वसुतेऽस्मै सादरं प्रादात् । अथ विवाहितो युवराजः कंसः चित्राविशाखाभ्यां युतश्चन्द्र इव व्यराजत ।

अत्रान्तरे उग्रसेनानुजो देवकः सर्वाङ्गसुन्दरीं प्रभावतीं पर्यणयत् । सा राजपत्नी दुष्यन्तस्य शकुन्तलेव पत्युः प्रणयिनी बभूव । ततो गार्हस्थ्यसुखमनुभवतोस्तयोर्दम्पत्योर्बहुतिथः कालो जगाम । अथैकदा गर्भं दध्रे राज्ञी, समये च यदा सा सर्वलक्षणसम्पन्नां सुतां सुषुवे तदा राजा सुतजन्मवत् कन्याजन्ममहोत्सवं चक्रे । किं बहुना तस्मिञ्छुभावसरे राजद्वारात् कोऽप्यर्थी निराशो न न्यवर्तत । ततो दानमानाभ्यां सन्तुष्टा लोका भूपाय शुभाशीर्वादान् वितरन्तः प्रोचुः । नरपाल ! महाभागैषा तव सुता देवकी वीरपत्नी वीरमाता च भूयात् । निशम्यैवं सुधोपमं जनतावाक्यं हर्षितहृदयो राजा पुनः पुनः स्वभाग्यं बह्वमन्यत ।

इति श्रीकृष्णचरिते देवकीजन्मनिरूपणं नाम प्रथमः स्तवकः ॥ १ ॥

आसीद्वृष्णिवंशे परमधार्मिकः सर्वस्वामिगुणोपेतश्च व्रजमण्डलान्तिके शूरसेनो नाम नरपतिः । स स्वप्रतापेन शत्रून्

विजित्य स्वनाम्ना शूरपुराख्यं नगरमावासयामास । ततो यौवन-मवाप्य राजा स्वयंवरे जगत्त्रितयमोहिनीं मरिष्याख्यां सिन्धु-राजसुतामवाप । अथ पूर्वजपुण्यप्रभावात् विष्णुभक्तो भूपाल-स्तस्यां वसुदेवनामानं सुतम् अजीजनत् । यस्य जन्मदिने दिवि देवा दुन्दुभिनादं चक्रुस्तेन लोके स आनकदुन्दुभिरित्यपि प्रसिद्धो बभूव ।

अत्रान्तरे शुक्लपक्षशशिकलेव देवकराजसुता ववृधे । ततो जननीजनकौ कोकिलकण्ठ्यास्तस्याः कोमलां गिरं निशम्य बाल्यचरितानि विलोक्य च प्रेमपयोनिधौ निमग्नाविव बभूवतुः । अथैकदा महाराज्ञी हर्म्यस्थितं महीपतिं विनयपुरस्सरं जगाद । आर्यपुत्र ! सम्प्रति विवाहयोग्याऽभवद्राजकुमारी । अतो द्रुतमेव कुलशीलविद्यावित्तबन्धुवपुर्वयःसमन्विताय सुयो-ग्यवराय दुहिता देयेति समाकर्ण्य प्रियतमावचनम् राजोवाच । प्राणेश्वरि ! सत्यमुक्तं भवत्या । कन्यापितृत्वं खलु नाम कष्टमिति मयाऽपि श्रुतं । किन्तु देशकालौ विचिन्त्य भवत्याः कथनात् प्रागेव वरान्वेषणाय प्रेषितवानस्मि दूरदर्शिनं ब्राह्मणवर्यम् । अत्रान्तरे भूपप्रेरितो भूदेवोऽपि परावृत्य तत्राऽऽजगाम । सोऽथ राज्ञा पृष्टः प्रत्यवदत् । देव ! भगवदिच्छया यदुपुंगवः शूरसेनो राजकुमारेण वसुदेवेन सह राजपुत्र्या देवक्याः संबन्धं सहर्षं स्वीकृतवान् । निशम्यैतद् द्विजवचनं प्रमुदितमना भूपतिः

पूर्वं साधुवादैः सत्कृत्य विप्रं ततो मिष्टान्नपानवस्त्रालङ्कारादिभिश्च तं परितोषयामास । अथान्येद्युः कृतनित्यकृत्यो देवकः समाहूय मंत्रिमण्डलं सर्वं वृत्तान्तमावेदयामास । तच्छ्रुत्वा सन्तुष्टाः सचिवा नृपादेशाद्वरार्थं हयसमेतां तिलकसामग्रीम् सहसैव प्रेषयामासुः । ततः शुभेऽहनि विवाहार्थं समाहूतो वरो महता समारोहेण मधुपुरीमाजगाम । अथ महीपो देवको वेदोक्तविधिना वरं सम्पूज्य तस्मै सर्वलक्षणसम्पन्नां, सवस्त्रां, सालङ्कारां, साक्षाद्देवतास्वरूपिणीं देवकीं कन्यां प्रादात् । ततो राजा यौतुके गवां सहस्रं, हयानामयुतं, गजानां सप्तशतीं, दासदासीगणसमेतं च संख्यातीतं प्रचुरं धनधान्यमदात् । प्रस्थानसमये च पिता पुत्रीमादिदेश । वत्से ! श्वशुरगृहं गत्वा——

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने ।
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी ।
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

ततो नववधूसमेतः शौरिः स्यन्दनमारुह्य यदा प्रतस्थे तदा भगिनीप्रियकाम्यया स्वयं कंसः तत्सारथ्यमकरोत् ।

अत्रान्तरे देवयोगात् काऽप्यशरीरा वागभवत्——भो कंस ! यां स्वसारं भर्तृगृहं प्रापयसि तस्या एवाष्टमो गर्भस्तवप्रियान् प्राणानपाहरिष्यति । निशम्यैतत् विद्युत्पातोपमं वचः कोपकम्पि-

ताधरः कंसः सहसा खड्गमाकृष्य केशेषु च तां गृहीत्वा सपद्या-चकर्ष । एतदालोक्य प्रत्युत्पन्नमतिर्वसुदेवः सविनयं जगाद—युवराज ! नेयं सज्जनपद्धतिः यया प्रवृत्तोऽसि, धैर्यधनाः साधवो धृतिमेव कल्पलतां मन्यन्ते। सखे ! क्रोधः पूर्वं स्वात्मानं निपातयति ततोऽपरम्, विकृतबुद्धयोऽन्धा इव हितमहितं वा न पश्यन्ति, अतः क्रोधं संहृत्य क्षमामवलम्बस्व । अप-रञ्चैषा तु तवानुजा कन्यकोपमाऽस्ति । मङ्गलमयेऽस्मिन्समये भगिनीवधं कृत्वा घोरतरेऽस्मिन्पापपङ्के स्वात्मानं मा पातय । वीरा वीरेष्वेव वीरत्वं दर्शयन्ति नाऽवीरेषु । अपरं च—

मृत्युर्जन्मवतां वीर ! देहेन सह जायते ।
अद्य वाऽब्दशतान्ते वा, मृत्युर्वै प्राणिनां ध्रुवः ॥

एवं विचिन्त्य कल्याणार्थी न कदापि कस्यचिद् द्रोहमाचरेत्, जगति भद्रकृद् भद्रमभद्रकृच्चाभद्रं लभते । किं बहुना भीतिस्तु केवलाऽष्टमादेव गर्भादस्ति । किन्त्वहं जातमात्रान् सर्वानेव समानीय तुभ्यं समर्पयिष्यामि । ततस्तेषां मारणे पालने वा तवैवाधिकारो भविष्यति । एवं श्लक्ष्णया वाचा प्रबोधितः कंसः शान्तिमवलम्ब्य प्रोवाच स्वसृपते ! त्वं विश्वासार्होऽसि । यतो भवन्ति यादवाः खलु सत्यसन्धाः । अन्यच्च भगिनीवधपापान्मां निवार्य मम महोपकारमपि कृतवानसि । ततो मिथो हस्तमेल-नानन्तरं कंसः स्वसदनं जगाम ।

अथ लब्धस्वान्तःस्वास्थ्यः शौरिः विद्युत्पातान्मुक्तां कल्पलतामिव स्वपत्नीं नीत्वा स्वभाग्यं श्लाघमानश्च स्वाश्रयाभिमुखं प्रतस्थे । ततो मङ्गलतूर्यपुरस्सरौ यदा स्वनगरं प्राविशतां, तदा पौरनार्यः पुष्पाण्यवर्षन् । कुमार्यो लाजा अवाकिरन्, ब्राह्मणाः पुण्याहवाचनमपठन्, सूतमागधबन्दिनश्च विरुदावलीं जगुः, महाराजः शूरसेनोऽपि तस्मिञ्छुभावसरे याचकेभ्योऽसंख्यातं धनं विततार । अथान्तःपुरं प्रविश्य वधूवरौ गृह्यसूत्रविधिमनुसृत्य च देवपितृगुरून् पूजयामासतुः । तत आनन्दभवनमवाप्य सुखेन सुषुपतुः । अथ सौभाग्यवती देवकी प्रत्यहं देवानानर्च, गुरुजनान् प्रणनाम, पतिं परमेश्वरबुद्ध्या समपूजयत्, सपत्नीजने सखीभावमरक्षत्, परिचारिकासु दयावती बभूव, अतिथिष्वादरपरायणा चाऽभवत् । किं बहुना स्वल्पेनैव कालेन सा सर्वेषां संबन्धिनां मनांसि निजकौशलेनाऽचकर्ष । ततो नानाविधान्भोगाननुभवतो देवकीवसुदेवयोर्बहुतिथोऽपि समयः क्षण इव जगाम । ततः कालक्रमेण वरवर्णिनी दध्रे गर्भम् । यदा सा प्रासूत सुतं तदा प्रतिज्ञापाशबद्धो वसुदेवः परित्यज्य सुतस्नेहं तं कंसाग्रे स्थापयामास । तमालोक्य नवजातं शिशुं क्रूरहृदयोऽपि कंसः करुणाऽऽकुलो बभूव । सोऽथ वसुदेवं बभाषे । मित्र ! धन्योऽसि, दृष्टं मयाऽद्य तव दृढव्रतत्वं । साम्प्रतमिमं निर्दोषं स्तनन्धयं नीत्वा द्रुतं गृहं प्रापय । यतोऽ-

स्मादूयं नास्ति । आकाशवाण्या तु युवयोरष्टमादेव गर्भाद्भीतिर्निगदिता । तच्छ्रुत्वाऽतिसन्तुष्टो वसुदेवः सानुकूलं विधिं मत्वा कंसं प्रशस्य च गृहीतपुत्रः स्वसदनं न्यवर्तत । अथ चिन्तातुरा देवकी ससुतं पतिं सकुशलिनमालोक्य सुधासिन्धौ निमग्नेव बभूव ।

इति श्रीकृष्णचरिते देवकीसुतरक्षणं नाम द्वितीयः स्तवकः ॥ २ ॥

अथैकदा देवर्षिर्नारदः कंससभामाजगाम। तं दृष्ट्वा युवराजः सहसोत्थाय प्रणिपत्य पाद्यार्घ्यासनादिभिर्विधिवत्सम्पूजयामास । सोऽथ कृताञ्जलिः शुभासनासीनं मुनिं प्रोवाच । ऋषिराज ! जातोऽहमद्य कृतार्थः, कृपयाऽत्रागमनकारणं कथयतु भवान्, भवद्विधाः परोपकारदक्षा महामुनयोऽसामान्यकारणं विना न कुत्रापि पदार्पणं कुर्वन्ति । तच्छ्रुत्वा देवर्षिरुवाच—राजन् ! यथार्थं वचनं भवतः, धर्मोपदेशार्थमेव यतयः कुर्वन्ति तीर्थयात्रां, देशदर्शनन्तु यया स्वत एव सञ्जायते, संप्रति सावधानमनसा समाकर्ण्य धर्मसारम्—

महापुण्यैर्लब्ध्वा विविधफलदां मानवतनूं ।
न कुर्याद्धर्मं यः क्षणिकसुखलोभाकुलमतिः ।
स कल्पवृक्षस्याऽऽश्रयणमधिगम्याऽपि कुधिया ।
वराटं याचित्वा सततमनुशोचन् हि म्रियते ॥ १ ॥

स्नातं तेन समस्ततीर्थसलिले सर्वाऽपि दत्ता मही।
यज्ञानां च कृतं सहस्रमखिला देवाश्च सम्पूजिताः।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ।
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥ २ ॥
स्वर्णस्थालं भरति रजसा दोग्धि गां कुक्कुरार्थे।
काष्ठं वोढुं त्यजति स वने घोटकं श्यामकर्णं।
कर्पूरं च ज्वलयति मुधा चुल्लिकोद्दीपनार्थं।
यो दुर्भाग्यो गमयति वृथा जीवनं धर्मशून्यम् ॥ ३ ॥

राजन् ! किं बहूक्त्या । तच्छ्रुत्वा प्रकृतिवशात् कंसो यदाऽरुचिं प्रादर्शयत् धर्मोपदेशश्रवणे, तदा मुनिस्तमेकान्ते नीत्वा जगाद—नरराज ! दूरे तिष्ठतु धर्मचर्चा, पूर्वजन्मनि त्वं कालनेमिरिति विख्यातो दैत्यराजोऽभूः, रणे च विष्णुना व्यापादितः, अतो विष्णुर्विद्यते तव सहजशत्रुः, इमे वसुदेवाद्या यादवाः, देवकीप्रभृतयो यदुस्त्रियो व्रजस्था नन्दपुरोगमा गोपाः, यशोदापुरस्सरा गोप्यश्च देवांशत्वाद् देवकल्पा एव। बुधा ऋणाग्निशत्रुसर्पव्याधीन् कदापि क्षुद्रान् न गणयन्ति, किन्तु येऽनवधानास्तानुपेक्षंते ते वृक्षाग्रे सुप्ता इव पतित्वैव प्रतिबुद्ध्यन्ते । तच्छ्रुत्वाऽब्रवीत् कंसः। महामुनेऽनुगृहीतोऽस्मि भवता, किमिदानीं करवाणि, भयन्तु विद्यते केवलादष्टमादेव गर्भात् । एवमाकर्ण्य मुनिः पृथिव्यामष्टरेखाः कृत्वाऽपृच्छत्—राजन् ! पूर्वं क्रमात्

गणय ततो विपर्ययात् । तच्छ्रुत्वा कंसः उभाभ्यां रीतिभ्यां रेखा गणयित्वाऽष्टमत्वं सर्वास्वेवालभत, ततो मुनिप्रोक्तं सर्वं रहस्यमवगच्छति स्म ।

अथ गते मुनिवरे राजा समाहूय मुख्यामात्यं तेन साकं कृतवान् परामर्शम् । अथ कृतनिश्चयः कंसः पूर्वन्तु देवकीवसुदेवौ चारके प्राक्षिपत् । ततो महाराजादुग्रसेनात् सर्वानेव राज्याधिकारान् बलादाच्छिद्य स्वयं च सर्वतंत्रस्वतंत्रो बभूव । उक्तं च—

मातरं पितरं भ्रातॄन्, सर्वांश्च सुहृदस्तथा ।
घ्नन्ति ह्यसुतृपो लुब्धा, राजानः प्रायशो भुवि ॥

यद्यपि कंस आसीद्बलवान् तथापि नारदवचनं स्मारं स्मारं प्रासादस्थोऽपि चिन्तातुरोऽभवत् । किं बहुना, आसीनः शयानः खादन् पिबन् पर्यटंश्चाऽपि हृषीकेशमेव दध्यौ । सोऽथ मंत्रिगणानुमत्या यादवानेव पीडयितुमारभत । ततः स्वराज्ये घोषणां अपि कारितवान्—

राजा विष्णुः शिवो राजा, ब्रह्मापि च नरेश्वरः ।
तं विहाय न चान्योऽस्ति, प्रत्यक्षफलदो भुवि ॥

अथास्तप्रायेष्वग्निहोत्रेषु, धूतेषु धर्मकृत्येषु, विगतप्रभेषु विप्रेषु, म्लानेषु मुनिवृन्देषु, सुप्तेषु च श्रुतिसमुदायेषु, सर्वा एव प्रजाः खिन्नानना बभूवुः । कंसराज्ये—धृतिर्धरायाम्, क्षमा क्षीर-

सागरे, दमो दिवि, अस्तेयमरण्ये, शौचं शास्त्रपृष्ठेषु, इन्द्रियनिग्रह इन्द्रलोके, सत्यं सदाशिवे, विद्या विष्णौ, धीः धिषणागुरौ, अक्रोधश्चामरगणेष्वातिष्ठत् ।

अत्रान्तरे दृप्तनृपव्याजदैत्यानीकशतायुतभूरिभारसमाक्रान्ता धरित्री गोरूपं धृत्वा ब्रह्मणोऽतिकमगात् । साऽथ नेत्रजलैः पुण्यांगणं सिंचन्ती विरंचिं प्रणिपत्य व्यजिज्ञपत्-ज्ञानदयासिन्धो ! सम्प्रति कालनेमिप्रभृतयो दैत्याः कंसादिरूपेण मृत्युलोकेऽवतीर्य निरन्तरं प्रजाः परिपीडयन्ति । बाणसुन्दारिष्टाद्या दैत्यास्तद्वंशजाः क्षत्रियाश्चापि पुनः पुनर्भरतखण्डमुद्वेजयन्ति । तद्भूरिभारपरिपीडिताहं रसातलं गन्तुमिच्छामि । लोकेऽस्मिन्भवानेव मम त्राताऽस्तीति निगद्य विरराम भूतधात्री ।

एतदुपाकर्ण्य महीवचनं ब्रह्मोवाच—पुत्रि ! मा भैषीः । वयमचिरादेव तव कष्टनिवारणं करिष्यामः । सोऽथ रुद्रेन्द्रवरुणादिदेवैस्सह सत्वरं क्षीरपयोनिधेस्तीरं गत्वा तत्र पुरुषसूक्तेन देवदेवं वृषाकपिं तुष्टाव । ततो भगवान् पद्मभुवमुवाद— वेदनिधे ! भवद्विज्ञापनाद् प्रागेव मया मेदिनीज्वरो विज्ञातः । पूर्वजन्मनि स्वायंभुवे मन्वंतरे प्रश्निसंज्ञिका पत्नी सुतपाश्च प्रजापतिरभूत् । उभावेव वशीकृत्येन्द्रियग्रामं परमं तपस्तेपतुः । ततो वरं ब्रूतमिति मयोक्ते मायामोहितौ तौ मोक्षेच्छां विहाय केवलं मादृशं सुतमेव ययाचाते । ततोऽहं

शीलौदार्यादिसर्वगुणसंपन्नमन्यमनालोक्य भक्तजनमनोरथपूरणाय नियतसमये स्वयमेवावतरिष्यामीति प्रत्युत्तरमदाम्। ताविमौ देवकी-वसुदेवौ स्तः। एवमेव यौ धराद्रोणावपि तपस्तप्त्वा मामेव सुतत्वेन प्रार्थयामासतुस्तयोरपि तपःफलकालोऽयं समुपस्थितः। अतोऽन्यस्मिन् जन्मनि धरा तु यशोदाऽभवत् द्रोणश्च नन्दराजः। कमलासन! तत्रादौ सहस्रवदनोऽनन्तो वसुदेवगृहेऽवतरतु। ततोऽहमपि समवतरिष्यामि। या मम मायाऽस्ति साऽपि कार्यार्थे संभविष्यति। धर्मरक्षका देवा अपि सपत्नीका भुवि समवतरन्तु। निशम्यैतद्भगवद्वाक्यं परितुष्टः पद्मयोनिः ओमित्युक्त्वा यथाश्रुतं संदेशं देवान् संश्रावयामास। तच्छ्रुत्वा सर्वेऽपि देवा बाढमित्युक्त्वा विरंचिवचनमनुमोदयामासुः। अथ देवाः सन्तोषमवाप्य यथाऽभिमतं स्थानं गताः। ततो भगवती वसुंधरापि यथाऽवस्थिता बभूव।

अथ देवक्या हर्षशोकविवर्धनः सप्तमो गर्भोऽभूत्। तस्मिन् अवसरे विश्वात्मा भगवान् कंसजं भयं विदित्वा योगमायां समाहूय बभाषे——देवि! संप्रति गच्छ गोगोपगणैरलङ्कृतं व्रजमण्डलं। तत्र नंदराजगृहे रोहिणीति प्रसिद्धा या वसुदेवभार्या वसति साम्प्रतं देवकीजठरे यत् शेषाख्यं नाम मामकं धाम तिष्ठति तत्सन्निकृष्य रोहिण्या उदरे संनिवेशय। अहमप्यंशेन देवकी-पुत्रतां यास्यामि। त्वं चापि यशोदायां संभविष्यसि। ततो

लोकाः सर्वकामफलप्रदां त्वां नानोपहारबलिभिः संपूजयिष्यन्ति । तत्र तव दुर्गा, भद्रकाली, वैष्णवी, शारदेति च नाना नामानि भविष्यन्ति । रोहिणीतनयोऽपि गर्भसंकर्षणाल्लोके सङ्कर्षण इति ख्यातो भविष्यति । एवं भगवता समादिष्टा देवी तथाऽस्त्विति व्याहृत्य भुवमवततार । अथ योगमायया देवकीगर्भे रोहिणीं प्रति प्रणीते सति माथुरा मिथः प्रोचुः—अहो कंसभयात् देवकीगर्भः पतितः । हा !!! किमग्रे भविष्यतीति चुक्रुशुः । ततो नियतसमये सर्वगुणागारो भगवान् शेषावतारः संकर्षणः प्रादुर्बभूव । तस्मिन्नवसरे दिवि देवा महोत्सवं चक्रुः । धरण्यां पुष्पाणि चाऽवर्षन् । रंभाद्या अप्सरसो ननृतुः मङ्गलानि च जगुः ।

इति श्रीकृष्णचरिते श्रीबलभद्रावतरणं नाम तृतीयः स्तवकः ॥ ३ ॥

अथ विश्वात्मा भगवान् भक्तजनानां कष्टनिवारणाय पूर्णानन्दरूपेण श्रीवसुदेवाय मनः समाविवेश । ततो देवकी श्रीमता वसुदेवेन मनसैव वैधदीक्षयाऽर्पितं जगन्मङ्गलं तं अदितिरादित्यमिव धारणया दधार । अथैकदा भयातुरः कंसः कारागारे देवकीवसुदेवयोः स्थितिमवलोकयितुं ययौ । सोऽथ प्रभया जितान्तरां भवनं विरोचयन्तीं च देवकीं समीक्ष्य हा ! हतोऽस्मीति जगाद । एष मम प्राणहरो गुहायामस्यां प्रविष्टोऽस्ति । सत्यवसरे निःसृत्य नूनं मम प्राणानपाहरिष्यति । किं करोमि ।

क्व गच्छामीति भूयो भूयश्चिन्तयन्नपि स्थिरतां नाऽधिगच्छामि। पूर्वन्त्वेषा स्त्री, ततो भगिनी, ततश्चान्तर्वत्नी, वधोऽस्या-स्तत्क्षणमेव श्रियमायुर्यशश्च हन्ति। उक्तं च—

स एष जीवन् खलु सम्परेतो, वर्तेत योऽत्यन्तनृशंसितेन।
देहे मृते तं मनुजाः शपन्ति, गन्ता तमोऽन्धं तनुमानिनो ध्रुवं॥

एवं पर्यालोच्य समर्थोऽपि स भगिनीवधं न चकार। ततः स राजभवनमेत्य हृषीकेशं चिन्तयन् रात्रौ निद्रां न लेभे। किं बहुना, सर्वमपि जगत्तन्मयं ददर्श।

अथैकदा देवराजप्रभृतयोऽमरगणा अलक्षितरूपेण बन्धनागारमेत्य वेदानुसारिणीभिः स्तुतिभिः भगवन्तं स्तोतुमारेभिरे—

यथा न ते माधव! तावकाः क्वचित्,
भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः।
त्वयाऽभिगुप्ता विचरन्ति निर्भयाः,
विनायकानीकपमूर्धसु प्रभो॥ १॥
सत्यव्रतं सत्यपरं त्रिसत्यं,
सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं,
सत्यात्मकं त्वां शरणं प्रपन्नाः॥ २॥

एकायनोऽसौ द्विफलस्त्रिमूलः,
चतूरसः पंचविधः षडात्मा ।
सप्तत्वगष्टविटपो नवाक्षो,
दशच्छदो द्विखगो ह्यादिवृक्षः ॥ ३ ॥

देव ! त्वमेक एवास्य संसारवृक्षस्य निमित्तोपादानरूपोभयविधं कारणमसि । त्वमेव स्रष्टा पालकः संहर्ता चासि । त्वन्मायामोहिता एव ब्रह्मादिदेवान् पृथग्गणयन्ति । वस्तुतस्त्वमेक एव तत्तद्रूपेण विराजमानोऽसि । नाथ ! त्वं सुजीवानां हिताय सत्वमयानि रूपाणि बिभर्षि । खलनिग्रहाय भयानकमूर्तिं धारयासि । ईश ! भवानेव कामक्रोधाद्यन्तरंगशत्रुभ्यः शरणागतान् रक्षित्वा संसारात्समुद्धरसि । हरे ! यथा प्रत्यक्षदर्शनेन धर्मे रुचिः संजायते तथा न परोक्षेण । उक्तं च—

वासुदेवे भगवति, भक्तियोगः पुनः पुनः ।
जनयत्याशु वैराग्यं, ज्ञानं यत्तदहेतुकम् ॥

किं बहुना, ये भवदीयभक्ताः सन्ति ते हि तव नामानि कीर्तयितुं शक्नुवन्ति रूपाणि च विलोकयितुं प्रभवन्ति, नाऽन्ये । अत्र श्रुतिः—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥

हरे ! दिष्ट्या तव जन्ममात्रेणैव दैत्यादिभाराक्रान्ताया अस्या भूमिदेव्या भारो दूरी भूतः । प्रभो ! तव वज्राङ्कुशादिभिः शुभलक्षणैः सहिताभ्यां कोमलचरणारविंदाभ्यामंकितां मेदिनीं स्वर्गतुल्यां वयं द्रक्ष्यामः । विभो ! तव भवस्य कारणं क्रीडासंकल्पं विना नान्यत् तर्कयामः । यदा जीवात्मनोऽपि जन्मस्थितिमरणादयः अविद्यया देहेंद्रियान्तःकरणादौ आत्माऽध्यासेन कृता भवन्ति । तस्या निवृत्तौ तस्यापि जन्मादयो न भवन्ति तदा सर्वथाऽभयस्य जीवाभयदातुश्च भवतो जन्मादयो विकाराः कथं भवितुमर्हन्ति । उक्तं तावद् 'लोकवत्तु लीला कैवल्यम्' इति ब्रह्मसूत्रं ।

मत्स्याश्वकच्छपवराहनृसिंहहंस, राजन्यविप्रविबुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च यथाऽधुनेश, भारं भुवो हर यदूत्तम वन्दनं ते ॥

एवं भगवन्तमभिष्टूय देवा देवकीमूचुः—मातः ! जगद्धिताय साक्षात्पुरुषोत्तम एव दिष्ट्यांशेन ते कुक्षिं गतः । संप्रति मुमूर्षोः कंसाद्भयं मा भवतु । तवात्मजोऽयं धर्मशीलानां यदूनां सर्वथैव रक्षकोऽस्तु । एवमभिधाय देवराजादयोऽमरगणा अलक्षिता एव दिवं ययुः ।

इति श्रीकृष्णचरिते देवस्तोत्रं नाम चतुर्थः स्तवकः ॥ ४ ॥

अथ गच्छता कालेन यदा सर्वगुणोपेतः परमशोभनः कालः समुपस्थितः, तदा दिशः प्रसेदुः, गगनं निर्मलोडुगणो-

दयमभूत्, पुरग्रामव्रजाकरा मही मङ्गलभूयिष्ठाऽभवत्, नद्यः प्रसन्नसलिला आसन्, सरोवरा जलरुहश्रियो बभूवुः, वनराजयः द्विजालिकुलसन्नादस्तवका अभूवन्, वायुः सुखस्पर्शः पुण्य-गन्धवहः शुचिश्च ववौ, द्विजातीनां श्रौतस्मार्तकर्माङ्गभूता अग्नयः शान्ता अपि सम्यग्घोमा बभूवुः, धर्मपरायणानां साधूनां मनांसि प्रसन्नान्यासन्, अवादिता अपि स्वर्गे दुंदुभयो नेदुः ।

ततो भाद्रपदकृष्णाष्टमीनिशीथे रोहिणीनक्षत्रान्विते च बुधवासरे श्रीदेवतारूपिण्यां देवक्यां सर्वभूतगुहाशयो भगवान् विष्णुः प्राच्यां शशाङ्क इव प्रादुर्बभूव । गन्धर्वकिन्नरचारणा भगवद्गुणान् जगुः, सिद्धाः सूक्तैर्भगवन्तं तुष्टुवुः, विद्याध-र्योऽप्सरश्च ननृतुः, मुदान्विता देवाः पुष्पाणि मुमुचुः, जलधराश्च अनुसागरं मन्दं जगर्जुः ।

अत्रान्तरे वसुदेवो मेघश्यामं, पीताम्बरं, पूर्णेन्दुसुन्दरमुखं, सकिरीटकुंडलं, नवनलिननिभेक्षणं, केसरतिलकं, कम्बुग्रीवं, कौस्तुभोद्भासिताङ्गं, शंखचक्रगदापद्मवनमालाविभूषितं, चतुर्भुजं, उद्दामकांच्यंगदकंकणादिभिः विरोचमानं चाद्भुतं, बालमुकुन्द-मदर्शत् । सोऽवदत्—सत्यमाह भगवती श्रुतिः—'तत्सृष्ट्वा तदेवानुप्राविशत् इति' । देव ! विलक्षणा तव महिमा । अत्र श्रुतिः—

पराञ्चि खानि व्यतृणत् स्वयम्भूः,
तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,
आवृत्तचक्षुरमृतत्वमिच्छन् ॥

देव ! यस्योपरि भवतः कृपा भवति स एव भवद्दर्शनानन्दसुखमनुभवति, नान्यः कश्चित् । सच्चिदानन्दस्वरूप ! त्वमेव त्रिलोकस्थितये सत्वगुणेन शुक्लवर्णं विष्णुरूपं, सर्गाय रजसोपबृंहितं रक्तवर्णं ब्रह्मरूपं, तथा संहाराय तमोगुणेन कृष्णं रुद्ररूपं च दधासि । परमात्मा स्वतंत्रो जीवश्च परतंत्रः । अत्र श्रुतिः—

अजामेकां लोहितशुक्लकृष्णां,
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते,
जहात्येनां भुक्तभोगामजोऽन्यः ॥

प्रभो ! त्वत्त एवास्य जगतो जन्मादीनि भवन्तीति वेदा वदन्ति यथा—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभि संविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति' इति स्तुत्वाऽऽनकदुन्दुभिर्विरराम ।

ततो भगवती देवक्यपि महापुरुषलक्षणं सुतमवलोक्य कंसाद्भीताऽपि स्तोतुमारभत—देव ! यस्य स्वरूपं वेदा वर्णयन्ति

स एव जगत्प्रकाशको विष्णुस्त्वमेवासि । यस्य कारणतया कार्येष्वन्वितस्य सर्वमपि विश्वं सदिति प्रतीयते । नाथ ! ब्रह्मण आयुषोऽवसाने लोके नष्टे सति शेषसंज्ञो भवानेक एव शिष्यते । आद्य ! सांसारिकोऽयं जनः मृत्युसर्पाद्भयमवाप्य सर्वलोकान् गच्छन्नपि न क्वाऽपि निर्भयं स्थानं समधिगच्छति । सोऽपि पुण्ययोगेन त्वत्पादपद्मसेवां लब्ध्वा परमानन्दपदं लभते । ईश ! सम्प्रति नृशंसस्वभावादुग्रसेनसुतात् कंसान्नः पाहि, यतो वयं त्वत्परायणाः स्मः । ध्यानयोग्यं तवेदं स्वरूपं मांसचक्षुषां प्रत्यक्षं मा कृथाः । पुरुषोत्तम ! क्रूरकर्मा कंसो मयि तवावतरणं मा विद्यात् । यतस्तेन मम बहवः सुता निहताः । अतोऽहं तस्मात्पुनः पुनरुद्विजे । विश्वात्मन् ! शंखचक्रगदापद्मयुतमेतच्चतुर्भुजस्वरूपं शीघ्रमेव संहर ।

निशम्यैतद्देवकीवचनं श्रीभगवानुवाच—देवि ! पूर्वसर्गे स्वायम्भुवे त्वन्तु पृश्निरासीः । अकल्मषोऽयं वसुदेवश्च सुतपाः प्रजापतिरभूत् । ब्रह्मणादिष्टौ युवां यदाऽतिकठिनन्तपः कृतवन्तौ तदाहं परितुष्टोऽनेनैव वपुषा प्रादुरासम् । ततो वरो व्रियतामिति मयोक्ते विस्मृत्य मोक्षवाञ्छां युवाभ्यां मादृशो सुतो याचितः । तदाहं तथास्त्विति वरं दत्वान्तर्हितोऽभवम् । ततो लोके मादृशमनालोक्य द्वितीयं स्वयमहमेव युवयोः सुतत्वमवाप्तवानस्मि । तदा मम नाम पृश्निगर्भ आसीत् । ततो यदाऽदितिकश्यपयोर्युव-

योरहं सुतोऽभूवम् तदा उपेन्द्रइति विख्यातो वामनत्वाच्च वामनो-ऽप्यभूवं। अथ तृतीयेऽस्मिन्भवे तेनैव वपुषा प्रादुर्भूतोऽस्मि। मातः! प्राग्जन्मस्मरणाय रूपमेतद्दर्शितवान्। अन्यथा मद्भव-ज्ञानं मर्त्यलिङ्गे नोपजायते। युवां इदानीन्तु पुत्रभावेन ततो ब्रह्मभावेन च पुनः पुनः स्मरंतौ ममलोकप्राप्तिरूपां गतिं यास्यथ, इति अभिधाय हरिः सद्यः प्राकृतः शिशुः बभूव। अत्रान्तरे योगमाया सहसा यशोदायां प्रादुरासीत्।

ततः शौरिः सूतिकागृहात् सुतं समादाय यदा नन्दमित्रगृहं गन्तुमियेष तदा मायाऽऽश्रिता द्वारपाला झटिति निदद्रुः, बृहत्कपाटा विवृता जाताः, पौरा अपि निद्रिता अभूवन्। अथोपांशुगर्जितः पर्जन्यो ववर्ष। ततो गोकुलं प्रति प्रस्थितं वसुदेवं फणैर्वारि निवारयन् शेषोऽनुससार। मार्गस्था नानाऽवर्त-शताकुला मत्स्यकच्छपादिजलजन्तुसमाकुलातिगभीरापि च सरिद्वरा यमुना जानुमात्रजला बभूव। एवमालोक्य हृष्टो वसुदेवो राघवो यथा समुद्रं ततार तथा रवितनयामवातरत्। ततः स नन्दव्रजमुपेत्य तत्र सुप्तान् गोपानुपलभ्य निद्रिताया यशोदायाः शयने सुतं निधाय तत्रस्थां सुतामुपादाय च सपदि गृहान्न्यवर्तत। सोऽथ समवाप्य सदनं देवकीशयने दारिकां प्रतिमुच्य पूर्ववदा-वृतो बभूव।

इति श्रीकृष्णचरिते कृष्णजन्मनिरूपणं नाम पंचमः स्तवकः॥५॥

अथ नवजातः शिशू रुरोद । तच्छब्दं श्रुत्वा रक्षापुरुषाः सहसोत्थाय सत्वरं भोजराजाय तद्देवकीगर्भवृत्तमावेदयामासुः । ततो विदितसमाचारः कंसः शयनादुत्थाय हा !!! कालोऽयं ममोपस्थित इति मत्वा सपदि सतीगृहम् आजगाम । तमालोक्य भयातुरा देवकी जगाद—भ्रातः ! त्वया मम बहवः शिशवो हताः । सम्प्रति पुत्रिकैका तु प्रदीयताम् । तेऽहमवरजा हतपुत्रा चास्मि । अतश्चरमामिमां सन्ततिं तु दातुमर्हसि । एवं प्रार्थितोऽपि स तद्वाक्यमनादृत्य तद्धस्तात् सपदि कन्यामाकृष्य चरणयोः गृहीत्वा च शिलोपरि प्रचिक्षेप । अत्रान्तरे सा देवी तद्धस्तात्समुत्पत्य सद्योऽम्बरं जगाम । साऽथ गगनं गत्वा अवदत्—मन्द ! हतयाऽपि मया तव न काऽप्यर्थसिद्धिः । तवान्तकृत्तु जातः खलु व्रजमण्डले । वृथा कृपणान् मा हिंसीः । इति प्रबोध्य देववंद्या सा देवी सपदि तिरोहिता बभूव ।

एवं निशम्य तद्वाक्यं परमविस्मितः कंसो देवकीवसुदेवौ विमुच्य सविनयं प्रोवाच—महाशयौ ! पापात्मना मया पुरुषाद इव युवयोर्बहवः पुत्रा हिंसिताः । त्यक्तकारुण्योऽहं गमिष्यामि कांल्लोकान् । अथवाऽलं पश्चात्तापेन । कोऽत्र ममापराधः यदा देवा अप्यनृतं वदन्ति तदा का कथा मनुष्याणां । सम्प्रति युवाम् सुतान् मा शोचतम् । पूर्वजन्मनि तैस्तादृशमेव कर्म कृतं येन बाला एव मद्धस्तान्मृत्युमवापुः । साम्प्रतं क्षमध्वं मम दौरात्म्यम् ।

यतः साधवो भवन्ति खलु क्षमाशीलाः । एवमभिधाय श्यालो देवकीन्वसुदेवयोः सम्मुखेऽपतन् ।

एवमाकर्ण्य कंसवचनं तौ प्रावदताम्—राजन्! नात्र कस्यापि दोषः । भविष्यमेव खलु बलवत्तरं यस्याग्रे कस्य किमपि कुत्रापि न चलति । ततः कृपाऽऽकुलः कंसो देवकीवसुदेवौ निगडान्मोचयित्वाऽन्यत्र क्वापि सुरक्षिते रम्यस्थाने संस्थापयामास ।

अत्रान्तरे तत्र श्रीमती यशोदा शिशुरुदनमाकर्ण्य पीडिताऽपि प्राबुध्यत । साऽथ श्यामसुन्दरं लोचनानन्ददायिनं च सुतं निरीक्ष्य सुधासमुद्रे निमग्नेव बभूव । ततः सुतजन्महर्षितो नन्दराजोऽपि श्रुतिस्मृतिपुराणज्ञान् विप्रान् समाहूय देवपितृपूजनपूर्वकं सुतस्य जातकर्माख्यं संस्कारं कारयामास । सोऽथ 'यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्तीति' श्रुतिवाक्यमनुस्मरन् निगमागमपारगेभ्यो विप्रेभ्यः सवत्सा धेनूः कौशेयवस्त्राणि रत्नजटितानि भूषणानि च प्रादात् । उक्तं च—

कालेन स्नानशौचाभ्यां, संस्कारैस्तपसेज्यया ।
शुद्ध्यन्ति दानैः सन्तुष्ट्या, द्रव्याण्यध्यात्मविद्यया ॥

अथ दानमानाभ्यां सन्तुष्टा द्विजाः स्वस्त्ययनं पेठुः । सूतमागधबन्दिजना विरुदावलिं जगुः । वादका भेरीपणवाद्यानि

वाद्यानि वादयामासुः । तस्मिन्नवसरे सुमृष्टसंसिक्तद्वाराजिरगृहान्तरं ध्वजपताकपल्लवतोरणैश्च विभूषितम् आसीत् समग्रं गोकुलं । गोवृषभवत्सतरा हरिद्रातैललिप्ता गैरिकबर्हपुष्पमालादिभिश्चालङ्कृता अभूवन् ।

अत्रान्तरे महार्घवस्त्राभरणभूषिता गोपा दधिदुग्धतक्रनवनीतसमेतानि नानोपायनानि नीत्वा नन्दाय समर्पयामासुः । एवमालोक्य नीतिनिपुणो नन्दः प्रियभाषणैस्तान् परितोष्य यथायोग्यं पारितोषिकमपि तेभ्यो ऽयतरत् । ततो नवकुङ्कुमकिंजल्कमुखपङ्कजभूतयो गोप्योऽपि मङ्गलगीतानि गायन्त्यस्तत्रागत्य नन्दनन्दनाय बलिं समर्पयाम्बभूवुः ।

ततस्तुष्टे महाभागे रोहिणीयशोदेऽपि गोपीगणान् समुचितसत्कारेण पर्यतोषयताम् । अथ शुक्लपक्षे शशीव नन्दनन्दनो ऽयवर्धत । किं बहुना नन्दलालवृद्ध्या सहैव व्रजमण्डलस्यापि पुत्रपौत्रादिसहिता धनधान्यसमृद्धिः लोकोत्तराऽभवत् ।

इति श्रीकृष्णचरिते नन्दगृहोत्सवो नाम षष्ठः स्तवकः ॥ ६ ॥

अथ प्रभाते कंसो मंत्रिमण्डलमाहूय योगमायया यदुक्तं तत्सर्वं तेभ्यः समाचष्ट । तच्छ्रुत्वा ते देवशात्रवः प्रोचुः—राजन् ! यद्येवं तर्हि वयं त्वद्यैव निर्दशानानिर्दशांश्च शिशून् हनिष्यामः । किमस्माकं करिष्यन्ति समरभीरवो वराका देवगणाः ।

विष्णुस्तु लक्ष्म्या सह वैकुण्ठे विहरति । वनवासी दिगम्बरः शिवः किं कर्तुं शक्नोति । वेदाभ्यासजडो ब्रह्मा तु वदति 'पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरैः' । आखण्डलोऽल्पवीर्यो बहुषु स्थलेषु पलायित एव । अवशिष्टा वरुणादयो देवाः कस्योद्यानस्य मूलिकाः सन्ति । राजन् ! सत्वरमेव तन्मूलखननेऽनुव्रतानस्मान् समादिशेति निगद्य राजादेशं प्रतीक्षमाणास्तस्थुः ।

एवमाकर्ण्योत्साहवाक्यानि कश्चिद्वृद्धोऽवदत्—सहृदयाः ! भवादृशान्येव मित्राणि भवन्ति कार्यसिद्धये ।

यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ।
यथेन्द्रियग्राममुपेक्षितस्तथा रिपुर्महान् बद्धबलो न चाल्यते ॥

मूलं हि विष्णुर्देवानां स एव श्रुतिप्रतिपादितस्य पुरातनधर्मस्य रक्षकोऽस्ति । उक्तं च—

विप्रा गावश्च वेदाश्च, तपः सत्यं दमः क्षमा ।
श्रद्धा दया तितिक्षा च, क्रतवश्च हरेस्तनूः ॥

किं बहुना मुनिजनविहिंसनमेव तद्वधोपायः । एतदुपाकर्ण्य कंसो धर्मबाधामेव स्वहितममन्यत । सोऽथ कामरूपधरान् राक्षसान् लोककदने नियोज्य विश्रामार्थमन्तःपुरं प्रविवेश ।

इति श्रीकृष्णचरिते कंसपरामर्शनिरूपणं नाम
सप्तमः स्तवकः ॥ ७ ॥

अथैकदा वसुदेवप्रेरितो यादवपुरोहितो महर्षिः गर्गाचार्यो गोकुलं आजगाम। हृष्टो नन्दः सहसोत्थाय विष्णुबुद्ध्या तं प्रणतिपुरस्सरं संपूजयामास। ततः कृताञ्जलिः सोऽवदत्—ऋषिराज ! अभिवादयेऽहं—

अद्य मे सफलं जन्म, अद्य मे सफलं तपः।
अद्य मे सफलं ज्ञानं, त्वत्पादाम्भोजदर्शनात् ॥'

प्रभो ! भाग्यं विना महात्मनां दर्शनं न लभ्यते। निःस्पृहस्य भवत आगमनकारणं प्रष्टुमिच्छामि। तच्छ्रुत्वा मुनिरुवाच—गोपराज ! लोकहितैषित्वमेव ब्राह्मणत्वं। त्वामभिन्नहृदयं ज्ञात्वा शौरिः पालनाय निक्षिप्तवान् तव सन्निधौ स्वपुत्रौ। पापमतिः कंसो वृत्तमिमं नाऽवगच्छेदतो गुप्तरीत्या तयोर्नामकरणसंस्कारार्थं प्रेषितोऽस्मि वसुदेवेन। एवमाकर्ण्य मुनिवचनं 'श्रेयांसि बहुविघ्नानीति' लोकोक्तिं मन्यमानो नंदराजः पुत्रौ समानीय सपदि मुनये समर्पयामास। ततः शास्त्रविन्मुनिर्होमान्ते प्रोवाच—प्रियवर ! ज्येष्ठोऽयं रोहिणीपुत्रः स्वगुणैः सुहृदो रमयन् राम इति बलाधिक्यात् बलदेव इति गर्भसंकर्षणाच्च संकर्षण इति विदितो भविष्यति। अथानुयुगमवतारं धृतवतोऽस्यानुजस्य शुक्लरक्तपीताश्चेति त्रयोऽवतारास्त्वासन्। किन्त्विदानीं द्वापरान्ते कृष्णतामुपगतोऽयं कृष्ण इति संज्ञको भविष्यति। रामानुजननाद्रामानुजः। वसुदेवापत्यत्वात् वासुदेव

इत्यपि प्रसिद्धो भविष्यति । सुतस्यास्य बहूनि रूपाणि नामानि च सन्ति । अहं तु तानि जानामि, किन्तु साधारणो जनो ज्ञातुं न शक्नोति । नन्दराज !

शतकूपाधिका वापी, शतवापीसमं सरः ।
सरःशताधिको यज्ञः, पुत्रो यज्ञशताधिकः ॥ १ ॥
तद्गेहं वनमेव यत्र शिशवः खेलन्ति न प्राङ्गणे ।
तेषां जन्म वृथैव लोचनपथं याता न येषां सुताः ।
तेषामंगविलेपनं व्रजपते पङ्कोपदेहैः समं ।
येषां धूलिविधूसरात्मजरजश्चर्चा न वक्षःस्थले ॥ २ ॥

किं बहूक्त्या ! एष गोकुलचन्द्रमा वः श्रेयः सर्वथा विधास्यतीत्यभिधाय गृहीतदक्षिणो नन्दानुमोदितश्च विप्रवर्यो मथुरां जगाम ।

इति श्रीकृष्णचरिते नामकरणसंस्कारनिरूपणं
नाम अष्टमः स्तवकः ॥ ८ ॥

अथैकदा नन्दगोपो गोपालान् गोकुलरक्षायां नियोज्य स्वयं कंसाय वार्षिकं करं दातुं मथुरां ययौ। ततो वसुदेवो मित्रागमनसमाचारं श्रुत्वाऽतिहृष्टो नन्दालयमाजगाम । अथोभौ मिथो मिलित्वाऽतिसन्तुष्टौ बभूवतुः । ततः सुखोपविष्टो वसुदेवोऽपृच्छत्—सखे ! अप्यनामयं सभार्यस्य ससुतस्य च भवतः ?

भूयेम्बुतृणवीरुधं पशव्यं नीरुजं च व्रजं कच्चित् ? भवद्भ्यामुपलालितौ मम सुतौ कुशलिनौ कच्चित् ? पुंसस्त्रिवर्गो मित्राधीनः क्लिश्यमाने तस्मिन् त्रिवर्गोऽपि सीदति । एवमाकर्ण्य शौरिवचनं नन्दराजोऽब्रवीत्—सखे ! नास्त्यत्र सन्देहः । परंतु धृतिं धारय । स्वप्नोपमोऽयं संसारः उक्तं च—

सर्वे क्षयान्ता निचयाः, पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता, मरणान्तं हि जीवितम् ॥

तच्छ्रुत्वा निपुणमतिर्वसुदेवोऽब्रवीत्—भ्रातः ! सत्यमभिहितं भवता । राज्ञे वार्षिककरोऽद्य भवता दत्तः, वयं च दृष्टाः । सम्प्रत्यत्र स्थितिरधिका न समीचीना । यतस्तत्र गोकुले महोत्पाताः सम्भवन्तीति प्रतीतिर्जायते । निशम्यैवं शौरिवचनं नन्दादयः सर्वेऽपि गोपाः शङ्काग्रस्ता बभूवुः । ततस्ते शकटान् अनडुद्युक्तान समारुह्य सहसा गोकुलं ययुः ॥

इति श्रीकृष्णचरिते नन्दवसुदेवसम्मेलनं
नाम नवमः स्तवकः ॥ ९ ॥

आसीन्मथुरायां दिनेषु तेषु लघीयसी भगिनीव यमस्य, जननीव महाकालस्य, दूतिकेव कृतान्तस्य, सहचरीव कालाग्निरुद्रस्य, पाचिकेव मातृमण्डलस्य, धात्रीव यातुधानलोकस्य, श्राद्धभूमिरिव पितृपक्षस्य, क्षयरात्रिरिव समस्तजन्तूनां,

पूतनानाम राक्षसी। साऽथ कामरूपिणी कंसप्रेरणया गोकुलमेत्य वल्गुस्मितापांगविसर्गवीक्षितैः व्रजौकसां मनांसिहरन्ती नन्दगृहमन्विष्य प्रविवेश। ततः कपटकलेवरा सा युवतिः भस्माच्छादितमग्निमिव तल्पे शयानं शिशुं अवलोक्य सपदि तमुत्थाप्य च स्वांकमारोपयामास। यद्यपि यशोदाद्या गोप्यस्तदा तत्रैवासन् तथापि स्त्रीस्वभावात् अपरिचितामपि तां छद्मसुंदरीं न निवारयामासुः। अथ लब्धावकाशा सा शिशुमुखे विषसंपृक्तं स्तनमदात्। एवमालोक्य रोपसमन्वितो बालमुकुन्दः कराभ्यां तस्याः स्तनं प्रपीड्य कुपथ्यमपि तत् स्तन्यं प्राणैः सह पातुमारभत। ततो मर्मसु निष्पीड्यमाना सा मुंच मुंचेति क्रोशन्ती नेत्रे विवृत्य चरणौ भुजौ च पुनः पुनश्चालयंती सहसा पपात। तस्मिन्नवसरे तस्या गंभीरस्वनं श्रुत्वा तत्रत्या जना वज्रपातशंकां चक्रुः।

अत्रान्तरे जातसंभ्रमे मातरौ तूर्णमेत्य तं बालकृष्णं नीत्वा च गोपुच्छभ्रमणादिभिरस्य रक्षां व्यधाताम्। ततो मथुरातो निवर्तमाना नन्दादयो गोपाः पूतनावृत्तान्तं श्रुत्वा वसुदेवकथनं सत्यममन्यन्त। ततो भास्करं प्रणम्य शिशुं दोलायां शाययामास जननी। श्रीकृष्णोपधात्री सा क्रूराऽपि सद्गतिमवाप। विषयेऽस्मिन् शुकोक्तिरियं—

अहो स्वकीयं स्तनकालकूटं, जिघांसयापाययदप्यसाध्वी।
प्रापद्गतिं धात्र्युचितां ततोऽन्यं, कं वा दयालुं शरणं व्रजेम॥

अथ तत्र समायाता गोपा नन्दभाग्यं मुहुर्मुहुः प्रशंसन्तो गृहान् ययुः ।

इति श्रीकृष्णचरिते पूतनागतिनिरूपणं नाम दशमः स्तवकः ॥ १० ॥

अथैकदा यशोदा उत्संगमारूढं सुतं भुजाभ्यामुत्तोल्य चुंबनाऽऽलिङ्गनादिभिः लालयन्ती शिशुगरिमाणमनुभूय चकिता बभूव । साऽथ बालकं भूमौ निधाय भगवन्तं दध्यौ—पुराण-पुरुष ! त्वया दत्तोऽयं पुत्रस्त्वयैव रक्षणीय इत्यभिधाय गृह-कर्मसु संलग्नाऽभवत् । अत्रान्तरे कंसानुचरस्तृणावर्तो गोकुलमेत्य चक्रवातस्वरूपेण सर्वमावृणोत् । सोऽथ रेणुभिराच्छादितेषु चक्षुःषु प्रांगणस्थमर्भकं सहसा नीत्वोत्पपात । अथ सुतवत्सला नन्दपत्नी विहाय गृहकृत्यं यावदागत्य पश्यति तावत्तत्स्थानं शून्यम् अद्राक्षीत् । साऽथ मृतवत्सा गौरिव विषण्णा विलप्तु-मारभत । अत्रान्तरे बालकृष्णो दैत्यगलं निष्पीड्य ललम्बे । ततो गलग्रहणाभिश्लिष्टो दनुजः सहसा धरातले निपपात । तच्छब्दं श्रुत्वा जनता भीता बभूव । अथ कृष्णानुसंधानपरा लोका दैत्योरसि क्रीडन्तं कृष्णं विलोक्य विस्मिता बभूवुः । ततस्ते गोपा मृत्युमुखात्प्रमुक्तं नन्दनन्दनं नीत्वा यशोदायै समर्पयामासुः । साऽपि सकुशलिनं सुतमवाप्य पूर्वजपुण्यमेव बहुमन्यत । उक्तं च—

वने रणे शत्रुदवाग्निमध्ये, महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥

इति श्रीकृष्णचरिते तृणावर्तवधानिरूपणं नाम
एकादशः स्तवकः ॥ ११ ॥

अथ कदाचिदौत्थानिककौतुकाप्लवे जन्मनक्षत्रे समागते सति यशोदा योषिन्मध्ये स्थित्वा मंत्रपाठकैर्ब्राह्मणैः सह शिशोः अभिषेचनं चकार । साऽथ मिष्टान्नपानदक्षिणादिभिः सत्कृतविप्रैः कृतस्वस्त्ययनं वस्त्रालङ्कारतिलकादिभिर्विभूषितं संजातनिद्रासमं कृष्णं शकटाधस्तात् प्रेंखे शाययामास । ततो व्यतीयायां घटिकायां प्रबुद्धः शिशुः स्तन्यपानेच्छया रोदितुमारभत । ततः सा स्तन्यमपाययत् । अथैकदा नन्दपत्नी स्नपयित्वा शिशुं वस्त्रालङ्कारचन्दनादिभिश्च तं मण्डयामास । चपलोऽच्युतः सहसैव रेणुस्नात इव बभूव । तमालोक्य सुतवत्सला यशोदा अब्रवीत्—वत्स !

इदानीमंगमक्षालि, रचितं चारु चन्दनम् ।
इदानीमेव ते कृष्ण !, धूलिधूसरितं वपुः ॥

तच्छ्रुत्वा नन्द उवाच—प्रिये ! अलमुपालम्भेन, शिशुरयं कृष्णो न वेत्ति तवोपालंभरहस्यं । किं त्वं न जानासि

यदयं महता पुण्यपण्येन क्रीतोऽस्ति । समयमवाप्याऽयं स्वयमेव सर्वमवगमिष्यति । उक्तं च—

लोलालकानि बहलाञ्जनलोचनानि ।
केलिश्रमश्वासितदुर्ललिताधराणि ।
आलिङ्गनोद्गतवपुः पुलकाः सुतानां ।
चुम्बन्ति ये वदनकानि त एव धन्याः ॥

अथैकदा यशोदा स्वोत्संगे समासीनं सुतं भुजाभ्यामुत्तोल्य मुखचुम्बनादिभिरुल्लासयंती गिरिकूटवच्छिशुभारं सोढुमसमर्थाभवत् । ततो विस्मिता सा तं भूमौ निधाय गृहकर्मसु संलग्ना बभूव । अथ स्तन्यपानेच्छया शिशू रुरोद । अत्रान्तरे गृहागतानतिथीन पूजयन्ती यशोदा यदा बालकरोदनं न शुश्राव तदातिखिन्नः अच्युतः पादप्रहारेण समीपस्थं शकटमताडयत् । येन कुप्यभाण्डैः परिपूरितः शकटः सहसा विपर्यस्तोऽभवत् । तच्छब्दं श्रुत्वा भीताः प्रातिवेश्मिकाः सपदि तत्रागत्य किमेतदिति ब्रुवाणाः समन्तात्तं बालं परिवव्रुः । ततस्ते विलोक्य घटनां मिथः प्रोचुः—नूनमियं चेष्टास्य बालकस्यैव नान्यस्य । तच्छ्रुत्वा अपरे गोपा विपरीततर्केण तस्मिन्नर्भकेऽपरिमितबलं न श्रद्धिरे । अत्रान्तरे समुपेता यशोदा ग्रहपीडाशंकिता सती विह्वलतामवाप । साऽथ रुदन्तं बालकं समादाय विप्रैर्वैदिकमंत्रैः कृतस्वस्त्ययनं पीतस्तन्यं चार्भकं पयःफेननिभे तल्पे शाययामास । उक्तं च—

येऽसूयाऽनृतदम्भेर्ष्याहिंसामानविवर्जिताः ।
न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥

इति श्रीकृष्णचरिते शकटभङ्गनिरूपणं नाम
द्वादशः स्तवकः ॥ १२ ॥

अथ गच्छता कालेन रामकृष्णौ सह पाणिभ्यां रिंगमाणौ चत्वरे विजह्रतुः । तस्मिन्नवसरे तौ गोमयगोमूत्रगोरसादिपतनेन जातकर्दमयुक्तस्थानेषु द्रुतं तिर्यग्गच्छन्तौ इतस्ततो व्रजन्तं पुरुषं वा स्त्रियं विलोक्य त्रीणि चत्वारि वा पदान्यनुकृत्य पश्चात्परावृत्य दृष्टे सति तं परकीयं ज्ञात्वा प्राकृतबालकवद् भीतिमवाप्य रोहिणीयशोदयोः समीपं समागच्छताम् । एतदालोक्य स्नेहाकुले मातरौ स्तनं दत्वा मुग्धस्मितदशनाननं च दृष्ट्वा स्वजन्मनः साफल्यमवाऽऽगच्छतां । विषयेऽस्मिन् कस्यचिद्भक्तस्योक्तिरियम्—

दोर्भ्यां दोर्भ्यां लुठन्तं व्रजसदनजनाह्वानतः प्रोल्लसन्तम् ।
मन्दं मन्दं हसन्तं मृदुमधुरवचो मेति मेति ब्रुवन्तम् ।
गोपालीपाणितालीतरलितवलयध्यानमुग्धान्तरालम् ।
वन्दे तं देवमिन्दीवरदलविमलश्यामलं नन्दबालम् ॥

अथैकदा रामाद्या गोपदारका व्रजाङ्गणे चिक्रीडुः । तत्राऽकस्मात् कृष्णो मृत्तिकां चखाद । एतदालोक्य कश्चिद्द्रुतं धावित्वा

तद्वृत्तं मात्रे न्यवेदयत् । तच्छ्रुत्वा चकिता जननी कृष्णं करे गृहीत्वाऽपृच्छत्—वत्स ! त्वमेकान्ते कथं मृदं भक्षयसि ? किमस्माकं गृहे सितादिमृष्टं भोज्यं नास्ति ? पश्य पश्य तवैव सहचरा बालकाः समक्षे ते कुबुद्धिं व्याहरन्ति । एतदुपाकर्ण्य मातृवचनं प्रत्युत्पन्नमतिः पीताम्बरोऽवदत्—

नाहं भक्षितवानम्ब ! सर्वे मिथ्याभिशंसिनः ।
यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥

इत्यभिधाय यावन्मुखं व्यादाय दर्शयति तावन्नन्दपत्नी तस्यानने सगिरिकाननं भूगोलं सूर्येन्दुग्रहनक्षत्रसमेतं खगोलं च ददर्श । ततो भयातुरा यशोदा नेत्रे निमील्याऽचिन्तयत्—अहो यन्मया दृष्टं तत्किं स्वप्नः, उत देवमाया, अहोस्विद्दर्पणे मुखदर्शनवन्मदीय एव बुद्धिविपर्ययः ! किं वा ममैवाऽर्भकस्य कोऽपि स्वाभाविक आत्मयोगः ! नाहं रहस्यं ज्ञातुं प्रभवामीति कथयित्वा चिन्ताऽऽर्णवे निमग्ना बभूव ।

अथ मातरं विस्मयाविष्टां विलोक्य कृपाकुलो हरिः सहसा यशोदातः स्वमायां अपाहरत् । ततो नष्टस्मृतिर्यशोदा पूर्ववत्सुतमंकमारोप्य स्नेहाधीना बभूव । उक्तं च—

त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च शाश्वतैः ।
उपगीयमानमाहात्म्यं हरिं साऽमन्यताऽऽत्मजम् ॥

इति श्रीकृष्णचरिते मृद्भक्षणं नाम त्रयोदशः स्तवकः ॥१३॥

अथैकदा गोप्यो बालपरीक्षार्थं कृष्णं समादिशन्—वत्स ! पीठकमानय। तच्छ्रुत्वा बालकृष्णस्तदानेतुमसमर्थ इव केवलं हस्ताभ्यान्तु गृह्णाति किन्तु नोत्थापयति। तदालोक्य काचिद-वदत्—लाल ! गुरुत्वात् एतदानेतुमशक्तश्चेत् तदा ततो लघून्मानं तण्डुलादिमानपात्रं त्वानय। तच्छ्रुत्वा हरिः केवलं तत् स्पृशति न च बिभर्ति। तत एकाऽब्रवीत्, अस्तु तावत् शिशो ! लघुपादुकमानयने तु नहि गौरवम्। यदा हरिः केवलं दूरादेव पश्यति न त्वानयति तदा गोप्यः प्रसन्नतामवाप्य स्वगृहाणि ययुः। अथ यशोधरा स्तन्यदानाय कृष्णमाहूय प्रोवाच—लाल !

कालिन्दीपुलिनोदरेषु मुसली यावद्गतः क्रीडितुं।
तावत्कर्बुरिकापयः पिब हरे ! वर्धिष्यते ते शिखा।
इत्थं बालतया प्रतारणपराः श्रुत्वा यशोदागिरो।
धन्यः स स्वाशिखां स्पृशन्प्रमुदितः क्षीरेऽर्धपीते हरिः ॥

अथैकदा यशोदा पुराणादिषु यानि विशुद्धयशांसि वर्णितानि तानि संस्मृत्य गायन्ती भक्तिलतां सिषेच। ततो नन्दपत्नी गृहदासीषु कर्मान्तरनियुक्तासु स्वयं दधि ममन्थ। तदा तस्याः काऽप्यपूर्वा शोभा बभूव। उक्तं च—

क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं।
पुत्रस्नेहस्नुतकुचयुगं जातकम्पं च सुभ्रूः।

रज्ज्वाऽकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च ।
खिन्नं वक्त्रं कबरविगलन्मालती निर्बबन्ध ॥

अत्रान्तरे स्तन्यकामो हरिः चालयन्सर्वाङ्गं विचालयन हस्तपादं मुखाच्च मधुराऽरावं कुर्वन् मन्थतीं जननीं समुपेत्य मन्थनदण्डं गृहीत्वा तां न्यवारयत । अथ नन्दपत्नी तस्य सस्मितमुखमवलोक्य प्रसन्नचित्ता समुपविश्य लालनार्थं तमंकमारोप्य च स्तन्यमपाययत् । अस्मिन्नेवावसरे चुल्लीमारोपिते पयस्युत्सिच्यमाने यशोदाऽतृप्तमेव कृष्णं त्यक्त्वा जवेन तदुत्तारणार्थं जगाम । एतदालोक्य कोपस्फुरिताधरपल्लवः कृष्णः पाषाणखंडेन तक्रभाण्डं दधिभाजनं च भित्वा मृषाश्रुः सन् शिक्ये स्थापितं नवनीतं नीत्वा स्वयं वानराय प्रादात् । अथ गोपी सुशृतं पयः समुत्तार्य यावदागच्छति तावद्भग्नभाण्डखण्डानि विलोकयति, परं नोपद्रवकारिणं कृष्णम् । ततो गृहीतयष्टिः साऽनुसन्धानार्थं तमनुससार । अथ सावधानो नन्दकुमारो जननीमागच्छन्तीं विलोक्य सहसोलूखलादवरुह्य च भीतवत्पलायितवान् । एवमालोक्य योगिनां मनोऽपि यं जवेन गृहीतुं न शक्नोति तं नेतुं गोपी समन्वधावत् । ततो विस्रंसितकेशबन्धनच्युता सा यथाकथंचित् समवाप्य प्रोवाच—रे चोर ! त्वां तथा यष्ट्या ताडयामि यथा पुनरेवमुपद्रवं न कदापि करिष्यसि । तच्छ्रुत्वा भयनिमीलितेक्षणोऽभवत्कृष्णः । ततोऽर्भकवत्सला यशोदा सुतं भीतं

परिज्ञाय यष्टिं परित्यज्य च दाम्ना बद्धुमियेष । साऽथ गोपिका तमधोक्षजं प्राकृतवन्मानुषशरीरं सुतं मत्वा दाम्नोलूखले बबन्ध । तस्मिन्नवसरे कृतागसो दामबद्धस्य तस्य तद्दाम द्व्यंगुलोनमभूत् । तदालोक्य गोपी पुनरन्येन सन्दधे । तदपि द्व्यंगुलन्यूनमभवत् । ततः स्वगेहदामानि सन्दधत्यपि यशोदा यदा तं बद्धुं नाशकत्तदा विस्मयमवाप्य निश्चलाऽतिष्ठत् । ततः स्विन्नगात्रायाः मातुः परिश्रमातिशयं दृष्ट्वा स स्वयमेव बन्धनमवाप । भगवतो भक्तवश्यताविषये कथितम्—

नेमं विरिंचि र्न भवो न श्रीरप्यंगसंश्रया ।
प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥

संसारेऽस्मिन् भगवान् देहिनाम्मध्ये यथा भक्तिमता सुखापस्तथा न ज्ञानिनाम् । ततो बद्धोऽपि कृष्णचन्द्रो गृहकृत्येषु व्यग्रायां मातरि त्वरं यमलार्जुनौ ददर्श । यौ नारदशापेन वृक्षतामगमताम् । अत्रैषाऽऽख्यायिका—

अस्ति धनधान्यपतिः लोकपालः कुबेरः । स रुद्रांशत्वात् रुद्रानुचरोऽपि जगति प्रथितः । तस्य नलकूबरमणिग्रीवाख्यौ पुत्रौ बभूवतुः । तौ कदाचिद्वारुणीं पीत्वाऽतिरम्ये कैलासोपवनेऽनुगायद्भिः स्त्रीजनैः सह स्वच्छन्दं विचेरतुः । ततस्ताविंभोजवनशालिनि गंगाजले नग्नावेव प्रविश्य करेणुभिः सह गजाविव विवस्त्राभिर्युवतिभिः समं चिक्रीडतुः । अत्रान्तरे देवर्षिर्नारदस्त-

त्राऽऽजगाम । तमालोक्य शापशंकिता देव्यस्तु सहसा वासांसि पर्यधुः । किन्तु श्रीमदान्धौ यक्षराजसुतौ तथैव विवस्त्रौ एव आस्ताम् । एतदालोक्य कुपितो देवर्षिरुवाच—

नह्यन्यो जुषतो जोष्यान् बुद्धिभ्रंशो रजोगुणः ।
श्रीमदादाभिजात्याभिर्यत्र स्त्रीद्यूतमासवः ॥ १ ॥
हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ।
मन्यमानैरियं देहमजरामृत्युनश्वरम् ॥ २ ॥

प्रथमं भूदेवनरदेवादिसंज्ञितमपि शरीरमन्ते आदिभिर्भक्षितं विट्संज्ञितं भवति । पुत्रादिभिर्दग्धं भस्मसंज्ञामवाप्नोति । परित्यक्तमन्यथा कृमिसंज्ञां लभते । देहोऽयं सर्वथा स्वाधीनो नास्ति । अस्मिन् मातृपितृभूपक्रेतृप्रभृतीनामप्यस्ति स्वाम्यम् । एवं सर्वसामान्यं देहं को विद्वानात्मसात् कृत्वा जन्तून् वृथा पीडयति । अहो कुबेरपुत्रावपि युवां गंगास्नाननियमान न बोधथः । उक्तं च—

शौचमाचमनं चैव निर्माल्यं मलकर्षणं ।
तैलसंमर्दनं क्रीडां प्रतिग्रहमथो रतिं ॥ १ ॥
अन्यतीर्थाभिलाषश्च अन्यतीर्थप्रशंसनं ।
वस्त्रत्यागं तथाऽऽस्वातं संहारं चैव वर्जयेत् ॥ २ ॥

युवां लोकपालसुतौ भूत्वाऽप्यधर्मरतौ । अतोऽहं युवयोर्मदिरोन्मत्ततां परिहरामि । युवां वृक्षाविव निर्लज्जाऽवतिष्ठताम् ।

तस्माद् वृक्षयोनिमेवाप्नुतामित्यशपत। एतदाकर्ण्य भयातुरौ तौ जगदतुः—प्रभो! क्षमस्वापराधम्। यज्जातं तज्जातं सम्प्रति कृपां कृत्वा शापनिवृत्तिमपि समाचक्ष्व। एतच्छ्रुत्वा मुनिवरोऽवदत्—वत्सौ! 'ऋते ज्ञानान्न मुक्तिः' इति भगवती श्रुतिः प्रतिपादयति। तज्ज्ञानं तु भक्त्या लभ्यते। उक्तं च शांडिल्येन—'सा परानुरक्तिरीश्वरे'। दिव्यशरच्छते वृत्ते श्रीकृष्णसान्निध्यं लब्ध्वा पुनर्देवलोकं समवाप्स्यथः। इत्याभिधाय देवर्षिर्नारायणाश्रममगात। ततो नलकूवरमणिग्रीवावपि सहसा यमलार्जुनावभूताम्।

अथ दामोदरो महर्षिवचनं सत्यं कर्तुं उलूखलसमेतस्तयोरन्तरेण न्यसरत्। ततः श्रीकृष्णस्य निर्वेशमात्रेण तदुलूखलं तिर्यग्जातम। अथ वेगाकृष्टौ तौ वृक्षौ सपदि निर्मूलौ भूत्वा व्यपतताम्। ततः प्राप्तदिव्यरूपौ तौ यक्षराजसुतौ भगवन्तं स्तोतुमारभताम्—

कृष्ण! कृष्ण! महायोगिन् त्वमाद्यः पुरुषः परः।
व्यक्ताऽव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः॥

प्रभो! नारदकिंकरौ नावनुजानीहि। तव दर्शनं मुनिवरकृपयैव जातम्। किं बहुना—

वाणी गुणानुकथने श्रवणौ कथायाम्।
हस्तौ च कर्मसु मनस्तव पादयोर्नः।

स्मृत्यां प्रभो! तव मतिः प्रणतौ शिरो मे ।
दृष्टिः सतां भवतु ते तनुदर्शने च ॥

एतदुपाकर्ण्य दामोदरो विहस्य प्राह—श्रीमदान्धयोर्युवयोः दयालुना मुनिना यद् वाग्विभ्रंशः कृतः स शुभोदर्कायैव जातः । उक्तं च—

साधूनां समचित्तानां सुतरां मत्कृतात्मनां ।
दर्शनान्तो भवेद् बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ॥

सम्प्रति स्वसदनं गच्छतम् । युवयोर्मयि यः प्रेमातिशयः सोऽथ परिपूर्णः । एवं भगवतोक्तौ तौ श्रीमद्देवकीनन्दनं पुनः पुनः प्रणम्य परिक्रम्य तमामंत्र्य च वैश्रवणीं दिशं जग्मतुः ।

अत्रान्तरे नन्दादयो गोपा द्रुमयोः पतनशब्दं श्रुत्वा निर्घातभयशंकामवाप्य सहसा तत्र समाजग्मुः । ततस्ते भूम्यां पतितौ यमलार्जुनौ दृष्ट्वा पतनकारणमन्वेष्टुं इतस्ततश्चेरुः । अत्रान्तरे गोपबालकाः समेत्य प्रोचुः—तातचरणाः! तिरश्चीनपतितमुलूखलं विकर्षता वृक्षयोर्मध्यगतेन चानेन कृष्णेन महीरुहौ पातिताविति वयमाचक्ष्महि । न केवलमेतावत् किन्तु वृक्षाभ्यां विनिर्गतौ दिव्यपुरुषावपि विलोकितावस्माभिः । विषयेऽस्मिन् कस्याचिद्धरिभक्तस्योक्तिरियम्—

परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः ।
विचिनुत भवनेषु बल्लवीनामुपनिषदर्थमुलूखले निबद्धम् ॥

ततो नन्दराजो दामबद्धं सुतमवलोक्य कृपाकुलो यशोदामुवाच——अयि भ्रान्तचित्ते ! किं रत्नं पाषाणेन खंड्यते । द्रुतं मोचय बालमुकुन्दं व्रजचन्द्रम् । निशम्यैवं भर्तृवाक्यं यशोदा सपद्येव दामोदरं मुमोच ।

इति श्रीकृष्णचरिते यमलार्जुनमुक्तिनिरूपणं नाम चतुर्दशः स्तवकः ॥ १४ ॥

अथ गच्छता कालेन रामकृष्णौ जानुचलनयोग्यौ बभूवतुः । ततस्तौ व्रजस्त्रीणां मुदं जनयन्तौ चिक्रीडतुः । अथैकदा गोप्यः कृष्णस्य बालचापलमालोक्य यशोदामुपसृत्य प्रोचुः——सखि ! तवायं पुत्रः स्ववत्सान् मुंचन्नस्माकं वत्सानप्यसमये गुप्तरीत्या मोचयति । तेन सर्वं दुग्धं वत्सा एव पिबन्ति । ततोऽयं वत्सान् परिवर्तयितुं गृहान्निःसृत्य धावत्सु जनेषु शून्यान् गृहान् प्रविश्यास्माकं दधिपयोऽत्ति । अथागत्य ताड्यतान्नह्यतामिति क्रोशे कृते सति न बिभेति प्रत्युत हसति । ततोऽयं कल्पितैः स्तेययोगैः उपार्जितं पेयं स्वादुमत्वाऽत्ति । किं बहूक्त्या भुज्यमानः प्रथमतो मर्कटान् विभज्य प्रयच्छति । यदि कश्चिद् वानरो न भक्षयति तर्हि विमनाः सन् दध्यादिपूर्णभांडं भिनत्ति । यदाकदाचित्तु द्रव्यालाभे गृहानेव धक्ष्यामीति कथयित्वा प्रसुप्तान् बालान् नखाघातादिना रोदयित्वा पलायते । देवि ! चातुर्यमस्य

विलक्षणम् । दध्यादिपदार्थे उत्तुंगशिक्यस्थे हस्ताऽग्राह्ये सति पीठकं संस्थाप्य तदुपर्युलूखलमारोप्य तदुपरि बालमारोप्य च तत्स्कन्धारोहणादिना अवतारणोपायं रचयति । यदि तथाऽवतारितुं न शक्नोति तदा लकुटशलाकाऽऽदिना शिक्यस्थेषु गोरसेषु छिद्रं रचयति । ततो धारां पातयितुं मुखं व्यादेहीति वदति । अथ गृहकृत्येषु व्यग्रासु गोपीषु निभृतान् पयोदधितक्रान् बालकान् पाययति । किं बहुना ध्वान्तयुक्तेषु गृहेषु धृतमणिगणं स्वांगमेव पदार्थस्य प्रकाशकं रचयित्वा स्वकार्यं साधयति । एवं बहुविधानि प्रगल्भ्यानि कुरुते । त्वत् समीपे तु सुप्रतीक इव तिष्ठति । तच्छ्रुत्वाऽपि यशोदा कृष्णाय नाऽकुप्यत् प्रत्युत प्रेम्णाऽवदत्—

दुग्धं घृतं दधि मदीयगृहेऽपि कृष्ण !
सम्विद्यते बहुतरं तव तृप्तयेऽलम् ।
तद् भुंक्ष्व भोजय सखीन् न निरोधयामि ।
त्वं वत्स ! चौर्यनिरतं न जहामि कस्मात् ॥

अत्र कस्यापि भक्तकवेरुक्तिरियम्—

प्रणतदुरितचौरः पूतनाप्राणचौरः ।
बलयवसनचौरो बालगोपांगनानाम् ।
नयनहृदयचौरः पश्यतां सज्जनानाम् ।
अपहरति मनो मे कोऽप्ययं कृष्णचौरः ॥

अथ सभयनयनश्रीमुखालोकिनीभिः गोपाङ्गनाभिः प्रबोधिताऽपि यशोदा सुतवात्सल्यात् विहस्य श्रीकृष्णमुपालब्धुं न शशाक ।

इति श्रीकृष्णचरिते गोप्युपालंभनं नाम पंचदशः स्तवकः ॥ १५ ॥

अथैकदा गोपांगना नन्दांगणे क्रीडन्तं श्रीकृष्णमुपसृत्य प्रोचुः——लाल ! यदि त्वं नर्त्स्यसि तर्हि तुभ्यं मोदकान् नवनीतादिकं च दास्यामः । तच्छ्रुत्वा कृष्णः तासां हस्ततालादिभिः कृतं प्रोत्साहनं समवाप्य समग्रैश्वर्यसंपन्नोऽपि प्रेमविह्वलः सन् काष्ठनिर्मितपुत्तलिकावत् ननर्त । अत्रान्तरं कदाचित् फलविक्रयिणी तत्र समायता । फलानि क्रीणीहीति तस्या वचनमाकर्ण्य सकलफलदाताऽपि फलार्थी सन् धान्यमादाय सत्वरं अयासीत् । ततस्त्वरया सह निर्गच्छतोऽच्युतहस्ताभ्यां मार्गपतितानि धान्यानि दृष्ट्वा तत्सौन्दर्यविमोहिता मालिनी करद्वयं फलैरपूरयत् । अथाच्युतोऽप्यवशिष्टान् धान्यकणान् तद्भाण्डे प्राक्षिपत् । हरिप्रसादात् तानि धान्यानि माणिक्यादीनि रत्नानि जातानि । अत्रान्तरे काऽपि गोपिका तत्राजगाम । सा नन्दकुमारस्य मनोहारिणीं छविमालोक्य चकिता बभूव । साऽथ गृहं गता स्ववयस्यामाह——

सखि ! शृणु कौतुकमेकं नन्दनिकेताङ्गणे मया दृष्टम् ।
गोधूलिधूसराङ्गो नृत्यति वेदान्तसिद्धान्तः ॥

अथैकदा बालकृष्णो गोपबालकप्रेरणया कस्याश्चिद्गोप्या गृहमगात् । सोऽथ तत्पुत्रसंकेतेन बालस्कन्धमारुह्य छिक्कास्थितं नवनीतं समुत्तार्य विभज्य च बालकेभ्यः प्रादात् । अत्रान्तरे समागता गृहस्वामिनी तद् दृश्यमालोक्य च कुपिता सती कृष्णं गृहीतुं गृहाभ्यन्तरं आगात् । प्रत्युत्पन्नमतिः कृष्णः अन्धकारे युक्त्या तत्पुत्रस्यैव हस्तं नीत्वा तस्यै प्रायच्छत् । ततो हृष्टा गोपी गृहान्निःसृत्य यावदंगणे तं भर्त्सयितुमिच्छति तावत्स्वकीयमेव बालकं दृष्ट्वाऽवदत्—अहह ! कृष्णेन वंचितास्मीति निगद्य पश्चात्तापमनुबभूव । साऽथ तद्वृत्तं यशोदायै निवेद्य सत्याप्युपालंभवती बभूव । एतदुपाकर्ण्य प्रेमविह्वला गोपी सहसा भगवतो मनोहरां मूर्तिं विलोक्य पुनः पुनः स्वभाग्यं श्लाघ्यमाना गृहमागत्य सखीमुवाच—आलि !

कृष्णस्य मोहिनी मूर्तिस्तथा मन्मनसि स्थिता ।
यथा महन्दिकापत्रे रक्तता विद्यतेऽस्फुटा ॥ १ ॥
यं दृष्ट्वा सखि मे चेतो नान्यं द्रष्टुं समीहते ।
स एव वसतु कृष्णो नेत्रयोर्मम सर्वदा ॥ २ ॥

तच्छ्रुत्वा सर्वा अपि सख्योऽतीव सन्तुष्टा बभूवुः ।

अथैकदा नन्दकुमारौ क्रीडार्थं बहिरगच्छताम्। तत्र बालकैः सह क्रीडन्तौ रामकृष्णौ भोजनवेलामपि व्यस्मरताम्। एतद् विचिन्त्य बहिरागत्य यशोदा प्रोवाच—वत्स! एह्येहि पयः पिब। विहारैरलं क्षुत्क्षामः क्रीडापरिश्रांतश्च असि। राम! त्वमपि कृष्णं नीत्वाऽऽशु समागच्छ। तात! त्वं प्रातरेव कृताहारोऽसि अतो भोजनवेलां विज्ञाय सत्वरं मिष्टान्नादिकमुपभोक्तुमर्हसि। लाल! भोक्ष्यमाणो व्रजाधिपस्त्वां प्रतीक्षते। ततो बालानपि जगाद—भो भो बालकाः! यूयमपि स्वगृहान् यात। ततः समीपमुपयातं नन्दनन्दनमालोक्य मातोवाच—वत्स! तेऽद्य जन्मनक्षत्रमपि विद्यते, अतः शुचिर्भूत्वा देवान् सम्पूज्य ब्राह्मणेभ्यो गाः प्रयच्छ। पश्य पश्य तवैते वयस्याः स्नातानुलिप्ता-स्तिष्ठंति त्वमपि स्नात्वाऽलंकृतश्च भोजनं कुरु। ततो यथेष्टं विहरस्व। एवं व्याहरन्ती यशोदा रामकृष्णौ हस्तयोर्नीत्वा स्वसदनमाजगाम। ततो बन्धुसमेतो नन्दराजः सुतवर्षग्रन्थि-महोत्सवं चकार। तत्र वैदिकमंत्रैः विप्राः कृष्णाभिषेकं चक्रुः। यथा—

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ १॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ २॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ ३॥ यजुः॥

ततो नन्दराजो निमंत्रितान् भूदेवान् बान्धवांश्च भोजनाच्छादनादिभिः सन्तोष्य विससर्ज ।

इति श्रीकृष्णचरिते नन्दकुमारवर्षग्रन्थिमहोत्सवो नाम षोडशः स्तवकः ॥ १६ ॥

ततो गच्छत्सु दिनेषु कुमारौ यदा सर्वत्र गन्तुं योग्यौ बभूवतुस्तदा यशोदानन्दराजौ बालबोधाय सिंहगजमर्कटसरीसृपादीनां क्रीडनकान्यानीय बोधयामासतुः—पुत्रौ ! ग्रामेषु नगरेषु च मर्कटादिभ्यो दूरे तिष्ठतम् । वने सिंहगजाऽजगरादिभ्यो भयं जायते । जले च मकरादिभ्यो भीतिर्भवति । एतदाकर्ण्य नन्दलालौ भयाकुलाविव बभूवतुः । ततो बालकैर्युद्धार्थमादिष्टौ रामकृष्णौ बाहुस्फोटादिकं कृत्वा स्वयमपि योद्धुमुद्यतावभूताम् । एवं नानाविधाभिः क्रीडाभिः मातापित्रोर्गोपीनां च मनांसि रंजयन्तौ सुखेन न्यवसताम् । किं बहुना, तयोर्दर्शनानंदसुखमनुभवन् नन्दस्तु गोकुलं भूवैकुण्ठमेव गणयामास ।

अथैकदा नन्दादयो गोपवृद्धा बृहद्वने महोत्पातानुभूय संभूय च व्रजहितं मंत्रयामासुः । ततस्तत्र ज्ञानवयोऽधिक उपनन्दोऽब्रवीत्—भ्रातरः ! गोकुलहितैषिभिः अस्माभिः सत्वरमेव क्वाऽप्यन्यत्र गन्तव्यम् । यतोऽत्र बालनाशनहेतवो नानोपद्रवाः प्रत्यहमायान्ति । तत्रादौ पूतनोत्पातः, ततः शकटाविपर्ययः,

अनन्तरं च तृणावर्तसंकटः । किं बहुना, पूर्वजपुण्यान्येव यमलार्जुनाभ्यां कृष्णं ररक्षुः । सखायः ! यावदौत्पादिकोऽरिष्टो व्रजं नाभिभवेत्ततः पूर्वमेव बालानुपादाय गोधनभृत्यादिसमेता वयमितोऽन्यत्र यास्यामः । इतस्त्रिगव्यूतिमात्रे प्रदेशे वर्तते पुण्याद्रितृणवीरुधं गोगोपीगोपसेव्यं वृन्दावनाख्यं नवकाननम् । यदि सर्वेभ्यो रोचेत तर्हि तत्रैव चलाम । उक्तं च—

यस्यास्ति सर्वत्र गतिः स कस्मात् ।
स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः ।
क्षारं जलं कापुरुषाः पिबन्ति ॥

एवमाकर्ण्य उपनन्दवचनं गोकुलस्था लोकाः 'शुभस्य शीघ्रं' इति वदन्तः तं परामर्शं स्वीचक्रुः । ततोऽन्येद्युः पुरस्कृत्य पुरोहितान् प्रणम्य च विनायकं एकधिया गोपाः स्वान् स्वान् व्रजान् समायुज्य समारूढपरिच्छदाश्च महता तूर्यघोषेण प्रतस्थिरे । तस्मिन्नवसरे रूढरथाः कुंकुमकान्तयश्च गोप्यो मधुरस्वरेण कृष्णलीलां जगुः । अथैकशकटस्थिते यशोदारोहिण्यौ तच्छ्रुत्वा परां प्रीतिं समवापतुः । अथ गोपगणाः सर्वर्तुसुखावहं निखिलभुवनवनश्रियं समादाय स्थितं इव वृन्दावनं समवाप्य

तत्रार्धचन्द्राकारं गोकुलवसतिमावासयामासुः ; ततोऽन्येऽपि वर्णाश्रमानुयायिनः तत्रोषित्वा वृन्दारण्यस्य शोभां संवर्धयामासुः ।

इति श्रीकृष्णचरिते वृन्दावनगमनं नाम
सप्तदशः स्तवकः ॥ १७ ॥

अथैकदा राममाधवौ वृन्दावनसमीपवर्तिनीं यमुनापुलिनादीनामाकर्णितां शोभां प्रत्यक्षमनुभूय प्रमोदातिशयमध्यगच्छताम् । ततस्तौ समवाप्य शुभावसरं कदाचिद्बालकैः सह को वर्द्धते को वर्धते इति वदन्तौ कवृद्धिक्रीडया, कदाचिन्नेत्रनिमीलिकया, कदाचिद्गुप्तमुष्टिकाकथनेन, कदाचिद्गुंजागोपनलीलया, कदाचिद् कन्दुकदंडताडनेन, कदाचिद् कन्दुकप्रक्षेपणादिभिश्च क्रीडाभिः बाल्यमप्यवाहयताम् ।

अथैकदा नन्दराजः शुभदिने रामकृष्णौ गोचारणार्थं वने प्रेषयामास । ततस्तौ व्रजभुवो नातिदूरे कालिन्दीकूलमवाप्य गोपबालकैः सह वेणुवेत्रशृंगकंदुकदंडकादीनि क्रीडासाधनानि नीत्वा विहरन्तौ वत्सान् चारयामासतुः । ततः क्वचिद् वेणून् वादयन्तौ, क्वचित् क्षेपणैः लोष्ठादीनि क्षिपन्तौ, क्वचित् किंकणीयुक्तैः पादैः नृत्यन्तौ विरेजतुः । तत्रैकदा कंबलादिभिः पिहितौ स्वीकृतवृषभाकारैः सह स्वयमपि वृषभायमाणौ नर्दन्तौ च परस्परं युध्येते स्म । ततो हंसमयूरादीननुकृत्य शब्दं कुर्वाणौ

गोपबालैः सह विनोदपरायणावभूताम्। अत्रान्तरे कंससहायकः कश्चिद्दैत्यो वत्सरूपं धृत्वा तज्जिघांसयाऽकस्मात्तत्राऽऽजगाम। सावधानो हरिस्तं परिचित्य भ्रूसंज्ञयाऽन्यान् सर्वांश्च विज्ञाप्य मुग्ध इव शनैः शनैस्तत् समीपमियाय। एतदालोक्य कपट-कलेवरो वत्सासुरो यावन्मायां कर्तुं समीहते ततः प्रागेव नन्दसूनुः अपराभ्यां पादाभ्यां सह तस्य लांगूलं गृहीत्वा भ्रामयित्वा च कपित्थोपरि प्रचिक्षेप। सहसैव सोऽसुरो गतप्राणो बभूव। मरणसमये मायोपगमात् स दुरात्मा प्रकटित-निजस्वरूपोऽभवत्। एवमालोक्य विस्मिताः सर्वे बालाः साधु साध्विति वदन्तः श्रीकृष्णं प्रशशंसुः। धर्मपोषका देवाश्च कृष्णोपरि पुष्पवृष्टिं कृत्वा स्वकीयां प्रसन्नतां विज्ञापयामासुः।

इति श्रीकृष्णचरिते वत्सासुरप्राणहरणं नाम अष्टादशः स्तवकः॥ १८॥

अथैकदा कृष्णबलदेवौ गोपबालकैः सह यमुनातटे वत्सान् चारयन्तौ आस्ताम्। तत्र सर्वे बालकाः प्रातर्भोज्यं भुक्त्वा जलं पीत्वा च तर्णकानपि सलिलं पाययामासुः। अत्रान्तरे यदा बकरूपधृक् दैत्यः सहसा तत्रागत्य कृष्णमग्रसत् तदा रामादयः सर्वेऽर्भकाः किंकर्तव्यविमूढा अभूवन्। अत्रान्तरे चतुरचूडा-मणिः कृष्णः तदुदरं गत्वैव सद्यः पावकवर्णो बभूव। ततो

दग्धोदरो वको गोविन्दं सहसा चच्छर्द । ततो यमुनाकूले कृष्णवकयोर्युद्धं भवितुमारब्धम् । कोपाकुलो वकस्तुंडेन कृष्णं अपीडयत् । तदा नन्दनन्दनो दोर्भ्यां तं निगृह्य पश्यत्सु बालकेषु लीलयैव तदङ्गानि विददार । तस्मिन्नवसरेऽतिमुदितमनसो देवाः पुष्पवृष्टिं अकुर्वन् । विमानस्था गन्धर्वा हरियशो जगुः । किन्नराश्च शंखादिवाद्यस्वनैर्भगवन्तं प्रसादयामासुः । ततः सायाह्ने गोपदारकाः वृन्दावनमागत्य गोपालेभ्यः वकासुरनिधन-वृत्तान्तमावेदयामासुः । तच्छ्रुत्वा ते मिथः प्रोचुः—अहो ! बतात्राऽपि बालकस्य बहवो मृत्युहेतवोऽभूवन् । किन्तु तेषामेव विप्रियमभूत् येऽस्यानिष्टमैच्छन् । ब्रह्मविदां वाचोऽन्यथा न भवन्ति । श्रीमता गर्गाचार्येण यद्यद् भणितं तत्तदक्षरशः सत्यं जातम् ।

इति श्रीकृष्णचरिते वकासुरवधवर्णनं नाम एकोनविंशतितमः स्तवकः ॥ १९ ॥

अथैकदा हरिः वन एव भोजनं कर्तुं मनोऽदधत् । प्रातः समुत्थाय मनोहरेण शृंगरवेण स्वसखीन् समाहूय च वत्सपुरस्सरो व्रजाद् बहिः अगमत् । तस्मिन्नवसरेऽन्येऽपि गोपबालकाः स्वकान् स्वकान् वत्सानग्रतः कृत्वा हर्षेण कृष्णानुगामिनो बभूवुः । ततस्ते तत्र सर्वानेव वत्सानेकीकृत्य चारयन्तो बाललीलाभिः विजह्रुः । केचिद्बालकाः मातृभिः काचादिभिर्भूषिता अपि

प्रसन्नतया पुनः पत्रपुष्पफलस्तवकपिच्छगैरिकगुंजादिभिरात्मानं विभूषयामासुः। भोजनसमये अन्योऽन्यस्य शिक्यादीन् चोरयित्वा गोपकुमाराः ततोऽनेन मदीयमपहृतमिति मत्वा स्वामिनाऽज्ञातान् दूरे चिक्षिपुः। तत्रत्याः पुनस्तांस्ततोऽपि दूरे प्राक्षिपन्। एवमनवस्थया स्ववस्त्वलभमानान् बालान् रुदन्मुखानवलोक्य हसन्तः केचित्पुनः प्रददुः। अथ वनशोभानिरीक्षणार्थं कृष्णेऽतिदूरं गते बालका 'अहं पूर्वम् स्प्रक्ष्यामि, अहं पूर्वं स्प्रक्ष्यामीति' वदन्तोऽनुद्रुत्य तं संस्पृश्य समाश्लिष्य च रेमिरे। अथ केचिद्वेणून्वादयंतः, अन्ये शृंगाणि मुखमारुतेन पूरयित्वा नादयंतः, अपरे भ्रमरैः सह प्रगायन्तः, इतरे कोकिलैः साकं कूजन्तः, अन्ये उपरि समुत्पततां पक्षिणां छायाभिः सह धावन्तः, केचिद् बकैः सह जलतीरे समुपविशन्तः, केचिन्मयूरैः साकं नृत्यन्तः, केचित्तरुस्थितानां वानराणां लांगूलानि आकर्षन्तः, केचिद्वानरैः सार्धं दन्तप्रदर्शनभ्रूविजृंभादिविकारान् कुर्वन्तः, केचित् तरुशाखायाः शाखान्तरमुपगच्छन्तश्च सच्चिदानन्दमूर्तिना कृष्णचन्द्रेण सह विजह्रुः।

तत्पादपांशुर्बहुजन्मकृच्छ्रतो,
धृतात्मभिर्योगिभिरप्यलभ्यः।
स एष हि दृग्विषयः स्वयं स्थितः,
किं वर्ण्यते दिष्टमहो व्रजौकसाम्॥

अत्रान्तरे कंसानुशिष्टोऽघासुरनामको दैत्यो भ्रातृभगिन्योर्वैरनिर्यातनेच्छया पर्वताकारं महाऽजगरस्वरूपं धृत्वा मुखं व्यादाय तेषां मार्गमाक्रम्य चातिष्ठत्। ततस्तत्र क्रीडन्तः केचिद् गोपबालकाः ज्ञात्वाऽपि सर्पकलेवरं मिथोऽवदन्—वयस्याः! त्रातरि नन्दनन्दने स्थिते माऽभैष्ट। दुरात्मनोऽस्यापि वधो बकवद्भविष्यतीत्यभिधाय विहसन्तः श्रीकृष्णमुखचन्द्रं वीक्ष्य च तन्मुखं विविशुः। एतदालोक्य दीनबन्धुः व्यचिन्तयत्—यद्यहं बहिः स्थित एव दैत्यं हन्मि तदा तु तेन सह सवत्सा बालका अपि मृताः स्युः। व्रजेऽपि च महद्दुःखं आपतेत्। अतोऽहमपि प्रविश्य तान् रक्षामीति निश्चित्य सहसा तदुदरं प्रविवेश। ज्ञात्वैवं मेघान्तरिता देवा अपि हाहेति चुक्रुशुः। गुप्तरीत्या स्थिताः कंससहायका असुरा अपि जहृषुः। ततः कृष्णप्रभावात् सवत्सा गोपबालकाः तस्य गले सहसैव ववृधिरे। अथ निरुद्धकंठस्य निर्गतलोचनस्य च तस्य प्राणवायुर्ब्रह्मरंध्रं विनिर्भिद्य सपदि विनिर्ययौ। ततो भगवान् जाठराग्निज्वालातो मूर्छितान् वत्सान् सखींश्च स्वकीयामृतवर्षिण्या दृष्ट्या सचेतनान् कृत्वा समुत्थाप्य च तैः समेतो तद्वक्त्राद्विनिर्ययौ। एतदालोक्य सन्तुष्टा अमराः जयध्वनिभिर्गगनमापूरयामासुः। ततो हरिर्वत्सपालकान् सरित्पुलिनमानीय प्रोवाच—सखायः! रम्योऽयं प्रदेशः, अतः क्षुधार्तैरस्माभिरत्रैव भोक्तव्यम्। वत्साश्च जलं

पीत्वाऽत्रैव तृणं चरन्तु । एवमाकर्ण्याच्युतवचनं सर्वेऽपि गोपकुमारास्तथास्त्विति व्याहृत्य स्व स्व शिक्यानि नीत्वा च नन्दसूनुसमीपे तस्थुः । ततः केचित्पत्रैः, अपरे पद्मदलैः, इतरे कदलीदलैः, अन्ये भूर्जपत्रादिभिश्च पात्राणि रचयित्वा कृष्णेन साकं भोक्तुमारेभिरे । तस्मिन्समये पृथक्पृथक् भोज्यरुचिं दर्शयन्तो हसन्तो हासयन्तश्च गोपालबालका भुक्त्वाऽतिसन्तुष्टिं लेभिरे । उक्तं च—

विभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे ।
वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु ।
तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः ।
स्वर्गे लोके मिषति बुभुजे यज्ञभुग् बालकेलिः ॥

एवमच्युतात्मसु भुंजानेषु वत्सपेषु तृणलुब्धा वत्सा वनमध्ये दूरं जग्मुः । अत्रान्तरे परिहासपटुः ब्रह्मा वत्सानितोऽन्यत्र नीत्वा स्वयमन्तर्हितोऽभवत् । ततो बालका वत्साननालोक्य संत्रस्ता बभूवुः । एवमालोक्य हरिरुवाच—मित्राणि ! भोजनान्मा विरमत । एषोऽहं द्रुतं वत्सान्समानयामीत्यभिधाय गृहीतकवलोऽपि ततः प्रातिष्ठत । अथावसरज्ञो विरंचिर्हरिरहितान् वत्सपान् अपि जहार । ततोऽच्युतोऽद्रिषु तद् दरीषु गह्वरेषु च वत्साननवलोक्य सहसा पुलिनमाजगाम । सोऽथ तत्र वत्सपालानप्यनालोक्य सर्वत्र विपिने तान् विचिकाय । ततो

हरिः प्रणिधानेन सर्वं वत्सादिहरणं विधिचेष्टितं अवगम्य तन्मातॄणां स्वयंभुवश्च मुदं कर्तुमात्मानमुभयायितमकरोत् । उक्तं च—

यावद्वत्सपवत्सकाल्पकवपुर्यावत् करांघ्र्यादिकं ।
यावद्यष्टिविषाणवेणुदलशिग् यावद्विभूषांबरम् ।
यावच्छीलगुणाधिकाकृतिवयो यावद्विहारादिकं ।
सर्वं विष्णुमयं गिरोंगवदजैः सर्वस्वरूपो बभौ ॥

किं बहूक्तेन । सायंकाले निवर्तमानो वेणुं वादयन् जनार्दनो यत्र यत्र यस्य यस्य गोपबालकस्य गृहमार्गोऽभवत् तत्र तत्र तस्य तस्य तेन तेन गोपरूपेण वत्सान् पृथङ् नीत्वा गोष्ठेषु निवेश्य च स्वयमपि तेषां तेषां गृहेषु प्रविवेश । तस्मिन्नवसरे श्रवणसुखप्रदेन शब्देन मोहिता गोपवध्वः सहसोत्थाय श्रीकृष्ण-मेव तत्तद्बालकरूपं मत्वा भुजैरुत्थाप्य समालिंग्य च स्नेहस्नुत-पयोधराः स्तन्यमपाययन् । चरणार्थं वनं गता गावोऽपि गोष्ठं उपेत्य हुंकारघोषैः स्वकीयान् वत्सतरान् मुहुर्मुहुर्लिहन्त्यः स्रवदौधसं पयः पाययामासुः । अथ दिनान्ते निवृत्यायाता गोपा अपि गवां वत्सवात्सल्यं विलोक्य परमां प्रीतिमवापुः । उक्तं चात्रिणा—

यस्यैकापि गृहे नास्ति धेनुर्वत्सानुसारिणी ।
मंगलानि कथं तस्य कुतस्तस्य तमक्षयः ॥

किं बहूक्तेन । व्रजवासिनो गोपा यथा पुत्रेषु स्निह्यन्ति तथा वत्सेष्वपि। एवं स्वमहिम्ना श्रीकृष्णः संवत्सरात्मकं कालमत्यवाहयत्। रहस्यमस्य ज्ञानमयेन चक्षुषा बलभद्रोऽप्यवागच्छत्। एवं पूर्णेऽब्दे स्वकीयेन त्रुटिमात्रकालेन शीघ्रमेत्य ब्रह्मा सर्वरूपं हरिं विलोक्य चकितोऽचिन्तयत्। अहो गोकुले यावन्तो बाला वत्साश्चासन् ते तु मयाऽन्यत्र नीताः। मन्मायामोहितास्तेऽधुनाऽपि न समुत्थिताः। पुनरेते कृष्णेन सह क्रीडन्तः कुतः समायाताः। एतेषु के सत्याः के वाऽसत्याः इति चिन्तयन्नपि ज्ञातुं न शक्नोमि। एवं विष्णुं संमोहितुं प्रवृत्तोऽहं स्वयमेव मायामोहितोऽभूवम्। यथा खद्योता रात्रौ राजन्ते तथा न दिवसे। किं बहुना, तस्मिन्नवसरे सर्वे वत्सपालाः घनश्यामाः पीतकौशेयवाससः चतुर्भुजाः शंखचक्रगदाब्जपाणयः किरीटिनः कुण्डलिनो वनमालाविभूषिताः सच्चिदानन्दमूर्तयश्च बभूवुः। अत्र श्रुतिः—

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥

ततो हरिः परमैश्वर्यं द्रष्टुमसमर्थं मायामोहितमाश्चर्यसागरे च निमग्नं विधिं विचिन्त्य झटिति तस्योपरि अजाजवनिकां प्रसारयामास। अथ मूर्छितो यथा समुत्तिष्ठते तथोत्थाय ब्रह्मा

नेत्राणि समुन्मील्य च संमुखे गोलोकोपमं वृन्दावनं गोलोकाधिपतिं श्रीकृष्णचन्द्रं च ददर्श । सोऽथ कनकदंडवत् श्रीकृष्णसन्निधौ पतित्वा भक्तिविनम्रकन्धरः कृताञ्जलिः सन् स्तोतुमारभत ।

इति श्रीकृष्णचरिते ब्रह्ममोहनिरूपणं नाम
विंशतितमः स्तवकः ॥ २० ॥

अथ विरंचिरुवाच—देव !

नौमीड्य ! तेऽभ्रवपुषे तडिदम्बराय ।
गुंजावतंसपरिपिच्छलसन्मुखाय ।
वन्यस्रजे कमलवेत्रविषाणवेणु-
लक्ष्मश्रियै मृदुपदे पशुपांगजाय ॥ १ ॥

श्रेयस्रुतिं भक्तिमुदस्य ते विभो !
क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते ।
नान्यद्यथा स्थूलतुषावघातिनाम् ॥ २ ॥

व्रजराज ! यदा मया त्वदीया वत्सादयो नापहृतास्तदा तु त्वमेक एव आसीः । परमिदानीन्तु समस्ता एव गोपबालकास्त्वत्स्वरूपा जाताः । अतस्तव महिमा वर्णनातीतोऽस्ति । सांप्रतं

त्वदीयं वस्तु तुभ्यमेव समर्प्य कृतार्थोऽस्मि । देव ! नाहं चतुरः यो मायिनामपि मोहने त्वयि स्वमायां वितत्य कुतूहलं द्रष्टुमैच्छम् । किमग्निज्वाला विभावसौ स्वप्रभावं दर्शयितुं शक्नोति । ईश ! अनेकब्रह्माण्डानां कर्ता भवान् क्व ? सप्तवितस्तिकायश्चाहं क्व ? यथा माता गर्भगतस्य पादप्रक्षेपणं न गणयति तथा भवानपि मम अपराधं मा गणयतु । प्रभो ! जलशायिनो भवतो नाभि-कमलादेव समुत्पन्नोऽहं, अतो भवदीयः पुत्रोऽस्मि । पिता पुत्रापराधं क्षमतेऽत्र वैचित्र्यं नास्ति । भगवन् ! विज्ञानविशारदा ज्ञानमवलंब्य मुक्तये प्रयतन्ते, किं च भक्तिं विना मुक्तिर्दुर्लभा । अतो भक्तिदानं मह्यं देहि । स्वामिन् ! यथा पृथिवीपरमाणवः जलस्थाः सूक्ष्मजन्तवः गगनस्थास्तारकाश्च संख्यातीतास्तथा भवद्गुणा अप्यसंख्याः सन्ति । विभो ! नित्यानन्दविग्रहे त्वयि जगदिदमशेषं त्वदिच्छयैव आविर्भावतिरोभावौ समवाप्य स्वप्राभ अपि मदिवावभाति । वस्तुतस्त्वं तु अखण्डानन्दोऽसि ।

एकस्त्वमाद्यः पुरुषः पुराणः ।
सत्यः स्वयंज्योतिरनन्त आद्यः ।
नित्योऽक्षरोऽजस्रसुखो निरंजनः ।
पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥

"पूर्वमेवाऽहमिहासमिति पुरुषस्य पुरुषत्वमिति" श्रुतेः । हरे ! व्रजरमण्यो गावश्च धन्या यासां सुधोपमं दुग्धं शिशुरूपेण

वत्सरूपेण च भवता पीतम् । यथा तव तृप्तिस्तेन पयसा जाता तथा बहुविधैर्यज्ञैरपि नाद्यपर्यन्तं अभून् । पृथ्वीमण्डले धन्यं व्रजमण्डलम् ।

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनम् ॥

स्वर्गसमा व्रजभूमिः, वृन्दारण्यं विरंचिलोकसमम । मथुरा वैकुण्ठसमा । गोलोकत्वं च गोकुलं लभते । रमारमण ! त्वमेव कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽसि । संप्रति स्वकीयाभिमानं परित्यज्य स्वात्मानं तुभ्यं समर्पयामि । नाथ !

यावद्रागादयस्तेनास्तावत्कारागृहं गृहम् ।
तावन्मोहोऽघ्रिनिगडो यावत् कृष्ण ! न ते जनः ॥

यः कोऽपि असाधारणं तव महिमानं न मन्यते स भ्रमाविष्टोऽस्ति । अत्र श्रुतिः——

यस्याऽमतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥

ततः प्रणम्य परिक्रम्य च विधिः स्वलोकमगात् । अथ कृतकृत्यो हरिः सवत्सो सगोपबालकश्च व्रजं न्यवर्तत । तस्मिन्नवसरे व्रजवनिता उपलालननामभिः वत्सान् समाह्वयन्तं

वर्हप्रसूननवधातुविचित्रांगं श्यामसुंदरं निर्निमेषाभ्यां लोचनाभ्यां निरीक्ष्य नयनसाफल्यमवापुः। तत्रैका परमविदुषी गोपी प्राह—

वंशीविभूषितकरान्नवनीरदाभात् ।
पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् ।
कृष्णात्परं किमपि तत्वमहं न जाने ॥

ततो गोपबालका नन्दगृहमेत्य नन्दपत्नीमूचुः—मातः ! वनेऽद्य वयं महाव्यालेन ग्रस्ता दीनबन्धुना[1] कृष्णेन रक्षिताः। तच्छ्रुत्वा यशोदाऽतीव संतुष्टा बभूव । एवं बहुविधाभिः क्रीडाभिः व्रजवासिनां मनांसि रंजयंतौ रामकृष्णौ सुखेन कौमारं वयो यापयामासतुः ।

इति श्रीकृष्णचरिते ब्रह्मदेवकृतस्तुतिनिरूपणं नाम
एकविंशतितमः स्तवकः ॥ २१ ॥

अथातीतकौमारौ रामकृष्णौ पौगंडावस्थामवापतुः। तत एकदा नन्दः कार्तिकशुक्लाष्टम्यां सुतावाहूय प्रोवाच—वत्सौ ! वर्ततेऽद्य

१-भगवतो दीनबन्धुनामविषये कस्यापि हरिभक्तस्योक्तिरियम्—
दीनबन्धुरिति नाम ते स्मरन् । कृष्णचन्द्र ! पतितोऽहमुत्सहे ।
भक्तवत्सलतया त्वयि श्रुते । मामकं हृदयमाशु कंपते ॥

परमपुनीतं नक्षत्रम्। अतो वत्सचारणस्थाने गोचारणकार्यमारभेथाम्। तच्छ्रुत्वातिहृष्टौ रौहिणेययाशोदेयौ कुलक्रमागतं विधिं समाप्य भगवन्तं भास्करं प्रणम्य च सखिभिः सह कुसुमाकरं पशव्यं च वनं प्राविशताम्। तत्र वृन्तारुणपल्लवशोभाढ्यां वनश्रियं निरीक्ष्याऽग्रजमुवाच—तात! वनमेतत् कीदृग् मंजुघोषालिमृगद्विजाकुलं वर्तते। श्रवणसुखप्रदेनात्रत्यशब्देन मे कर्णौ तृप्तौ। शतपत्रगन्धिना वातेन जुष्टं सलिलं मे नासिकामतितरां तर्पयति। पुष्पसंपदा लताः फलसमृद्ध्या च नम्रान् वृक्षान् विलोक्य मे चित्तं भृशं प्रसीदति। इमे षट्पदा मंजु गुंजन्तोऽखिललोकपावनं दिव्यं तव यशो दिक्षु भक्ता इव गायन्तीति मन्ये। अत्रत्या मयूरास्त्वां विलोक्यैव हर्षेण नृत्यन्ति। वनविहारिण्य एता हरिण्य गोप्य इवातिथये तुभ्यं प्रियं कर्तुं वांछन्ति। इमाः कोकिलाः स्तोत्रकल्पैर्मधुरशब्दैस्त्वां गृहागतं मत्वा स्तुवन्ति। समहीधरा धरेयं तव पादस्पर्शात् असंशयं धन्या जाता, इति।

एवं सूक्तिसुधया भ्रातरं प्रसाद्य कृष्णः सानुगो गाः संचारयन् सरिद्रोधसि रेमे। ततः संकर्षणान्वितः स्रग्वी श्रीकृष्णः सहचरैर्गोपैर्देवगणैश्चोपगीयमानचरितः मधुपानलुब्धेषु भ्रमरेषु गायत्सु स्वयमपि गायति स्म। क्वचित्कलहंसानुकूजितमनुकृत्य चुकूज। क्वचिन्नृत्यन्तं बर्हिणमवलोक्य ननर्त। क्वचिन्मेघ-

गंभीरया गिरा संकेतनामभिः दूरगान् पशून् नीत्वा समाह्वयति। क्वचिच्चकोरादीन् पक्षिणः अनुरुराव। क्वचित् सिंहव्याघ्रयोः शब्देन भीतवद् भवति। क्वचित् क्रीडाक्लान्तं गोपोत्संगोपवर्हणं रौहिणेयं पादसम्मर्दनादिभिः विगतश्रमं करोति। क्वाऽपि मिथो नृत्यादीन् कुर्वतो गोपालान् वीक्ष्य रामकृष्णौ जगदतुः— सखायः! यूयं नृत्येन विद्याधरविडंबकाः, गानेन गन्धर्वगणगर्वहारिणः, युद्धेन च वीरविजेतारः स्थ। अथ नियुद्धश्रमकार्शितः कृष्णः क्वचित्पल्लवतल्पेषु गोपोत्संगोपवर्हणं कृत्वाऽशयिष्ट। तस्मिन्नवसरे केचित्केशवस्य पादसंवाहनं चक्रुः। हतपाप्मानोऽपरे व्यजनैस्तं वीजयामासुः। अन्ये स्नेहार्द्रधियः शयानस्य तस्य मनोऽनुकूलानि गीतानि जगुः। एवं रमालालितपादपल्लवोऽपि भगवान् ग्राम्यैः समं चरितैर्गोपात्मजत्वं विडम्बयन् रेमे।

तस्मिन्नवसरे रामकृष्णसखः श्रीदामानामगोपः प्रेम्णेदमुवाच—हे राम! हे कृष्ण! इतोऽविदूरे तालालिसंकुलं वर्तते महद्वनम्। यत्र सन्ति नानाविधानि समुपभोग्यानि फलानि। तच्छ्रुत्वा सुबलाद्या गोपाः प्रोचुः—मित्राणि! किं नावगच्छथ यूयं तत्र दुरात्मा धेनुकः खररूपं धृत्वा स्वात्मतुल्यबलैः गोत्रजैः सह सुखेन निवसति। तद्भयात् यदा पक्षिणोऽपि तत्र न कूजंति तदा का कथा मनुष्याणाम्। एवमाकर्ण्य सुहृद्वचांसि विहस्य भ्रातरौ मित्रगणप्रियचिकीर्षया गोपान्नीत्वा सहसैव तत्र

जग्मतुः । ततोऽच्युताग्रजो बाहुभ्यां तालान् कम्पयित्वा फलानि अपातयत् । अथ पततां फलानां शब्दं श्रुत्वा कोपाकुलो धेनुकासुरः पृथ्वीं कंपयन् सहसोपद्रवकारिणं हन्तुमभ्यधावत् । सोऽथ तमभ्येत्य प्रत्यक् पादाभ्यां उरसि निहत्य जातीयशब्दं कृत्वा संमुखो भूत्वा च बलभद्रं दन्तैः चर्वितुमारेभे । एतदालोक्य क्रुद्धः संकर्षणः पाणिभ्यां तमसुरं पादाग्रयोर्गृहीत्वा भ्रामयित्वा च तालमूले प्राक्षिपत् । किमधिकेन भ्रामणमात्रेणैव स गतजीवितो बभूव । ततः क्रोधमूर्छिता धेनुकज्ञातयो रामकृष्णपुरोगान् गोपकुमारान् हन्तुम् अभ्यधावन् । अथ रामकृष्णौ गृहीतपश्चाच्चरणांस्तान् क्रमशस्तृणराजसु प्राक्षिपताम् । गताऽसुभिर्दैत्यदेहैर्व्याप्ताऽपि सा भूमिः कंटकशोधनात् मंगलप्रदा बभूव । तदाप्रभृति मनुष्या गतसाध्वसा अभूवन्, खगाश्च तालफलान्यत्तुमारेभिरे । ततः साग्रजः कमलपत्राक्षः कृष्णो गोपवृन्दैश्च स्तूयमानः सायंकाले व्रजमाजगाम । अथ गोप्यो गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसेनरुचिरेक्षणं वेणुं क्वणन्तं गोपैः अनुगीतकीर्तिं साग्रजं नन्दसूनुं विलोकयितुं मिथोऽहं पूर्विकां चक्रुः । ततो यशोदारोहिण्यौ पुत्रयोस्तयोर्यथाकामं यथाकालं च परमाशिषो व्यधत्ताम् । अथ मज्जनोन्मर्दनादिभिर्गतमार्गश्रमौ तौ नीवीं

वसित्वा जनन्युपहृतं सुधोपममन्नं प्राश्य वरशय्यां समाश्रितवन्तौ।

इति श्रीकृष्णचरिते धेनुकासुरवधो नाम द्वाविंशतितमः स्तवकः ॥ २२ ॥

अथैकदा भगवान् कृष्णो गोपवृन्दयुतो विनैव रामं कालिन्दीकूलमगात्। तत्र निदाघातपपीडिताः तृषार्ताश्च सगोपा गावः विषदूषितं जलं पपुः। ततो दैवोपहतचेतसः सर्वे ते सहसा सलिलान्तिके मूर्च्छामवाप्य निपेतुः। योगेश्वरो भगवान् तथाभूतान् तान् विलोक्य सुधावर्षिण्या दृष्ट्या सद्य एव संजीवयामास। ततस्ते स्मृतिं लब्ध्वा जलसान्निध्यात् समुत्थाय गोविन्दानुग्रहमेव जीवनप्रदममन्यंत। अथ त्रिकालज्ञो हरिः कृष्णाहिना दूषितजलां कृष्णां विज्ञाय तस्या विशुद्धिं अन्विच्छन् तत्रस्थं सर्पं निष्कासितुमियेष। सोऽथ प्राणिहितार्थं तुंगतमं कदंबमधिरुह्य करतलेन बाहुमाहत्य च तस्मिन् गभीरे कालियह्रदे सहसा चुकूर्द। अथ पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितोऽम्बुराशिः सर्पह्रदो विषकषायविभीषणोर्मिभिर्धावन् धनुःशतं पर्यक्प्लुतो बभूव। ततो ह्रदे विहरतो वरवारणविक्रमस्य तस्य भुजदंडवारिघोषमाकर्ण्य स्वसदनाभिभवं निरीक्ष्य च चक्षुःश्रवाः अतिकोपाऽकुलो बभूव। सोऽथ श्यामसुन्दरं घनावदातं अप्रतिभयं क्रीडन्तं कृष्णं क्रोधेन मर्मसु संदश्य भुजया चच्छाद। एवं नागभोगपरिवीतं अदृष्टचेष्टं च तं

विलोक्य कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामाः भृशार्ताश्च पशुपालाः सहसा चिन्तार्णवे व्यमज्जन् । कृष्णे दत्तेक्षणा गोवृषभवत्सतर्योऽपि रुदत्य इवावतस्थिरे ।

अत्रान्तरे व्रजे महोत्पाता उत्पेतुः । एवमालोक्य नन्दपुरस्सरा गोपगणा रामं विनैव कृष्णं गां चारयितुं गतं ज्ञात्वा दुर्निमित्तैस्तैः सपदि दुःखशोकभयातुरा बभूवुः । अत्रान्तरे कृष्णदर्शनलालसाः आबालवृद्धवनिता अपि महोत्पातैस्तन्निधनशंकां कृत्वा सपदि गोकुलान्निश्चक्रमुः । एवं तान् कातरान् वीक्ष्य तत्प्रभावज्ञो बलरामः प्रहस्य किंचिन्नोवाच । ततस्ते तं दयितमन्वेषमाणा तल्लक्षणैः पदैः सूचितया पदव्या सपदि यमुनातटं प्रापुः । ततस्ते दूरादेव महाह्रदे भुजगभोगपरीतदेहं कृष्णं विलोक्य जलाशयान्ते गूढधिषणान् गोपान् विज्ञाय परितः क्रन्दतः पशूनवाप्य च परमकश्मलमवापुः । अथ भगवत्यनुरागमनसो गोप्यः प्रियतमेऽहिना ग्रस्ते सति तत्सौहृदं स्मारं स्मारं समग्रं भूलोकमपि शून्यममन्यन्त । अत्रान्तरे यशोदा पुत्रमोहाकुला सहसा जले प्रविवेश । तदा काचिद् गोपी तां हस्तेन धृत्वा सपद्याचकर्ष । अथान्या प्रोवाच—भगिनि ! पूतनादिनिधनवृत्तान्तं ज्ञात्वाऽपि कृष्णपराक्रमे वृथा किं शंकसे । ततो नन्दादीनपि कालीयह्रदं प्रविशतो वीक्ष्य रामोऽवदत् । महाशयाः ! सहसा विदधीत न क्रियामिति नीतिवाक्यं स्मृत्वा धैर्यं धारयत ।

जगति जीवन्नरो भद्रशतानि पश्यति। अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ। इति गर्गाचार्यवचने पूर्णं विश्वासं कुरुत। अत्रान्तरे मुहुर्तमात्रं बन्धनकष्टमनुभूय हरिरात्महेतोः व्रजवासिनोऽनन्यगतिकान् विचिन्त्य सहसा संवर्ध्यमानेन वपुषा तन्नागपाशादुदतिष्ठत्। एतदालोक्य कुपितो भुजंगमः फणानुन्नमय्य विषोल्वणान् श्वासान् मुमोच। अथ सकलकलानिष्णातो हरिरवसरमवाप्य हस्तेन फणां नम्रं कृत्वा तमारुह्य च ननर्त। एवमालोक्य देवमुनिगन्धर्वचारणाः प्रसन्ना अभूवन्। ततः खलदंडधरो भगवान् कालियस्य यद्यच्छिरो नाऽनमत् तत्तत्स्वचरणपातैर्ममर्द। ततस्तदास्येभ्यो नासाविवरेभ्यश्च विषमिश्रितं रुधिरं निस्ससार, येन सहसैव स मुमूर्छ। सोऽथ भगवच्चरणप्रभावात् निर्धूतपापोऽभवत्। ततः स्वपुण्योदयेन तं चराचरगुरुं पुरुषोत्तमं ज्ञात्वा मनसा सस्मार। एवमालोक्य विषण्णा श्लथद्वसनभूषणकेशपाशाश्च नागपत्न्यः सहसा नन्दनंदनमुपसृत्य सविनयं स्तोतुमारभन्त—

दयानिधे! कृतकिल्बिषेऽस्मिन् दंडोऽयं न्याय्यः, यतो भवतोऽयमवतारः खलनिग्रहायैव जातः। भवादृशो न्यायशीलो रिपौ सुतेऽपि वा दंडेन धर्मविप्लवं निहन्ति। देव! जीवः पापादेव सर्पयोनिं लभते। संप्रति भगवच्चरणस्पर्शादयं विगतकल्मषो जातः। क्रोधोऽप्ययं भवतोऽत्र कृपाकार्यमकरोत्। भवदीया भक्ता भवत्कृपामेव समभिलषन्ति।

न नाकपृष्ठं न च सार्वभौमं, न पारमेष्ठ्यं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा, वांछन्ति यत्पादरजःप्रपन्नाः ॥१॥

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
भूतावासाय भूताय पराय परमात्मने ॥ २ ॥
ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये ।
अगुणायाविकाराय नमस्ते प्राकृताय च ॥ ३ ॥

विभो ! त्रिलोक्यां त्रिधा योनयः सन्ति । शान्तास्तव प्रियाः राजसाः तामसाश्च सर्वथैव तवाऽप्रियाः । किन्तु क्रीडा-स्वभावस्तु तेषां त्वयैव निर्दिष्टः। भगवन् ! राजाऽपि प्रजाकृतमप-राधं कचित् सहते । मृतप्रायेऽस्मिन् पन्नगे दयार्द्रदृष्टिं प्रक्षिप । वयमबलाः, कृपां कृत्वाऽस्मभ्यं पतिप्राणभिक्षां देहि । निशम्यैवं नागपत्नीवाक्यानि कृपाकुलमनाः कृष्णः चरणप्रहारभुग्नमस्तकं फणिनं सपदि तत्याज । ततो लब्धप्राणो नागो विनम्रः सन् हरिमुवाच—नाथ ! वयन्तु जन्मनैव खलाः, यदा सर्वेषामेव प्राणिनां स्वभावो दुरतिक्रमः तदा दीर्घमन्यूनामस्माकन्तु का कथा । सर्वज्ञस्त्वं निग्रहमनुग्रहं वा यथा इच्छसि तथा कुरु । कार्यमानुषो हरिर्भुजगस्येत्थं वचः समाकर्ण्य प्रत्यवदत्—सर्पराज ! त्वयात्र न स्थेयम्। द्रुतमेव सकुटुंबो याहि रमणकद्वीपम् । अतः परं मत्पादलांछितं त्वां सुपर्णो न पीडयिष्यति । सरिदेषा भागीरथीभगिनी गोगोपहितैषिणी भवतु । अतः परं यः कोऽपि

सायं प्रातः संध्ययोरुभयोर्वा वृत्तान्तमावयोः स्मरिष्यति स सर्पबाधां न कदाप्येष्यति । योऽत्र स्नात्वा जलेन देवानर्चयेत्, पितॄन्वा तर्पयेत्, समुपोष्य च मां स्मरेत्सोऽपि सर्वपापैः प्रमुच्यते । एवमाकर्ण्य श्रीकृष्णवचनं सर्पो बाढमित्युक्त्वा षोडशोपचारैर्जगन्नाथं संपूज्य प्रसाद्य परिक्रम्य च सपरिवारः सत्वरं निर्दिष्टस्थानमगात् । एवं श्रीकृष्णप्रभावात् कालिन्दी निर्विषा लोकोपकाराय समर्थाऽभवत् ।

इति श्रीकृष्णचरिते कालियोद्धारनिरूपणं नाम त्रयोविंशः स्तवकः ॥ २३ ॥

अत्रैषाख्यायिका—पुरा मातृवैरमनुस्मरन् गरुडः प्रत्यहं सर्पान्भक्षयामास । एतदालोक्य वासुकिप्रमुखाः सर्पा ब्रह्माणं शरणमगमन् । ततो विरंचिः सुपर्णमाहूय सन्धिं कारयित्वा च नियमेन बलिं कल्पयामास । तदाप्रभृति नागाः स्वं स्वं देवतया स्वीकृतं भागमात्मरक्षणार्थं पर्वणि पर्वणि वानस्पत्यं बलिं प्रायच्छन् । अथैकदा मदान्धः कालियस्तस्मै भागं नाऽददात् । प्रत्युतान्यदत्तमपि करं बुभुजे । एतदुपाकर्ण्य स्वापमानमसहमानस्तार्क्ष्यः सहसा तन्निहन्तुं तत्राजगाम । अथ सुपर्णमापतन्तं विलोक्य कालियोऽपि योद्धुं सम्मुखो बभूव । ततस्तयोर्युद्धमभूत् । महाविषो भुजंगमो दद्भिस्तमदशत् । तदा कोपाकुलो गरुडो हिरण्यरोचिषा सव्येन पक्षेण तं जघान । ततः पक्षाभिहतो भुजगो

विह्वलो भूत्वा गरुडागम्यं गभीरं च कालिन्दीहृदं प्रविवेश ।

अत्राप्येकाऽऽख्यायिका—आसीत्तपोधनः सौभरिः। स महा-मुनिः कालिन्दीकूले कठिनां तपश्चर्यामकरोत् । ऋषितपःप्रभावात् महामत्स्या अपि स्वल्पकलेवरान् मीनान् व्यापादयितुं समर्था नाऽभूवन् । अथैकदा सौभरिणा निवारितोऽपि वैनतेयो जिह्वा-लौल्यात् मत्स्यानपाहरत् । ततः सुदुःखितान् जलचरान् दृष्ट्वा कृपान्वितो मुनिरुवाच—यदि गरुडोऽत्र आगत्य मत्स्यान् खादिष्यति तदा सद्य एव स प्राणवियोगात्मकं दंडं अवाप्स्यति । तं मुनिशापं कालिय एव वेद, नान्यः कश्चित् । सोऽयं गरुड-भीतस्तत्रावात्सीत् । त्रिकालज्ञो जनार्दनो व्रजजनहिताय तं स्वपौरुषेण निःसारयामास । 'परोपकाराय सतां विभूतय' इति लोकोक्तिः सत्यास्ति ।

इति श्रीकृष्णचरिते कालियवासकारणनिरूपणं नाम चतुर्विंशः स्तवकः ॥ २४ ॥

अथ नन्दादयो गोपा यशोदाद्या गोप्यश्च कृष्णं दिव्यस्र-ग्गन्धवाससं महामणिगणाकीर्णं हृदान्निष्क्रान्तं च समुपलभ्य प्रमोदनिभृतात्मानो लब्धप्राणा देहा इव बभूवुः । ततस्ते गोपाः प्रीत्या तमभिरेभिरे । तत्रत्या गोवृषवत्सनगा अपि परमां मुदं लेभिरे । ततोऽतितुष्टो नन्दराजः समागतेभ्यो विप्रेभ्यो गो-सुवर्णवस्त्राणि प्रादात् । महाभागा यशोदाऽपि संकटमुक्तं

गोपालं परिष्वज्य स्वांकमारोप्य च जलमानन्दजं मुमोच । ततः श्रमकर्षिता लोका गावश्च तत्रैव रवितनयातीरे सुषुपुः । अथ निशीथे शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजमावृत्य सहसा दग्धुमुपचक्राम । अथ दह्यमाना व्रजौकसः मायामनुजविग्रहं कृष्णं शरणमुपगम्य प्रोचुः—

कृष्ण ! कृष्ण ! महाभाग ! हे रामामितविक्रम !
एष घोरतमो वह्निस्तावकान् ग्रसते हि नः ॥

संप्रति शरणागतान्नः पाहि । त्वच्चरणशरणं विहाय वयं नान्यत्र गन्तुं शक्नुमः । इति भक्तजनवचः श्रुत्वा कृष्णचन्द्रो लोकोपकाराय तीव्रतरमपि तमग्निमपिबत् । उक्तं च—

नमस्कारप्रियो भानुः, जलधाराप्रियः शिवः ।
उपकारप्रियो विष्णुः, ब्राह्मणो मधुरप्रियः ॥

ततः प्रमुदितात्मभिराभीरैः परिवृतो भगवानपि गोकुलमंमितं व्रजं प्रविवेश ।

इति श्रीकृष्णचरिते दावानलपानलीलावर्णनं नाम पंचविंशः स्तवकः ॥ २५ ॥

एवं गोपालच्छद्ममायया व्रजे क्रीडतो रामलक्ष्मणयोः शरीरिणां नातिप्रेयान् ग्रीष्मर्तुराजगाम । यद्यपि सर्वत्र निदाघः प्रासरत्तथापि व्रजमंडले विशेषतश्च वृन्दावने रामकृष्णयोः प्रभावात् वसन्त इव लक्षितोऽभवत् । अथैकदा गोगोपगणैः परिवृतौ

गोपालो रामं पुरस्कृत्य निर्झरनिर्ह्लादनिवृत्तस्वनझिल्लीकं शश्वत् तच्छीकरस्निग्धद्रुममंडलमंडितं गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् नदच्चित्रमृगद्विजं च यमुनातटमगात् । सोऽथ कल्हारकंजोत्पलरेणुहारिणा सरित्सरःप्रस्रवणोर्मिवायुनातिसुखमवाप्य मित्रमंडलीं जगाद——वयस्याः ! अत्रागाधतोयह्लादिनीतटोर्मिभिः पुलिनैः समन्ततो द्रवत्पंकवत्यः शाद्वलभूमयो राजन्ते । यासां शाद्वलतां ग्रीष्मकालीना त्रिषवदुल्वणा अपि चंडांशुकरा नापहरन्ति । तच्छ्रुत्वा गोपालदारकाः प्रोचुः——सखे ! सत्यम् । ततो वेणुं विरणयन् बलसंयुतो नन्दनन्दनः क्रीडितुमारभत । तदा गुंजाफलमालामंडिता गोपकुमारा ननृतुः, जगुर्मिथश्च मिथ्यायुद्धं चक्रुः ।

एवं तत्र गोपैः सह पशून् चारयतोः सतो रामकृष्णयोः तयोर्जिहीर्षया प्रलम्बासुरो धृत्वा गोपरूपं सहसा समाययौ । ततः सर्वविद् भगवान् ज्ञात्वाऽपि तस्य तत्कापट्यं तेन साकं सख्यमन्वमोदत । अथोपायज्ञो हरिर्गोपानुवाच——सहृदयाः ! द्वंद्वीभूय वयं वयोबलाद्यनुरूपं विहरिष्यामः । निशम्यैतद् गोपा रामकृष्णावेव कक्षानायकौ चक्रुः । ततः केचित् कृष्णसंघट्टिनोऽपरे च रामपक्षीया अभूवन् । ततस्ते विविधाः क्रीडा आचेरुः । एकदा अस्पृश्यलीलां चक्रुः । तत्र यदि रामसंघट्टिनां मध्ये कोऽपि कृष्णसंघट्टिनं कमपि स्पृशति तदा रामसंघट्टिनः सर्वे एव जेतारः संतस्तान् कृष्णसंघट्टिन आरोहन्ति । ते च

कृष्णसंघट्टिनः पराजिताः सर्वे तान् रामसंघट्टिनो यथायोग्यं वहन्ति । एवं यदा कृष्णसंघट्टिनां मध्ये कोऽपि रामसंघट्टिनं कमपि स्पृशति तदा कृष्णसंघट्टिनो जेतारः सन्तस्तानारोहन्ति ते च तान् वहन्ति । क्रमेणानेन कृष्णपुरोगमा गोपा वहन्तो वाह्यमाना गाश्चारयन्तश्च भांडीरकं नाम वनमवापुः । अथ रामसंघट्टिनः श्रीदामवृषभादयः तमेव वटमवरोहणस्थानं परिकल्प्य तत्समीप एव क्वचिदारोहणस्थानं निर्धारयामासुः । अत्रान्तरे रामपक्षीया जिग्युः । पराजितः कृष्णः श्रीदामानं भद्रसेनो वृषभं प्रलंबश्च रोहिणीनन्दनमुवाह । सोऽथ धरणीधरेंद्रगौरवं तमुद्वहन् यदा विगतरयोऽभवत् तदा निजमासुरं भयावहं रूपं दध्रे । तदा पूर्वन्तु हलधर ईषदत्रसत् किन्तु कृष्णसंकेतं समवाप्य कोपाकुलो द्रढमुष्टिना तच्छिरसि अहनत् । येन विदीर्णमस्तको रुधिरमुद्वहन् वज्राहतो गिरिरिव धरण्यामपतत् । एवं बलशालिना रामेण हतं प्रलंबं दृष्ट्वा गोपा विस्मिता अभूवन् । ततस्ते साधु साधु इति वदन्तः शुभाशीर्वादैस्तमच्युताग्रजं परितोषयामासुः । एवं पापे प्रलंबे निहते देवा अपि परमसन्तोषमवाप्य गगनात्पुष्पवृष्टिं चक्रुः । अथ सायंकाले सुखेन समायातं बलभद्रं प्रेम्णा समालिंग्य रोहिणीप्रभृतयो गोकुलनार्यः परमां प्रसन्नतामवापुः । अथ नन्दराजोऽवदत्—वत्सौ ! पयःपानं व्यायामं च मा व्यस्मरतम् । उक्तं च—

व्यायामाद्वर्धते गात्रं, व्यायामाद्वर्धते बलम् ।
व्यायामाद्वर्धते बुद्धिस्तस्माद् व्यायाममाचरेत् ॥

इति श्रीकृष्णचरिते प्रलंबासुरवधनिरूपणं नाम षड्विंशः स्तबकः ॥ २६ ॥

अथैकदा क्रीडाऽऽसक्तेषु गोपेषु यथेष्टं चरन्त्यो गावः तृणलोभेन दुःप्रवेशं वनं विविशुः । ततो दावाग्निपरिभूता अजागोमहिष्यः वनाद्वनं निर्विशन्त्य इषीकाटवीं प्रापुः । अथ रामादयो गोपगणा यदा तत्र पशून्नापश्यन् तदा तेषां पद्धतिं चिन्वन्तोऽनवाप्य तान् नष्टाजीव्यास्ते पश्चात्तापग्रस्ता बभूवुः । ततो मार्गाभावात् निवर्तमानं स्वगोधनं समेत्य कृतार्थास्तेऽपि न्यवर्तन्त । अत्रान्तरे भगवता समाहूतास्ताः स्वनाम्नो निनदं श्रुत्वा प्रहर्षिताः सत्यः प्रतिनेदुः । तस्मिन्नेवावसरे तत्र प्राणिदौर्भाग्येन सहसा दावानलः प्रादुर्बभूव । सोऽथ वायुसहा- यतामवाप्य तीक्ष्णविस्फुलिंगैर्यदा गोपान् पीडयितुमारेभे, तदा मृत्युभयार्दिता गोपाः कृष्णं प्रार्थयामासुः । ततः भक्तवत्सलो भगवानपि माऽभैष्ट लोचनानि च सम्मीलयत, इत्यभाषत । ततो निमीलिताक्षेषु तेषु मुखेन तमुल्बणमग्निं पीत्वा तान् भांडीरं च नीत्वा कृच्छ्रान्मोचयामास । अथ कृष्णप्रेरिता गोपा यावदक्षीण्युन्मीलयंति तावत् भांडीरमेव पश्यन्ति न च तां

मुंजाटवीम् । ततस्ते गोपाः कृष्णस्य योगमायां निशम्य विस्मिता अभूवन् । एवं कृष्णकृपया दावानलात् स्वक्षेमं समवाप्य भगवन्तं सर्वेश्वरममन्यन्त सर्वे गोपाः । ततः सरामो जनार्दनोऽपराह्णे गाः संनिवर्त्य वेणुं विरणयन् गोपैरभिष्टुतः च गोष्ठमाजगाम । तस्मिन्समये गोविन्ददर्शनमवाप्य गोप्यः परमानन्दमवापुः । येन विना तासां क्षणमपि युगशतमिव व्यतीयाय । ततो गृहमुपेत्य गोपाः भगवन्माहात्म्यं मातृप्रभृतिभ्यः समाचख्युः । तच्छ्रुत्वा सर्वास्ताः श्रीरामकृष्णयोर्विलक्षणं पराक्रमं मुहुर्मुहुः प्रशशंसुः ।

इति श्रीकृष्णचरिते गोपानां दावाग्निमोक्षनिरूपणं नाम सप्तविंशः स्तवकः ॥ २७ ॥

अथ गच्छता कालेन, सत्कवितेव सर्वजनाह्लादिनी, उदारबुद्धिरिव सर्वत्र वर्षिणी, तपःफलसिद्धिरिव कृशतानिवारिणी, सुराजनीतिरिव प्रजासंवर्धिनी, नाट्यशालेव विविधदृश्यप्रदर्शिनी, समाच्छादितशशिभास्करा राहुशक्तिरिव, पर्वतविदारिणी पविरिव, विचित्रांबरा वारवनितेव, सत्पथविरोधिनी नास्तिकतेव, मर्यादाध्वंसिनी कुलटेव, प्रावृट् प्रावर्तत । तां विलोक्य गोपकुमाराः कदम्बच्छायासमासीनं नन्दसूनुं समुपेत्यापृच्छन्—भगवन् ! कृपया वृष्टिकारणं वद । तच्छ्रुत्वा हरिरुवाच—सखायः ! शृणुत—

अग्नौ प्रास्ताऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥

कार्तिकादारभ्य ज्येष्ठमासपर्यन्तं भगवान् भास्करो भूम्या जलरूपं वसु निपीय पुनस्तदेव वर्षाकाले मुंचति । एवमेव सुभूपालोऽपि सुभिक्षे प्रजाभ्यः करादिकं गृहीत्वा दुर्भिक्षसमये ताभ्य एव संप्रयच्छति । प्रावृषि नवजलधरं दृष्ट्वा शिखंडिनस्तथा हृष्यंति यथा तापत्रयदग्धा गृहस्था गृहाऽगतं महात्मानं निरीक्ष्य प्रसीदन्ति । जलोपान्ते तूष्णीं शयाना मंडूका मेघनिनदं श्रुत्वा तथा गिरो विसृजंति यथा गुरुकुले मौनावलंबिनश्छात्रा गुरुजनानुशासनं समाकर्ण्य स्वाध्यायं समारभन्ते । मेघाच्छन्नानि नक्षत्राणि तथा न प्रकाशन्ते यथाऽहंकारग्रस्ता जीवाः परमतत्वज्ञाने दीप्तिमन्तो न भवन्ति । दृढसेतवो वृष्टिजलैस्तथा न भिद्यन्ते यथा कामिप्रलोभनैः सतीनां मनांसि पातिव्रत्यान्न च्यवन्ते । किं बहुनोक्तेन, अस्यर्तोरसंख्या गुणाः सन्ति । जलेन विना जीवनं न भवति । अत एव जलार्थं प्रार्थना क्रियते । अत्र श्रुतिः—

पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे ।
पयो धाः पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ यजुः ॥

एवमाकर्ण्य सर्वे गोपाः प्रासीदन् । ततः सबलो हरिर्गोगोपालान्

पुरस्कृत्य प्रावृट्श्रियायुक्तं पक्वखर्जूरं जंबुमञ्च विहर्तुं वृन्दावनं प्रविवेश ।

अथोधोभारेण मन्दगामिन्यः स्नुतस्तन्या अपि धेनवो भगवता समाहूताः सहसा समाययुः । ता विलोक्य प्रसन्नाः कुमारा हरिं मंगलपदार्थान पप्रच्छुः । तच्छ्रुत्वा हरिरुवाच—सखायः ! शृणुत—

लोकेऽस्मिन् मंगलान्यष्टौ, ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्यः, आपो राजा तथाष्टमः ॥ १ ॥
एतानि सततं पश्येत्, नमस्येदर्चयेच्च यः ।
प्रदक्षिणं च कुर्वीत, तथा चायुर्न हीयते ॥ २ ॥

अथ भगवन्मुखाच्छ्रुत्वोपदेशं गोपास्तुष्टा अभूवन् । ततो हरिशोभां निरीक्ष्य मृगपक्षिगणा अपि प्रमोदातिशयमवापुः । अथाऽच्युतो गिरिनिर्झराणां शब्दं श्रुत्वा जहर्ष । ततः शाद्वलोपरि समुपविश्य मीलितनयनान् गोवृषवत्सतरांश्च वीक्ष्य बलभद्रः कृष्णमुवाच—तात ! 'गावः प्रतिष्ठा भूतानाम्' वाक्यमेतदक्षरशः सत्यम् । अत्र श्रुतिः—

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागं सोमेनातनच्मि विष्णो हव्यꣳ रक्ष ॥ यजुः ॥

माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः ।
प्रनुवोचे चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ यजुः ॥

ततः प्रावृट्शोभां वर्णयन् रौहिणेयः सकृष्णः सगोपगणश्च वृन्दावनमाजगाम ।

इति श्रीकृष्णचरिते प्रावृड्वर्णनं नाम अष्टाविंशः स्तवकः ॥ २८ ॥

एवं व्रजे वसतो रामकृष्णयोः, पत्नीव प्रभाकरस्य, जननीव पितॄणां, भगिनीव विभावसोः, दासीव शशांकस्य, धात्रीव विजिगीषुभूपतीनां, जन्मभूमिरिव जपोपवासानां, महत्वहारिणीव च मेघमालानाम्, शरत्प्रादुर्बभूव । तस्यां योगिमनांसीव स्वच्छानि भवन्ति नीराणि । यतिहृदयमिव नभो निर्मलतारकं शोभते । रिक्ता अपि जलदा दानकृशा धनाढ्या इव स्तुत्यपदं लभन्ते । सुपाठका यथा पात्रतां विचिन्त्य विद्यार्थिभ्यो विद्यां ददति नान्येभ्यः तथा पर्वता अपि कस्मैचित्तोयं ददति कस्मैचिच्च न वितरन्ति । जलजन्तवः क्षुद्रजलाशयेषु क्षीयमाणं सलिलं न विदन्ति यथा बहुकुटुंबिनः अविवेकिनश्च प्रत्यहं क्षय्यमायुषो भागं नावगच्छन्ति । स्थलानि पंकतां वीरुधश्चापक्वतां तथा जहति यथा महात्मानो देहादिष्वनात्मवस्तुषु ममतां अहन्तां च परित्यजन्ति । समुद्रो निश्चलांबुः निर्घोषश्च तथा तिष्ठति यथा मुनिर्वैराग्यमवलंब्य ध्यानमग्नो भूत्वा च वादविवादौ परिहरति । कृषकाः शालिक्षेत्रेभ्यः क्षरत्सीरापो दृढसेतुभिस्तथा रक्षन्ति यथा योगिनः क्षुभितैरिंद्रियैः स्रवज्ज्ञानं यमनियमाद्य-

ष्टयोगांगैर्मनोनिग्रहं कृत्वा रक्षन्ति। सूर्योदये कमलानि विकसन्ति कुमुदानि च तथा संकुचन्ति यथा नीतिनिपुणे महीपाले प्रजाः शासति सति धर्मात्मानः प्रसीदन्ति किन्तु चौरदस्युद्यूतकाराः विषीदन्ति। सुधाकरो दिवकरांशुजांस्तापान् हृत्वा कर्षकांस्तथा प्रमोदयति यथा मुकुन्दो व्रजवासिनां त्रिविधान् परितापान् परिहरति। सर्वशस्याढ्येयं भूतधात्री तथा विभाति यथा धर्मनिष्ठसाम्राज्ये विविधसामग्रीसमेता वेददेवप्रतिष्ठिता यजनस्थली सुशोभते। प्रावृषि नियमरुद्धा मुनिनृपछात्रवणिजः समुपस्थितां शरदमालोक्य यात्रार्थं प्रवृत्तास्तथाऽर्थसिद्धिमाप्नुवन्ति यथा दैवयोगात् पूर्वं कष्टमनुभवन्तो लोकाः पश्चात्पुण्यप्रभावात् सिद्धां दशां समवाप्य सफलश्रमाः सन्तः सततं सुखमनुभवन्ति।

इति श्रीकृष्णचरिते शरद्वर्णनं नाम
एकोनत्रिंशः स्तवकः॥ २९॥

अथ कदाचित् गोगोपसमन्वितोऽच्युतः पुरस्कृत्याग्रजं पद्माकरसुगन्धिना व्याप्तं शरत्स्वच्छसलिलं कुसुमितवनराजिमत्तभृंगाद्विजकुलघुष्टसरित्सरोमहीध्रम् वृन्दावनं प्रविवेश। ततस्तत्र देशकालज्ञो हरिः सर्वसुखावहं वेणुमवादयत्। तच्छब्दं श्रुत्वा व्रजवनिता मिथः प्रोचुः—अल्यः! एतद् वृन्दारण्यन्तु स्वर्गादपि विशिष्टतरम्। उक्तं च—

वृन्दावनं च वैकुंठं, विरंचिः समतोलयत् ।
भारवद् भूतलेऽतिष्ठल्लघुरूर्ध्वमगात् स्वतः ॥

तच्छ्रुत्वाऽन्या प्राह—सत्यमेतत् यत्र गोविन्दचरणपंकजं तत्स्थानं भूरि भाग्यं भवति इति मे मतम् । अहा ! मह्यन्तु श्रीकृष्णमनोहरमूर्तिदर्शनम् अतीव रोचते ।

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारम् ।
बिभ्रद्वासः कनकरुचिरं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैः ।
वृन्दारण्यं स्वपदरमणं प्राविशद् गोपकीर्तिः ॥

अथाऽपरा प्राह । नात्र सन्देहः सखि !

ध्यानं बलात् परमहंसकुलस्य भिन्दन् ।
निन्दन् सुधामधुरिमाणमधीरधर्मा ।
कन्दर्पशासनधुरां मुहुरेव शासन् ।
वंशीध्वनिर्जयति श्रीनटनागरस्य ॥

वेणुरयं पूर्वजन्मनि किं सुकृतं कृतवान् यद् गोपिकानामपि दुर्लभं दामोदराधरपीयूषं पुनः पुनः पिबति । ततोऽपरा तदीयवाक्यमनुमोदयन्ती प्राह—अये ! त्वं किन्न जानासि यदयं वंशो पूर्वं वने तपश्चर्यार्थमूर्ध्वबाहुरिवैकाकी ग्रीष्मे घर्मं वर्षासु जलं हेमन्ते च शैत्यकष्टं अनुभवन् चिरकालं तस्थौ । अपरं च—हरिमुखात् महामंत्रमेकाक्षरं श्रुत्वा विरंचिर्लोकरचनायां समर्थो

भवति, एतन्तु प्रतिदिनं प्रभुर्मन्त्रं श्रावयति, अतोऽस्य भाग्यन्तु वर्णनातीतमस्त्येव। अन्याऽपि तमेव वाक्यं समर्थयन्ती प्राह— प्रिये! सत्यमेवैतत्। इमे वंशा यासां पयसा पुष्टास्ता मातृतुल्याः सरितोऽपि विकसितकमलामिषेण रोमांचिता इव लक्ष्यन्ते। येषां वंशे च जातास्ते तरवोऽपि मधुधारामिषेण आनन्दाश्रु मुंचन्त इव प्रतीयन्ते। अत्रत्या मयूराः नीलनीरदाभं मुकुंदं मेघनिनादं च वेणुध्वनिं मन्यमाना नृत्यन्ति। इमा कपिलाद्या धेनवः कृष्णमुखान्निर्गतवेणुगीतसुधां उन्नमितैः कर्णपुटैः पिबन्त्य इव तिष्ठन्ति। पश्य! स्तन्यपाने प्रवृत्ता अपि वत्सा मनोहरं वेणुरवं श्रुत्वा तदाकृष्टचित्ताः सन्तः स्तनक्षारितदुग्धग्रासमुखा एव लक्ष्यन्ते। इमे कदम्बशाखास्थिता खगाः वेणुजनितमधुर-गीतं श्रुत्वा चित्रीयन्ते। एवं बहुविधाः भगवतो लीलावर्ण-यन्त्यो गोपांगनाः श्रीकृष्णपरायणा बभूवुः। उक्तं च—

चेतो दर्पणमार्जनं भवमहादावाग्निनिर्वापणम्।
श्रेयः कैरवचन्द्रिकावितरणं विद्यावधूजीवनम्।
आनन्दांबुधिवर्धनं प्रतिपदं पूर्णामृतास्वादनम्।
सर्वात्मस्नपनं परं विजयते श्रीकृष्णसंकीर्तनम्॥

इति श्रीकृष्णचरिते वेणुगीतनिरूपणं नाम
त्रिंशत्तमः स्तवकः॥ ३०॥

ततः कदाचित् हेमन्तारम्भे हविष्यं भुंजाना राधिकाद्या गोपकुमारिकाः कात्यायनीपूजनव्रतं चक्रुः । तत्र ता अरुणोदयवेलायां यमुनाजलेऽन्योऽन्याऽऽबद्धबाहवः स्नात्वा तत्तीरे सैकतीं प्रतिमां रचयित्वा षोडशोपचारैः प्रत्यहं सम्पूजयामासुः । ततो भक्तिविनम्रकन्धरास्ता भगवतीं तुष्टुवुः—

कात्यायनि ! महामाये ! वांछितार्थप्रदायिनि !
नन्दसूनुं पतिं देहि महादेवि ! नमोऽस्तु ते ॥

भगवान् गोचारणसमये वंशीद्वारा सप्तस्वरमयं गीतं गायति स्म । तच्छब्दं श्रुत्वा सर्वा एव गोपकन्या मोहमापद्यंते स्म । अथैकदा वेणुवाद्यमोहिता राधिका कृष्णं वंशीं ययाचे । हरिस्तामुवाच—वृषभानुनंदिनि ! सम्प्रत्यहं तां दातुमसमर्थः यतोऽयं गोचारणसमयः । प्रत्यहं वने वंशीवटस्थान् सखीन् श्रावयित्वा वंशीं विनोदयाम्यात्मानम् । सायाह्ने त्वमवश्यं नेतुमर्हसि । उक्तं च—

अश्वं शस्त्रं शास्त्रं धेनुं वीणां स्रजं तथा मुद्राम् ।
यष्टिं सुलेखनीं च दद्याज्ज्ञानी फलाऽफले बुद्ध्वा ॥

एवं श्रुत्वाऽपि परिहासपट्वी मानवती च राधाऽवकाशमवाप्य एकदा तां जहार । सखीप्रेरणया वस्त्रेण वेष्टयित्वा कदंबशाखायां च क्वाऽपि बबन्ध । अथ प्रभातेऽच्युतः प्रस्थानसमये यावत्तां

पश्यति तावन्न लभते। ततः स राधाचेष्टां ज्ञात्वा तामन्वेष्टुं कालिन्दीकूलमगात्। तत्र कुमारीणामर्चनप्रकारं दृष्ट्वाऽतीव तुष्टो बभूव। अत्रान्तरे राधाऽपि तत्र सखीसमेता स्नातुमाजगाम। ततो राधासहचरी ललिता उवाच—राधे! नात्र कश्चिद् द्रष्टा पुरुषोऽस्ति, अतो वस्त्राणि धृत्वा स्नातुं आगच्छ। विवस्त्रा विशाखाऽपि सखीसमेतैषा स्नास्यति। एवं सख्याऽनुरुद्धा राधिका विवस्त्रा मौग्ध्याज्जलं प्रविवेश। ततो हरिरागत्य जलस्थां राधां अपृच्छत्—राधिके! मदीया मुरली क्वाऽस्ति? तदा विहस्य राधोवाच—कृष्ण! नाऽहं वेद्मि। ततो नन्दसूनुः 'हास्ये हास्यं समाचरेत' इति वाक्यं स्मृत्वा तासां वस्त्राणि नीत्वा कदंबमारुरोह। अत्रान्तरेऽन्ये अपि समायाता गोपकुमारा जहसुः। ततोऽन्या गोपांगनास्तु स्ववस्त्राणि पर्यदधुः, किं च सखीसमेता राधिका अवस्त्रा जलेऽतिष्ठत्। तास्वेका सविनयमुवाद—कृष्ण! तव परिहासन्तु राधा एव करोति अतः तस्यैव वस्त्राणि रक्ष। तच्छ्रुत्वा कृष्णोवाच—सख्यौ! युवामपि तु यदा-कदा राधापक्षं गृह्णीथः। एकाऽवदत्—राधे! कलहमूलं हासो रोगमूलं च कासो निगद्यते। यदि त्वया मुरली नीता चेद् द्रुतं ज्ञापय, अन्यथा वयं तु शैत्यात्सीदामः। अत्रान्तरेऽन्या कृष्णमुवाच—देव! त्वन्तु सर्वज्ञोऽसि अतो द्रुतं निवारय शीतबाधाम्। निशम्यैतद्धरिरुवाच—कन्याः! वेद्म्यहं

सर्वं किन्तु धृतव्रता अपि यूयं विवस्त्राः सत्यो यदपो व्यगाहत तदेतद्देवहेलनं कृतं युष्माभिः । अत्र श्रुतिः—

अप्स्वग्निर्देवताश्च तिष्ठन्ति, अतो नाप्सु मूत्रपुरीषं कुर्यान्न ष्ठीवेन्न विवसनः स्नायात् । गुह्यो वा एषोऽग्निः ॥

अतः पापापनुत्तये आदित्याभिमुखं मां प्रणमत । एवं हरिवाक्यं श्रुत्वा नग्नस्नानेन व्रतच्युतिं मत्वा तत्पूर्तिकामास्ताः सर्वकामफलप्रदातारं भगवन्तं ववन्दिरे । ततो लज्जिता राधिकाऽपि भगवते मुरलिकापरिचयं प्रादात् । ततस्तुष्टो हरिः ताभ्यो वासांसि प्रायच्छत् ।

अथ कृष्ण उवाच—गोप्यः ! याः स्त्रियो—"न नग्नस्नानमाचरेत्" इतिस्मृतिवाक्यमवधीरयन्ति ता एव विवसनाः स्नान्ति । सत्यवसरे एवमेव ताः कष्टमनुभवन्ति विशेषतः कंसराज्ये, इति लोकशिक्षणार्थमेव चीरहरणलीलां कृतवानहम् । एवं श्रुत्वा ताः सर्वा एव नग्नस्नानहानिमज्ञासिषुः । पुनः कृष्णोवाच—नार्यः ! युष्मासु या भगवतीं समभ्यर्च्य पतित्वेन मया सह रमणविषयकं यं मनोरथं कृतवती स तस्याः संकल्पोऽवश्यं सिद्धिमेष्यति । तपसा सर्वमसाध्यमपि सुसाध्यं भवति । भद्राः !

न मय्यावेशितधियां कामः कामाय नेष्यते ।
भर्जिताः क्वथिता धाना प्रायो बीजाय नेष्यते ॥

सिद्धार्था यूयमधुना तु व्रजं यात। आगामिनीषु शरद्रात्रिषु मया सह रंस्यथ। इति तद्वाक्यं श्रुत्वा ता हरिं ध्यायन्त्यः स्वसदनानि ययुः। ततोऽच्युतोऽपि गाश्चारयन् वृन्दारण्याद् दूरमगमत्।

अथ प्रख्यातान् सफलाँश्च वृक्षान्विलोक्य हरिरुवाच—सखायः! एषां परोपकारदीक्षितानां वृक्षाणां जगति जन्म प्रशस्तम्।

भवन्ति नम्रास्तरवः फलोद्गमैर्नवांबुभिर्भूरि विलंबिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥

इति श्रीकृष्णचरिते चीरहरणलीलानिरूपणं
नामैकत्रिंशत्तमः स्तवकः॥ ३१॥

अथैकदा मध्याह्ने गोपा अवोचन्—रामकृष्णौ! एषाऽतिदुःसहा क्षुन्नो बाधते। कृपया तच्छान्तिं कुरुतम्। श्रुत्वैतद् गोपवचनं हरिरुवाच—सत्यमेतत्, "क्षुत् खलु वै मनुष्यस्य भ्रातृव्य" इति भगवती श्रुतिरपि प्रतिपादयति। सोऽथ विप्रपत्नीनां परमां भक्तिं विचिन्त्य प्राह—सहृदयाः! इतो नातिदूरे वेदार्थोपदेष्टारो ब्राह्मणाः स्वर्गकाम्यया आंगिरसं सत्रमनुतिष्ठंति। यूयमिदानीमेव यज्ञवाटं गत्वा तत्राऽर्यस्य बलभद्रस्य किंवा ममाभिधानम् कथयित्वा तेभ्य ओदनं याचत। एवं भगवता

समादिष्टास्ते बाढमित्युक्त्वा तत्र जग्मुः । ततस्ते भुवि दंडवत्पतित्वा सविनयं प्रोचुः——भूदेवाः ! भद्रमस्तु भवताम् । श्रीरामकृष्णाभ्याम् प्रेरितानस्मानत्र समागतान् जानीत । इतो नातिदूरे गाश्चारयन्तौ श्रीरामकृष्णौ सम्प्राप्तौ । क्षुधान्वितौ तौ युष्माकमादनमभिलषतः । धर्मज्ञा यूयं अन्नदानमाहात्म्यमवगच्छथ एव ।

दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति ॥

इति गोपवाक्यानि श्रुत्वाऽपि वृद्धमानिनस्ते भगवन्तमधोक्षजं न मेनिरे । ततो निराशा गोपाः प्रत्येत्य रामकृष्णयोस्तत्रत्यं वृत्तं जगदुः । तच्छ्रुत्वा लौकिकीं गतिं विचिन्त्य विहसन् हरिः उवाच——सखायः । निर्वेदं मा कुरुत । ससंकर्षणं मां समागतं विप्रपत्नीभ्यो ज्ञापयत । मद्भक्तास्ताः पुष्कलान्नं वो दास्यंति । एवमनुज्ञाप्य गोपाः पुनस्तां यज्ञशालां गत्वा तत्र समासीनाः द्विजसतीः प्रणम्य सविनयमेतदब्रुवन्——महाभागाः ! कृपया नो वचांसि निबोधत । इतोऽति निकटे विचरता कृष्णेन वयं इह प्रेषिताः स्मः । सरामः सगोपालश्च स यशोदानंदनो बुभुक्षितस्य स्ववर्गस्य हिताय भोजनं वांछति । अतो यथाशक्ति साहाय्यं दत्त । निशम्यैतद् वचनं भगवद्दर्शनोत्सुकास्ताः पतिपुत्रभ्रातृबन्धुभिर्निषिध्यमाना अपि षड्रससमन्वितमन्नं नीत्वा यथा नद्यः समुद्रमुपगच्छन्ति तथा हरिं उपजग्मुः । अत्रान्तरे

काचिद्भर्त्रा निरुद्धा मनसैव हरिं ध्यायन्ती कर्मानुबंधं देहं सद्यस्तत्याज । ततस्ताः सर्वा अशोकनवपल्लवमंडिते यमुनोपवने गोगोपालगणसमेतं साग्रजं श्यामसुन्दरं विलोक्य लोचनछिद्रैस्त-मन्तःकरणे प्रवेश्य समाश्लिष्यन्। तस्मिन्नवसरे यथाऽहंकारवृत्तयः सुषुप्तिसाक्षिणं प्राज्ञं समालिंग्य चिन्तां त्यजन्ति तथा संसारजं तापं ताः पर्यहरन् । अथ ता विनिवेद्य भोजनसामग्रीं बद्धांजल-यस्तस्थुः । एवमालोक्य प्रहसिताननो नंदसूनुः प्रोवाच—महाभागाः ! वः स्वागतम् । अलंकुर्वन्तु भवत्यः पुनीतं यमुनोपवनम्। कथयत किं प्रियं करवाम। भवतीभिर्दत्वान्नं पुण्य-मुपार्जितम् । दर्शनं जातं, संप्रति कृतार्था यूयं यज्ञवाटं व्रजत । गृहमेधिनः स्वामिनो भवतीभिः सहैव यज्ञानुष्ठानं पारयिष्यन्ति । श्रुत्वैतत् विप्रपत्न्यः प्रोचुः—

मैवं विभोऽर्हति भवान् गदितुं नृशंसम् ।
सत्यं कुरुष्व निगमं तव पादमूलम् ।
प्राप्ता वयं तुलसिदामपदावसृष्टम् ।
केशैर्निबोढुमतिलंघ्य समस्तबन्धून् ॥

देव ! वयमत्र गृहकृत्यानि विहाय समायाताः । अतः पतयोऽप्यस्मान्न ग्रहीष्यन्ति । बान्धवास्तु दूरे तिष्ठन्तु । भवदीयपादपद्मयोः पतितात्मनाम् अस्माकं त्वत्तोऽन्या गतिर्न विद्यते । एवमाकर्ण्य

वाक्यानि व्रजराज उवाच—द्विजपत्न्यः ! साध्वसं त्यजत, मयोपेतान् युष्मान् पतयो नाभ्यसूयेरन् । न चान्ये लोका अपि । किमधिकेन यज्ञभागिनो देवा अपि निर्दोषतयांगीकरिष्यन्ति भवतीः । मयि मनो युंजाना यूयमचिरान्मां समवाप्स्यथ, इति प्रबोधिता द्विजपत्न्यः पुनर्यज्ञवाटमगमन् । ततो ब्राह्मणाः स्त्रीणान्तु भगवति कृष्णेऽतिदृढां भक्तिं स्वेषु च श्रीविश्वेश्वरयांचावैफल्यं च विचिंत्य मुहुर्मुहुः पश्चात्तापं चक्रुः ।

धिग्जन्म नस्त्रिविद्विद्याम् धिग्व्रतं धिग्बहुश्रुतम् ।
धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥

अहो ! नैतासामुपनयनादिसंस्काराः न शौचं न गुरुकुल-निवासः न च यज्ञानुष्ठानं तथाप्यस्मत्तोऽधिका हरिभक्तिरासु जागर्ति । अहो ! भगवतो मायेयं योगिनामपि मोहिनी वर्तते । विमूढा वयं यद्विस्मृत्य स्वकर्तव्यं स्वार्थे पतित्वा मुह्यामः । ततस्ते स्वापराधप्रमार्जनाय हरिं तुष्टुवुः ।

नमस्तुभ्यं भगवते कृष्णायाकुंठवेधसे ।
यन्मायामोहितधिया भ्रमामः कर्मवर्त्मसु ॥

अत्रान्तरे लीलानरवपुः श्रीगोविन्दस्तेनैव षाड्विधेनान्नेन गोपान् भोजयित्वा स्वयमपि बुभुजे । ततोऽपराह्णे गोगोपयुतौ

रामकृष्णौ वृन्दावनं निवृत्य व्रजवासिजनान् पवित्रदर्शनदानेन प्रमोदयामासतुः ।

इति श्रीकृष्णचरिते द्विजपत्नीभक्तिनिरूपणं नाम द्वात्रिंशत्तमः स्तवकः ॥ ३२ ॥

अथैकदा बलभद्रसहितो हरिर्वनयात्रां कुर्वन् गोवर्धनगिरिं ददर्श । यः खलु धम्मिलविन्यास इव नागनगरदेवतायाः । किरीटोच्छ्रय इव वनलक्ष्म्याः । स्तनाभोग इव महीमहिलायाः । क्रीडाकंदुक इव वनदेवतायाः । मातृमोदक इव दिग्बालकलोकस्य । कुकुदोद्गम इव भूगोलनगेंद्रस्य । द्वारपिधानस्तूप इव भुजंगभुवनस्य । यष्ट्यधिष्ठानबन्ध इव विहायोविहंगमस्य । त्रिविष्टपकुटनिर्माणमृत्पिण्ड इव प्रजापतिजनस्य । केलिप्रासाद इव कुकुप्पालककन्यकानिकरस्य । गतिस्खलनलोष्ठ इव कलिकालस्य च गर्वगंजनाय स्थितः । ततो महेन्द्रयागाय प्रवृत्तान्नन्दादीनवलोक्य उपेन्द्रो विज्ञोऽपि तान् समुपेत्य पप्रच्छ—तात ! कोऽयं संभ्रमोऽद्य वः समुपस्थितः । अस्योद्देशः कः ? किं फलम् ? केन साधनेन केन वाधिकारिणाऽयं मखः साध्यते ? रहस्यश्रवणेऽस्य मम महत्युत्कंठा वर्तते । शुश्रूषवे मह्यं सर्वं कथय । यतः साधवो भवन्ति खलु स्पष्टवक्तारः । तात !

ज्ञात्वाज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ।
विदुषः स्याद्यथा सिद्धिस्तथा नाविदुषो भवेत् ॥

ततः नन्द उवाच——वत्स ! भगवानिंद्रो वर्षाधिपो देवः । अनुचरास्तस्य मेघाः । आज्याहुतिभिः प्रीता जलधराः प्राणिनामाप्यायनकरं नीरम् अभिवर्षन्ति । वयं द्विजातयः अतो परंपरागतां रीतिमनुसरामः । तच्छ्रुत्वा हरिरुवाच——पितः ! सत्यम् परं चात्र गोपवसतिः । वैदिकप्रयोगेषु लोमविलोमाक्षरप्रयुक्त्या सहसा भयमुत्पद्यते । अत्राऽऽगमः——

मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधात् ॥

यत्र वेदादिशास्त्रप्रचारकाणां ब्राह्मणानां सत्कारो भवति तत्रैव सर्वसिद्धयः स्वतः समायान्ति । देवकल्पाः खलु विप्राः । यज्ञादौ यथा 'अग्निमुखा वै देवाः' इति श्रुतिः प्रतिपादयति । तथा यज्ञान्ते 'देवा विप्रमुखाः स्मृता' इति स्मृतयो व्याहरन्ति । उक्तं च——

नाहं तथाऽद्मि यजमानहविर्विताने ।
श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ।
यद्ब्राह्मणस्य मुखतः चरतोऽनुघासं ।
तुष्यामि मय्यवहितैर्निजकर्मपाकैः ॥

तात ! विश्वमेतत्कर्मप्रधानम् । यो यादृशं कर्म करोति स तादृशमेव फलं लभते । श्रूयतां तावत्कर्ममहत्त्वमपि——

कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ १ ॥
वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ।
वैश्यस्तु वार्तया जीवेत् शूद्रस्तु द्विजसेवया ॥ २ ॥

कृषिः गोरक्ष्यं वाणिज्यं कुसीदं चेति चतस्रो वैश्यवृत्तयः । पितः ! वयन्तु वनौकसः अतो यथाऽस्माकं प्रयोजनं शैलेन सिद्ध्यति तथा नान्येन । इन्द्रः कदाचिद्वर्षति कदाचिन्न वर्षति । वृष्ट्युत्पादकं मंत्रमहं वेद्मि । अस्य जपमात्रेणैव वृष्टिर्भवति । इन्द्रोऽतिप्रसन्नो महेन्द्रयागेनैव भवति ।

शन्नो वातः पवताᳪं शन्नस्तपतु सूर्यः ।
शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु ॥

मासोऽयं कार्तिकः । अत्र वृष्टिर्नोपकारिणी । ये संभारा इंद्रयागार्थम् उपकल्पिताः तैः गोब्राह्मणाहितावहं गोवर्धनमखं कुरुत । विप्रान्समाहूय तेभ्यो बहुविधमन्नं देयम् । धेनुदक्षिणाश्चापि प्रदेयाः । ततोऽश्वधेनुप्रभृतिभ्योऽप्यन्नसहितं दत्वा सर्वं पक्वान्नं गोवर्धनाय समर्पणीयम् । मम त्वेतन्मतम्, यदि तुभ्यमपि रोचेत तदा त्वेवं क्रियताम् ।

एवं शक्रदर्पहन्तुः कालात्मनो भगवतो वाक्यं श्रुत्वा नन्दाद्याः सर्वे गोपाः साधूक्तमिति व्याहृत्य कृष्णादेशं चक्रुः ।

ततः सपत्नीकाः सवस्त्राः सालंकाराश्च गोपा नानापदार्थ-पूरितान् शकटान् समारुह्य गिरिप्रदक्षिणां चक्रुः। अत्रान्तरे भगवान् विशालस्वरूपं धृत्वा अहं शैलाभिमानी देवोऽस्मीति वदन् गोपगणैरर्पितं बलिं सहसैव भक्षयामास। एवमालोक्य व्रजवासिनो मिथः प्रोचुः—अहोऽयं शैलस्तु विचित्रशक्ति-सम्पन्नोऽस्ति यः प्रत्यक्षरूपं धृत्वाऽनुग्रहं व्यधात्। अथ ब्राह्मणाः पंक्तिपावनैः विप्रैः सह गोपैः समर्पितं षड्रससमन्वितमन्नं भुक्त्वातितुष्टाः बभूवुः। ततः कृतार्चना गोपगोपीगणा अपि प्रसादं गृहीत्वाऽतिसन्तुष्टा अभूवन्। उक्तं च—

धन्यो गोवर्धनगिरिर्यत्र साक्षाच्चतुर्भुजः।
गाश्चारयन् स्वयं भुंक्ते गोपैर्दत्तं बलिं मुदा॥

इति श्रीकृष्णचरिते गोवर्धनपूजनं नाम
त्रयस्त्रिंशत्तमः स्तवकः॥ ३३॥

ततो देवराजो गोपैः विहतां स्वपूजां विज्ञाय कृष्णनाथेभ्यो नंदादिगोपेभ्यश्चुकोप। सोऽथ गर्ववान् संवर्तकं नाम गणं समाहूय प्रोवाच—अहो! श्रीमदान्धानां काननौकसां गोपानां माहात्म्यं, यत् कृष्णं मर्त्यम् समुपाश्रित्य ईदृशं देवहेलनं चक्रुः। यथा कश्चित्कर्मकाण्डमुपासनाकाण्डं चावमत्य सहसा ज्ञानकाण्डे प्रविशन्निपतति, तथा वाचालं पंडितमानिनं कृष्णमग्रेसरं कृत्वा ममार्चाबहिर्मुखा इमे गोपा लौकिकसुखेभ्यो वंचिताः स्थास्यन्ति।

मेघराज ! कृष्णपुरस्सराणामेषां श्रीमदस्तम्भमद्यैव कम्पय । अहमपि समारुह्यैरावतं मरुद्गणैः सह नन्दगोष्ठजिघांसया सत्वरं नन्दव्रजमुपैमि । इत्थं सुरपतिनिर्देशं श्रुत्वा निर्मुक्तबन्धना विद्युद्भिर्द्योतमानाः अशनिभिर्गर्जन्तो मेघा धारासम्पातैश्च नन्दगोकुलं परिपीडयामासुः । ततः शीतार्ता गोपगोपीगणाः सहसा गोविन्दशरणमुपेत्य प्रोचुः—

कृष्ण कृष्ण महाभाग ! त्वन्नाथं गोकुलं प्रभो ।
त्रातुमर्हसि देवान्नः कुपिताद् भक्तवत्सल ॥

तच्छ्रुत्वा करुणानिधिः प्रोवाच—व्रजवासिनः ! भयं त्यजत । अहमात्मयोगेन संप्रत्येव प्रतिक्रियां कृत्वा लोकेशमानिनः श्रीमदं हरिष्य इत्यभिधाय—

सपद्येकेन हस्तेन कृत्वा गोवर्धनाचलम् ।
दधार लीलया कृष्णः छत्राकमिव बालकः ॥

ततो भगवानाह—व्रजौकसः ! यूयं सकुटुंबाः यथेष्टं गिरिगर्तं प्रविशत । अहं सर्वान् रक्षयिष्यामि । तच्छ्रुत्वा दृष्टप्रभावा लोकाः प्रभोराज्ञां परिपालयामासुः । एतदालोक्य प्रकुपितो महेन्द्रः स्थूणास्थूलानासारान् सपदि अभिक्षणशोऽमुंचत् । ततो जलौघैः प्लाव्यमाना मही नादृश्यत । हरिः सप्ताहपर्यन्तं गिरिं दधानोऽपि क्लान्तिं न प्राप । किं बहुना, उद्धारसमये यत्र

पादौ न्यस्तौ ततस्तिलमात्रमपि न चचाल । अथ मघवा कृष्ण-सामर्थ्यम् मेघराजद्वारा निशम्य बिभ्ये । सोऽथ मानं परित्यज्य स्वकीयान् मेघान् वर्षातः सद्यो निवारयामास । तस्मिन्समये भगवतः प्रभावात् सर्वेषु गोवर्धनशरणागतेषु नैकोऽपि दैहिक-बाधाभिः पीडितो बभूव । अत्र श्लोकः---

खिन्नोऽसि मुंच शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः ।
भारभग्नविततबाहुषु गोपेषु हसन् हरिर्जयति ॥

अथ गोवर्धननाथो व्यभ्रमाकाशं निवृत्तवातवर्षं प्रमुदितमादित्यं समवलोक्य गोपान् उवाच---गोभक्ताः ! भयं व्यपेतम् । संप्रति सकुटुंबाः यूयं गर्तात् निर्गच्छत । संप्रति वातवर्षं गतम् । सरितोऽपि स्वल्पजला अभूवन । एवमाकर्ण्य हरिवचनं गोपाः शनैः शनैर्गोधनं समादाय बहिराययुः । ततः स्त्रीबालस्थविरा अपि शकटानारुह्य गर्तान्न्यसरन । अथ जनार्दनोऽपि पश्यतां सर्वभूतानां पूर्ववत् शैलं लीलयैव स्वस्थाने संस्थापयामास । ततोऽतितुष्टा व्रजवासिनः श्यामसुन्दरं प्रेम्णा समालिलिंगुः । गोपीगणा दधिदुग्धनवनीतैर्हरिं प्रसादयामासुः । ब्राह्मणाः शुभाशीर्वादान् युयुजुः ।

तस्मिन्नवसरे केचिन्मस्तकाऽघ्राणं, केचिच्चुम्बनं, केचिद्बाहुसंमर्दनं, केचित् अंगुलिस्फोटनं च चक्रुः सहानुभूतिप्रदर्शनाय । ततो गुरुजनाः प्रशंसाम् , समानाः पादपतनं, लघवश्च चरणसंमर्दनं

चक्रुः । स्नेहकातरा नन्दयशोदारोहिणीबलभद्राः कृष्णचन्द्रं समालिंग्य प्रसन्नमनसो बभूवुः । देवास्तुष्टुवुः । देवांगना पुष्पवृष्टिं चक्रुः । सिद्धसाध्यगन्धर्वचारणविद्याधरा विरुदं जगदुः । अप्सरसोऽनृत्यन् । ततो बलभद्रं पुरस्कृत्य सखिगणसमेतो यशोदानंदनो गोपूजनं चकार । मार्गे समागच्छन् गोरक्षामाहात्म्यं शृण्वन् हरिः स्वगृहमाजगाम । तस्मिन्दिने प्रतिगृहं मंगलाचारोऽभवत् । ततो वृजवासिनः सर्वे यथेष्टं भुक्त्वा आनन्दसागरेऽवगाहनं चक्रुः ।

इति श्रीकृष्णचरिते गोवर्धनोद्धरणं नाम चतुस्त्रिंशत्तमः स्तवकः ॥ ३४ ॥

अथ मघवापि नंदनंदनेन धारासपाताद्रक्षिते गोवर्धने लोकपालतायाः परित्यज्याभिमानं सुरभिं च पुरस्कृत्य श्रीव्रजराजस्याभिषेकार्थं सहसा तत्राजगाम । विविक्ते हरिमुपसृत्य व्रीडितः सन् रविप्रभेण किरीटेन हरिचरणारविन्दं पस्पर्श । ततः कृतांजलिः सन् प्रोवाच—देवाधिदेव ! गर्वहारी भवान् । देवराजत्वस्य समालंब्याभिमानम् यदहं भवन्तं नागणयम् तस्य फलं मया प्राप्तम् ।

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
वासुदेवाय कृष्णाय सात्वताम्पतये नमः ॥ १ ॥

स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये ।
सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ २ ॥

भगवन् ! यदा यज्ञे मम भागो विहतस्तदा तीव्रमन्युना मया मूसलधाराभिर्महावृष्टिभिः गोष्ठनाशायेदमकृत्यं कृतम् । संप्रति ध्वस्तमानोऽहं तव शरणमुपयातोऽस्मि । तच्छ्रुत्वा हरिरुवाच— पुरन्दर ! देवराजश्रिया गर्वितस्य तव हितायैव प्रतीकारं कृतवानस्मि ।

मामैश्वर्यश्रीमदान्धो दंडपाणिं न पश्यति ।
तं भ्रंशयामि सपद्भ्यो यस्य चेच्छाम्यनुग्रहम् ॥ १ ॥
अभिमानं सुरापानं गौरवं घोररौरवम् ।
प्रतिष्ठां शूकरीं विष्ठां यो जानाति स वै सुखी ॥ २ ॥

ततो बाढमित्युक्त्वा महेन्द्रोऽमरगणैः सह कामधेनुपयसा हरेरभिषेकं चकार । अथैरावतकरोद्धृतैर्गंगाजलैः शुद्धोदकस्नानं कारयित्वा पुरुषसूक्तेन षोडशोपचारैश्चार्चयित्वा देवा जनार्दनस्य 'गोविन्द' इति नाम रचुः । ततः प्रमुदिता देवगन्धर्वचारणाः पुष्पवृष्टिं चक्रुः ।

अथ कामधेनुरुवाच—प्रभो ! सर्वेश्वरोऽसि, अतो गोवंश-वृद्धये 'पर्जन्यः कालवर्षी भवत्विति' कृपां कृत्वा वरं ददातु । तच्छ्रुत्वा हरिरुवाच—देवि ! तथाऽस्तु । अपरं च—

मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ १ ॥

गावो मे चाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ २ ॥

ततः प्रणम्य व्रजराजं सर्वे देवाः सुरभिसमेताः संतुष्टिमवाप्य यथाऽभिमतं देशं गताः ।

इति श्रीकृष्णचरिते श्रीगोविन्दाभिषेकनिरूपणं
नाम पंचत्रिंशत्तमः स्तवकः ॥ ३५ ॥

अथैकदा नंदराजो निराहारः सन्नेकादशीव्रतमकरोत् । ततो जागरणं कुर्वन् मेघाच्छन्ने नभसि निशथि एव कालिंद्यां स्नातुं प्रविवेश । अथ वरुणकिंकरो नंदं नीत्वा वरुणान्तिकं प्रापयत् । ततः प्रभाते नन्दम् अपश्यन्तो लोका भयमवाप्य श्रीकृष्णसमीपमुपसृत्य प्रोचुः—व्रजचन्द्र ! यमुनास्नानाय गतो नंदोऽधुनाऽपि न समायातः । श्रुत्वा हरिः प्रणिधानेन सर्वं ज्ञात्वा तानाश्वस्य च सपदि वरुणपार्श्वमगमत् । अथ प्रचेता विलोक्य व्रजराजं सहसोत्थाय विधिवत्समपूजयत् । ततः कृतांजलिः प्रोवाच—

धन्योऽस्मि कृतकृत्योऽस्मि प्रभोऽद्य तव दर्शनात् ।
समाज्ञापय मामीश ! किं प्रियं करवाणि ते ॥

तदा हरिरवदत्—जलाधिपते ! तव सेवकेन मम पिताऽत्रानीतः तं मह्यं समर्पय । ततोऽपांपतिरवदत्—भगवन् ! मम प्रेरणयैव

तव जनकमानीतवान् मदीयोऽयं भृत्यः। क्षन्तव्योऽयं ममापराधः। यद्ययमेनमत्र न आनेष्यत् तर्हि भगवद्दर्शनमहं कथमवाप्स्यम्।

ततस्तुष्टो जनार्दनः सोपहारं नंदमादाय व्रजमाजगाम। अथ तुष्टा गोपाला विलोक्य नन्दं परां प्रीतिमापेदिरे। ततस्ते हरिं प्रोचुः—वत्स! दीर्घजीवी भव। अथ नंदो वरुणलोकैश्वर्यं श्रीकृष्णप्रभावं च तेभ्यो वर्णयामास। ततः गोपाः प्रोचुः—कृष्ण! अस्मानपि तु दर्शय स्ववैभवम्। ततः हरिरुवाच—सखायः! जनोऽयमविद्यावशात् शब्दादीन् विषयांस्तु वांछति, परंतु परमात्मतत्त्वं न चिन्तयति। अतो नानायोनिषु परिभ्रमन् सुखं न लभते। पूर्वजपुण्यप्रभावादद्य युष्माकमीदृशी रुचिर्जाता, इत्यभिधाय हरिः पुरा तु तान् ब्रह्महृदं नीतवान्। ततस्तत्र हरिप्रेरणया निमग्नास्ते परमपुनीतं वैकुंठलोकं प्रापुः। अत्र श्रुतिः—

न तत्र सूर्यो भाति न चंद्रतारकम्।
नेमा विद्युतो भांति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वम्।
तस्य भासा सर्वमिदं विभाति॥

अथ ते गोपा वेदान्तवेद्यं पुरुषं सच्चिदानंदस्वरूपं भगवन्तं विलोक्य सफलजन्मानो बभूवुः। ततो मिथः प्रोचुः—अहो! धन्या वयम्। परमसावधाना मुनयो महता परिश्रमेण यत्पदमा-

प्नुवंति तद्दिव्यं धामाद्य कृष्णकृपया विलोकितमस्माभिः । ततो हरिप्रभावान्निवृत्तास्ते गोरक्षकाः पुनर्व्रजं अवाप्य भूयो भूयो हरियशो गायन्तस्तस्थुः ।

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

इति श्रीकृष्णचरिते हरिविभवदर्शनं नाम
षट्त्रिंशत्तमः स्तवकः ॥ ३६ ॥

अथ कदाचित्केशवः शरदोत्फुल्लमल्लिकारात्रीर्विलोक्य 'याता ऽबला व्रजं सिद्धा, मयेमा रंस्यथ क्षपाः' इति वाक्यं स्मरन् कालिन्दीकूले रन्तुं मनश्चक्रे । अत्रान्तरे प्रोषितभर्तृकापतिरिव सुधाकरोऽरुणेन रागेण प्राचीमुखं नायिकाऽऽननमिव विलिंपन् सुखकरैः किरणैश्च चराचरात्मकप्राणिनां तापान् परिहरन्नुदियाय । ततः कमलाक्षो नवकुंकुमारुणं शशांकं तत्कोमलगोभिरभितो रंजितं वनं विलोक्य वामदृशामपि मनोहरं वेणुनादमकरोत् । तच्छ्रुत्वाऽन्योऽन्यमलक्षितोद्यमा जवलोलकुंडलाश्च व्रजवनिता यत्र व्रजराजोऽतिष्ठत्तत्रायातुमारेभिरे । तस्मिन्नवसरे काचिद् दुहंती, काचित् शिशुं पयः पाययंती, काचिदश्नंती, काचित् शृंगारं कुर्वती च विहाय स्वकार्यं सर्वा अपि कृष्णांतिकमगुः । काश्चित्तु पतिपितृभ्रातृबन्धुप्रभृतिभिर्वार्यमाणा अपि गोविंदासक्तचित्ताः

स्वाग्रहान्न न्यवर्तन्त । ततस्तत्र बह्व्यो गोप्यो गृहमध्यगता एव समयाभावात् मीलितलोचना गोविंदध्यानपरायणा अभूवन् । अवशिष्टास्तु दुःसहप्रेष्ठविरहतापधुतकिल्बिषाः मत्यः कृष्णं ध्यानेन समवाप्य परमपदमवापुः । उक्तं च—

तमेव परमात्मानं जारबुध्यापि संगताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ १ ॥
कामं क्रोधं भयं स्नेहं ऐक्यं सौहृदमेव च ।
नित्यं हरौ विदधतो यांति तन्मयतां हि ते ॥ २ ॥

अत्र श्रुतिः—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

ततः कमनीयविग्रहो हरिः समवलंब्य वाग्मित्वं समीपस्था व्रजवनिताः प्रोवाच—महाभागाः ! स्वागतं वः । कथयत किं प्रियं वः करवाणि । स्वर्गादपि रमणीयतरस्यास्य व्रजमंडलस्य त्वनामयं क्वचित् ? सत्यपि कलानिधौ घोरसत्वनिषेवितेयं रात्रिः पुंसामपि भयप्रदाऽस्ति, अतोऽत्र चिरं स्त्रीभिर्न स्थेयम् । भवदीया बान्धवा युष्मानदृष्ट्वा यत्र तत्र विचेष्यन्ति । संप्रतीतो गत्वा गा दुह्यत । बद्धान् क्षुधितांश्च वत्सान्मोचयित्वा अमृतोपमं दुग्धं पाययत ।

तेषां करुणाक्रंदनं श्रोतुं न शक्नोमि । इति श्रुत्वा कुवलयाक्षव-चनं गोप्यः प्रोचुः—कौमोदकीधर ! एवं दुराग्रहग्रस्तं नृशंसं च वाक्यं मा वद । यतः परित्यज्य सर्वविषयान् तव पादमूलं वयमुपयाताः । तदा कैवल्यप्रदो भगवानुवाच—भद्राः ! सत्यम् । यथा मयि सर्वजन्तवः स्निह्यन्ति तथा यूयमपि स्निह्यथ । किं च गौणसुखेषु शब्दादिषु रुचिमदत्वा मुख्यधर्मे पतिशुश्रूषणे मनो रक्षत । उक्तं च मनुना—

दुःशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥ १ ॥
अस्वर्ग्यमप्रशस्यं च फल्गु कृच्छ्रं भयावहम् ।
जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २ ॥

अपरं च यथा ध्यानश्रवणदर्शनानुकीर्तनेभ्यो मयि स्नेहो भवति तथा नांगसंबन्धेन । निशम्यैतत् कामजितो वचनं भग्न-मनोरथा गोप्योऽवदन्—कामकलानिधे ! मुमुक्षून् यथाऽऽदिपुरुषो भजते तथाऽस्मान् भजस्व । श्रुतमस्माभिरपि वेदवाक्यम्—

न वा अरे पत्युः कामाय पतिः प्रियो भवति,
आत्मनस्तु कामाय पतिः प्रियो भवति ॥

कीर्तिमन् ! यदस्माकं गृहासक्तमासीच्चित्तं तत्सुखस्वरूपेण भवताऽपहृतम् । यौ करौ गृहकर्मतत्परावास्ताम् तावपि व्यापारर-

हिताबभूताम् । चरणावपि च शक्तिशून्यौ जातावतो विहाय भवतः पादपद्मच्छायां कथं व्रजं व्रजामः ? कदंबच्छायाप्रिय ! सांप्रतं त्वदधरामृतपूरकेण वंशीवाद्येन मानसीं व्यथां नः संहर । नो चेद् त्वद्विरहजनितपावकेन दग्धदेहा वयं ध्यानमार्गेणैव तव पादपदवीमुपेष्यामः ।

अथैका वाग्विलासविदग्धा गोपी प्राह—दामोदर ! तव जितचन्द्रं अलकाऽवृतं कुंडलमंडितं च विलोक्य मुखं यदा शचीप्रभृतयो देवांगना रंभाद्या अप्सरसश्च मुह्यन्ति तदा का कथाऽस्मद्विधानां वनचरीणां गोपांगनानाम् । तव मुखांभोजात् सुधोपमं गीतं श्रुत्वैव का वनिताऽऽर्यचरितात् वंचितैव न भवति । तच्छ्रुत्वाऽपरा जगाद—सखि ! सत्यमेतत् । सप्तस्वरसमन्वितं गानविद्यामाहात्म्यं सर्वोपरि वरीवर्त्ति । येन वनस्था गोद्विजमृगा अपि परित्यज्य स्वस्वव्यापारान् विवशा भवन्ति । अत्र श्रुतिः—'गायन्तं स्त्रियः कामयन्ते'। धर्मध्वज ! समाकर्ण्य वेदगणप्रार्थनां त्वं मत्स्यकच्छपवाराहनृसिंहवामनपरशुरामरामादीनवतारान् धृत्वा विश्वोपकारं कृतवान् । ब्रह्माद्या देवगणा यस्याः कमलालयायाः कृपाकांक्षिणः सा च तव चरणाब्जसेविकास्ति । ईदृशस्य महाभागस्य पादपांसून् वयं शिरसा धारयितुं वांछामः । कृपासिंधो ! समाकर्ण्याऽभ्यर्थनां संसृतिभयात्शरणमुपेयुषां किंकरीणां नः शिरसि विरचिताभयं कामपूरकं च श्रीकरग्रहं

निधेहि । इति विकलचित्तं तासां श्रुत्वा योगेश्वरो हरिः प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ।

अथोदारचेष्टितः श्रीधरः प्रफुल्लेंदीवरलोचनाभिः गोपीभिः सह विराजमानो नक्षत्रावलीमध्ये राकापतिरिव विरेजे। ततो वैजयन्ती विभूषितो राधारमणः ताभिर्गीयमानगुणः स्वयं चोद्गायन् कामप्यपूर्वामभिख्यां दधे । उक्तं च—

बाहुप्रसारपरिरंभकरालकोरु,
नीवीस्तनालभननर्मनखाग्रपातैः ।
क्ष्वेलावलोकहसितैः व्रजसुन्दरीणा,
मुत्तंभयन् रतिपतिं रमयांचकार ॥

ततो मुरलीधरेण लब्धमानास्ता गोप्यो भुवि वर्तमानानां वरवर्णिनीनां मध्ये स्वात्मानं सर्वोपरि मेनिरे । अथ राधावरस्तासां सौभगमदं मानं च परिहर्तुं कामपि भक्तिमतीं नीत्वा सहसैव तिरोहितो बभूव । एवमन्तर्हिते व्रजनाथे व्रजबालास्तथाऽतप्यन्त यथा करिण्यो यूथपतिमदृष्ट्वा विह्वला भवन्ति ।

ततो मोहमापन्ना गोपिका हरेरनुसन्धानाय वनद्वनान्तरं पर्यटितुमारब्धाः । अथैकाऽवदत्—भोऽश्वत्थप्लक्षन्यग्रोधाः ! कश्चिद्विपिनविहारी दृष्टो युष्माभिः ? यः प्रेमहासावलोकनैर्मनो मम हृत्वा चौर इव क्वापि पलायितः । द्वितीयाऽपृच्छत्—श्रीगोवि-

न्दचरणप्रिये तुलसि ! वनमालाविभूषितो वृंदावनविहारी त्वयाऽवलोकितः कश्चित् ? अयि जातीमल्लिकामालत्यः ! पुष्पग्रहणाय करस्पर्शेन वः प्रीतिं जनयन् माधवोऽनेन पथा गतः कश्चित् ? यमुनातीरतरवः ! वैकुंठविरहाकुलानां रामानुजपदवीं नः शंसत । यतो यूयं दूरदर्शिनःपरोपकारपरायणाश्च स्थ । मेदिनि ! त्वया पुरा किं सुकृतमाचरितं यत्त्वं आनंदकंदस्य यदुनंदनस्य चरणस्पर्शोत्सवं समधिगम्य हरिततृणांकुरैः रोमांचितेव विभासि ? कुरंगिके ! त्वं विशालनेत्राऽसि, यदि त्वया क्वापि कुंजविहारी दृष्टश्चेत्तर्हि संकेतेन तद्गमनमार्गं समाचक्ष्व । सख्यः ! अलमटनेन, इमा लताः पृच्छत । यदेता वनस्पतिबाहून् समाश्लिष्य तिष्ठन्ति । कदाचित् कुसुमावचयं कुर्वतः कमलाकान्तस्य करस्पर्शः अभवत् ।

अथैकाऽवदत्——रमानिवास ! व्रजोऽयं तव निवासेन वैकुंठादप्यधिकं महिमानं धत्ते । यत्र त्वं विराजसे तत्रैव साक्षाल्लक्ष्मीरपि स्वयं समायाति । सुखशान्तिमयेऽस्मिन्समये त्वमन्तर्हितो भूत्वा गोपीजनान्मा पीडय । निराश्रिता एता व्रजांगना दिक्षु त्वां विचिन्वन्ति । द्रुतं दर्शनं दत्वा दासीनां दुःखं दूरी कुरु । त्वयि धृतासवो वयमत्र तिष्ठामः । त्वं सदयो भूत्वा नूतनकमलश्रीमुषा दृशाऽस्मानाशु संजीवय । ललितकीर्ते ! भवादृशा भव्या अशुक्लदासिका अस्मान्प्रपीड्य किं फलं सम-

वाप्स्यन्ति । वीराः वीरेष्वेव शौर्यं दर्शयन्ति, नाऽवीरेषु । यदि वयं मारणीया एव तर्हि विषमयजलव्यालराक्षसादिभ्यो विपद्भ्यः कथं रक्षिताः ? त्वं यशोमतीसुत एव नासीः किन्तु सर्वेषामेव प्राणिनामन्तरात्माऽसि । देवादिभिः प्रार्थितस्त्वं समवतीर्य यदुवंशे विश्वरक्षणं करोषि । शौरे ! त्वमिच्छाविग्रहोऽसि । प्राकृतजनवत्तव जन्मकर्मणी न स्तः । संसृतिभयात्तव चरण-शरणमुपेयुषां नः शिरसि विरचिताभयं करसरोरुहं धृत्वाऽऽशु व्यथामपनय । व्रजजनार्तिहन् ! प्रणतदेहिनां शरीरेषु पापकर्शनं पादपंकजं धृत्वा हृत्तापं कृन्धि । बुधमनोरमया मधुरया गिरा मुह्यतीरस्मान् अधरामृतेन सन्तर्पय । पुराणपुरुष ! पूर्वजन्मनि यैः पुण्योपार्जनं कृतं तैरेव भाग्यवद्भिः कलिकल्माषापहं तव कथामृतं पीयते । ते ध्यानमंगलं प्रहसितं प्रेमवीक्षणं हृदयंगमाः कथाश्च भूयो भूयो अस्माकं मनः समाकर्षन्ति । यदा त्वं गाश्चारयन् व्रजाच्चलसि तदा नलिनसुन्दरं ते पदं तृणांकुरैः सीदतीति विचिन्त्य चित्तमस्माकं धैर्यं न धारयति । नटनागर ! सायाह्ने यदा त्वं वंशीविभूषितं मुखं प्रदर्शयसि तदा वयं सपदि प्रमोदतुलामधिरोहामः । सरलहृदयाः सज्जनाः कौटिल्याय मनस्यवकाशं न ददति । यदाऽहनि काननं भवानटति तदा त्वां अपश्यन्तीनां व्रजवनितानां त्रुटिमात्रकालोऽपि युगशतायते । ततो दिनान्ते कुटिलकुन्तलं श्रीमुखं पश्यामस्तदा नेत्राणां

पद्मकृत्पद्मभूः मंद एवेति निर्धारयामः । पूर्णचन्द्र ! जगति तवावतारो विश्वमंगलायेति मुनयो व्याहरन्ति । तव चरणारविन्दसेवार्थमुपयाता वयम् । अतोऽनुग्रहप्रदानेन कृतार्थीकरणीया अबलाजनाः ।

तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ।।

अत्र लक्ष्मीनाथभावनास्ताः समवाप्य यमुनातटं तदागमनकांक्षया गोकुलचंद्रमसः शुभागमनं प्रतीक्षमाणास्तस्थुः । अत्र कस्याऽपि कवेरुक्तिरियम्——

धन्या गोकुलकन्या वयमिह मन्यामहे जगति ।
यासां नयनसरोजे अंजनभूतो निरंजनो वसति ।। १ ।।
सांकेत्यं पारिभाष्यं वा स्तोभं हेलनमेव च ।
गोविन्दनामग्रहणं अशेषाघहरं स्मृतम् ।। २ ।।

इति कथयन्त्यो व्रजवनिता हरिध्यानपरायणा बभूवुः ।

इति श्रीकृष्णचरिते रासरसिकान्वेषणं नाम
सप्तत्रिंशत्तमः स्तवकः ।। ३७ ।।

अत्रान्तरे धावित्वा समायाता काचित्सख्युवाच——वयस्याः ! इतो नातिदूरे दृश्यन्ते विकीर्णानि पुष्पाणि । तत्र गत्वा कुरुत

निर्णयम् । ततस्तत्र गत्वा ता मिथोऽवदन्—अत्र प्रेयसा प्रियार्थे प्रसूनावचयः कृतः। अत्र वेणीबन्धनमभूदिति तर्कयामि ।

रेमे तया चाऽऽत्मरत आत्मारामोऽप्यखंडितः ।
कामिनां दर्शयन् दैन्यं स्त्रीणां चाचलचित्तताम् ॥

अथाऽपराऽब्रवीत्—आलि ! महात्मनो मनोमोहनस्यात्र ज्योत्स्नायां ध्वजांभोजवज्रांकुशयवादिभिश्चिन्हितानि पदानि लक्ष्यन्ते । ततस्तैस्तैः पदैस्तत्पदवीम् चिन्वन्त्योऽबलाजनाः कस्याश्चित् पदानि तत्पदैर्मिलितानि दृष्ट्वा मिथः प्रोचुः—सख्यः ! रासविहारिणा सह याताया अंसन्यस्तहस्तायाः कस्या एतानि पदानि ?

अनयाराधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥

धन्याः खलु गोविन्दपदपांसवः यान् देवराजप्रभृतयो गीर्वाणा रमाद्या देव्यश्च पापापनुत्तये मूर्ध्नि धारयन्ति । अत्रान्तरे विहारी यया गोप्या सह चचाल साऽप्यात्मानं ललनारत्नममन्यत । ततः साऽ गोकुलेशं जगाद—गोपीनाथ ! दूरमियत्पदभ्यां चलन्ती श्रान्ताऽस्मि । संप्रति साहाय्यं विना पदमपि चलितुं न शक्नोमि । अतो यत्र ते जिगमिषा तत्र मां स्कंधारूढां कृत्वा नय । निशम्यैतत्प्रियावचनं विनोदरसिको व्रजविहारी प्रोवाच—सखि ! सुष्ठु । अत्रागत्य स्कन्धं समारोह । तच्छ्रुत्वा हृष्टाऽबला

यावत्स्कन्धमारोढुं लग्ना ततः प्रागेव वृन्दापतिः सद्यस्तिरोदधे । अथ एकाकिनी बाला विह्वला सती वने विलप्तुमारेभे । हा नाथ ! क्वाऽसि ? हा ! रमणश्रेष्ठ ! क्वाऽसि ? महाभुज ! दास्यास्ते कृपणाया मे दर्शय संनिधिम् ।

अज्ञानाद्यत्कृतं देव ! लब्धं तस्य मया फलम् ।
भवादृशः स्वधर्मज्ञो न श्रुतो नावलोकितः ॥

एवमाकर्ण्य तच्छब्दं अनुसन्धानतत्परा गोप्यः सहसा तत्र जग्मुः । ततस्ताः प्रियविश्लेषदुःखितां तां विलोक्य सपदि हर्ष-विषाददोलामधिरुरुहुः ।

अथ व्रजवनिताः मिथः प्रोचुः—यथा ऽस्माकं गतिरभूत्तथाऽस्यापि स्थितिः जाता । मुरमर्दनान्मानप्राप्तिम् तथाऽभिमानात्तिरोधानेन तद्दैन्यं च तया कथितं श्रुत्वा भगवतोऽद्भुतचरित्रेण परमविस्मिता अभूवन् । अथ परिश्रान्तास्ता विश्रामाय क्वचित्तस्थुः । अथैका सखी तामपृच्छत्—आ-राधिके ! त्वमेव धन्यासि यज्जगन्नाथस्त्वामेकाकिनीं नीत्वाऽव्रजत् । सा प्रत्यवदत्—सखि ! भ्रान्तासि व्रजविहारिणस्तस्य न कापि प्रिया न चाप्यप्रियाऽस्ति । मम भक्तिपरीक्षार्थं मां नीतवान् । मोहमापन्नाऽहं मानमवलम्ब्य स्कन्धमारूढुकामाऽभूवम् । योगिराजः सपद्यन्तर्हितो बभूव । कान्तारेऽस्मिन् भवतीभिरहमनुगृहीता । ततः सर्वा एव गोपदारिका विस्मयाविष्टा अभूवन् । ततस्ता

मिलित्वा राधास्वामिन आवाहनार्थं नानालीलाः कर्तुमारभन्त । अथ काचित् कस्याश्चित्पूतनायन्त्याः कृष्णायन्ती स्तन्यमपिबत् । काचित्तृणावर्तायती कृष्णार्भकभावनामन्यां जहार । ततस्तासु द्वे तु कृष्णरामायितेऽन्याश्च गोपायन्त्योऽभूवन् । अथ कृष्णवत् वर्तमानाऽव्यक्तशब्देन वत्सवत् चरन्तीं समाहूय पयः पाययामास । तत्रैका कृष्णस्वरूपा बकायतीं ताडयामास । अत्रान्तरे काचित् वंशीरवेण यथा हरिर्गाः समाह्वयति तथा गोवृन्दमाहूयैकत्रितमकरोत् । एतदालोक्य गोपभावनायुक्ता इतराः साधु साध्विति वदन्त्यस्तासामुत्साहवृद्धिं चक्रुः । अथैका तन्मनाः स्वभुजमन्यस्या भुजे निधाय चलन्ती प्राह—वयस्याः! नंदवल्लभः अहम् । मम ललितां गतिन्तु पश्यत । तच्छ्रुत्वाऽपरा प्राह—सखि ! गौरांगोऽयमतो न याशोदेयः । श्यामोऽहन्देवकीतनयः । तत एका कृष्णवद् वर्तमानाऽपरां शिरस्याक्रम्य कालियवद्वर्तमानां प्रोवाच—दुष्ट ! निर्गच्छ ह्रदादस्मात्सत्वरम् । खलनिग्रहार्थमेव धरातलेऽवतीर्णोऽहम् । एवं समाकर्ण्य स्वलीलाऽनुकरणं नटनागरो भगवान् सद्यस्तुतोष । ततः—

तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥

ततो मूर्छिता यथाऽमृतवृष्टिमवाप्य जीवंति तथा सर्वा एव व्रजवनिता प्रीत्युत्फुल्ललोचना बभूवुः । अथैका कमलापतेः

करांबुजं प्रीत्या जग्राह । अपरा अतिशयमानन्दमवाप्य चन्दनचर्चितं तद्बाहुमंसे दधार । इतरांगना हरिविरहाग्निना सन्तप्ता स्वोरसि तदंघ्रिकमलं धृत्वाऽतुष्यत् । प्रेमसंरंभविह्वलाऽन्या निर्निमेषाभ्यां लोचनाभ्यां तन्मुखांबुजं निरीक्षमाणा तृप्तिं नाध्यगच्छत् । काचित्पुरंध्री नेत्रमार्गेण व्रजवासिनं हृदि निधाय संजातपुलका योगिनीव ध्यानामृतमपिबत् । एवं सर्वा एव गोपबालिकाः सर्वेश्वरमालोक्य सहसा विरहजं तापं जहुः । अत्र श्रुतिः—

प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् ॥

अथ विधूतशोकाभिर्गोपिकाभिः परिवृतो मधुसूदनः सिद्धिवृन्दस्थितो गणाध्यक्ष इव रराज । सोऽथ विकसत्कुन्दमन्दारसौरभानिलमधुकरं शरदिन्दुकिरणसन्दोहध्वस्तदोषान्धकारं कृष्णाहस्ततरलांचितकोमलवालुकं च रवितनयातटमेत्य सुखासीनो बभूव । अत्रोक्तिः—

ध्यानाभ्यासवशीकृतेन मनसा यन्निष्कलं निष्क्रियम् ।
ज्योतिश्चेतसि योगिनो यदि परं पश्यन्ति पश्यन्तु ते ।
अस्माकन्तु तदेव लोचनचमत्काराय भूयाच्चिरम् ।
कालिन्दीपुलिनोदरे किमपि यन्नीलं महः क्रीडति ॥

ततः काऽप्यन्तर्धानजनितकोपं प्रकटयन्ती प्राह—निगमागमपारदृश्वन् ! मम प्रश्नानां कृपया समाधानं कुरु ।

भवतोऽनुभजत्येक एक एतद्विपर्ययम् ।
नोभयाँश्च भजत्येक एतन्नो ब्रूहि केशव ॥

तच्छ्रुत्वा स्वभूरुवाच—सख्यः ! ये स्वार्थसाधका भवन्ति त एव स्वाभीष्टसिद्धये मिथ उपकुर्वन्ति । तत्र सौहृदं न विद्यते । अपरे अभजतोऽपि भजन्ति ते दयालवः सन्ति यथा मातृपितृगुरवः । अत्र निर्वादो भवति धर्मः । किंच ये भजतोऽपि न भजन्ति कुतस्ते अभजतो भजेयुः । एतादृशाः खलु लोके चतुर्विधा विलोक्यन्ते, तेष्वेके आत्मारामाः अन्ये प्राप्तकामाः अपरे कृतघ्ना इतरे च गुरुद्रोहिणः । त्यक्तलोकवेदस्वजनानां भवतीनामनुवृत्तयेऽहमन्तर्हितोऽभवम् । भक्तिः क्वचित् समक्षे फलवती क्वचिच्च परोक्षे । ज्ञात्वैवं दोषदृष्ट्या मां मा पश्यत । निष्कपटभजनासक्तानां भवतीनां गुणान्वर्णयितुं सर्वथाऽहमसमर्थः । धन्या यूयं या दुर्जरगेहशृंखलाः संवृश्च्य मां स्मरथ । युष्मत्साधुकृत्यं भवदीयसाधुकृत्येनैव साम्यं प्रयातु ।

इति श्रीकृष्णचरिते गोपीकृष्णसंमेलनं
नामाष्टत्रिंशत्तमः स्तवकः ॥ ३८ ॥

इत्थं गोप्यो गोवर्धननाथस्य सुपेशलावाचो निशम्य सपदि गतक्लमा बभूवुः । ततो वृन्दावनविहारिणः प्रेरणया गोप्यो मंडलाकारेण तस्थुः । अत्रान्तरे एकोऽपि हरिरनेकरूपधरो भूत्वा

द्वयोर्द्वयोर्मध्येऽतिष्ठत् । अथ अन्योऽन्याबद्धबाहुभिः स्त्रीरत्नैः सह गोपीमंडले मंडितस्य कृष्णस्य रासमहोत्सवः संप्रवृत्तः । ततः सकृष्णानां व्रजवनितानां वलयनूपुरकिंकिणीनां तुमुलः शब्दो बभूव ।

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैः ।
भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः ।
स्विद्यन्मुख्यः कवररशनाग्रन्थयः कृष्णवध्वो ।
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥

ततः कृष्णसंस्पर्शमुदिता गोपांगना उच्चस्वरेण गातुमारभन्त—

श्रितकमलाकुचमंडल धृतकुंडल ए ।
कलितललितवनमाल जय जय देव हरे ॥
दिनमणिमंडलमंडन भवखंडन ए ।
मुनिजनमानसहंस जय जय देव हरे ॥
कालियविषधरगंजन जनरंजन ए ।
यदुकुलनलिनदिनेश जय जय देव हरे ॥
अमलकमलदललोचन भवमोचन ए ।
त्रिभुवनभवननिधान जय जय देव हरे ॥
जनकसुताकृतभूषण जितदूषण ए ।
समरशमितदशकंठ जय जय देव हरे ॥

अभिनवजलधरसुन्दर धृतमन्दर ए ।
श्रीमुखचंद्रचकोर जय जय देव हरे ॥
तव चरणे प्रणता वयं इति भावय ए ।
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥
श्रीजयदेवकवेरिदं कुरुते मुदं ए ।
मंगलमुज्वलगीतं जय जय देव हरे ॥

एवमाकर्ण्य हरिरतितरां तुतोष । तत एका नटनागरेण महासंकीर्णस्वरजातीः उन्नीतवती । तेन तुष्टो विनोदरसिकः साधुवादेन तां सम्मानितवान् । ज्ञात्वैवमपरा ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये । तच्छ्रुत्वा हरिराह—अहो ! अतीव प्रवीणेयं गोपबालिका । ततो रासपरिश्रान्ता काचित् गदाधरस्य स्कन्धं बाहुना जग्राह । अत्रान्तरेऽन्या गोपीवल्लभबाहुं कमलसौरभं समाघ्राय हृष्टरोमा सती चुचुम्ब । अथापरा कृष्णकपोलेन सह स्वकपोलं संयोजयंती तांबूलप्रसादमादातुमियेष । ततोऽलकालंकृतकपोलघर्मवक्त्रश्रियः स्वकेशस्रस्तस्रजश्च गोप्यो वलयनूपुरघोषवाद्यैः भ्रमरगायकरासगोष्ठ्यां भगवता सह ननृतुः । पूर्णकामोऽपि हरिः स्निग्धेक्षणोद्दामविलासहासैर्व्रजसुन्दरीभिः सह तथा रेमे यथाऽर्भकः स्वप्रतिबिंबविभ्रमैः रमते । अथ तदंगसंगप्रमुदाकुलेंद्रिया विस्रस्तमालाभरणाश्च व्रजवनिताः केशदुकूलादीनपि यथापूर्वं धर्तुं समर्था न बभूवुः । एवं कृष्णवि-

क्रीडितं वीक्ष्य देवाः कुसुमानि अवाकिरन्। खेचरस्त्रियो मुहुर्मुहुः हरियशो जगुः। शशांकश्चापि सगणो विस्मितो बभूव। ततोऽतिविहारेण श्रान्तानां व्रजांगनानां वदनानि सत्तमेन पाणिना स प्रामृजत्।

एवं शशांकांशुविराजिता निशाः।
स सत्यकामोऽनुरताऽबलागणः।
सिषेव आत्मन्यवरुद्धसौरतः।
सर्वाः शरत् काव्यकथारसाश्रयाः॥ १॥

यत्पादपंकजपरागनिषेवतृप्ता।
योगप्रभावविदिताऽखिलकर्मबन्धाः।
स्वैरं चरन्ति मुनयोऽपि न नह्यमानाः।
तस्येच्छयात्तवपुषः कुत एव बन्धः॥ २॥

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम्।
योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक्॥ ३॥

तस्य मायामोहिता व्रजौकसः स्वान् स्वान् दारान् पार्श्वस्थान् मन्यमानाः कृष्णाय खलु नाभ्यसूयन्। ततो ब्राह्मे मुहूर्ते संप्राप्ते वासुदेवानुमोदिता गोप्यः अनिच्छन्त्योऽपि स्वगृहान् ययुः। एवमाप्तकामोऽपि हरिर्भूतानुकंपायै मानवीं लीलामकरोत्। भक्तिविषयोऽयमिंद्रियातीतः। अत्र श्रुतिः—

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ॥ १ ॥

श्रीकृष्ण श्रीकृष्ण गिरा स्मरन्त्यः,
श्रीकृष्णपादांबुजलग्नमानसाः ।
श्रीकृष्णरूपास्तु बभूवुरंगना,
चित्रं न पेशस्कृतमेत्य कीटवत् ॥ २ ॥

इति श्रीकृष्णचरिते रासक्रीडानिरूपणं नामैकोन-
चत्वारिंशत्तमः स्तवकः ॥ ३९ ॥

अथैकदा जातकौतुका गोपा देवयात्रार्थं मथुरातः पश्चिमायां दिशि वर्तमानमंबिकावनं ययुः । तत्र सरस्वत्यां स्नात्वा गन्धपुष्पाक्षतधूपदीपनैवेद्यादिभिः साम्बं सदाशिवं संपूज्य तुष्टुवुः—

कर्पूरगौरं करुणावतारं, संसारसारं भुजगेन्द्रहारं ।
सदा वसन्तं हृदयारविन्दे, भवं भवानीसहितं नमामः ॥

अथ ध्यानम्—

वामांके च विभाति भूधरसुता देवापगा मस्तके ।
भाले बालविधुर्गले च गरलं यस्योरसि व्यालराट् ।
सोऽयं भूतिविभूषणः सुरवरः सर्वाधिपः सर्वदा ।
शर्वः सर्वगतः शिवः शशिनिभः श्रीशङ्करः पातु नः ॥

ततस्ते तत्र ब्राह्मणान् भोजयित्वा तेभ्यो यथाशक्ति दक्षिणा अपि व्यतरन् । ततो नन्दादयो गोपा रात्रौ तत्रैव विशश्रमुः । अत्रान्तरे दैवयोगात् कश्चित्सर्प आगत्य शयानं नन्दमग्रसीत् । अथ भयभीतो गोपः कृष्ण कृष्ण ! भुजंगमोऽयं मामग्रसदिति चुक्रोश । तच्छब्दं श्रुत्वा सपदि गोपालाः समुत्थाय ज्वलत्काष्ठैः तं पृदाकुं पीडयामासुः । इत्थमुल्मुकैस्ताड्यमानोऽप्यहिर्यदा नामुञ्चत् कृष्णपितरं तदा प्रपन्नार्तिहरो वासुदेवः पदा तं पस्पर्श । विश्वमूर्तिपादस्पर्शहताशुभः सर्पः सद्यो विगतकल्मषोऽभवत् । ततः स कलेवरं त्यक्त्वा विद्याधरार्चितं दिव्यस्वरूपं दध्रे । अथ कमनीयविग्रहं प्रणतं च तं कृतान्तकृत् पप्रच्छ—हेममालिन् ! को भवान् ? सोऽब्रवीत्—प्रणतपाल ! पूर्वजन्मन्यहं सुदर्शनाख्यो विद्याधरोऽभवम । एकदा विमानेन दिशो विदिशश्च भ्रमन् अष्टावक्रवाद्विरूपानांगिरसो दृष्ट्वा प्राहसम् । अथाऽवमानिता मुनयोऽब्रुवन्—यः पंडितोऽपंडितम्, धनी निर्धनम्, सुरूपश्च कुरूपं, हसति स स्वयमेवात्मानं पातयतीति निगद्य रे रूपसम्पद्गर्वित खल ! सपद्यहियोनिमवाप्नुहीत्यशपन् । हे कृपालो ! मुनिदत्तः शापोऽप्यनुग्रहकार्यमकरोत् ।

> जन्मान्तरसहस्रेषु तपोदानसमाधिभिः ।
> नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

महात्मन् !

यन्नामगृह्णन्नखिलान् श्रोतॄनात्मानमेव च ।
सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥

तीर्थंकर ! गमनायानुजानीहीति निगद्य तं प्रणिपत्य परिक्रम्य च दिवमारुरोह । ततः संकटान्मुक्तं नन्दं समालोक्य सर्वे गोपा मुदिता अभूवन् । ततः प्रभाते नियमं समाप्य कृतकृत्या गोपाः पूतात्मनः प्रभावं वर्णयन्तो व्रजं समाययुः ।

इति श्रीकृष्णचरिते सुदर्शनोद्धारनिरूपणं नाम
चत्वारिंशत्तमः स्तवकः ॥ ४० ॥

अथ प्रभातेऽनुदिते एव श्रीकृष्णे वनं याते गोप्यो भगवल्लीला गायन्त्यो महता कष्टेन वासरान् निन्युः । तत्रैकाऽवदत्—सख्यः ! वामबाहुकृतवामकपोलो मुरारिर्यदा कोमलांगुलिभिः सप्तछिद्रसमन्वितं अधरार्पितवेणुं वादयति तदा विमानस्था अपि दिव्ययोषितो मोहमुपयांति । पशवः पक्षिणश्च चित्रिता इव तिष्ठन्ति । सरितः स्तिमितापा भवन्ति । लतास्तरवश्च पुष्पफलाढ्यतामुपयान्ति । हंसाद्या जलचरा मीलितदृशो भूत्वा योगिजना इव मौनमवलंबन्ते । मेघो महदतिक्रमणशंकितचित्त इव मन्दं मन्दमनुगर्जति ।

अपराऽऽह—यशोदे ! धन्यासि । यदा तव सूनुः वृन्दावनप्रदेशेषु क्रीडित्वा मध्याह्ने गोधनानि परावृत्य यमुना-

तटमायाति तदा शीतलो मन्दः सुगन्धश्च वायुः स्वयमेव तं समुपसेवते । आलि ! समग्रं गोधनं नीत्वा खुररजश्छुरितस्रक् श्यामसुन्दरो दिनान्ते यदा मन्दगत्या वनान्निवर्तते तदा चन्द्रमसं दृष्ट्वा यथा कुसुमानि विकसन्ति तथा गोपीहृदयानि प्रफुल्लितानि भवन्ति । एवं बहुविधानि पीयूषोपमानि वाक्यानि श्रुत्वा नन्दपत्नी प्रत्यवदत्——सख्यः ! नात्र मदीयं पुण्यम्, किन्तु पूर्वजपुण्यस्यैव फलमेतत् ।

ततः सायाह्ने व्रजवासिनां पुण्यराशिरिव गोकुलानन्दकारी सरामः समाजगाम । तमालोक्य सर्वा एव व्रजललनाः प्रसन्नानना बभूवुः । ततो गोष्ठगतं गोवृन्दं विलोक्य गोभक्तो बालकृष्णोऽपि स्वसदनं प्रविवेश । स्नातानुलिप्तौ कृतभोजनौ स्वलंकृतौ वनमालाविभूषितौ रौहिणेययशोदेयौ कुमुदगन्धयुक्तेन वायुना जुष्टम्, मल्लिकागन्धमत्तालिसेवितम्, समुदितोडुपतारकं च प्रदोषमालोक्य श्रवणमंगलं स्वरमंडलमूर्च्छितं गानमगायताम् । तच्छ्रुत्वा बद्धसौहृदा गोप्यः सहसा तत्र समाजग्मुः । अत्रान्तरे धनदानुचरः शंखचूडोऽपि गीतं श्रुत्वा समाकृष्टचित्तः सन् सपदि तत्राऽजगाम । सोऽथ पश्यतो रामकृष्णयोः क्रोशान्तमबलाजनमुदीच्यां हठात् प्रेरयामास । एतदालोक्य कोपाकुलौ भ्रातरावपि तमन्वधावताम् । ततस्तौ माऽभैष्ट इति भाषमाणौ द्रुतमेव तं गुह्यकाधममासेदतुः । अथ कुबेरकिंकरः कालमृत्यूपमौ

तावलोक्य स्त्रीजनं विमुच्य च जीवितेच्छया दुद्राव । ततः स्खलनिग्रहीता चक्रधरो प्रमदाजनरक्षाभारमग्रजे निक्षिप्य तच्छिरोरत्नं नेतुं स्वयमग्रे गत्वा प्रोवाच——रे शठ ! तिष्ठ तिष्ठ । त्वं मारणीयोऽसि ।

> अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
> क्षेत्रदाराऽपहारी च षडेते आततायिनः ॥ १ ॥
> आततायिनमायान्तं हन्यादेवाविचारयन् ।
> नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ २ ॥

इत्यभिधाय मुष्टिप्रहारैस्तस्य प्राणानपाहरत् । सोऽथ तन्मस्तकात् तत् शिरोरत्नं नीत्वा न्यवर्तत । ततो भास्वरं तं मणिं कामपालाय समर्प्य कृतकृत्यो बभूव । अथ बलदेवः कृष्णमाहात्म्यं जनताऽग्रे जगाद । ततो दस्युकष्टान्मुक्ता गोरिव स्त्रीवर्गोऽपि सुखेन स्वसदनं जगाम ।

इति श्रीकृष्णचरिते शंखचूडवधनिरूपणं नाम एकचत्वारिंशत्तमः स्तवकः ॥ ४१ ॥

अथैकदा महाककुत्कायोऽरिष्टासुरः खुरविक्षतां महीं धुन्वन् सहसा गोष्ठमाजगाम । सोऽथ खरतरं रंभमाणः पृथ्वीं पदा विलिखन् पुच्छमुद्यम्य च विषाणाग्रेण वप्राणि खनितुमारेभे । ततः स्तब्धलोचनः स मूत्रपुरीषे व्यसृजन् निह्रादमकरोत् । तच्छब्दं

श्रुत्वा गवां नारीणां च गर्भस्रावपातप्रसवाश्च बभूवुः। एवमालोक्य गोप्यो गोपाश्च सपदि तत्रसुः। पशवश्च तं तीक्ष्णशृंगमालोक्य भयातुराः सन्तः सहसा परित्यज्य गोकुलं पलायितुमारेभिरे। ततः केचित् कृष्ण कृष्णेति व्याहरन्तो व्रजरक्षकं शरणमयासिषुः। सोऽपि भयविह्वलां गोकुलजनतां वीक्ष्य माऽ भैषीरिति मधुरया गिरा समाश्वासयामास। ततो वृषासुरं समीपमुपयातं प्रोवाच—मन्द! एभिः पशुभिर्गोपालैश्च त्रासितैः किम्? त्वद्विधानां दुरात्मनां बलदर्पहा त्वहमेवेत्यभिधाय करतलेन बाहुमास्फोट्य भुजगाभोगं स्वभुजं सख्युः करे संस्थाप्यातिष्ठत्। अस्मिन्नवसरेऽसौ वृषभासुरो खुरेण भूमिमुल्लिखन् पुच्छमुद्यम्य कटाक्षेण तिर्यङ् निरीक्ष्य च देवराजमुक्तोऽशनिरिव कृष्णाभिमुखं दुद्राव। अथ वीरवरो दैत्यारिस्तं शृंगयोर्गृहीत्वा गजो यथा प्रतिगजं पीडयति तथा तमपीडयत्। ततः क्रोधमूर्छितोऽरिष्टः शृंगाभ्यां हरिं हन्तुमियेष। एवमालोक्य नियुद्धनिपुणो नांदिस्तं शृंगयोर्निगृह्य बलाद्भूतले निपातयामास। सोऽथ पादप्रहारैस्तं गतजीवितमकरोत्। एवमद्भुतकर्मणा कृष्णेन दैत्येऽरिष्टे निहते देवदर्शनो नारदः कंसमभ्येत्य प्रोवाच—राजन्। यद्यपि चारचक्षुर्भवान्वेत्ति तथापि भूतार्थं सर्वमावेदयामि। यद्भीतो वसुदेवो गुप्तरीत्या देवकीपुत्रं कृष्णं यशोदायै समर्प्य तत्सुतां च नीत्वा देवक्यै समर्पयामास। ताभ्यामेव रामकृष्णाभ्यां ते सखायो दैत्या

हताः । तयोर्ज्येष्ठं रामं गोकुलस्था वसुदेवपत्नी रोहिण्यपालयत् । कनिष्ठं च कृष्णं नन्दपत्नी यशोदा ररक्ष । एवमाकर्ण्य मुनिवचनं कोपाकुलः कंसः सहसा खड्गमुद्यम्य निशीथ एव वसुदेवं हन्तुमुद्यतोऽभवत् । ततो मुनिरुवाच—राजन् ! शीघ्रतां मा कुरु । वसुदेवे हते कदाचित्तौ पलायेयाताम् । तच्छ्रुत्वा कंसो देवकीवसुदेवौ पुनः सुरक्षिते स्थाने संस्थाप्य क्षणिकां शान्तिं समवाप ।

इति श्रीकृष्णचरिते अरिष्टासुरवधो नाम द्विचत्वारिंशत्तमः स्तवकः ॥ ४२ ॥

अथ प्रभाते कंसः केशिनमाहूय प्रोवाच—सखे ! त्वमेव ममाभिन्नहृदयं मित्रमसि । गोकुले मम शत्रुभूतौ रामकृष्णौ नन्दगृहे निवसतः । पुरा तौ निहन्तुं ये ये मम सखायो दैत्याः कपटकलेवराणि धृत्वा गतास्ते सर्वे ताभ्यां शीतेतरदीधितिसुतस्य नगरं प्रापिताः । तच्छ्रुत्वाऽब्रवीत्केशी—महाराज ! विद्यमाने मयि भवता शत्रुचिन्ता सर्वथा परिहर्तव्येत्यभिधाय नृपं प्रणम्य तेन सत्कृतश्च स्वस्थानं अगात् । अथापरेऽह्नि मनोजवं हयरूपं धृत्वा खुरैः प्रकंपयन्महीं नन्दव्रजमयात् । अथ गोकुलेशो विशालनेत्रम्, विकटास्यकोटरम्, नीलमेघोपमम्, हयं समालोक्य तद्धेषितैश्च समग्रगोकुलं भयभीतं विज्ञाय निर्भयः सन् तमाजुहाव । सोऽपि कृष्णशब्दं श्रुत्वा सिंहनादं कृत्वाऽतिमर्षणः पद्भ्यां अरविन्दलोचनं

बबाधे । सावधानो हरिस्तस्य प्रहारं वंचयित्वा दोर्भ्यां पादयोः प्रगृह्य भ्रामयित्वा च गरुडो यथा सर्पं प्रक्षिपति तथा तं वृक्षोपरि प्रचिक्षेप। ततो लब्धसंज्ञः समुत्थाय स कोपेन मुखम् व्यादाय च वेगेन हरिं ग्रसितुमाजगाम । अत्रान्तरेऽच्युतस्तस्य मुखे वामं हस्तं प्रवेश्य तं संवर्धयामास । येन निरुद्धकंठो हय इतस्ततः चरणान् प्रक्षिपन् मग्न एव गतप्राणो भूमौ न्यपतत् । महाभुजो हरिः तन्मुखात् स्वभुजमपाकृष्य गर्वरहितः पूर्ववदस्थात् । तस्मिन्नवसरे चकिता देवाः पुष्पवृष्टिभिस्तं संपूज्य स्तोतुमारेभिरे——

कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर ।
वासुदेवाखिलाऽवास सात्वतां प्रवर प्रभो ॥

देव ! सर्वगुणसम्पन्नस्त्वं राजरूपाणां दैत्यानां विनाशाय साधूनां च रक्षणाय यदुवंशे समवतीर्णोऽसि। दिष्ट्याद्य त्वया हयाकृतिर्दैत्यो हतः । यस्य हेषितमाकर्ण्य देवा अपि बिभ्यति मनुष्याणान्तु का वार्ता । एवं नन्दसूनुर्निहत्य केशिनं गोवृन्दैस्सह नन्दव्रजमाजगाम ।

अथ कदाचित् रामकृष्णादयो गोपकुमाराः अद्रिसानुषु पशूंश्चारयन्तः चौरपालापदेशतो निलायनक्रीडाश्चक्रुः । तेषु केचिच्चौरा आसन्, केचिच्च रामकृष्णादयो गोपबालकानामध्यक्षा बभूवुः । तस्मिन्नवसरे केचिद् दुर्बला मेषायिता अभूवन् सबलाश्च

तान् चोरयामासुः । अत्रान्तरे मयपुत्रो व्योमासुरो गोपालवेशं धृत्वाऽकस्मात्तत्राजगाम । सोऽथ चौरायितः सन् मेषायितान् गोपान्नीत्वा गिरिगुहायां निक्षिप्य शिलया तद्द्वारं पिदधे । एवमालोक्य सतांशरण्यो व्रजराजः सिंहो यथा वृकं गृह्णाति तथा तं जगृहे । ततस्तयोर्दण्डादंडं केशाकेशि च युद्धं भवितुमारब्धम् । अथ अवसरमवाप्य हरिर्दोर्भ्यां तं निगृह्य महीतले न्यपातयत् । पश्यतां देवानां मुष्टिभिस्तं व्यापादयामास । ततः गुहापिधानं निर्भिद्य तन्निरोधजात् दुःसहात्कष्टात् गोपान् रक्षित्वा देवगणैः स्तूयमानविरुदः सानुगः सगोगोपगणश्च श्रीकृष्णः गोकुलग्राममाजगाम ।

इति श्रीकृष्णचरिते केशी-व्योमासुरवधवर्णनं नाम
त्रिचत्वारिंशत्तमः स्तवकः ॥ ४३ ॥

अथैकदा वसुदेवप्रेरितो गर्गाचार्यो रामकृष्णयोरुपनयनसंस्कारं कारयितुं नंदगोकुलमगात् । तत्र अग्निसंनिधौ शिष्याभ्यां गायत्रीमंत्रोपदेशं ददौ । यथा —

ओ३म् भूः इति भूलोकाभिमानिनी देवता । भुवः इति भुवर्लोकाभिमानिनी देवता । स्वरिति स्वर्गाधिष्ठात्री देवता । मया कृतं संध्यावन्दनादिकृत्यं वेत्तु ।

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

तत्-सवितुः-वरेण्यं-भर्गः-देवस्य-धीमहि । धियः-यः-नः-प्रचोदयात् । इति पदानि॥

यः भर्गः न धियः प्रचोदयात्, देवस्य सवितुः तत् वरेण्यं धीमहि । इत्यन्वयः ॥

तस्य (सवितुः) सर्वस्य प्रसवदातुः । आदित्यान्तरपुरुषस्य, (देवस्य) हिरण्यगर्भोपाध्यवच्छिन्नस्य वा, विज्ञानानंदस्वभावस्य वा ब्रह्मणः । (वरेण्यम्) वरणीयम् । (भर्गः) भर्गशब्दो वीर्यवचनः 'वरुणाद्र वा अभिषिषिचानाद् भर्गोऽपचक्राम—वीर्यं वै भर्ग-इति श्रुतिः । तेन हि पापं भृज्जति दहति' । अथ वा भर्गस्तेजोवचनः । यद्वा 'मंडलं-पुरुषो-रश्मय-इत्येतत् त्रितयं अभिप्रेयते' । (देवस्य) दानादिगुणयुक्तस्य । (धीमहि) ध्यायामः । धियः यः नः । धीशब्दो बुद्धिवचनः कर्मवचनो वा । (यः) सविता । (नो) ऽस्माकं । (प्रचोदयात्) प्रकर्षेण प्रेरयति ॥

श्री उव्वटसायणमहीधरादिकृतभाष्यच्छाया ॥

अथाचार्य उपदिदेश—आचार्याधीनो भव अन्यत्राधर्माचरणात् । बाढम् । मैथुनं वर्जय । बाढम् । उपरिशय्यां वर्जय । बाढम् । कौशीलवगन्धांजनानि वर्जय । बाढम् । दिवा शयनं मा कुरु । बाढम् । क्षुरकृत्यं वर्जय । बाढम् । मधुमांसे वर्जय । बाढम् । गोयुक्तवाहनारोहणं वर्जय । बाढम् । नग्नस्नानं मा कुरु ।

बाढम् । आत्मस्तुतिं परनिंदामिव गणय । बाढम् । मातृदेवो भव, पितृदेवो भव । बाढम् । आचार्यदेवो भव, अतिथिदेवो भव । बाढम् । जले प्रतिबिंबं मा पश्य, क्षेमे सति रात्रौ ग्रामान्तरं मा व्रज । बाढम् । सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद । बाढम् । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । बाढम । श्रिया देयं, ह्रिया देयं, श्रद्धया देयम् । बाढम् । अश्रद्धयाऽदेयं, भिया देयं, संविदा देयम् । बाढम् । स्वयमिंद्रियमोचनं न कर्तव्यम् । बाढम् । मेखलाधारणभैदयचर्यादंडधारणसमिधाधानोदकस्पर्शनप्रातरभिवादाः कर्तव्याः । बाढम् । इत्यभिधाय पुरोहितं प्रसादयामासतुः रामकृष्णौ । ततः पुरोहितादेशेन नंदोऽनिच्छन्नपि रामकृष्णौ अवन्तिकापुरीं प्रेषयामास। तौ च तत्र गत्वा काशगोत्रजस्य कुलपतेः सान्दीपनेः गुरुकुलं समवाप्य शिक्षाग्रहणाय प्रविष्टावभूताम् ।

अथ तौ मनोवाक्कायकर्मभिः आचार्यं उपमेत्य विधिवच्छात्रधर्मं प्रतिपालयामासतुः । ततस्तयोः शुद्धभावानुवृत्तिभिस्तुष्टो द्विजवरः स्वल्पैरेव मासैः सांगोपांगान् सरहस्यान् वेदान् प्रोवाच ।

अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश ॥ १ ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥ २ ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं श्रुतम् ॥ ३ ॥

उक्ताश्च शैवतन्त्रे चतुःषष्टिः कलाः—

गीतम् । वाद्यम् । नाट्यम् । आलेख्यम् । विशेषच्छेद्यम् । तंडुलकुसुमवलिविकाराः । शय्यादौ पुष्पास्तरणम् । दशनवसनादिरागाः । मणिभूमिकर्म । शयनरचनम् । उदकवाद्यम् । उदकघातः । चित्रयोगाः । माल्यग्रथनविकल्पाः । शेखरापीडयोजनम् । नेपथ्ययोगाः । कर्णपत्रभंगाः । सुगन्धयुक्तिः । भूषणयोजनम् । ऐंद्रजालप्रयोगाः । कौचुमारयोगाः । हस्तलाघवम् । चित्रशाकापूपविकारविक्रियाः । पानकरसरागासवयोजनम् । सूचीवापककर्म । सूत्रक्रीडा । वीणादिवाद्यरचनाप्रकारः । प्रहेलिका-कूटवाक्यपरिज्ञानम् । प्रतिमाला । दुर्वाचकयोगाः । पुस्तकवाचनम् । नाटकाख्यायिकादर्शनम् । काव्य-समस्यापूरणम् । पट्टिकावेत्रबाणविकल्पाः । तर्ककर्माणि । तक्षणम् । वास्तुविद्या । रूप्यरत्नपरीक्षा । धातुवादः । मणिरागज्ञानम् । आकरज्ञानम् । वृक्षायुर्वेदयोगाः । मेषकुक्कुटलावकयुद्धविधिः । शुकसारिकाप्रलापनम् । उत्सादनम् । केशमार्जनकौशलम् । अक्षरमुष्टिकाकथनम् । म्लेच्छितकलिपिविकल्पाः । देशभाषाज्ञानम् । पुष्पशकटिकानिमित्तज्ञानम् । यंत्रमातृकाधारणम् । रत्नवेधरीतिः । मानसीकाव्यक्रिया । अभिधानकोशाः । छन्दोज्ञानम् । क्रियाविकल्पाः । छलितयोगाः ।

वस्त्रगोपनानि । द्यूतविशेषाः । आकर्षक्रीडा । बालक्रीडकानि । वैनायिकानां वैजयिकानां वैयासिकानां च विद्यानां ज्ञानं चेति ।

ततः श्रुतधरौ तौ सकृन्निगदमात्रेण सर्वा विद्याः संजगृहतुः । ततः कृतार्थौ मेधाप्रतिभासंपन्नौ च व्रजमागत्य व्रजवासिनां विरहजां पीडाम् अपाहरताम् ।

इति श्रीकृष्णचरिते रामकृष्णविद्याधिगमनिरूपणं नाम चतुश्चत्वारिंशत्तमः स्तवकः ।। ४४ ।।

अथैकदा विरंचिर्वृन्दावनमेत्य नानास्तोत्रैः राधामाधवौ तुष्टाव । अथ *—

ब्रह्मणः स्तवनं श्रुत्वा तमुवाच ह राधिका ।
वरं वृणु विधातस्त्वं यत्ते मनसि वर्तते ।। १ ।।
राधिकावचनं श्रुत्वा तामुवाच जगद्विधिः ।
वरं च युवयोः पादपद्मभक्तिं च देहि मे ।। २ ।।
पुनर्ननाम तां भक्त्या विधाता जगतां पतिः ।
ततो ब्रह्मा तयोर्मध्ये प्रज्वाल्य च हुताशनम् ।। ३ ।।
हरिं संस्मृत्य हवनं चकार विधिना विधिः ।
उत्थाय शयनात् कृष्ण उवास वह्निसन्निधौ ।। ४ ।।

* ब्रह्मवैवर्तपुराणान्तर्गतकृष्णजन्मखण्डस्य पंचदशाध्यायात् समुद्धृत्य श्रीराधिकाविवाहप्रसंगो लिख्यते ।

ब्राह्मणोक्तेन विधिना चकार हवनं स्वयम् ।
प्रणमय्य पुनः कृष्णं राधा तां जनकः स्वयम् ॥ ५ ॥
कौतुकं कारयामास सप्तधा च प्रदक्षिणम् ।
पुनः प्रदक्षिणां राधां कारयित्वा हुताशनम् ॥ ६ ॥
तस्या हस्तं च श्रीकृष्णं ग्राहयामास तं विधिः ।
वेदोक्तान् सप्तमंत्रांश्च पाठयामास माधवम् ॥ ७ ॥
संस्थाप्य राधिकाहस्तं हरेर्वक्षसि वेदवित् ।
श्रीकृष्णहस्तं राधायाः पृष्ठदेशे प्रजापतिः ॥ ८ ॥
स्थापयामास मंत्राँस्त्रीन् पाठयामास राधिकाम् ।
पारिजातप्रसूनानां मालां जानुविलंबिनीम् ॥ ९ ॥
श्रीकृष्णस्य गले ब्रह्मा राधाद्वारा ददौ मुदा ।
प्रणमय्य पुनः कृष्णं राधां च कमलोद्भवः ॥१०॥
राधा गले हरिद्वारा ददौ मालां मनोहराम् ।
पुनश्च वासयामास श्रीकृष्णं कमलोद्भवः ॥११॥
तद्वामपार्श्वे राधां च सस्मितां कृष्णचेतसम् ।
पुटांजलिं कारयित्वा माधवं राधिकां विधिः ॥१२॥
पाठयामास वेदोक्तान् पंचमंत्रांश्च नारद ।
प्रणमय्य पुनः कृष्णं समर्प्य राधिकां विधिः ॥१३॥
कन्यकां च यथा तातो भक्त्या तस्थौ हरेः पुरः ।
एतस्मिन्नंतरे देवाः सानंदपुलकोद्गमाः ॥१४॥

दुंदुभिर्वादयामासुश्चानकं मुरजादिकम् ।
गते विरंचौ सा देवी लज्जयाऽऽननमावृणोत् ॥१५॥
यः कामो ध्यायते नित्यं यस्यैकचरणाम्बुजम् ।
बभूव तस्य वशगो राधासंतोषकारणात् ॥१६॥

मुरलीं माधवकराज्जग्राह राधिका बलात् ।
चित्तापहारं राधायाश्चकार माधवो बलात् ॥१७॥

श्रीराधाभक्तिं विना श्रीकृष्णभक्तिः सफला न भवति। अत्र श्लोकौ—

गौरतेजो विना यश्च श्यामतेजः समर्चयेत् ।
जपेद्वा ध्यायते वाऽपि स भवेत्पातकी शिवे ॥ १ ॥

अनाराध्य राधापदांभोजयुग्मम् ।
अनाश्रित्य वृन्दाटवीं तत्पदाङ्काम् ।
असंभाष्य तद्भावगंभीरचित्तान् ।
कुतः श्यामासिन्धो रसस्याऽऽवगाहः ॥ २ ॥

ततो देवा श्रीराधामाधवयोर्नीराजनं कृत्वा तुष्टुवुः। अत्र केनाऽपि रचितमारार्तिकम् *—

---

* पूर्वजैर्वैद्यराज रामसुखत्रिपाठिप्रभृतिभिर्यथा श्रुतम् यथा च पण्डितप्रयागदत्तत्रिपाठिनः सकाशात् समुपलब्धं तथाऽत्र संयोजितम्।

वंदे गोपालं, अभिवंदे गोपालम्, मृगमदशोभितभालम्,
भुवनत्रयपालम् ॥ जय देव ! जय देव ! ॥ १ ॥
अगुणं सगुणाकारं, संभृतभवभारम् २, कृष्णं नंदकुमारम्,
मुनिजनसुखकारम् ॥ जय देव ! जय देव ! ॥ २ ॥
कुंचितकुंतलनीलं, पार्वणविधुवदनं २, मणिगणमण्डित-
कुण्डलराजितश्रुतियुगलम् ॥ जय देव ! जय देव ! ॥३॥
फुल्लेन्दीवरनयनं, विलसितभ्रूयुगलं २, बिम्बोष्ठं कमनीयं,
नासामणिलोलम् ॥ जय देव ! देव ! ॥ ४ ॥
कंबुग्रीवं, कौस्तुभमणिकंठाभरणम् २, श्रीवत्सांकसुललितं,
लंबितवनमालम् ॥ जय देव ! जय देव ! ॥ ५ ॥
भूषितबाहुं सुखदं, करधृतदधिगोलम् २, त्रिवलीशोभित-
उदरं, नवजलधरनीलम् ॥ जय देव ! जय देव ! ॥ ६ ॥
किंकिणिमेखलमध्ये, पीताम्बरवसनं २, नूपुरभूषितचरणं,
हरिजनसुखकरणम् ॥ जय देव ! जय देव ! ॥ ७ ॥
मुरलीवादनलोलं, सप्तस्वरगीतम् २, खेचरस्थलचरजलचर-
रंजितमतिप्रीतम् ॥ जय देव ! जय देव ! ॥ ८ ॥
कुसुमितकाननमखिलं, मंदस्मितवदनम् २, फणिवरकालि-
यदमनं, पक्षेश्वरगमनम् ॥ जय देव ! जय देव ! ॥ ९ ॥
स्तंभितयमुनातोयम्, तवचरितागणितम् २, गोपीचेतोहरणं,
दान्तं श्रीकान्तम् ॥ जय देव ! जय देव ! ॥ १० ॥

वृंदावनसंचारं, नवनीरजहारं २, करुणापारावारं,
गोवर्द्धनधारम् ॥ जय देव ! जय देव ! ॥ ११ ॥

रासक्रीडामध्ये, वेष्टितव्रजपालम् २, ताण्डवनृत्ये दक्षं,
कुवलयदलनयनम् ॥ जय देव ! जय देव ! ॥ १२ ॥

निजजनरक्षणशीलं, खलजनबलमथनम् २, गोब्राह्मणप्रति-
पालं, नौमि रमारमणम् ॥ जय देव ! जय देव ! ॥ १३ ॥

गोगोपगणैः सहितं, यमुनातटसंस्थं २, व्यासाऽभयदं शिवदं,
तापत्रयीशमनम् ॥ जय देव ! जय देव ! ॥ १४ ॥

इति श्रीकृष्णचरिते श्रीराधाविवाहनिरूपणं नाम
पंचचत्वारिंशत्तमः स्तवकः ॥ ४५ ॥

अथ कदाचिच्चारद्वारा केशिनिधनं रामकृष्णयोश्चान्यत्र-गमनं निशम्य कंसः चिन्ताऽर्णवे न्यमज्जत् । यथाकथंचिद्धैर्यं धृत्वा सचिवानाजुहाव । ते प्रोचुः——स्वामिन् ! चिन्तयाऽलम् । 'अनिर्वेदः श्रियो मूलम्' इति नीतिज्ञा व्याहरन्ति । दुर्दान्तशत्रु-दमनाय कपटावलंबनमेव सिद्धिप्रदं भवति । अक्रूरद्वारा तावत्रा-हूय येनकेनापि प्रकारेण तौ हंतुमर्हसि । इत्यभिधाय सचिवा यथाऽभिमतं स्थानं गताः । अथ राजाऽक्रूरं आजुहाव । ततः समायातं तं विधिवत्संपूज्य तस्य च पाणिं पाणिना गृहीत्वा

ऽब्रवीत्——दानपते ! त्वमसि यादवेषु मम विश्वासपात्रम् । अतो ममार्थं साधयित्वा संकटसागरान्मामुद्धर । मित्रवानेव सर्वार्थान् साधयितुं शक्त इति सर्वसम्मतः सिद्धान्तः । वसुदेवसुतः कृष्णः साग्रजो मम सहजशत्रुः । मम भयात् स क्वाऽपि गत्वा पुनरायात इति मया श्रुतम् । भवानितो द्रुतं गोकुलं व्रजतु । ततः साम्ना दानेन भेदेन वा यज्ञमहोत्सवं विलोकयितुं विश्वासमुत्पाद्याऽऽशु सभ्रातृकं तमिहानय । सखे ! नन्दाद्या गोपा इहागमिष्यन्ति धनुर्यज्ञे तदा कुतूहलात्तावपि तैः सह समायास्यतः । ततोऽहं कालकल्पेन गजेन तौ घातयिष्ये । यदि कथंचिन्मुक्तौ भविष्यतस्तर्हि वैश्रुतोपमैर्मल्लैस्तौ नाशयिष्यामि । इत्थं सफले प्रयत्ने वसुदेवप्रभृतीन् यादवान्निहत्य राज्यलुब्धं सदेवकमुग्रसेनमपि व्यापादयिष्यामि । ततो भविष्यति राज्यं मम निष्कंटकम् । मगधाधिपतिः जरासन्धोऽस्ति मे श्वशुरः । वानरराजो द्विविदो मे सहृदयः । बाणनरकशंबराश्च मे पृष्ठपोषकाः । अतो मम विजये शंकालेशोऽपि नास्ति । निशम्यैतत्कथनं कंसस्य श्वाफल्किः सहसा वृश्चिकदष्ट इव बभूव । सोऽथ क्षणं स्थित्वाऽवदत्—राजन् ! सत्यमुक्तं भवता । कर्म मनुष्यायत्तम् फलं च दैवाधीनम् ।

मनोरथान्करोत्युच्चैर्नरो दैवहतानपि ।
सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् ॥

अस्तु, शिरसि धृत्वा भवदीयामाज्ञां तावानेतुं प्रातरेव गोकुलम् यास्यामीत्यभिधाय गान्दिनीनन्दनः स्वसदनं जगाम। कंसोऽपि प्रक्षिप्तबाणो व्याध इव विश्वासमापन्नो निजागारं जगाम।

इति श्रीकृष्णचरिते अक्रूरप्रेषणनिरूपणं नाम षट्चत्वारिंशत्तमः स्तवकः॥ ४६ ॥

अथ हर्षविषाददोलाधिरूढोऽक्रूरस्तां रात्रिं मधुपुर्यामेव यापयामास। सोऽथ प्रातरेव रथमारुह्य गोकुलं प्रतस्थे। ततो मार्गवाहिनीं यमुनाम् समुत्तीर्य तत्तटे सघनच्छायायां स्थित्वा व्यचिन्तयत्—अहो! हरिविरोध्यपि कंसो ममोपरि अनुग्रहं कृतवान्। अथवा—

किं मयाऽऽचरितं पुण्यम् किं तप्तं परमं तपः।
किं दत्तं गुरवे दानम् यद् द्रक्ष्याम्यद्य केशवम्॥

अहो! विषयासक्तचित्तोऽप्यहमद्य पुंडरीकाक्षदर्शनमवाप्स्यामि। यच्चरणनखमंडलत्विषा हरिभक्ता अम्बरीषप्रभृतयो दुस्तरं तमस्तेरुः। कृष्णदर्शनं पुण्यैर्विना दुर्लभम्। यथा प्रवाहपतितस्तृणो नदीतटमवाप्य कार्यसाधको भवति तथा प्रबलपुण्योदयात् अद्य कृष्णदर्शनमवाप्याहमपि कृतकृत्यो भविष्यामि।

न तस्य कश्चिद् दयितः सुहृत्तमो।
न चाप्रियो द्वेष्य उपेक्ष्य एव वा।

तथापि भक्तान् भजते यथा तथा ।
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ १ ॥
ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः ।
यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजम् ॥२॥

प्रभो ! विश्वासघातपातकान्मां रक्ष । कंसप्रेरणया त्वां नेतुमहमागतोऽस्मि । नात्र मम कश्चिद् दोषः । गोपालो गाश्चारयितुं वनं गतोऽस्ति । अतोऽधुना तत्र गमनमनुचितम् । सोऽथ यात्रायां गोधूलिवेलाऽतिप्रशस्तेति निश्चित्य मध्याह्नं तु तत्रैवागमयत् । ततोऽपराह्णे रथमारुह्य प्रस्थितोऽक्रूरोऽस्तमनवेलायां गोकुलं प्रविवेश । ततस्तत्र लोकपालकिरीटजुष्टानि यवकमलांकुश रेखांकितानि हरिचरणचिह्नानि विलोक्य मुदितमनास्तद्धूलिषु लुलोठ ।

अथ गांदिनीनन्दनः शरदंबुरुहेक्षणौ नीलपीताम्बरौ रामकृष्णौ विलोक्य स्नेहविह्वलः सन् तच्चरणोपान्ते दंडवत्प्रणिपपात ।

देहभृतामियान् धर्मो हित्वा दंभं भियं शुचम् ।
भक्त्या परमया ध्यायेद् देवदेवं जनार्दनम् ॥

ततः श्रीकृष्णदर्शनाह्लादबाष्पपर्याकुलेक्षणो रोमांचितांगश्च यादवोऽत्यौत्सुक्यात् श्वफल्कसूनुरक्रूरोऽहं प्रणमामीति भाषितुमपि न शशाक । अत्रान्तरे सर्वज्ञो भगवान् रथांगांकितपाणिना

तमाकृष्य परिरेभे । अथ महामना बलभद्रोऽपि कृतप्रणामं तं समाश्लिष्य स्वपाणिना तस्य हस्तं गृहीत्वा स्वसदनं निनाय । ततस्तौ तस्मै शुभासनं दत्त्वाऽनामयं पप्रच्छतुः । अत्रान्तरे नंदोऽपि तत्र समाजगाम । सोऽथ तं प्रणम्य तत्पादौ प्रक्षाल्य च गृहागताय तस्मै गां विनिवेदयामास । ततो विश्रान्ताय षड्रस-संयुक्तमन्नं समर्पयामास । अथ भुक्तवते यादवाय प्रीत्या सुगंध-माल्यमुखवासादीनपि समर्प्याऽपृच्छत्—महामते ! निरनुग्रहे कंसे जीवति सति यूयं कथं जीवथ ? देवकीवसुदेवौ तु कुशलिनौ कच्चित् ? पौरा जानपदाश्च स्वधर्मानुष्ठानपराः कच्चित् ? वृद्धौ देवको-ग्रसेनौ तु कुशलिनौ कच्चित् ? कृपयोत्तरं दत्त्वाऽस्मान् संप्रीणय ।

निशम्यैतत् सूनृतवचनं प्रत्युवाचाऽक्रूरः—महाशय ! कंसराज्ये सुखं कुतः ? देवकीवसुदेवौ तु कारागारं निषेवेते । उग्रसेनश्च कंसनिरीक्षणे हृताधिकारस्तिष्ठति । संप्रति कंसो धनुर्यज्ञदीक्षितोऽस्ति । तेन च रामकृष्णाभ्यां निमंत्रणं दत्तम् । अतो भवता प्रभाते तौ मया सह मथुरां प्रति यज्ञदर्श-नार्थं प्रेषणीयौ । तच्छ्रुत्वा दंपती सहसैव वृश्चिकदष्टाविव बभूवतुः । अथ व्रजचंद्रः सायंकालोचितमशनं कृत्वाऽक्रूरमुप-सृत्य प्राह—तात ! प्रत्यहं जननीजनकयोः स्मृत्वा कष्टं नितरां विषीदामि, किंतु परवानहम् किं करवाणि । कुलकष्टप्रदः कंसो नाममात्रेण मातुलोऽस्ति । वस्तुतोऽस्माकं वंशविच्छेदकः ।

तच्छ्रुत्वाऽक्रूरः संक्षेपेण कंसस्य यादवैः सह वैरानुबंधं नारदागमनादिकं च तस्मै शशंस । अस्मिन्नेव समये नंदः समागतान् गोपान् प्रति कंससंदेशं श्रावयामास । निशम्य राजशासनं गोपा बाढमित्युक्त्वा स्वगृहान् ययुः । ततो गतेषु गोपालेषु यादवः दुग्धधवलायां शय्यायां शयित्वा मार्गजनितं सकलं श्रमं गमयामास ।

इति श्रीकृष्णचरिते अक्रूरागमननिरूपणं नाम
सप्तचत्वारिंशत्तमः स्तवकः ॥ ४७ ॥

अथ व्रजाधिपो नंदराजः प्रातः समुत्थाय कृतनित्यकृत्यो गोपानाहूय समादिदेश—भ्रातरः ! अद्य धनुर्यागमहोत्सवं द्रष्टुं सोपायना वयं मथुरां समेष्यामः । अतो गोरसो गृह्यताम् । शकटानारुह्य गम्यताम् । पश्यत, जानपदा इमे लोकाः सोत्कंठा मधुपुरीं प्रति धावंति । एवं नंदनिदेशं श्रुत्वा रसभाण्डान् नीत्वा च शकटारूढा गोपाः प्रतस्थिरे। अत्रान्तरे गोप्योऽपि रामकृष्णौ पुरीं नेतुमक्रूरागमनं श्रुत्वा भृशं चिंतिता बभूवुः ।

अहो ! विधातस्तव न क्वचिद् दया ।
संयोज्य मैत्र्या प्रणयेन देहिनः ।
तांश्चाऽकृतार्थान् वियुनंक्ष्यपार्थकम् ।
विक्रीडितं तेऽर्भकचेष्टितं यथा ॥

हे निर्दय ! नीलकुन्तलावृतं सुलोचनं मुकुन्दं अस्मदभिमुखं कृत्वाऽद्य विमुखं कर्तुमुद्यतोऽसि । हा विधे ! पुरा संयोगदो भूत्वाऽनन्तरं वियोगदो मा भव । वयं त्वद्दत्तेनैव चक्षुषा सर्वांगसुन्दरं कृष्णं विलोक्य त्वदीयं सृष्टिनैपुण्यं प्रशंसामः ।

अत्रान्तरेऽपरा प्रोवाच—सख्यः ! विध्युपालंभेनालं, स्वयं नन्दनन्दनोऽप्यस्मान्न समीक्षते । स नवसंगमप्रियः क्षणभंगसौहृदश्चास्ति । विमूढा वयं सुतस्वजनगृहपतींश्च त्यक्त्वा यस्य दास्यं गताः । यथाऽश्वस्तु धावित्वा परिश्राम्यति किन्तु अश्वारोही परिश्रमं तस्य न गणयति, तथाऽस्माकं दशा जाता । रात्रिरेषा तु माथुरीणां सुप्रभाताऽभवत्, यदद्य ताश्चकोर्यश्चन्द्रमसमिव श्यामसुन्दरं विलोकयिष्यन्ति । सख्यः ! कृष्णचन्द्रस्य प्रत्यागमनाशां सर्वथा त्यजत । यतो विदग्धानां पौराङ्गनानां सलज्जस्मितविभ्रमैर्मोहितो मदनमोहनो नास्मान् गोपीजनान् कदाऽपि संस्मरिष्यति । नूनं यदुकुलस्त्रियोऽपि प्रशस्याः, या अद्य पुरुषोत्तमं देवकीकुमारं विलोकयिष्यंति । वयस्याः ! ईदृशस्य क्रूरकर्मणः अक्रूर इति शोभनं नाम केन रक्षितम् । अयन्तु महाक्रूरः । पश्यत, पश्यत । अयमनाश्वास्य गोपीजनान् प्रागेव रामकृष्णौ नीत्वा मथुरां प्रस्थातुकामोऽस्ति ।

अत्रान्तरे रामकृष्णौ नंदराजं रोहिणीयशोदे च प्रणम्य जगदतुः—महानुभावाः ! क्षमध्वमावयोरपराधम् । आवां सेवा-

समये विहाय भवतां सान्निध्यं मधुपुरीं गच्छावः। पुत्रो मातापित्रो ऋणात् कदापि मुक्तो न भवति । उक्तं च मनुना—

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥

एवमाकर्ण्य प्रियवचनं यशोदाऽवदत्—वत्सौ ! समानावुभयत्र मातापितरौ । तत्र गत्वा शीघ्रं तयोः कष्टनिवारणं कुरुतम् । अत्रत्या प्रीतिर्न कदापि विस्मर्तव्या ।

देहस्तु वर्तते कृष्ण ! ममाऽत्र विरहे तव ।
मनस्तु सर्वदा सार्द्धं त्वयैव विचारिष्यति ॥

ततः 'पंथानः शिवाः संत्विति' मात्रादिष्टौ रामकृष्णौ तत्राजग्मतुः यत्र चत्वरे गोपीगणाः कृष्णदर्शनलालसास्तस्थुः । एवमालोक्य काचित् सख्युवाच—आल्यः ! अलमक्रूरोपालंभेन। सैष कृष्णोऽप्यद्य स्नेहशून्योऽभवत्। तच्छ्रुत्वाऽपरा प्राह—सखि ! मैवं वद । सम्प्रति वयं श्रीकृष्णं विनयवचनैः प्रबोध्य मथुरागमनान्निवारयामः । दर्शका वृद्धा अस्माकं किं करिष्यन्ति । लोके मुकुंदविरहसमोऽतिकष्टप्रदो विषयोऽन्यो नास्ति ।

योऽह्नः क्षये व्रजमनंतसखः परीतो ।
गोपैर्विशन् खुररजश्छुरितालकस्रक् ।

वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन ।
चित्तं क्षिणोत्यमुमृते नु कथं भवेम ॥

एवं ब्रुवाणा विरहातुरा व्रजवनिता विहाय लज्जामुच्चस्वरेण गोविन्द ! माधव ! दामोदर ! इति संबोधयन्त्यो रुरुदुः । अत्रान्तरे कृतप्रातःकृत्यः अक्रूरोऽपि रथारूढस्तत्राऽऽजगाम । अथ नंदाद्या गोपा अपि नानोपायनानि नीत्वा शकटैस्तमनुसस्रुः । एवमालोक्य गोप्योऽपि कृष्णमनुसर्तुं आरब्धाः । ततश्चतुरचूडामणिः कृष्णो व्रजवनितानां दृढां भक्तिं विलोक्य गद्गद्गिरा प्रोवाच—सख्यः !

मातापित्रोः प्रियं कर्तुं गच्छामि मथुरामितः ।
अन्यथा मम चित्तं तु नित्यं वसति गोकुले ॥

भवतीभिश्चिन्ताऽधिका न कार्या, यतः कार्यं कृत्वाऽहं पुनर्दर्शनार्थमिह आगमिष्यामि । भद्राः ! संयोगा भवंति खलु वियोगान्ताः । एवं बहुविधैर्वाक्यैः समाश्वास्य सामजो रथमारुरोह । ततो गोप्यो यावद्रथमालक्ष्यते यावच्च रेणुर्दृश्यते तावच्चित्रलिखिताः प्रतिमा इव तत्रैव समवतस्थिरे । ततोऽक्रूररथो वायुवेगेन रथेन पतितपावनीं यमुनां ततार । अत्रान्तरे कृष्णं स्मरंत्यो गोप्योऽपि गोकुलं प्रविविशुः ।

ततोऽक्रूरश्चिन्तयामास—यदाहं दिवा नगरीं प्रविशामि तदा नागरिका मां कंसपक्षपातिनं मत्वा निन्दिष्यन्ति, अतोऽत्रैव

कालयापनं युक्तम् । इति निश्चित्य माध्यन्दिनं कृत्यं संपादयितुं रथादवतीर्य क्वचिच्छायायां विश्राम्यति स्म । सोऽथ माध्यंदिनं कर्म कर्तुं जले निमज्य यावत् सनातनं ब्रह्म जपति तावत् तावेव वासुदेवौ सलिले विलोकयति ।

यावन्निरंजनमजं पुरुषं पुराणम् ।
संचिन्तयामि निखिले जगति स्फुरंतम् ।
आयाति तावदचिरेण हृदन्तरे मे ।
गोपस्य कोऽपि शिशुरंजनपुंजमंजुः ॥

एवमालोक्य विस्मितो गांदिनीसुतो वहिर्निःसृत्य यावत् रथं पश्यति तावत् रामकृष्णभूषितः स्यंदनस्तथैव तिष्ठति । ततो भ्रमाविष्टोऽक्रूरः पुनः सलिले न्यमज्जत् । तस्मिन्नवसरे देवगन्धर्वचारणैः स्तूयमानं सहस्रफणिमौलिनं शुभ्रवर्णं नीलाम्बरं रौहिणेयं तस्योत्संगे च पुण्डरीकाक्षं पीतकौशेयवाससं चतुर्भुजं घनश्यामं श्रीकृष्णचन्द्रं च ददर्श । ततोऽतितुष्टः श्वाफल्किः धैर्यं धृत्वा हरिं स्तोतुमारभत—

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये ।
सर्वात्मने सर्वधियां च साक्षिणे ।
गुणप्रवाहोऽयमविद्यया कृतः ।
प्रवर्तते देवनृतिर्यगात्मसु ॥

देव ! त्वमेवाऽस्य प्रपंचस्य हेतुरसि । इमानि पंचभूतानि, तेषां कारणमहंकारः, महत्तत्त्वं, प्रकृतिः, पुरुषः, मनः, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, शब्दस्पर्शरूपरसगंधाः, इन्द्राद्या लोकपालाश्च तवांगात् समुत्पन्नाः । अत्र छान्दोग्यश्रुतिः—

य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्ण इति ॥

एवमक्रूरेण संप्रार्थितो भगवान् नटो नाट्यमिव भूयस्तद्रूपं संजहार । ततो यादवो निःसृत्य जलात् सर्वमावश्यकं विधिं समापयामास ।

अथ हृषीकेशस्तमपृच्छत्—तात ! सम्प्रति त्वयाऽत्र स्थले जले वा किमाश्चर्यं दृष्टम् ? निशम्यैतद् भगवद्वचनं गांदिनीसुतोऽवदत्—देव ! त्रिलोक्यां यावन्त्यद्भुतानि वस्तूनि संति तानि सर्वाणि विश्वात्मके त्वयि मया समवलोकितानि । ततः संकोचमापन्नः श्वफल्कितनयः शनैः शनैश्चालयन् रथं दिनात्यये रामकृष्णसमेतो मथुरान्तिकमवाप । तस्मिन्नवसरे मार्गे ये ये जना मिलितास्ते ते वीक्ष्य वासुदेवौ निर्निमेषा इव बभूवुः । अत्रान्तरे समायाता नंदगोपादयोऽपि आनन्दं लेभिरे । ततः प्रहसन्नुवाच—तात ! सरथो भवान् अस्मत्प्रवेशात् पूर्वमेव पुरीं प्रविशतु । वयं तु अत्रोपवने वस्तून्युत्तार्य पश्चात्पुरीं

द्रक्ष्यामः। एवमाकर्ण्य हरिवचनं प्रत्यवदत् यदुपुंगवः—प्रभो ! नाऽहं भवद्भ्यां रहितः पुरीं प्रवेक्ष्यामि । कृपां कृत्वा पूर्वं मम गृहं पवित्रचरणार्पणेन पुनीतं कर्तुमर्हसि । मम त्वेषा प्रार्थना ।

दिवि वा भुवि वा ममास्तु वासो ।
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ ।
चरणौ ते मरणेऽपि चिन्तयामि ॥

तच्छ्रुत्वा प्रत्यवदत् गोविन्दः—तात ! बाढम् । अवगतो मया भवदीयोऽभिप्रायः । किन्त्वहं पूर्वं यदुचक्रद्रुहं हत्वाऽनंतरं भवत्सदनमायास्यामि । इत्थं भगवताऽऽदिष्टोऽक्रूरो विमना इव पुरीं प्रविश्य कंसाय स्वकर्म समावेद्य च स्वगृहं जगाम ।

इति श्रीकृष्णचरितेऽक्रूरमथुरानिवर्तनं नाम
अष्टचत्वारिंशत्तमः स्तवकः ॥ ४८ ॥

अथ ससंकर्षणः सगोपश्च श्रीकृष्णः रम्योद्यानशोभिताम्, सर्वर्तुसुखावहां, ध्वजपताकादिभिरलंकृताम्, रंभापत्रपूर्णकुंभविभूषितद्वारां, संसिक्तरथ्यापणमार्गचत्वरां च मथुरां प्रविवेश । ततो युगलकिशोरयोः शुभागमनसमाचारं श्रुत्वा दर्शनार्थमुत्कण्ठिता काचित् नूपुरं करे कटकं च चरणे धृत्वाऽद्रवत् । एका युगल-

धार्येषु कुंडलकंकणादिषु एकमेव नीत्वा चचाल । अपरा कज्जलमेकस्मिन्नेव नेत्रे निधाय द्वितीयमनकृत्वैव चन्द्रशाला-मारुरोह । इतरा च समाकर्ण्य कोलाहलं स्तन्यमर्भकं पाययंती विहाय स्वकर्तव्यं द्रुतं ससार । ततो दृष्ट्वा नंदकिशोरौ मुग्धाः पौरांगना मिथः प्रोचुः—

अधरं मधुरं वदनं मधुरम्, नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरम्, मथुराधिपतेरखिलं मधुरम् ॥१॥
वचनं मधुरं चरितं मधुरम्, वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरम्, मथुराधिपतेरखिलं मधुरम् ॥२॥

ततस्तत्र राजमार्गे तत्प्रेक्षणस्मितसुधोक्षणलब्धमानाः काश्चित्पौरांगनाः दृशैवानंदमूर्तिं श्रीकृष्णचन्द्रमुपगुह्य हृष्टत्वचः सत्यः सद्यो मानसीं व्यथां तत्यजुः । प्रसन्नाननाः काश्चित् प्रासा-दशिखरमारुह्य प्रीत्या रामकृष्णयोरुपरि लाजाः पुष्पाणि च समवाकिरन् । काश्चिद् द्विजपत्न्यः गंधपुष्पाक्षतादिभिर्वासुदेवौ संपूज्य ताभ्यां विविधानि पक्वान्नानि समपर्यामासुः । एवमालोक्य केचिदूचुः—अहो ! धन्या व्रजवनिताः, या नवलकिशोरौ नरलोकमहोत्सवौ नित्यं निरीक्षंते ।

अत्रांतरे हरिः वस्त्रग्रंथिसमेतं कंचिद्रंगकारं समायांतं दृष्ट्वा प्राह—सखे ! कृपयाऽस्मभ्यं निर्णिक्तानि दिव्यवासांसि

देहि । कंसराजेन निमंत्रिता वयं धनुर्यज्ञं विलोकयितुमायाताः । अनेनाऽतिथिपूजनेन श्रेयस्ते भविष्यति । तच्छ्रुत्वा सोऽवदत्— गोपकुमार ! मथुरायामस्यां प्रत्यहं त्वादृशा बहवः समायांति । भूपार्हाणीमानि कौशेयवसनानि ग्रामीणाः कथं धारयेयुः ? यदि जिजीविषा तर्हि शीघ्रमितो गृहं गच्छ । तंतुवायवीतानि कार्पासवासांसि परिधत्स्व । परित्यज्य दर्पं सारल्यवमलंबस्व । यतो बध्नति दृप्तं राजकुलानि । एतदाकर्ण्य रजकवचनं रामानुजः चपेटिकयैव तं विह्वलमकरोत् । ततस्तस्य तां दशां दृष्ट्वा भयाकुला रजककिंकराः सहसा पलायांचक्रिरे । ततोऽच्युतः पीताम्बराणि बलभद्रो नीलाम्बराणि गोपकुमाराश्च भूमिपतितानि वसनानि सपदि जगृहुः । अत्रान्तरेऽकस्मादायातः कश्चित् तुन्नवायः प्रीत्या नंदकिशोरयोर्यथानुरूपं वेशमकरोत् । तस्मिन्नवसरे तौ गौरश्यामौ नंदनंदनौ पर्वणि बालगजाविव विरेजतुः । ततस्तौ स्वभक्तस्य सुदाम्नो मालाकारस्य सदनं जग्मतुः । हरिभक्तः स समालोक्य तौ सहसोत्थाय भुवि दण्डवत् प्रणनाम । सोऽथ विधिवत् तौ संपूज्य प्रोवाच— महाभागौ ! जातमद्य मम सार्थकं जन्म । युवयोरागमनेन देवाः पितरश्च मह्यं तुष्टाः । एवं सुधोपमेन भाषणेन तौ परितोष्य प्रशस्तपुष्पै रचितां मालां संकर्षणाय विनिवेद्य गोपाललालायाऽपि समर्पयामास द्वितीयां स्रजम् । अथ कृपापात्राय

याचमानाय तस्मै भगवंतौ भक्तिवरं प्रददतुः । ततस्तुष्टो मालाकारोऽवदत्—महाशयौ ! सिद्धाः सर्वे मम मनोरथाः । मम त्वेषाऽभ्यर्थना—

न याचे गजालिं न वा वाजिराजिम् ।
न वित्तेषु चित्तं मदीयं कदाचित् ।
इयं केशवस्य प्रशस्ता मदीये ।
वसेन्मानसे मूर्तिरानंददात्री ॥

अथ तथाऽस्त्विवति व्याहृत्य वासुदेवौ मधुपुरीं द्रष्टुं ययतुः ॥

इति श्रीकृष्णचरिते हरिमथुराप्रवेशो नामैकोनपंचाशत्तमः स्तवकः ॥ ४९ ॥

अथ माधवो घंटापथेन व्रजन् गृहीतांगविलेपभाजनां कुब्जां विलोक्याऽपृच्छत्—सुन्दरि ! का त्वम् ? इदमनुलेपनं कस्मै नयसि ? यदि कृपां कृत्वा त्वमस्मभ्यं दास्यसि तर्हि श्रेयस्ते भविष्यति । निशम्यैतद् व्रजराजवचनं त्रिवक्रोवाच—महानुभाव ! कुब्जाभिधानाहं कंसकिंकरी । भूपालार्थमेतन्नयामि । यदि तुभ्यमेतद्रोचते तर्हि गृहाण । साऽथ व्रजचन्द्ररूपमोहिता तत् सान्द्रानुलेपनं साग्रजाय यशोदानंदनाय सहसा प्रादात् । ततः सर्वाङ्गसुंदरौ तौ शोभातिशायिनांगरागेण तेन चर्चितकलेवरौ नितरामशोभेताम् ।

अथ संतुष्टो जनार्दनस्तामृज्वीं कर्तुमियेष ।सोऽथ—

पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना ।
प्रगृह्य चिबुकेऽध्यात्ममुदनीनमदच्युतः ॥

ततो मुकुन्दाङ्गस्पर्शात् साऽशु ऋज्वंगी प्रमदोत्तमा बभूव । एतत् ज्ञात्वा स्मितमुखी सा तदुत्तरीयमाकृष्य जगाद—केशव ! एहि एहि । संप्रति मया सह गृहं चल । तत्रावां रंस्यावहे । त्वां त्यक्तुं नाऽहं सर्वथा समुत्सहे । तच्छ्रुत्वा हरिः पश्यतां बलभद्रादीनाम् सास्मितमिदमाह—सुभ्रु ! त्वरां मा कुरु । साधितार्था वयं ते गृहमवश्यं समेष्यामः । यतोऽगृहाणां मादृशानां तु त्वमेव परायणमासि । एवं माधवो मधुरया गिरा तां समाश्वास्य व्यसृजत् । ततः साग्रजः सगोपश्च नंदसूनुः पथि गच्छन् नानोपायनपाणिभिर्वणिग्भिः सत्कृतोऽतितरां जहर्ष । अथ गोपगणपुरस्सरौ रामकृष्णौ श्वाफल्किसूचिते प्रासादे स्थितिमकुरुताम् । ततस्तत्र तौ क्षीरमिश्रितमन्नं भुक्त्वा कंसचिकीर्षितं च ज्ञात्वा तां रात्रिं सुखं सुषुपतुः ।

अत्रान्तरे चारचक्षुः कंसो गोपगणसमेतयोः वासुदेवयोः आगमनसमाचारं श्रुत्वा सपदि भयकंपितो बभूव । सोऽथ जागरूकोऽपि दर्पणे स्वशिरोऽदर्शनमन्वभवत् । ततोऽक्षिसंकोचं विनाऽपि ज्योतिषां द्वैरूप्यमद्राक्षीत् । गात्रच्छायायां

छिद्रमवलोक्य मुहुर्मुहुरकंपत । प्राणघोषस्याऽनुपश्रुतिं विचिन्त्य जीविताशां तत्याज । वृत्तेषु स्वर्णवर्णत्वमवेद्य चिखिदे । ततः प्रजागरखिन्नो राजा यथाकथंचित् सुष्वाप । सोऽथ पश्चिमे यामे स्वप्ने प्रेतालिंगनमकरोत् । स्वयं विषं पीत्वा तैलाभ्यङ्गमकरोत् । ततो दिगम्बरो भूत्वा स्वयमेव श्मशानमगात् । ततः प्रबुद्धोऽवाप्य त्रासं सद्यस्तल्पमत्यजत् । इत्थं चिन्तातुरः कंसो महता कष्टेन रात्रिमत्यवाहयत ।

अथ प्रभातेऽदूभ्यः समुत्थिते भगवति दिनमणौ कंसः समुत्थाय कृताह्निकः सेवकानाहूयाऽऽदिदेश——भो भो राजपुरुषाः ! धनुर्यज्ञानुष्ठानाय सत्वरं रंगभूमिं संस्कुरुत । निशम्यैवं भूपाज्ञां तथाऽस्त्विति व्याहृत्य चेटकाः सपदि मार्जनचंदनांभःसेचनपुष्पविकरणादिभिस्तां मखशालां सुसज्जितां चक्रुः । ततो दुंदुभिनादोऽभवत् । शंखध्वनिसमेतः शतघ्नीघोषो नागरिकान् समुत्सुकानकरोत् । अत्रान्तरे पौराः पौरांगनाश्च दिदृक्षया तत्र समाययुः । रंगावनेरेकपार्श्वे नरा अपरभागे च नार्य उपाविशन् । अथाऽमात्यैः सामंतैश्च परिवृतो राजाधिराजः कंसः समागत्य रत्नजटितं सिंहासनमध्यतिष्ठत् । ततो वाद्यमानेषु वाद्येषु पुरस्कृत्य गोपान् नंदनन्दनौ समायातौ । अथाऽच्युताग्रजो विलोक्य विशालां धनुर्मखशालां भ्रातरमुवाच——तात ! पश्य पश्य चतुर्द्वारां स्वर्णस्तंभां विचित्रां च

यज्ञभूमिम् । अत्र सभामध्ये स्थितोऽस्मन्मातुलो महीपालो देववृन्दमध्ये विराजमानो विडौजा इव विद्योतते । यद्ययमधर्मरतो न भवेत्तर्हि तु स्वप्रतापेन नवखंडामपि मेदिनीं स्वायत्तां कर्तुं शक्नोति । ततो वासुदेवौ विप्रान् वृद्धांश्च प्रणम्य लब्धाशीर्वादौ दिव्यासने समलंचक्रतुः ।

अत्रान्तरे कृताग्निहोत्रो राजपुरोहितः समुत्थाय प्रोवाच—भो भो निमंत्रिता महानुभावाः ! वर्ततेऽद्य जन्मदिनमत्रभवतः कंसराजस्य । महोत्सवेऽस्मिन् योऽधुना विचित्रां धनुर्लीलां दर्शयिष्यति तस्मै संतुष्टो महीमहेन्द्रो हयदन्तावलसमेतां रत्नमालां पुरस्कारस्वरूपेण समर्पयिष्यति । एवमाकर्ण्य घोषणां गोपाः प्रोचुः—बलदेव ! किं विलोकयसि ? चमत्कारं दर्शयित्वा द्रुतं वरस्व कीर्तिकान्ताम् । कृष्ण ! कृत्वा कौतुकं कुरु कंसराजं करतलगतम् । एवमाकर्ण्य मित्रवृन्दवचनावलीं गोकुलचन्द्रमाः सपद्युत्थाय वामेन पाणिना धनुर्जग्राह । सोऽथ दक्षिणेन करेण सज्यं कृत्वा शरं संधाय च यावदाकर्षति तावदिक्षुकाण्ड इव सद्योऽत्रुट्यत् । तच्छब्दं श्रुत्वा साधु साध्विति वदंतो लोकाश्चक्रपाणिं प्रशशंसुः । कंसः सत्वरं कम्पितकलेवरो बभूव । अत्रान्तरे कृतसंकेता मंत्रिणा राजसेवका हन्यताम् गृह्यताम् इति वदंतः सत्वरं रामकृष्णौ परिवव्रुः । एतदालोक्य कुपितौ यदुपुंगवौ धनुःशकले समादाय ताभ्यां ताँस्ताडयितु-

मारब्धौ। विलोक्यैतत् साहसं पौरवनिता मिथः प्राचुः—आल्यः! विचित्रवीर्यौ राजकिशोरावेतौ हरिहरावेव धरातलेऽवतीर्णाविति मन्यामहे। वीरताऽनयोः श्लाघ्या।

गोप्यो मुकुंदविगमे विरहातुरा या।
आशासताऽऽशिष ऋता मधुपुर्यभूवन्।
संपश्यतां पुरुषभूषणगात्रलक्ष्मीम्।
हित्वेतरान्नुभजतश्चकमेऽयनं श्रीः॥

अत्रान्तरे कंसप्रेरितं सैन्यमपि तत्राऽऽजगाम। महावीरौ तौ पौरुषेण समग्रमपि तद्बलं निहत्य केशरिकिशोराविव तत्र पर्यटताम्। एवमालोक्य सचिवोऽब्रवीत्—गोपदारकौ! किमनेन स्वल्पबलनिपातनेन? संप्रति तु भगवान् भानुरस्ताचलं समुपैति। अतो युद्धविश्रामो भवतु। श्वः प्रभाते स्वत एव जयपराजयनिर्णयो भविष्यति। एवं प्रधाननिदेशं श्रुत्वा सभासदः सर्वे सभाविसर्जनं चक्रुः।

इति श्रीकृष्णचरिते धनुर्भंगनिरूपणं नाम
पंचाशत्तमः स्तवकः॥ ५०॥

अथ प्रभाते कृताह्निकौ रामकृष्णौ मल्लदुंदुभिनिर्घोषं श्रुत्वा पुरस्कृत्य गोपकुमारान् महोत्सवं द्रष्टुं रंगभूमिं प्रापुः। तत्रा-

ऽम्बष्ठप्रचोदितं कुवलयापीडाख्यं गजराजं स्वस्योपरि समाक्रमन्तं विलोक्य हरिः सपदि युद्धार्थं सन्नद्धो बभूव । सोऽथ कुटिलालकान् समुह्य मेघनादगभीरया गिरा हस्तिपमुवाच—रे रे निषादिन् ! देहि मे गमनाय मार्गम् । विलम्बं च मा कुरु । नो चेत् सकुंजरं त्वामधुनैव यमालयं प्रेषयामीति निगद्य निश्चलोऽतिष्ठत् । तच्छ्रुत्वा कुपितो हस्तिपकः कृष्णाय कालान्तकयमोपमं करिवरं प्रेरयामास। ततो हस्ती वेगेनाऽभिद्रुत्य श्रीकृष्णं गृहीतुमारभत । स्फूर्तिमान् वासुदेवः तस्य शुण्डादण्डादात्मानं रक्षित्वा तच्चरणेष्वलीयत । ततो गजो गंधेनैव तमभिज्ञाय यावत्करं प्रसारयति ततः प्रागेव शौरिः तं पुच्छे प्रगृह्य सुपर्णः पन्नगमिव समाचकर्ष। अथ वीरवरःसंमुखो भूत्वा दण्डप्रहारैस्तं वारणं ताडयामास ।

अथ महामात्रप्रेरितो मातंगो रुषा श्रीकृष्णमभिदुद्राव । ततः साहसमूर्तिः यदुनंदनः तं वंचयितुं भूमौ पतित्वाऽलक्षित एव समुत्थाय दूरं जगाम । येन गजदंतप्रहारो भूमावेव लग्नः । ततो व्यथितो गजराजः सद्यो निववृते । क्षणादूर्ध्वं हस्तिपप्रेरितो गजो भूयः श्रीकृष्णाभिमुखो बभूव । वारेऽस्मिन् हरिरापतन्तमिमं समासाद्य तस्य शुण्डां पाणिना प्रगृह्य तं पृथिव्यां पातयामास । सोऽथ पतितस्य तस्य दण्डमुत्पाट्य च तेन हस्तिपं निजघान । अत्रान्तरे श्रान्तो गज ऊर्ध्वश्वासान्नीत्वा पंचत्वमगात् । ततो विह्वलो हस्तिपालोऽपि गतजीवितोऽभवत् । ततो रंगभूमिं गतं

हरिं वीक्ष्य लोकाश्चिन्तयामासुः । अत्र श्लोकः—

मल्लानामशनिः नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् ।
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनाम् ।
वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥

इत्थं गजराजं गतप्राणं विलोक्य सामान्योऽपि कंसः किंकर्तव्यविमूढो बभूव । नागरिकाश्च विचित्रवेशौ नटनागरौ समीक्ष्य हर्षप्रफुल्ललोचना अभूवन् । ततस्ते मिथः प्रोचुः—सहृदयाः ! रामकृष्णावमू श्रीमन्नारायणस्यांशेन वसुदेववेश्मनि समवतीर्णौ । अनयोर्ज्येष्ठोऽयं हलधरो दैत्यदर्पहन्ता कनिष्ठश्चायं मुरलीमनोहरो गोब्राह्मणप्रतिपालकः । कंसभीतो वसुदेवः श्यामसुन्दरं गोकुले नीतवान् । संकर्षणश्च गौराङ्गस्तत्रैव रोहिण्यां प्रादुर्बभूव । नंदगृहे गुप्तरीत्या वर्धमानोऽयं श्रीकृष्णः पूतनामवधीत् । तृणावर्तशंखचूडादीनामसुराणामप्ययमेव निहन्ताऽस्ति । श्रुतिस्मृतिपुराणप्रतिपादितस्य सनातनधर्मस्य रक्षणे सदैवाऽयं दीक्षितस्तिष्ठति । महाभागोऽयं वृन्दावनाद् विषधरं कालियं विजित्य निष्कासितवान् । महिमाऽस्य सर्वथैव लोकातीतः ।

सप्ताहमेकहस्तेन धृतोऽद्रिप्रवरोऽमुना ।
वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥

व्रजवनिता अस्यैव मुखकमलं निरीक्ष्य श्रमाहते त्रिविधांस्तापान् नाऽजीगणन् । यदुकुलेऽवतीर्णोऽयं महाभागः करिष्यति जगद्धितम् ।

एवं ब्रुवाणेषु लोकेषु महामल्लश्चाणूरः प्रोवाच—नंदकुमारौ ! युवयोर्नियुद्धनिपुणत्वं निशम्य दिदृक्षुणा नृपेणाऽत्र समाहूतौ ।

प्रियं राज्ञो हि वांछन्त्यः श्रेयो विन्दंति वै प्रजाः ।
मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥

गोपा वनेषु गाश्चारयन्तो मुदमवाप्य नित्यमेव मल्लयुद्धेन क्रीडन्ति । अतोऽधुना यूयं वयं च मिलित्वा भूपतिं तोषयामः । एतदाकर्ण्य मल्लवचनं वासुदेवोऽपि देशकालोचितं वाक्यमवदत्—महाशय ! यद्यपि राज्ञः प्रियं कर्तव्यमावश्यकं तथाऽपि बाला वयम् । अतस्तुल्यबलैः सह क्रीडिष्यामो न त्वाधिकबलैर्भवद्भिर्धैः । नियुद्धे पक्षपातः सर्वथा न शोभते । तच्छ्रुत्वा चाणूर उवाच—सखे ! त्वं बालको नाऽसीः । न च किशोरोऽप्यसि । किन्तु युवैव प्रतिभासि । यदा त्वयाऽद्य गजराजो निपातितस्तदा मनुष्यः कस्योद्यानस्य चटकोऽस्ति !! किं बहूक्त्या, बलवद्भ्यां भवद्भ्यां साकं अस्माकं युद्धं न्यायसंगतमेवेति कथयित्वा चाणूरो योद्धुं सन्नद्धो बभूव ।

इति श्रीकृष्णचरिते कुवलयापीडवधनिरूपणं
नामैकपंचाशत्तमः स्तवकः ॥ ५१ ॥

अथ श्रुतमल्लवचनौ रामकृष्णावपि नियुद्धार्थं बद्धपरिकरा-वभूताम् । ततः कृष्णचाणूरयोः मुष्टिकबलदेवयोश्च पृथक् पृथङ् मल्लयुद्धं भवितुमारब्धम् । अथैकोऽपरं हस्तयोर्हस्ताभ्यां पादयोश्च पादाभ्यां बद्ध्वा मिथो विजिगीषया विचकर्षतुः । ततोऽरत्निभ्यामरत्नी जानुभ्यां जानुनी शिरसा शिरः उरसा चोरः समभिजघ्नतुः । अथ कदाचित् हस्तादिषु गृहीत्वा परितश्चालनम्, कदाचित् नोदनम्, कदाचिद् बाहुभ्यां निपीडनम्, कदाचिदवपातनम्, कदाचिदुपसर्पणम्, कदाचिच्चापसर्पणं कुर्वाणौ कृष्णचाणूरौ राममुष्टिकौ च मिथः प्रत्यरुन्धताम् । अथ जयार्थिनौ तौ स्थापनचालनोन्नयनादिभिः परस्परं देहापकारमकुरुताम् । एतदालोक्य विषमयुद्धं सानुकम्पाः पौरवनिता मिथः प्रोचुः—अब्रह्मण्यम्, अब्रह्मण्यम् । सभ्यानामयमधर्मः शोचनीयः खलु । य एते राजसभायामपि पक्षपातमवलम्बन्ते ।

क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।
क्व चाऽतिसुकुमाराङ्गौ किशोरौ नाऽप्तयौवनौ ॥

यत्र धर्म्मव्यतिक्रमो भवेत् तत्र कर्हिचित् केनाऽपि न स्थेयम् ।

न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ।
अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषभाग् भवेत् ॥

तच्छ्रुत्वाऽपरा प्राह—सखि ! सत्यमभिहितं भवत्या ।

पुण्या बत व्रजभुवो यदयं नृलिंगगूढः ।
पुराणपुरुषो वनचित्रमाल्यः ।
गाः पालयन् सहबलः क्वणयंश्च वेणुम् ।
विक्रीडयांचति गिरित्रमार्चितांघ्रिः ॥ १ ॥

गोप्यस्तपः किमचरन् यदमुष्यरूपम् ।
लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुसवाभिनवं दुराप-
मेकान्तधामयशसः श्रिय ऐश्वरस्य ॥ २ ॥

एवं भाषमाणासु ललनासु भगवान् द्रुतमेव शत्रुं निहंतुं मनश्चक्रे । ततः श्रीकृष्णसंकेतमवाप्य बलभद्रोऽपि रिपुनिग्रहे मतिमकरोत् । ततो वज्रनिष्पेषनिष्ठुरैर्हरिगात्रनिष्पातैर्भज्यमानगात्रश्चाणूरो जग्लौ । सोऽथ कोपं कृत्वा श्येन इव सहसोत्प्लुत्य मुष्टिना वक्षसि संमुखस्थं वासुदेवमताडयत् । प्रहृतोऽपि हरिः मालाहतद्विप इव निश्चलोऽतिष्ठत् । ततोऽवसरज्ञः शौरिः बाह्वोर्निगृह्य मल्लं भूपृष्ठे न्यपातयत् । ततः क्लान्तो मुखाद्रुधिरं निःसारयन् मल्लो जीवितमत्याक्षीत् । अत्रान्तरे बलदेवमुष्टिप्रहारजर्जरितो मुष्टिकोऽपि यमपुराऽतिथिर्बभूव । ततः शलोऽपि श्रीकृष्णेन

रंगावनौ निहतः । ततो विजयहृष्टा लोकाः करतलध्वनिं चक्रुः ! प्रसन्नानना गोपा अपि कृष्ण ! विजयीभव । राम ! जयं लभस्वेति जगदुः ।

तच्छब्दं श्रुत्वा भोजराजः सहसोत्थाय सिंहासनात् तूर्याणि निवारयन् प्रोवाच—रे रे राजपुरुषाः ! किं कौतुकं पश्यथ ? दुर्वृत्तावेतौ द्रुतं सभामण्डपान्निःसारयत । राजद्रोहिणमेनं नंदमाशु बध्नीत । परपक्षगोऽयं तातोऽप्युग्रसेनश्चारके निक्षेपणीयः । तच्छ्रुत्वा 'जयतु जयतु महाराज' इति ब्रुवाणान् किंकरान् यदुनंदनः प्रोवाच—तिष्ठत, तिष्ठत । नाऽयं पितृद्रोही सिंहासनयोग्यः । रणाङ्गणे संप्रत्येव निपात्यैनं कुमातुलं स्वव्रतं पालयिष्यामीत्यभिधाय कंसाभिमुखं प्राद्रवत् । खड्गपाणिः कंसोऽपि सहजशत्रुणा श्रीकृष्णेन साकं योद्धुमुद्यतोऽभवत् । ततः खड्गाखड्गियुद्धमभूत् । अथाऽच्युतोऽवसरमवाप्य द्रुतमुत्प्लुत्य च मंचमारुरोह । एतदालोक्य कंसो यावदासिप्रहारं कर्तुमीहते ततः प्रागेव शौरिः केशेषु तं प्रगृह्य सिंहासनादवनौ न्यपातयत् । अथ वीरस्याऽपि कंसस्य महाभयाद् हृदयमस्फुटत् । कंसपक्षीया जना हाहाकारं चक्रुः । तच्छब्दं श्रुत्वा कंकाद्याः कंसभ्रातरो वासुदेवमुपदुद्रुवुः । अत्रान्तरे परिघमुद्यम्य बलदेवः सिंहः पशूनिव तान् द्रुतमवधीत् । ततो देवाः पुष्पाण्यवर्षन् । ब्राह्मणाश्च स्तोतुमारेभिरे । उक्तं च—

यदा यदा हि धर्मस्य ग्लानिर्भवति केशव ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजस्यहो ॥ १ ॥
त्राणं करोषि साधूनां विनाशं च दुरात्मनाम् ।
धर्मसंस्थापनार्थाय जायसे त्वं युगे युगे ॥ २ ॥

ततो दर्शकाः केचित् कंसमहिमानं कथयंतः केचिच्च वासुदेव-विरुदावलीं वर्णयंतः स्वस्वगृहान् ययुः ।

मंगलं भगवान् विष्णुर्मंगलं गरुडध्वजः ।
मंगलं पुण्डरीकाक्षो मंगलायतनं हरिः ॥

इति श्रीकृष्णचरिते कंसवीरगतिनिरूपणं नाम
द्विपंचाशत्तमः स्तवकः ॥ ५२ ॥

ततः प्रियतममरणादुःखिता अश्रुक्लिन्नमुखाश्च राजदाराः स्वस्वशिरोवक्षःस्थलानि च ताडयन्त्यः तत्र समाययुः । अथ ता वीरशय्यायां शयानान् पतीन् वीक्ष्य समालिंग्य च हा नाथ ! हा रमण ! हा प्रियतम ! त्वं क्व मां विहाय गतोऽसि । देव ! त्वया हतेन सप्रजा वयं निहताः । अत्रान्तरेऽस्तिप्राप्तिसंज्ञिके कंसपत्न्यावपि तत्राऽऽयाते । ते धूलिधूसरितं विकीर्णकेशं च पतिमालोक्य सहसा मूर्छामवापतुः । ततः सखीभिः प्रबोधिते ते गद्गद्गिरा प्रोचतुः—प्राणपते ! परित्यज्याऽबलावर्गं क्व

प्रस्थितोऽसि ? इयं नित्यमंगलाऽपि मथुरा त्वया विरहिता सर्वथा न शोभते । देव ! पुनः पुनः प्रबोधितोऽपि भवान् बन्धुविरोधं नाऽत्यजत् । जगति बन्धुविरोधसमं कष्टप्रदं कार्यं न विद्यते ।

अनागसां च भूतानां कृतवान् द्रोहमुल्वणम् ।
तेन त्वं कष्टमापन्नो भूतध्रुक् को लभेत शम् ॥

यदुनंदनोऽयं श्रीकृष्णः साक्षाद् विष्णोरवतारः । अतः कर्तुमकर्तुमन्यथाकर्त्तुं च शक्नोत्ययं वासुदेवः । दौर्भाग्यादस्माकं भवान् वृद्धोपदेशं न गृहीतवान् । उक्तं च व्यासादिभिः—

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत्सन्निहिता तस्य स नरः शत्रुनंदनः ॥

अत्रान्तरे हरिरुपगम्य मातुलानीवृन्दं सविनयं प्रोवाच— पूज्या मातुल्यः ! संप्रति परित्यज्य चिन्तां शांतिं समावलंबध्वम् । नाऽत्रापराधो मम । प्राणी स्वकर्मानुसारं जगति फलं लभते । मातुलोऽयं भागिनेयान्हतवान्, अतो भगिनीसुतेनैव हतः । क्रूरहृदयोऽयं पितरमप्यपीपिडत् । अथवा किमतिक्रान्तवर्णनेन । युद्धे मरणाद्वीरगतिमवाप्तवान् सभ्रातृकोऽयं वीरवर्यः । प्रायः क्षत्रिया महानुभावा युद्धेष्वेव म्रियन्ते न गृहेषु ।

द्वावेव पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाऽभिमुखो हतः ॥

ततः समाश्वस्तं हरिरुवाच मातुलानीवर्गम्—अर्च्याः ! उक्तं पूर्वजैः—

सुखस्यानन्तरं दुःखं दुःखस्यानंतरं सुखम् ।
चक्रवत्परिवर्तंते दुःखानि च सुखानि च ॥

वयमपि च भवतीनां निदेशकारिण, इत्याभिधाय रणे हतानां कंसादिवीरवर्याणां मन्वादिधर्मशास्त्रविहिता दाहादिक्रियाः कारयामास । तस्मिन्नवसरे सर्व एव नगरवासिनो जना प्रेतहितार्थं यमुनाजले स्नात्वा तिलयवमिश्रिताञ्जलांजलीन्ददुः ।

मातृपितृगुरुस्वामिपत्न्यादिभ्यो जलांजलीन् ।
यो ददाति स श्रद्धालुः सुपुत्रो जायते ध्रुवम् ॥ १ ॥
यथा कर्मफलं प्राणी परलोकेऽधिगच्छति ।
तथा पुत्रादिभिर्दत्तं श्राद्धं चाऽपि समश्नुते ॥ २ ॥
पित्रादीनां धनं लब्ध्वा श्राद्धं यो नाऽभिनंदति ।
स कृतघ्नः कुपुत्रत्वं लब्ध्वा लोकेऽवसीदति ॥ ३ ॥

अथ कृतकृत्यौ रामकृष्णौ राजमंदिरेऽवरुद्धौ मातापितरौ मोचयामासतुः । ततस्तौ तयोश्चरणकमलसान्निधौ दण्डवत् प्राणमताम् । अथ लब्धस्वान्तःस्वास्थ्यौ वसुदेवनन्दनौ वक्तुमारब्धौ—हेऽम्ब ! हे तात ! यथा युवाभ्यां पुत्रसुखं नाऽधिगतं तथाऽवाभ्यामपि परिपूर्णं मातृपितृसुखं न लब्धम् । विरला एव लोकेऽस्मिन् भाग्यवंतो जनाः सर्वसुखं लभंते ।

सर्वार्थसंभवो देहो जनितः पोषितो यतः ।
न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥

यः समर्थोऽपि सन् पुत्रः स्वदेहेन धनेन वा पित्रोर्जीविकां न दद्यात् तं कुपुत्रं यमदूता मरणानंतरं तस्यैव मांसं बलात् खादयंति । उक्तं च धर्मशास्त्रकारैः सुपुत्रकृत्यम्—

वृद्धौ तु मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥

मान्यवरौ ! सेवाऽवसरे युवान्त्वत्र निरुद्धौ । आवांच बाल्यमापन्नौ व्रजवासमकार्ष्व । स्वभावतः सरलहृदयौ मातापितरौ पुत्रकृतानपराधान् नहि गणयतः । एवं श्रीकृष्णचन्द्रस्य धर्मसमन्वितं सूनृतं वचो निशम्य देवकीवसुदेवौ तमंकमारोप्य परिष्वज्य च परमानन्दं समवापतुः । ततस्ताभ्यां समादिष्टो हरिरुग्रसेनसमीपं ययौ । सोऽथ ससंकर्षणो मातामहं प्रणम्य यदुराज्ये तं प्रतिष्ठापयामास । ततो राज्ञादिष्टः स कृतांजली राजानमुवाच—तात ! ययातिशापात् यदुभिर्नृपासने नाऽऽसितव्यम् इति वृद्धानुशासनं शिरसि निधाय राजसिंहासनं नाऽधिरोहामि । मयि किंकरे विद्यमाने देवा अपि तुभ्यं बलिं समर्पयिष्यंति किमुतान्ये महीपालाः !!

ततो भगवान् कंसभयात् पलायितान् मधुदाशार्हादीन् समाहूय तान् वित्तैः परितोष्य च स्वस्वगेहेषु समावासयामास ।

अथ वृष्ण्यंधका अपि कृष्णबलदेवभुजैर्गुप्तां मथुरामवाप्य सुखेन स्थितिं चक्रुः। अत्रान्तरे कृतमथुरानिवासोऽतिसंतुष्टो नंदराजोऽपि तत्र समाययौ। तं विलोक्य साग्रजो हरिरुत्थाय विधिवत् तं संपूजयामास। अथ सुखोपविष्टं तं यशोदानंदनोऽब्रवीत्——तात! स्निग्धाभ्यां युवाभ्यां भृशं लालितौ पोषितौ चावाम्। भवादृशयोः सहजोदारयोर्मातापित्रोरात्मजेषु स्वदेहादपि समधिका प्रीतिर्भवति। अनाथरक्षणं महापुण्यफलप्रदं भणितम्। उक्तं च——

मातृपितृविहीनान्यौ रक्षतः कृपयाऽन्वितौ।
तौ दंपती लभेतेऽत्र सुखं स्वर्गोपमं ध्रुवम्॥

तात! बहूनि दिनानि जातानि। जननी त्वां विना मां पुनः पुनः संस्मरिष्यति। अहं सुहृदां सुखं विधाय शीघ्रमेव भवतां दर्शनाय व्रजं समेष्यामि। निशम्यैवं श्रीकृष्णवचनं नंदोऽब्रवीत्——वत्स! गच्छामि गोकुलम्। त्वं कृतकृत्यः शीघ्रमेव व्रजमागत्य संकुचितानन्दान् व्रजवासिनः पूर्णानंदान् कर्तुमर्हसीत्यभिधाय प्रणयविह्वलः सन् मुहुर्मुहुः परिष्वज्य च वासुदेवौ सगोपो व्रजं न्यवर्तत। अथ नंदं विलोक्य गोकुलस्था भृशं प्रासीदन्।

इति श्रीकृष्णचरिते देवकीवसुदेवविमोक्षणं नाम त्रिपंचाशत्तमः स्तवकः॥ ५३॥

अथ सुतदर्शनसंतुष्टो वसुदेवः समाहूय ब्राह्मणान् विधिवत् तान् संपूज्य च तेभ्यः पूर्वसंकल्पिताः सदक्षिणा गाः

प्रादात् । ततो वसुदेवादेशेन गर्गाचार्यं संपूज्य पुरोहितानुमत्याऽवन्तिकानगरस्थं गुरुकुलाधिष्ठातारं सपत्नीकं सांदीपनिमपि बहुदानमानादिभिः परितोषयामास । अथैकदा गुरुदक्षिणार्थं रामकृष्णाभ्यां संप्रार्थितो गुरुः पत्न्या सह संमन्त्र्य प्रोवाच—महाभागौ ! प्रभासक्षेत्रे स्नातुं गतो योऽस्मत्सूनुर्महार्णवे निमग्नः कृपया तमानीय गुरुपत्नीं प्रसादयतम् । एवमाकर्ण्य गुरुवर्यवचनं ओमित्युक्त्वा भ्रातरौ रथमारुह्य च त्वरितं प्रभासक्षेत्रमगच्छताम् । अथ तौ वेलामुपव्रज्य क्षणं निषीदतुः । तत्प्रभावज्ञो जलनिधिर्मानुषं रूपं समास्थाय तत्रागत्य तौ विधिवत् संपूजयामास । ततो गुरुदुःखदुःखितो हरिः सागरं समादिदेश—सरित्पते ! त्वयाऽत्र महोर्मिभिर्योऽस्मद् गुरुपुत्रोऽपहृतः सोऽधुना प्रदीयताम् । निशम्यैतत् कृष्णवचनं समुद्रः प्रत्यवदत्—देव ! सर्वज्ञोऽसि । नाऽहं भवद्गुरुपुत्रं हृतवानस्मि । योऽत्र पंचजनाख्यो दैत्यो निवसति तेन तव गुरुसुतो हृतः खलु । सोऽसुरः शंखरूपं धृत्वाऽत्र निवसति । तच्छ्रुत्वा हरिः सत्वरं जलमाविश्य तं दैत्यं निजघान । ततस्तदुदरे तं मृतपुत्रमनालोक्य हलधरसहितश्चक्रधरो यमराजधानीं संयमनीं गत्वा शंखध्वनिमकरोत् । तच्छब्दं श्रुत्वा प्रजासंयमनो यमः संमुखमागत्य च भक्त्युपहृतां तयोर्महतीं सपर्यामकरोत् । सोऽथ विनयाऽवनतो लीलामनुजविग्रहं भगवन्तं तत्रागमनकारणं

पप्रच्छ। ततो हरिरुवाच—धर्मराज! त्वद्भृत्यैरानीतं निजकर्मनिबंधनं मम गुरुपुत्रमानीय समर्पय। तच्छ्रुत्वा तथेत्युक्त्वा च पितृपतिः प्रत्यवदत्—प्रभो! किंकरान्प्रति ममाऽयमादेशः—

जिह्वा न वक्ति भगवद्गुणनामधेयम्।
चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदाऽपि।
तानानयध्वमसतोऽकृतविष्णुपादम्॥

अपरं च—

स्वपुरुषमभिवीक्ष्य पाशहस्तं, वदति यमः किल तस्य कर्णमूले।
परिहर मधुसूदनप्रपन्नान्, प्रभुरहमन्यनृणां न वैष्णवानाम्॥

ततो यमो गुरुपुत्रमानीय ताभ्यां समर्पयामास। अथ यदुनंदनौ गुरवे तत्पुत्रं विनिवेद्य कृतार्थौ बभूवतुः। ततस्तुष्टो गुरुरुवाच—सफलजन्मानौ युवाम्।

गच्छतं स्वगृहं वीरौ! कीर्तिर्वामस्तु पावनी।
छंदांस्ययातयामानि भवंत्विह परत्र च॥

इति श्रीकृष्णचरिते गुरुपुत्रानयनं नाम
चतुःपंचाशत्तमः स्तवकः॥ ५४॥

अथैकदा वासुदेवो बृहस्पतिशिष्यमुद्धवं समाहूयादिदेश—सखे! त्वमेव ममाऽन्तरंगं मित्रमसि। कृपया त्वमितो गत्वा

मम संदेशेन पित्रोर्नंदयशोदयोः प्रीतिमावह । अपरं च, व्रजवनिताश्चाऽपि या मयि स्निह्यंति तासामपि मद्वियोगजनितां व्यथामपनय । सहृदय ! किं वर्णयामि ।

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥

निशम्यैतद्यदुपतिवचनं उद्धवस्तथास्त्विति व्याहृत्य रथं समारुह्य च नंदगोकुलं ययौ । सोऽथ श्रीकृष्णदर्शनलालसानां व्रजौकसां दर्शनाय समुत्सुकः पवित्रसलिलां कालिन्दीमुत्तीर्य भगवति दिनमणावस्तं गते सर्वतः पुष्पितवनं, शोभितं विहंगमकूजितेन, नादितं वासितार्थेऽभियुध्यमानैः वृषभैः, विभूषितं वत्सान्प्रति धावंतीभिर्घटोध्नीभिः, समलंकृतं विचित्रवर्णैर्वत्सैः, गोदोहनसमयः समायातः अतो वत्सं मुंच, अरे ! मा मुंच, शीघ्रं वत्सं नय, मा नय, देहि, गृहाणेत्यादिशब्दैः शोभायमानम्, क्वचित्सायंकालीनाऽग्निहोत्रधूमेन मनोरमं, गोपगृहैर्विभूषितं च ददर्श गोकुलम् । ततो नंदसदनमवाप्य रथादवततार । तं विलोक्य प्रसन्नवदनो नंदः समुत्थाय तं समालिलिङ्ग । ततो गृहाभ्यन्तरे नीत्वा विधिवत् कृष्णसखं संपूजयामास । अथ कृतभोजनं पयःफेननिभायां कोमलशय्यायां सुखासीनं च नंदः प्रष्टुमारभत——सौम्य ! परमसुहृन्नो वसुदेवः कुशल्यास्ते

कच्चित् ? दिष्ट्या क्रूरकर्मा कंसो हतः ? अक्रूराद्या यादवाः कुशलिनः कच्चित् ?

अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ।
गोपान् व्रजं चाऽऽत्मनाथं गावो वृन्दावनं गिरिम् ॥

अप्यायास्यति स्वजनान् सकृदीक्षितुं गोविन्दः ? ललितलोचनं तं गोपालं कदा द्रक्ष्यामः ? महाभागः स वातवृष्टिवृषसर्पदावाग्निप्रभृतिभ्यो दुरत्ययेभ्य उपद्रवेभ्योऽस्मान् बहुशो रक्षितवान् । सखे ! कृष्णस्य गोवर्धनोद्धरणादिवीर्याणि लीलापांगनिरीक्षितानि गीतहसितभाषितानि च स्मरतां नः सर्वा अपि क्रियाः शिथिलाः संजाताः । भद्र ! मुकुंदपदभूषितान् इमान् सरिच्छैलवनोद्देशान् ईक्षमाणानां नो मनस्तदात्मतां याति । एवं कृष्णानुरक्तधीर्नंदः पुनः पुनस्तस्य दिव्यगुणान् स्मारं स्मारमश्रुकण्ठो बभूव ।

अत्रान्तरे समायाता यशोदाऽपि पुत्रमहिमानं श्रुत्वा स्नेहस्नुतपयोधराऽश्रूणि मोक्तुमारभत । एवं नंदयशोदयोर्भगवत्यसाधारणं वात्सल्यं वीक्ष्य स्वयमपि यादवोऽगाधे प्रेमपयोनिधौ निमग्नो बभूव । ततः स समवाप्य सावधानतां जगाद—महानुभावौ !

युवां श्लाघ्यतमौ लोके देहिनां नास्ति संशयः ।
नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥

धन्यौ खलु भवंतौ । ययोर्गृहे साक्षात्पुरुषोत्तमौ समवर्तिणौ । यः कोऽपि परित्यज्य विषयवासनां स्थिरचेतसा श्रीबलभद्रं श्रीकृष्णचन्द्रं वा स्मरति, स सर्वबंधविनिर्मुक्तो ब्रह्मणः सायुज्यं समवाप्नोति । अच्युतो दूरस्थोऽपि व्रजं न विस्मरति । सोऽचिराद-त्रागत्य प्रियं च कृत्वा व्रजं समुद्धरिष्यति । श्रीमतो यदुनंदनस्य संदेशं शृणुतम् मातापितरौ !

भो मातः ! भो पितः ! गोपा ! गोप्यश्च विमलाशयाः ।
युष्मान् द्रष्टुं समेष्यामो विधाय सुहृदां प्रियम् ॥

धर्ममूर्तिर्व्रजराजः स्ववचनमवश्यमेव प्रतिपालयिष्यति । युवां कदापि मा खिद्यतम् । श्रीकृष्णं सर्वदाऽन्तिके द्रक्ष्यथः । यथा काष्ठेऽग्निर्मथनाद्युपायमंतरेण न दृश्यते, एवं सर्वदा सर्वत्र वर्तमानोऽपि भगवान् भक्तिं विना नहि विलोक्यते । 'भक्तिप्रियो माधव' इति लोकोक्तिः सर्वथैव सत्याऽस्ति ।

नह्यस्यास्ति प्रियः कश्चिन्नाऽप्रियो वाऽस्त्यमायिनः ।
नोत्तमो नाऽधमो नाऽपि समानस्यासमोऽपि वा ॥

यथा भ्रमणशीलया दृष्ट्या पृथ्वी भ्राम्यतीव प्रतीयते तथाऽहं-धिया भ्रांतस्य जनस्य स्वदोषेण सर्वात्मा भगवानपि जन्मकर्मा-

धीनः प्रतीतो भवति । एवं नंदोद्धवयोः संवादं कुर्वतोः सा निशा समाप्तिमगात् ।

अथ प्रभाते गोप्यः समुत्थाय गंधाक्षतादिभिर्देहल्यादीन् संपूज्य दधीन्यमन्थन् । तस्मिन्नवसरे मंथनरज्जुविकर्षद्भुजकंकण-स्रजः चलन्नितम्बस्तनहारकुंडलत्विपत्कपोलारुणकुंकुमाननाश्च व्रजवनिताः दीपदीप्तैर्मणिभिरतितरां शुशुभिरे । ततोऽरविंदाक्ष-विरुदावलीं गायन्तीनां व्रजललनानां दधिमंथनघोषो दिवमपि पस्पर्श । अथ भगवति प्रभाकरे समुदिते नंदद्वारि शातकौंभं रथं दृष्ट्वा गोप्यः कस्यायं कस्यायमिति मिथः पप्रच्छुः । तच्छ्रुत्वा काचिदाह---आल्यः ! किं पृच्छथ ? येन घनश्यामो मधुपुरीं नीतः स एव कृष्णसखो नाम्नाऽक्रूरः कर्मणा च क्रूरोऽत्रागत इति तर्कयामि । अथाऽपरा प्राह—सखि ! गोकुलस्याऽस्य मणिर्व्रजचन्द्रस्तु तेन प्रागेव नीतः । पुनरागतः स न जाने किं करिष्यति ? अत्रान्तरे कृतनित्यनियम उद्धवोऽपि तत्राऽऽजगाम । स साधारणवार्तालापेऽपि श्रीकृष्णचन्द्रचर्चां श्रुत्वाऽतितरां तुतोष ।

इति श्रीकृष्णचरिते नंदोद्धवसंवादनिरूपणं नाम पंचपंचाशत्तमः स्तवकः ॥ ५५ ॥

अथ व्रजवनिताः श्रीकृष्णतुल्यवेशं तं विलोक्य कोऽयं सुदर्शनः ? कुतो वा समायातः ? किमर्थं चागत इति ब्रुवंत्यस्तं

परिवव्रुः। एवमालोक्य यादवोऽब्रवीत्—भवत्यः! श्रीकृष्ण-किंकरमुद्धवनामकं मां वित्त। प्रियसंदेशं नीत्वाऽऽगतोऽस्मि। ततस्ता रमापतेः संदेशहरं तं विज्ञाय शुभासनं तस्मै दत्त्वा सुखोपविष्टं च रहसि प्रष्टुमारब्धाः। महाशय! पित्रोः प्रिय-चिकीर्षया भर्त्रेह प्रेषितोऽसि। तस्य च त्वं पार्षदोऽसीति वयं जानीमः। अन्यथाऽस्मिन् गोव्रजे तस्य स्मरणीयं न विचक्ष्महे। बंधूनां स्नेहानुबंधो मुनेरपि सुदुस्त्यजोऽस्ति। संसारेऽस्मिन सर्वत्र स्वार्थस्यैव प्राधान्यं दृष्टं श्रुतं चास्माभिः। उक्तं च—

वृक्षं क्षीणफलं त्यजंति विहगा दग्धं वनान्तं मृगाः।
पुष्पं पीतरसं त्यजंति मधुपाः शुष्कं सरः सारसाः।
निर्द्रव्यं पुरुषं त्यजंति गणिका भ्रष्टं नृपं मंत्रिणः।
सर्वे स्वार्थवशाद् भजंति हि जनं कस्याऽस्ति को वल्लभः॥

अत्रान्तरे काचिन्मधुकरं दृष्ट्वा तं च प्रियप्रस्थापितं दूतं कल्पयित्वाऽन्योक्तिमिषेण चेदं वचनं जगाद—हे धूर्तबंधो मधुप! सपत्नीकुचमालाविलुलितकुंकुमश्मश्रुभिर्नोऽङ्घ्रिं मा स्पृश। मधुपतिस्तन् मानिनीनां प्रसादं वहतु। यस्य त्वमीदृग् दूतः तस्य यदुसदस्यु-पहासास्पदं कुतः!! भ्रमर! यःसकृदधरसुधां पाययित्वाऽस्मान-त्यजत्। यथा त्वं पुष्परसं पीत्वा तत्परित्यजसि। मुग्धा लक्ष्मीस्तु उत्तमश्लोकजल्पैस्तत्पादपद्मं परिचरति, परं वयमभिज्ञाऽतस्तद्वा-ग्जाले न पतामः। षडंघ्रे! श्रीकृष्णस्य याः सख्यः संप्रति संति

तासामग्रे तत्प्रसंगो गीयताम् । वयं तु पुराणं तं जानीमः । नवीना एव तवेष्टं दास्यंति । त्रिलोक्यां का स्त्रियस्तद्दुरापाः संति ? कपटरुचिरहासभ्रूविजृंभस्य यस्य यदा साक्षाल्लक्ष्मीश्च-रणरज उपास्ते तदा का कथाऽन्यासाम् । द्विरेफ ! मुकुन्दाच्छि-न्नित्वाऽनुनयादिकं यस्त्वमत्राऽऽयातोऽसि अतस्तव युक्तिमहं वेद्मि । कृष्णकृते विसृष्टापत्यपत्यन्यलोकाः अपि नोऽत्यजत्सः कथयाऽ-स्मिन् किन्नु संधेयम् ? यो रामावतारे लुब्धक इव वालिनमवधीत् । स्त्रीजितः सन् शूर्पणखां विरूपामकरोत् । वामनावतारे बलिं मत्त्वा बलिमपि ध्वांक्षवदेष्टयत् । अतोऽसितसख्यैरलम् ? संसारेऽत्र कृष्णत्वमाकर्षणशीलमिति लोकाः सत्यं व्याहरंति । उक्तं च—

यदनुचरितलीलाकर्णपीयूषविप्रुट् ।
सकृददनविधूतद्वंद्वधर्मा विनष्टाः ।
सपदि गृहकुटुंबं दीनमुत्सृज्य दीना ।
बहव इव विहंगा भिक्षुचर्यां चरंति ॥

अपरं च—

कुरंगमातंगपतंगभृंगा, मीना हताः पंचभिरेव पंच ।
एकःप्रमादी स कथं न हन्यते, यःसेवते पंचभिरेव पंच ॥

सखे ! ऽन्यवार्तां कथय । अथवा वृथोपालंभेन किम् ? प्रेयसा प्रेषितोऽसि अतोऽग ! संमाननीयोऽसि । कथय किमिच्छसि ? यस्य सन्निधौ लक्ष्मीः सदा वसति तद् दुस्त्यजं द्वंद्वपार्श्वं

कथमस्मान् नयसि ? सौम्य ! गुरुकुलादागत्य आर्यपुत्रः किं मधुपुर्यां वर्तते ? महानुभावः स पितृगेहान् गोपांश्च कदाचित् स्मरति ? अथवा किं बहूक्त्या, स नंदनंदनः क्वचिदपि किंकरीणां नः कथाः कदाचित् ब्रूते ? इत्यभिधाय स्नेहपरिप्लुता प्रत्युत्तराशया गोपी विरराम ।

इति श्रीकृष्णचरिते भ्रमरगीतनिरूपणं नाम
षट्पंचाशत्तमः स्तवकः ॥ ५६ ॥

एवमाकर्ण्य गोपीजनवचनानि सस्मितमुद्धवः प्रत्यभाषत—

अहो ! यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामत्यर्पितं मनः ॥

देव्यः ! जपदानव्रतोपवासादिभिः विविधैः श्रेयोभिः श्रीकृष्णे भक्तिः साध्यते । या मुनीनामपि मोहिनी सा भक्तिः भवतीभिः स्वतः प्रवर्तिता । अतो महाभाग्यवत्यो यूयमिति निश्चिनोमि । महाशयाः ! प्रेमपरिप्लुतं श्रीकृष्णचन्द्रसंदेशं समाकर्णयत—

भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ।
यथा भूतानि भूतेषु खंवाय्वग्निर्जलं मही ॥ १ ॥
तथाऽहं च मनः प्राणभूतेन्द्रियगुणात्मना ।
आत्मन्येवाऽऽत्मनाऽऽत्मानं सृजे हन्म्यनुपालये ॥ २ ॥

आत्मा ज्ञानस्वरूपोऽस्ति । स मायाकार्यमनोवृत्तिभिः विश्वतैजसप्राज्ञरूपेण प्रतीयते । अतो मनोनिग्रह एव सर्वसुखदोऽस्ति । स्त्रीणां मनो यथा दूरचरे प्रेष्ठे समाविश्य वर्तते तथा सांन्निकृष्टेऽक्षिगोचरे न तिष्ठति । अतो विमुक्ताशेषवृत्ति यन्मनः तन् मय्यावेश्य मां नित्यं स्मरंत्योऽचिरान्मां समुपैष्यथ । रासस्रमये या अनुपस्थिता अभूवन् ता निरंतरं मां चिन्तयन्त्यो मामेव समवापुः ।

एवमाकर्ण्य प्रभुसंदेशं गोप्य उद्धवमवादिषुः——सखे ! दिष्ट्या कंसो हतः । सबन्धुवर्गोऽच्युतः कुशल्यास्ते कच्चित् ? साधो ! अपि नः स्मरति पुरस्त्रीणां गोष्ठीमध्ये गोविन्दः ? संदेशहर ! तस्य मंदस्मितेन हृतधियो वयम्, कथं तं विस्मरामः ?

ताः किं निशाः स्मरति यासु तदा प्रियाभिः,
वृंदावने कुमुदकुंदशशांकरम्ये ।
रेमे क्वणच्चरणनूपुररासगोष्ठ्या,
मस्माभिरीडितमनोज्ञकथः कदाचित् ॥

प्राप्तराज्यो यदुपतिः कस्मादिह समायाति ? नरेन्द्रकन्या उद्वाह्य किमस्माभिर्वनवासिनीभिः संभाषणं करिष्यति ? इमे सरिच्छैलवनोद्देशा, इमा गाव, एते वेणुरवाश्च संकर्षणसहायेन कृष्णेनाचरिताः नः पुनः पुनः स्मारयंति । जगत्युत्तमश्लोकसंविदं संत्यक्तुं क उत्सहेत ?

हा नाथ ! हे रमानाथ ! व्रजनाथार्तिनाशन ।
मग्नमुद्धर गोविन्द ! गोकुलं वृजिनार्णवे ॥

ततः श्रीकृष्णसंदेशैर्व्यपेतविरहज्वरा व्रजवनिताः श्रीनंदनंदनमधोक्षजं ज्ञात्वा विधिवदुद्धवं संपूजयामासुः ।

अथोद्धवो गोपीनां शुचो विनुदन् कृष्णलीलाकथागायंश्च कतिचिन्मासांस्तत्रोवास । श्रीकृष्णसखो नंदव्रजे यावंत्यहानि अवात्सीत् कृष्णवार्तया व्रजौकसां तावंति दिनानि क्षणप्रायाण्येवाऽभूवन् । अथोद्धवो गोपीनां कृष्णावेशात्मविक्लवं दृष्ट्वा परमप्रीतोऽवदत् । अहोऽसंशयं धन्या व्रजललनाः ।

एताः परं तनुभृतो भुवि गोपवध्वो ।
गोविन्द एव निखिलात्मनि रूढभावाः ।
वांछंति यद्भवभियो मुनयो वयं च ।
किं ब्रह्मजन्मभिरनंतकथारसस्य ॥ १ ॥
क्वेमाः स्त्रियोवनचरीर्व्यभिचारदुष्टाः ।
कृष्णे क्व चैष परमात्मनि रूढभावः ।
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षात्,
श्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ २ ॥
आसामहो चरणरेणुजुषामहं स्याम् ।
वृन्दावने किमपि गुल्मलतौषधीनाम् ।

या दुस्त्यजं स्वजनमार्यपथं च हित्वा ।
भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्याम् ॥ ३ ॥
वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ४ ॥

अथोद्धवो गोपीगणमनुज्ञाप्य नंदयशोदे समामंत्र्य च गोपगणानुमोदितो रथमारुरोह । ततो नानोपायनपाणयो व्रजवासिनस्तं निर्गतं समासाद्य प्रोचुः—सखेऽस्माकं तु सत्यसंकल्पोऽयमस्ति—

कर्मभिर्भ्राम्यमाणानां यत्र क्वाऽपीश्वरेच्छया ।
मंगलाचरितैर्दानैर्मतिर्नः कृष्ण ईश्वरे ॥

एवं गोपैः सभाजित उद्धवः श्रीकृष्णपालितां मथुरां पुनराजगाम । सोऽथ श्रीकृष्णं प्रणिपत्य तस्मै व्रजौकसां भक्त्युद्रेकं विनिवेद्य ततः समानीतान्युपायनानि ससंकर्षणाय वसुदेवाय प्रीत्या समर्प्य च हर्षसमन्वितः स्वसदनं जगाम ।

इति श्रीकृष्णचरिते उद्धवप्रतियाननिरूपणं नाम
सप्तपंचाशत्तमः स्तबकः ॥ ५७ ॥

अथैकदा सर्वदर्शनो भगवान् स्मृत्वा प्रतिज्ञां पुरस्कृत्योद्धवं च कुब्जागृहमगात् । अथ गृहागतं वासुदेवं विलोक्य ससंभ्रमा सैरंध्री समुत्थाय तं समुपससार । ततः समित्रं तं शुभासनोपरि संस्थाप्य पाद्यार्घ्यादिभिः विधिवत् संपूजयामास ।

साऽथ सव्रीडहासस्मितविभ्रमोक्तितैः भगवन्तं प्रसाद्य रमणेच्छां प्रदर्शयामास । अथेंगितज्ञो हरिः तया साकं चतुष्पटे पाशकैः क्रीडित्वा तस्या मनोविनोदमकरोत् । ततः करौ संयोज्य साऽवदत्—प्रभो ! कतिचिद्दिनान्यत्रैव तिष्ठ । अहं भवन्तं त्यक्तुं सर्वथा नोत्सहे । भगवन् ! भवतो गोब्राह्मणभक्तिः प्रशस्यतमा । मातृपितृभक्तिं विलोक्य मुक्तकण्ठं प्रशंसन्ति व्रजवासिनः । गुरुदक्षिणादानं भवतो निशम्य क आश्चर्यसागरे न निमज्जति ? व्रजस्थानसुरान्निहत्य यत्कण्टकशोधनं कृतं तत् संस्मृत्य देवा अपि यदाऽतिसंतुष्टास्तदा मनुष्याणां तु गणनैव का ? नाथ ! सर्वत्र वेदध्वनिः श्रूयते । देवताः संपूज्यन्ते । यज्ञा रच्यन्ते । शास्त्राणि पाठ्यन्ते । किं बहुना, सर्वत्र सत्ययुगप्रसार इव दृश्यते । किं बहूक्त्या, भवदीयो महिमा वर्णनातीतोऽस्ति ।

प्रातःकाले भवन्मूर्तिर्दृष्टा यच्छति मंगलम् ।
मध्याह्ने दर्शनं युष्मद् धनं धान्यं ददाति च ॥ १ ॥
सायाह्ने वीक्षिता युष्मच्छविः पापप्रणाशिनी ।
रात्रौ च स्मरणं युष्मत् सर्वकामफलप्रदम् ॥ २ ॥

एवमाकर्ण्य तद्वचनं हरिस्तस्यै कामवरं प्रादात् । ततः सोद्धवो जनार्दनः प्रसन्नतापूर्वकं स्वायतनं जगाम ।

इति श्रीकृष्णचरिते सैरन्ध्रीसदने हरिपदार्पणनिरूपणं नामाष्टपंचाशत्तमः स्तवकः ॥ ५८ ॥

अथैकदा रामोद्धवाभ्यां सह मथुरेशोऽक्रूरगृहमयासीत्। श्वाफल्किस्तान् जगत्पूज्यान् गृहगतान् वीक्ष्य प्रमुदितः समुत्थाय परिष्वज्य च विधिवत्संपूजयामास। ततो गांदिनीनंदनः सविनयं जगाद—महानुभावौ ! दिष्ट्या कंसो हतः। भवद्भ्यां दुरंतात् कष्टात् कुलमुद्धृतम्।

युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ।
भवद्भ्यां न विना किंचित् परमस्ति न चाऽपरम् ॥१॥
त्वयोदितोऽयं जगतो हिताय, यदा यदा वेदपथः पुराणः ।
बाध्येत पाखंडपथैरसद्भिस्तदा भवान् सत्वगुणं विभर्ति ॥ २ ॥

श्रीकृष्णचन्द्र ! भक्तवत्सलोऽसि । भवदागमनेन वो गृहा भूरिभागाः खलु जाताः। तच्छ्रुत्वाऽतिसंतुष्टो यदुनन्दनोऽवदत्—

त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बंधुश्च नित्यदा ।
वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः ॥ १ ॥
नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ २ ॥

तात ! त्वं परोपकारशीलोऽसि। अतः पाण्डवानां हितसाधनाय मम मतमवलंब्य सत्वरं हस्तिनापुरं गच्छ। पितर्युपरते धृतराष्ट्रेनानीताः समातृका बालास्तत्सन्निधावेव वसंतीति शुश्रूम। दुष्पुत्रवशगो वैचित्रवीर्यो भ्रातृपुत्रेषु समो न वर्तते। उक्तं च—

स बन्धुर्यो विपन्नानामापदुद्धरणे क्षमः ।
न तु भीतपरित्राणवस्तूपालंभपण्डितः ॥

चतुरचूडामणिस्त्वं तत्र गत्वा साध्वसाधु वा तद्वृत्तं जानीहि । रहस्यज्ञानानंतरं यत्कर्तव्यं तत् समीक्ष्य विधास्यामः । अथ तथास्त्विति व्याहृत्य रथमारुह्याऽक्रूरो हास्तिनापुरमगमत् । ततः श्रीरामकृष्णावपि कृतकार्यौ उद्धवं गृहे प्रवेश्य स्वसदनं न्यवर्तेताम् ।

इति श्रीकृष्णचरितेऽक्रूरसंप्रेषणंनामैकोनषष्ठितमः स्तवकः ॥ ५६ ॥

अथ श्वाफल्किः पौरवेन्द्रयशोऽङ्कितम् तन्नगरमवाप्य तत्र प्रासादे भीष्मविदुरगांधारीसहितं सपुत्रं धृतराष्ट्रं युधिष्ठिरादिसमेतां पृथां च ददर्श । ततोऽक्रूरो हास्यहस्तस्पर्शालिंगननमस्कारादिभिः सत्कृतिभिस्तान् सत्कृत्य तैश्च सत्कृतो निर्दिष्टासनमलंचकार । ततो मिथोऽनामयप्रश्नानन्तरं कृतभोजनो नृपोद्यानमध्यातिष्ठत् । सोऽथ कुरुराजस्य वृत्तविवित्सया कतिचिन्मासांस्तत्रोवास । अथैकदाऽवसरमवाप्य कुंती पुत्रवशवर्तित्वं भूपस्य, खलत्वं दुर्योधनस्य, पैशुन्यं शकुनेः, कटुत्वं कर्णस्य, दुष्टतां च दुःशासनस्य श्वाफल्कये कथयांबभूव । ततो गरदानप्रसंगं कुंतीमुखाच्छ्रुत्वा तत्र विज्ञस्य विदुरस्य साद्यमवाप्य च गांदि-

नीसुतो दुःखार्णवे निमग्न इव विषण्णो बभूव। अथाऽश्रुकलेक्षणा शूरसेनसुताऽपृच्छत्—भ्रातः ! अपि पितृमातृभ्रातृभगिन्यो बांधवाश्च नः कदाचित् स्मरंति ? भक्तवत्सलः कृष्णः परदुःख-दलनदीक्षितश्च हलधरः पितृष्वसारं पैतृष्वस्रेयांश्च स्मरतः कच्चित् ? यथा वृकवृन्दमध्ये पतिता हरिणी महाकष्टमनुभवति तथा मृतभर्तृकाऽहं पितृहीनसुतान् रक्षन्ती दुःखमनुभवामि। यदुकुलनलिनदिनेश ! शृणु प्रार्थनाम्—

कृष्ण ! कृष्ण ! महायोगिन् ! शिशुभिश्चावसीदतीम्।
प्रपन्नां पाहि गोविन्द ! त्वां विना रक्षकोऽस्ति कः॥

एवं प्रपन्नार्तिहरं श्रीकृष्णं स्मारं स्मारं भृशं रुरोद पृथा। ततो विदुरः प्रोवाच—भ्रातृजाये ! मा कुरु चिन्ताम्। धर्माऽनिलेन्द्रादिभ्यो महाप्रभावेभ्यो जातास्तव पुत्रा अवश्यं विजयिनो भविष्यंतीति विश्वासं रक्ष। ततोऽक्रूरोऽप्यब्रवीत्—भगिनी ! विदुरवचने मा कुरु संदेहम्। द्वारकाधीशोऽपि न सुप्तोऽस्ति। सोऽप्यवश्यं द्रुतं तव संकटमपनेष्यतीति कथयित्वा नानापुरातनोपाख्यानैस्तां सांत्वयामास। भगिनी ! श्रीकृष्णेनैव प्रेरितोऽहमत्रागतः। यदाऽहं मथुरां गमिष्यामि तदा स्वयमेव बंधुमध्ये स्थितं विषमस्वभावं पुत्रपक्षपातिनं च राजानं सम्यक् प्रबोधयिष्यामि। निशम्यैवं भ्रातृवचनं पृथोवाच—भ्रातः ! धन्योऽसि। परोपकाराय सतां जीवनमिति नीतिज्ञा व्याहरंति।

ततोऽक्रूरः शुभसमयं विलोक्य प्रस्थितो राजसभामेत्य बंधुवर्गस्थितं कुरुराजं प्रणम्य च सज्जनोचितं वचनं जगाद—

वैचित्रवीर्य ! राजेन्द्र ! कुरूणां कीर्तिवर्धन ।
भ्रातर्युपरते पाण्डौ सिंहासनमधिष्ठितः ॥ १ ॥
धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन् ।
वर्तमानः समं स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ २ ॥
धनानि भूमौ पशवश्च गोष्ठे, भार्या गृहद्वारि जनः श्मशाने ।
देहश्चितायां परलोकमार्गे, कर्मानुगो गच्छति जीव एकः ॥३॥

देव ! राजधर्माद्विरुद्धमाचरन् जगति निन्दां परत्र च नरकं प्राप्स्यसि । एवं पर्यालोच्य पाण्डवेषु स्वसुतेषु च समवृत्तिं रक्ष। त्वं तु स्वयमेव विचारशीलोऽसि ।

नेह चात्यंतसंवासः कर्हिचित् केनचित् सह ।
राजन् ! स्वेनाऽपि देहेन किमु जायात्मजादिभिः ॥ १ ॥
एकः प्रसूयते जंतुरेक एव प्रलीयते ।
एकोऽनुभुंक्ते सुकृतमेक एव च दुष्कृतम् ॥ २ ॥

राजन् ! अधर्मेण वृद्धिमापन्नो नरो भद्राणि पूर्वं पश्यति । ततो रिपूञ्जयति । अन्ते चाऽनृतसेवनेन समूलो विनश्यति । अत्र श्रुतिः "समूल एषः परिशुष्यति योऽनृतं वदति" । एवमाकर्ण्य श्वाफल्किवचनं धृतराष्ट्र उवाच—दानपते !

यथा वदति कल्याणीं वाचं दानिवरो भवान् ।
तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ।

महामते ! यद्यपि तव सूनृता शिक्षावली परमहितावहाऽस्ति, तथाऽपि यथा सौदामिनी स्फटिकमणौ स्फुरिता न तिष्ठति, तथा पुत्रानुरागविषये लग्ना मम मतिर्नाऽन्यत्र स्थितिं लभते । सखे ! भूमिभारावताराय यो यदुकुलेऽवतीर्णः, तस्य परमेश्वरस्य चिकीर्षितं कोऽन्यथा कर्तुं शक्नोति ? निशम्यैतत् कौरवपति-वचनं सुहृद्भिः समनुज्ञातो दानपतिः स्यन्दनमारुह्य मधुपुरीमाजगाम । सोऽथ राजसभामेत्य तत्र विराजमानयोः रामकृष्णयोरग्रे सर्वं धृतराष्ट्रचेष्टितं स्थापयामास । तच्छ्रुत्वा परमोदारचरित्रौ भगवन्तौ वासुदेवौ न्यायानुयायिनां पाण्डवानां साहाय्याय प्रस्तुतावभूताम् । ततोऽक्रूरो हरिं तुष्टाव—

ध्येयं सदा परिभवघ्नमभीष्टदोहम् ।
तीर्थास्पदं शिवविरंचिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतम् ।
वंदे महापुरुष ते चरणारविन्दम् ॥

अथ स्वसदनं याते अक्रूरे यदुपुंगवावपि स्वभवनमवाप्य निश्चिन्तावातिष्ठताम् ।

इति श्रीकृष्णचरिते अक्रूरनिवर्तनं नाम
षाष्टितमः स्तवकः ॥ ६० ॥

अथोग्रसेनराज्ये मोक्षदायिकासु सप्तपुरीषु मथुराऽग्रगण्या नगरी बभूव । यत्र ब्राह्मणा निगमागमपारगाः, क्षत्रियाः अस्त्रशस्त्रविद्यासु दक्षाः, वैश्या व्यापारनिपुणाः, शूद्राश्च त्रिवर्गपरिचर्यापरायणा अभूवन् । धर्मराज्ये तस्मिन् व्रजस्थाः कुमार्यः पितृभक्ता, युवतयः स्वामिभक्ता, वृद्धाश्च पतिपुत्रहितैषिण्य आसन् । अत्रान्तरेऽस्तिप्राप्तिसंज्ञिके कंसमाहिष्यौ भर्तरि मृतेऽतिदुःखार्ते पितृगृहानेत्य स्वपित्रे मगधराजाय जरासंधाय स्ववैधव्यकारणं विस्तरेण वेदयामासतुः । तच्छ्रुत्वा शोकामर्षयुतो महीपो मेदिनीमयादवीं कर्तुं निश्चिकाय । सोऽथ त्रयोविंशतिभिरक्षौहिणीभिः संवृतः प्रस्थाय यदुराजधानीं मथुरां सर्वतोदिशं न्यरुणत् । ततः कारणमानुषो भगवान् कृष्णः सागरमुद्वेलमिव तद्बलं वीक्ष्य स्वपुरं निरुद्धं विज्ञाय स्वजनं च भयाकुलं विचिन्त्य देशकालानुगुणं स्वावतारप्रयोजनं विचारयामास । सोऽथ सैन्यसंहारं मागधरक्षणं च हितं निश्चित्य युद्धयोग्यं रथं सस्मार । अत्रान्तरे स सूतौ सपरिच्छदौ सायुधौ च सूर्यवर्चसौ स्यन्दनौ गगनात् समुपस्थितौ । ततो हृषीकेशः संकर्षणमुवाच । आर्य ! किं पश्यसि ? इमं रथं समारुह्य खलान् हत्वा च स्वजनान् व्यसनात् समुद्धर । ततोऽस्त्विति कथयित्वा बलभद्रः श्रीकृष्णवाक्यं समर्थयामास । अथोभौ रथिनौ स्वल्पबलावृतावपि पुरान्निर्गत्य स्वशंखौ दध्मतुः । तच्छब्दश्रवणात् परसैन्यानां

हृदि वित्रासवेपथुः सहसा बभूव । ततो मागधस्तौ समालोक्य प्रोवाच । हे पुरुषाधम कृष्ण ! त्वया बालेनैकेन सह योद्धुं नेच्छामि । अपरं च त्वं मातुलहंताऽसि । अतो द्रुतमितो याहि । मा दर्शय मुखम् । हे राम ! तव यदि युद्धश्रद्धा तर्हि धैर्यं धृत्वा युद्धचस्व । मच्छरैर्विद्धः स्वर्गं याहि वा मां विजित्य यशो लभस्व । तच्छ्रुत्वा हरिरुवाच—

न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम् ।
न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥

एवमाकर्ण्य श्रीकृष्णवचनं जरासुतो वायुर्यथाऽभ्रैः सूर्यमावृणोति तथा महता सैन्यसमूहेन तौ समावृतवान् । तस्मिन्नवसरे पुराट्टालकहर्म्यगोपुरस्थिता वनिताः सुपर्णतालध्वजचिह्नितौ रथावसमीक्ष्य सहसा संमुमुहुः। अथ हरिः परानीकप्रक्षिप्तैः शिलीमुखैः पीडितं स्वसैन्यमालोक्य सुराऽसुरार्चितं शार्ङ्गं धनुर्व्यस्फूर्जयत् । ततो निषंगाद्बाणपूगान् गृह्णन् संदधत् विकृष्य मुंचन् तैश्च रथकुंजरवाजिपत्तींश्च निघ्नन् हरिरलातचक्रवच्चतुर्दिक्षु सैन्याभिमुखं बभ्राम । अथ यदुनाथबाणभिन्ना गजहयरथध्वजसूतपदातयो धरण्यां निपेतुः । तेषामंगेभ्यो या रुधिरापगा निःसृतास्तत्र भुजाहयः, पुरुषशीर्षाणि कच्छपाः, हतागजा द्वीपाः, अश्वा ग्राहाः, करा मीनाः, केशाः शैवलाः, धनूंषि तरंगा, आयुधानि गुल्मानि चक्राणिचाऽऽवर्तसाम्यमवापुः । तस्मिन्नवसरे धावंतः

कातराः प्रोचुः—भ्रातरः! यद्यस्माद्रणक्षेत्रात् जीवंतो गृहानेष्यामस्तदा वयं तु मुखाद्युद्धशब्दमपि न कदापि निःस्सारयिष्यामः। तच्छ्रुत्वा वीरोऽवदत्—

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति तथ्यमितस्तदा तु यात।
अथ मरणमवश्यमेव जंतोः किमिति
मुधामलिनं यशः क्रियेत ॥

अत्रान्तरेऽपरिमिततेजसा संकर्षणेनाऽपि मुसलद्वाराऽनेके शत्रवो यमराजधानीं प्रेषिताः। ततो रामः सिंहः सिंहमिव विरथं जरासंधं जग्राह। अथ गोविन्दो वारुणैः पाशैर्बध्यमानं नृपं मोचयामास। एवमालोक्य व्रीडितो राजा तपसे कृतसंकल्पो मार्गे राजभिर्निवारितो यथाकथंचित् स्थैर्यमाभजत्। ततोऽल्पकैः कृते महान्तं पराभवं कर्माधीनं राजाऽमन्यत। अथ हतानीको राजा दुर्मना मगधान्ययौ। अत्रान्तरे साग्रजो मुकुंदो देवैः साधु साध्वित्यनुमोदितः कुसुमैर्विकीर्यमाणश्च स्वपुरं न्यवर्तत। तस्मिञ्छुभावसरे ब्राह्मणाः पुण्याहवाचनं चक्रुः। माथुराः पुष्पाण्यवाकिरन् मंगलमुख्यो गीतानि जगुः। सूतमागधवंदिनो विरुदावलीमगायन्। सुवासिन्यो माल्यदध्यक्षतादिमंगलपदार्थहस्ताः संमुखमागत्य शुभाशीर्वादान् शौरये ददुः। अथाऽऽयोधनमाप्तं वित्तं प्रभुरुग्रसेनाय सादरं समर्प्य

कृतार्थो बभूव । एवं मागधः सप्तदशकृत्वः ससैन्यो युयुधे । यदुभिः पराजित उपेक्षितो विषण्णश्च स्वपुरं जगाम ।

इति श्रीकृष्णचरिते जरासंधयुद्धनिरूपणं
नामैकषष्ठितमः स्तवकः ॥ ६१ ॥

अथाष्टादशमे संग्रामे नारदप्रेषितः कालयवनाख्यो योद्धा यादवान् समकक्षान् मत्वा युद्धाशयाऽसंख्यैर्म्लेच्छैर्युतो मथुरामेत्य तां रुरोध । एतदालोक्य संकर्षणसहायवान्हरिरचिंतयत् । अहो ! यदूनामुभयतो महद्वृजिनमुपयातम् । सोऽथ बन्धुवर्गहिताय विश्वकर्माणमाहूय मध्येसमुद्रं द्वादशयोजनविस्तीर्ण नगरं रचयेति समादिदेश । ततः सुरम्ये पुरे रचिते हरिः योगप्रभावेण सर्वजनं तत्र नीत्वा रामेण समनुमंत्रितः पद्ममाली निरायुधो नगरान्निर्जगाम । ततो यवनाधिपो दर्शनीयतमं पीतकौशेयवाससं श्यामसुंदरं च निष्क्रान्तं विलोक्य नारदोक्तैर्लक्षणैर्वासुदेवोऽयमिति निश्चित्यतमनुससार ।

हस्तप्राप्तमिवाऽऽत्मानं हरिणा स पदे पदे ।
नीतो दर्शयता दूरं यवनेशोऽद्रिकंदरम् ॥

ततो गिरिकंदरं प्रविशंतं हरिं यवनोऽब्रवीत् । कृष्ण ! यदुकुले जातस्य तव पलायनं नोचितम् । ततो हरिर्गुहामध्ये काऽप्यल-

क्षिते स्थानेऽतिष्ठत् । अथ प्रविष्टो यवनस्तत्रांधकारे शयानं पुरुषं श्रीकृष्णं मत्वा पदा ताडयित्वा च तं प्रोवाच—रे कपटिन्! मामतिदूरमानीय सम्प्रत्यत्र साधुवच्छेषे ? ततश्चिरं सुप्तः स सहसोत्थाय शनैर्लोचने समुन्मील्य दिशोऽवलोकयन् स्वपार्श्वे कालयवनमद्राक्षीत्। किं बहुना — स तावत् रुष्टस्य तस्य दृष्टिपातेन देहजाग्नितापेन च दग्धः क्षणाद् भस्मसादभवत् । अत्रेतिहासः—

पुरा इक्ष्वाकुवंशे परमप्रतापी मान्धाता नाम राजा बभूव । आसीत् तस्य गोब्राह्मणप्रतिपालको मुचुकुन्द इति ख्यातः सुपुत्रः । अथैकदा देवाऽसुरसंग्रामोऽभवत् । तत्राऽसुरेभ्यः परित्रस्तैरिन्द्राद्यैः सुरगणैरात्मरक्षार्थं याचितो राजर्षिश्चिरं सुरानरक्षीत् । अथ कदाचित् गुहं सेनानायकं समवाप्य देवा राजानमूचुः । राजर्षे! साम्प्रतम् भवान् नः परिपालनपरिश्रमाद्विरमताम् । निहतकण्टकं राज्यं परित्यज्याऽस्मान् पालयतस्ते सर्व एव कामाः समुज्झिताः । नरनाथ ! अतस्त्वं धन्यवादार्होऽसि ।

सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः ।
प्रजाश्च तुल्यकालीया नाऽधुना संति कालिताः ॥

बलीयानयं कालः । पशुपालो यथा पशून् कालयते तथा प्रजा अनायासेन कालयते । कैवल्यादृतेऽन्यं वरं वृणीस्व । यतस्तस्य दाता तु भगवान् विष्णुरेव । एवमाकर्ण्य देवादेशं प्रणम्य राजा प्राह—महानुभावाः! श्रमकर्शितोऽहं निद्रामेव याचे । अपरं च—

य: कश्चिन्मम निद्राया भंगं कुर्यात्सुरोत्तमाः ।
स हि भस्मीभवेदाशु तथोक्तश्च सुरैस्तदा ॥

ततो वरमवाप्य निश्चिन्तो राजा गुहायां सुष्वाप । एवं यवने भस्मसान्नीते यदुनाथो धीमते मुचुकुन्दायाऽऽत्मानं दर्शयामास । अथ राजा सर्वाङ्गसुन्दरं प्रसन्नवदनं भगवन्तं च विलोक्याऽपृच्छत्—को भवान्! गिरिगह्वरे उरुकंटके च विपिनेऽस्मिन् पद्मपलाशाभ्यां पद्भ्यां कथं भ्राम्यसि ? सूर्याग्निचन्द्रमहेन्द्रादिष्वन्यतमः कोऽसि ? अहं तु ब्रह्माविष्णुमहेशानां मध्ये साक्षाद्विष्णुं त्वां मन्ये । यौवनाश्वसुतोऽहं भवत्परिचयं प्राप्तुमिच्छामि । एवं राज्ञा संभाषितो भूतभावनो भगवान् प्रत्यवदत् । राजन्!

जन्मकर्माभिधानानि संति मेऽग सहस्रशः ।
न शक्यतेऽनुसंख्यातु मनंतत्वान्मयापि हि ॥

राजर्षे! गदतो मम वाक्यं श्रृणु । भूमेर्भारायमाणानामसुराणां क्षयाय यदुकुले वसुदेवगृहे च समवतीर्णोऽस्मि । कंसरूपेण जातः कालनेमिर्मया हतः ! योऽयं यवनस्तिग्मचक्षुषा त्वया दग्धः । तवानुग्रहार्थमेव तं नीत्वैनमत्राऽयातोऽस्मि—राजवर्य! वरान् वृणीष्व । तेऽहं सर्वान् कामान् ददामि । मां प्रपन्नो जनो भूयः शोचितुन्नार्हति । एवमाकर्ण्य भगवद्वचनं राजा गर्गवचनं स्मृत्वा तं नारायणं ज्ञात्वा च ववंदे । अथ सोवदत्—ईश! त्वदीयमायामोहितोऽयं जीवात्मा परमानंदस्वरूपं त्वां विस्मृत्य तुच्छ-

सुखाय दुःखप्रभवेषु गृहेषु आसक्तो भवति—नाथ ! योत्र दुर्लभं मानुषं देहं सांगोपाङ्गं समृद्धिमंतं च समवाप्य भवत्पादारविन्दं न भजति स मूढोऽन्धकूपे पतितः पशुरिव भृशं विषीदति । देव ! किमावेदयामि—

जन्मेदं व्यर्थतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥ १ ॥
न कामयेऽहं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो ।
आराध्य कस्त्वामपवर्गदेहरौ वृणीत आर्यो वरमात्मबंधनम् ॥२॥

तच्छ्रुत्वा हरिरुवाच—राजन् ! धन्योऽसि । मय्यावेशितमानसो महीं विचरस्व । तव मय्यनपायिनी भक्तिः सदाऽस्तु । अनंतरेजन्मनि क्षात्रधर्ममवलंब्य मृगयादिभिर्जंतून् न्यवधीः । अतस्तज्जनितं पापं तपसा मदुपाश्रितः सञ्जहि । अग्रिमजनने सर्वभूतसुहृत्तमो विप्रवर्यो भूत्वा मामेव समवाप्स्यतीति वरं दत्त्वा हरिरन्तर्दधे । ततो राजाऽपि गुहामुखान्निष्क्रम्य मर्त्यलोके सर्वत्र क्षुल्लकान् पुरुषान् पशून् वनस्पतींश्च दृष्ट्वा कलियुगं प्राप्तममन्यत । सोऽथ दिशमुत्तरां गत्वा गंधमादनं प्रविवेश । तत्र बदरिकाश्रमे स्थित्वा श्रीकृष्णे च मनःसमाधाय तपसा तमतोषयत् । अंतकाले भगवन्तं स्मरन् कलेवरं च त्यक्त्वा परमपदमवाप ॥

इति श्रीकृष्णचरिते मुचुकुन्दस्तुतिनिरूपणं
नाम द्विषष्ठितमः स्तवकः ॥ ६२ ॥

अथ भगवान् वासुदेवो यवनवेष्टितां पुरीं पुनरावृज्य म्लेच्छ-बलं जघान। ततस्तदीयं धनं द्वारकां प्रेषयामास। अत्रान्तरे त्रयोविंशत्यनीकपो जरासंधः पुनराजगाम। एतदालोक्य शिव-वरदानं ब्राह्मणवाक्यं च सत्यं कर्तुं रामकृष्णौ द्रुतं दुद्रुवतुः ततो विजयहृष्टो मागधो रथानीकैरन्वधावत्। सोऽथ प्रवर्षणगिरौ निलीनौ तौ विज्ञाय पावकमुत्सृज्य काष्ठैस्तं गिरिं समंतात् ददाह। ततो दग्धौ रामकृष्णौ इति मत्वा स्वसैन्यं नीत्वा च जरासुतो मागधान् प्रति समाययौ। अथ वासुदेवावपि तुङ्गमद्रि-मतिक्रम्य समुद्रपरिखां स्वपुरीं द्वारावतीं समवापतुः। अथैकदा विरंचिप्रेरित आनर्ताधिपतीरेवतो द्वारकामेत्य सर्वलक्षणसंपन्नां पूर्वप्रतिज्ञातां स्वसुतां रेवतीं वीरवर्याय बलभद्राय प्रादात्।

आसीद्विदर्भेषु भीष्मको नाम गुणज्ञो नरपतिः। तस्य रुक्मि-प्रभृतयः पंचपुत्रा रुक्मिणीति प्रसिद्धा चैका परमसुंदरी कन्या बभूव। अथ वैदर्भी गृहागतेभ्यो रूपशीलौदार्यादिसद्गुणान् मुकुंदस्य श्रुत्वा तमेव सदृशं पतिं मेने। एवं यदुपतिरपि गृहा-गतजनमुखात् रुक्मिणीगुणान् समाकर्ण्य आत्मनः सदृशीं भार्यां मत्वा तामेव समुद्वोढुं निश्चयमकरोत्। अथैकदा ज्येष्ठपुत्रो रुक्मी बंधूनामभिप्रायं बुद्ध्वा तान् दानान् निवार्य शिशुपालाय चैद्याय तां भगिनीन्दातुं समुद्यतोऽभवत्। ततो नियते विवाहदिने वरवर्णिनी सा वैदर्भी दुःखितचित्ता सती श्रीकृष्णप्राप्त्युपायं

विचार्य प्रेमपीयूषपूर्णं पत्रं लिलेख । तद्यथा—सिद्धश्री द्वारावती शुभस्थाने सर्वोपमार्हेषु विराजमानेषु शरणागतवत्सलेषु यावदार्य-कुलकमलदिवाकरेषु श्रीकृष्णचन्द्रयदुपुंगवेषु च कुण्डिनपुरात् चरणसरोरुहसेविकाया रुक्मिण्याः साष्टाङ्ग प्रणामाः प्रस्फुरंतु-तराम् । श्यामसुन्दर ! भवदीयां शरच्चन्द्रोज्ज्वलां कीर्तिं श्रुत्वा मे कर्णा तु तृप्तौ परन्तु चक्षुषी न तृप्ते । अतस्तयोर्विवादनिवारणाय दर्शनं दातुकामः शीघ्रमागमनं करोतु भवान् । मुकुंद ! सर्वगुणसंपन्नं भवंतं कुलवती धीरा च का कन्या न वृणीत ? ज्ञात्वैवं मयि भवद्भिर्दोषशंका न करणीया । केशव ! जगति निरुपमं त्वां निश्चित्य मया वृतोऽसि खलु । अतस्त्वमत्राऽऽगत्य द्रुतं मां भवतो भार्यां विधेहि । सिंहोपमस्य वीरस्य तव भागं गोमायुतुल्यः शिशुपालो मा स्पृशतु । प्रपन्नार्तिहर ! श्रौतस्मार्त-कर्मभिर्यदि मया परमेश्वरः समाराधितस्तदा तु श्रीकृष्णचन्द्र एव समागत्य मे पाणिं गृह्णातु । अन्ये दमघोषसुतादयस्तु ममोपरि दृष्टिमपि मा क्षिपन्तु । कृपानाथ ! विवाहः परश्वो भविता । ततः प्रागेव विदर्भानेत्य गुप्तरीत्या चैद्यमगधेन्द्रबलं निर्मथ्य राक्षसेन विधिना वीर्यशुल्कां मामुद्वोढुमर्हसि । प्रभो ! लग्नदि-नात् प्रथमेऽह्नि महती कुलदेवीदर्शनार्था यात्रा भवति । यत्र नववधूः गौरीपूजनाय नगराद्बहिर्गच्छति । अतो देवमंदिरादेव मम हरणं सुकरं प्रतीयते । पुण्डरीकाक्ष ! यस्यांघ्रिपंकजरजःस्नपनं

देवा अपि वांछंति तस्य प्रसादं यदि न लभेयं तर्हि व्रतोपवासादिभिः कृशान् प्राणांस्त्यजेयम् इति लिखित्वाऽऽप्ताय विदुषे ब्राह्मणाय तद्दत्त्वा च तं श्रीकृष्णाय द्रुतं प्राहिणोत् । सोऽथ द्वारावतीमभ्येत्य प्रतीहारैः प्रवेशितश्च कांचनासनासीनं ब्रह्मण्यदेवं ददर्श । अथ हरिरपरिचितं ब्राह्मणमवलोक्य निजासनादुत्थाय तं तत्रोपवेश्य च विधिवत् संपूजयामास । ततो विप्रभक्तो जनार्दनो भुक्तवन्तं विश्रान्तं च समुपसृत्य पाणिनाऽभिमृशन् पप्रच्छ । द्विजवर ! संतुष्टचित्तस्य तव वृद्धसम्मतोधर्मः कृच्छ्रेण नाऽतिवर्तते कच्चित् ? ब्राह्मणः संतोषमेव सदाऽवलंबेत । स एवाऽस्य सर्वकामधुगस्ति । उक्तं च—

असंतुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः ।
अकिंचनोऽपि संतुष्टः शेते सर्वांगविज्वरः ॥
विप्रान् स्वलाभसंतुष्टान् साधून् भूतसुहृत्तमान् ।
निरहंकारिणः शांतान् नमस्ये शिरसाऽसकृत् ॥

भूदेव ! यमर्थमवलंब्य दुर्गं निस्तीर्य च त्वमत्रागतः । तदगुह्यं चेत् तर्हि सर्वं नो ब्रूहि । एवमाकर्ण्य हरिवचनं स विप्रो जनार्दनाय तद्रुक्मिणीदत्तं पत्रं समर्पयामास ।

इति श्रीकृष्णचरिते रुक्मिणीप्रार्थनानिरूपणं नाम त्रिषष्टितमः स्तवकः ॥ ६३ ॥

अथ हरिस्तत् पत्रं पठित्वा पाणिना पाणिं गृहीत्वा सस्मितमुवाच—विप्रवर्य ! यथा तव राजसुता मां स्मरति तथाऽहमपि तां स्मरामि । रुक्मिणा द्वेषान्ममोद्वाहो निवारित इत्यपि सम्यगहं वेद । विश्वासं रक्ष । मृधेऽहं राजन्यापसदान् निहत्य वायुर्यथा काष्ठादग्निशिखां हरति तथाऽनवद्यांगीं तामानयिष्ये । ततो भगवान् दारुकं समाहूय द्रुतं रथः संयुज्यतामित्यादिदेश । अथ सारथिः शैब्यसुग्रीवमेघपुष्पबलाहकैरश्वैर्युक्तं रथमुपानीय प्रांजलिरग्रतोऽतिष्ठत् । अथ यदुपतिः द्विजं स्यन्दनमारोप्य स्वयमारुह्य चैकरात्रेणानार्ताद्विदर्भानगमत् । अत्रान्तरे कुण्डिनपुरपती राजा पुत्रस्नेहवशानुगः सन् शिशुपालाय कन्यां दास्यन् सर्वाणि कर्माणि कारयामास । तस्मिञ्छुभावसरे पुरं संमृष्टसांसिक्तमार्गरथ्याचतुष्पथम् चित्रध्वजपताकातोरणैश्च समलंकृतमभूत् । ततो राजा देवान् पितॄंश्च समभ्यर्च्य विधिवद् ब्राह्मणान् भोजयामास । अथाऽथर्ववित्पुरोहितः प्रतिकूलग्रहशांत्यर्थं जुहाव । द्विजाश्चाऽन्ये ऋग्यजुः साममंत्रैः कन्यारक्षां चक्रुः ।

हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ।
प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदां वरः ॥

अथ कृतकौतुकमंगला वरारोहा वैदर्भी द्विजस्य प्रत्यापत्तिमपश्यंती व्यचिन्तयत् । अहो ! त्रियामान्तरितो मे पाणिग्रहण-

संस्कार । अरविन्दाक्षो न समायातः । नाऽहमत्रकारणं वेद्मि ? किं करोमि ? स मम संदेशहरो दूतोऽपि नाऽवर्तते ।

दुर्भगाया न मे धाता नाऽनुकूलो महेश्वरः ।
देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ॥

एवं बाला विचिंतयती नेत्रे न्यमीलयत् । अथ प्रभाते गोविन्दागमनं प्रतीक्षयन्त्यास्तस्या वाम उरः भुजो नेत्रं चाऽस्फुरत् । अत्रान्तरे कृष्णविनिर्दिष्टो द्विजोऽन्तः पुरचरीं राजसुतां ददर्श । सोऽथ तस्यै श्रीकृष्णगमनमावेदयामास । अथ प्रहृष्टमानसा वैदर्भी ब्राह्मणाय प्रियवस्तुदानमशक्यं मत्वा प्रणाममेव तस्मै समर्पयामास । अत्रान्तरे भगवान् रामोऽपि कन्यां हर्तुं कृष्णमेकाकिनं गतं श्रुत्वा कलहशंकितः सन भ्रातृस्नेहपरिप्लुतो महता बलेन साकं सहसा तत्र समाजगाम । ततो भीष्मकः स्वदुहितुः विवाहप्रेक्षणौत्सुकौ रामकृष्णौ प्राप्तौ श्रुत्वा महता तूर्यघोषेण तत् संमुखमाजगाम । सोऽथ मधुपर्कादीन्युपादाय ताभ्यां समर्प्य विधिवत् सपूजयामास । ततो वैदर्भाः श्रीकृष्णमागतं समाकर्ण्य संमुखमेत्य च नेत्रांजालिभिस्तन्मुखपंकजं पपुः । मिथश्च प्रोचुः—

अस्यैव भार्या भवितुं रुक्मिण्यर्हति नाऽपरा ।
असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥

अथ सुस्नाता सुदती अहतांशुकयुग्मसमेता सालंकृता भटैर्गुप्ता सखीभिः परिवारिता च पद्भ्यामेव रुक्मिणी भवानी-पादपल्लवं द्रष्टुं पुरात् प्रागात् । साऽथ धौतपादकराम्बुजा देवाय-तनमासाद्य षोडशोपचारैः भवभयहारिणीं भवान्वितां भवानीम-पूपुजत् । सा च सादरमुवाच—

नमस्ये त्वांबिकेऽभीक्ष्णं स्वसंतानयुतां शिवाम् ।
भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदताम् ॥

साऽथ प्रसन्नाननां देवीमालोक्य संतोषमवाप । ततो गृहीतप्रसादा विप्रपत्नीः प्रणनाम वैदर्भी । सौभाग्यवत्यस्तास्तस्यै अखण्डसौ-भाग्यवती पुत्रपौत्रवती च भूया इति शुभाशीर्वादं प्रददुः । ततः शुचिस्मितां कलहंसगामिनीं सर्वाङ्गसुंदरीं च तां विलोक्य रुक्मिणीं वीराः सपदि पंचबाणविद्धा इव बभूवुः । अथ राजसुता हरिं ध्यायन्ती यावद्रथमारोढुकामाऽभवत् ततः प्रागेव कृष्णः समीक्षतां द्विषतां सुपर्णलक्षणं रथमारोप्य तां बलादपाहरत् । एवमालोक्य जरासंधाद्यो महीपा "धिगस्मान् गोपवंचितान्" इति कथयंतः प्रतीकारं कर्तुमुद्यता बभूवुः ।

इति श्रीकृष्णचरिते रुक्मिणीहरणनिरूपणं नाम
चतुःषष्ठितमः स्तवकः ॥ ६४ ॥

अथ सुसंरब्धाः सर्वे कार्मुकाणि नीत्वा वाहानारुह्य च यादवानन्वीयुः। ततो यादवास्तानापततो वीक्ष्य योद्धुं सम्मुखास्तस्थुः। अथ केचिदश्वपृष्ठस्था अपरे गजस्था अन्ये च रथस्था यादवसैन्योपरि बाणवृष्टिं चक्रुः। ततः सुमध्यमा शरासारच्छन्नं पतिबलं वीक्ष्य भयविह्वललोचना सव्रीडं तद्वक्रमैक्षत। अथ भगवान् प्रहस्य प्राह—वामलोचने! मास्म भैः। तावका एते भटाः सत्वरमेव शात्रवं बलं विनाशयिष्यंति। अत्रान्तरे गदसंकर्षणादयो वीरवर्या नाराचैः शत्रुपक्षीयान् पत्तिहयगजरथान् जघ्नुः। किं बहुना, तस्मिन् समये सा रणमेदिनी रुण्डमुण्डमयी बभूव। एवमालोक्य यादवानां हस्तलाघवं जरासंधप्रभृतयो राजानः पराङ्मुखा परावर्तन्त। ततस्ते हृतदारं शिशुपालमभ्येत्य प्रोचुः। पुरुषशार्दूल! स्वविवाहनिवृत्तिजनितविषादं त्यज। यतः सुखदुःखयोः स्थैर्यं देहिषु न दृश्यते—

यथा दारुमयी योषिन् नृत्यते कुहकेच्छया।
एवमीश्वरतंत्रोऽयमीहते सुखदुःखयोः॥

एवं मित्रैः प्रबोधिताः चैद्यः सानुगः पुरं न्यवर्तत। अत्रान्तरे श्रीकृष्णद्विड् रुक्मी राक्षसविवाहात् कोपं कृत्वा ससैन्यो योद्धुं प्रातिष्ठत। अथ ऊर्द्ध्वबाहुः सोऽब्रवीत्। शृणुत शृणुत लोकाः!

अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीम्।
कुंडिनं न प्रवेक्ष्यामि सत्यमेतद् ब्रवीमि वः॥

इत्यभिधाय रथमारुह्य च सारथिमादिदेश—सखे ! यत्र कृष्णो-ऽस्ति तत्राश्वानाशु गमय । सोऽथ शीघ्रगत्या श्रीकृष्णरथमवाप्य दूरात् तिष्ठ तिष्ठेति गोविन्दमाजुहाव । ततः संमुखं जनार्दनम् प्राह—कुलपांसन ! क्षणं प्रतीक्षस्व तुभ्यमहं बलात् कन्याहरणस्य दण्डं दातुमिच्छामीत्युक्त्वा सुदृढं धनुर्विकृष्य तत्र शरान् संधाय च त्रिभिर्बाणैः कृष्णं तुतोद । ततः प्रहसन् यदुपतिः बाणेनैकेन तस्य धनुश्छित्त्वा शरैःषड्भिस्तमपि विव्याध । अथाऽच्युतश्चतुर्भिश्चतुरो वाहान् द्वाभ्यां सूतं त्रिभिश्च ध्वजमच्छिनत् । ततः पावकं पतंग इव खड्गपाणी रुक्मी रथादवप्लुत्य जिघांसया श्रीकृष्णमभ्यद्रवत् । एतदालोक्य शौरिरापतस्तस्य खड्गचर्मणी शरैस्तिलशः कृत्वा तमपि हन्तुमुद्यतोऽभवत् । एवं दृष्ट्वा भयविह्वला वैदेही पतिपादयोः पतित्वा सकरुणं जगाद ।

योगेश्वराऽप्रमेयात्मन् ! देव ! देव ! जगत्पते !
हंतुन्नार्हसि कल्याण ! भ्रातरं मे महाभुज ! ॥

तच्छ्रुत्वा दयासागरो हरिस्तद्वस्त्रेण तं बद्ध्वाऽसिना तच्छिरो मुण्डयित्वा च विरूपमकरोत् । अत्रान्तरे यदुप्रवीरा गजाः पद्मवनमिव तत्सैन्यं सहसा ममर्दुः । अथ कृपानिधिः संकर्षणो म्लानाननं तं रुक्मिणं दृष्ट्वाऽनुजमुवाच । भ्रातः ! त्वयैतत् श्रीमदांधवत् कुलविरुद्धं कर्माचरितम् ? श्यालं मुंच मुंच ।

वैरूप्यमपि सुहृदो वध एव। ततोऽग्रजकथनं मत्वाऽच्युतः सत्वरं रुक्मिणममुंचत् । अथ बलभद्रो रुक्मिणीमुवाच । साध्वि ! वैरूप्यचिन्तयाऽस्मान् मैवाऽसूयेथाः । यतः सुखदुःखदोऽन्योऽत्र कोऽपि नास्ति । पुमान् स्वतएव स्वकर्मफलं भुंक्ते । अपरं च विलक्षणं क्षात्रं कर्म—

क्षत्रियाणामयं धर्मः प्रजापतिरकल्पयत् ।
भ्राताऽपि भ्रातरं हन्याद्येन घोरतरस्ततः ॥

भद्रे ! तरति शोकमात्मविदिति श्रुतिः प्रतिपादयति । देहात्मवादिनो देवमायया मोहिताः संतः अयं सुहृद् अयं दुहृद् अयमुदासीन इति कल्पनां कुर्वंति । वस्तुतस्तु—

एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ।
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥

इमे जन्मादयो विकारा देहस्यैव नत्वात्मनः । असंगोह्ययं पुरुष इति श्रुतिः । एवं रामेण प्रबोधिता वैदर्भी परित्यज्य दुःखं स्थिरबुद्धिर्बभूव । अत्रान्तरे विफलमनोरथो रुक्मी प्रतिज्ञां स्मृत्वा कुंडिनपुरं न जगाम । प्रत्युत भोजकटाख्यं नवीनं नगरं रचयित्वा तत्रैव स्थितिमकरोत् ।

इति श्रीकृष्णचरिते रुक्मिवैरूप्यानिरूपणं नाम
पंचषष्ठितमः स्तबकः ॥ ६५ ॥

अथ श्रीरुक्मिणीसमेतः श्रीकृष्णः सिक्तमार्गां ध्वजपताकादिभिरलंकृतां च द्वारावतीं प्रविवेश। तदा तत्र पुरवासिनां महामोदोऽभवत्। ततः शुभेऽहनि भगवान् शास्त्रोक्तविधिना वैदर्भीमुपयेमे। अथ कदाचित् सखीसमेता वैदर्भी स्वतल्पस्थं पतिं व्यजनेन पर्यचरत्। तत्र सखीशैथिल्यं विज्ञाय रुक्मिणी रत्नदण्डं वालव्यजनं वयस्याकरादादाय च स्वयमुपासांचक्रे भगवंतं पुरुषोत्तमम्। एतदालोक्य परिहासपटुर्द्वारकाधीशः सस्मितमुवाद। राजपुत्रि! स्मरदुर्मदान् चैद्यादीन् हित्वा कथमसमानान् अस्मानवृणोः? सुंदरि!

राजभ्यो विभ्यतः सुभ्रूः समुद्रं शरणं गतान्।
बलवद्भिः कृतद्वेषान् प्रायस्त्यक्तनृपासनान् ॥ १ ॥
निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः।
तस्मात्प्रायेण नह्याढ्या मां भजंति सुमध्यमे ॥ २ ॥
ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ ३ ॥
वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया।
वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥ ४ ॥

अथाऽऽत्मनोऽनुरूपं क्षत्रियर्षभं भजस्व। येन त्वमिहाऽमुत्र च सत्या आशिषः समुपलप्स्यसे। एवमश्रुतपूर्वमप्रियं च वचनं

भगवतः श्रुत्वा सहसा रुक्मिणी भयविह्वला रुरोद। तस्या हस्ताच्च व्यजनं पपात। एवमालोक्य देव्याः प्रेमातिशयं हरिः सहसा करुणान्वितोऽभवत्। ततो जनार्दनो रुक्मिण्या अश्रुकले नेत्रे प्रमृज्य प्रोवाच। प्रिये! मा मामसूयेथाः। मत्परायणां त्वां सम्यगहं वेद्मि। त्वद्वचः श्रोतुकामेन मया द्वेल्या कथितम्। अत्र दोषलेशोऽपि नास्ति।

अयं हि परमोलाभो गृहेषु गृहमेधिनाम्।
यन्नर्मैर्नीयते यामः प्रियया भीरुभामिनी॥

अथ समाश्वासिता वैदर्भी प्रोवाच। हृषीकेश! शोभते सर्वत्र भवतो वाचां वैचित्र्यम्। निजानंदस्वरूपेऽभिरतो वैराग्यादिगुणपूर्णो जगन्नियंता च भवान् क्व? विषयाऽऽविष्टचित्ता चाऽहं क्व? अत्र महद्वैषम्यं स्पष्टमेव। देव! शब्दादयो विषया एव राजानः। तेभ्यो भयादिव समुद्रइवाऽगाधेऽन्तःकरणे उपलंभनमात्रश्चैतन्यघन-आत्मा भवान् निश्चलतया तिष्ठतीत्यपि सत्यम्। विभो! प्रत्यहं बलवन्तमिन्द्रियग्रामं जयसि। अतो बलवाद्विरोधिताऽपि भवति यथार्था। आर्यपुत्र! पूर्वजव्रतपालनार्थमेव भवता राजसिंहासनं त्यक्तम्। अत्राऽपि भवतो महत्त्वमेव न तु लाघवम्। प्रभो! यतः सकाशात् किंचिदपि दुर्लभं नास्ति। तथाभूतो निष्किंचनो भवान्। नहि दारिद्र्यान्निष्किंचनः। नाथ! संपत्तिशालिनं सर्वे पृच्छन्ति किन्तु

निष्किंचनजनं तु भवानेव रक्षति। अतोऽकिंचनप्रियत्वमपि भवतः प्रशस्यम्। प्रणतपाल! उन्नता गर्वादधः पतंति। अवनताश्चैव स्वाभीष्टसिद्ध्यर्थं त्वां यष्ट्वा महत्पदं लभंते। अतो नह्याढ्या मां भजन्तीति सत्यम्।

नैवालीकमहं मन्ये वचस्ते मधुसूदन !
अंबाया इव हि प्रायः कन्यायाः स्याद् गतिः क्वचित् ॥ १ ॥
व्यूढायाश्चाऽपि पुंश्चल्या मनोऽभ्येति नवं नवम्।
बुधोऽसतीं न बिभृयात्तां बिभ्रन्नुभयच्युतः ॥ २ ॥

तच्छ्रुत्वा हरिरुवाच। साध्वि! सत्यमेतत्। प्रत्युत्तरं श्रोतुकामैस्त्वं विप्रलंभिताऽसि। देवि! कल्याणदातारं मां ये दांपत्यसुखार्थं व्रतोपवासादिभिर्यजंते ते मम मायामोहिता एव। मानिनि! गृहेषु त्वादृशीं गृहिणीं न पश्यामि। या विवाहात् प्राक् प्रेषयित्वा द्विजं मां समाह्वयत्। एवं भगवान् प्रेमपरिप्लुतैः परिहासै रुक्मिणीमनोविनोदं कुर्वन् सुखेन कालं निनाय।

इति श्रीकृष्णचरिते रुक्मिणीपरिहासनिरूपणं नाम षट्षष्टितमः स्तवकः ॥ ६६ ॥

अथ गच्छता कालेन तस्यां कंदर्पावतारः पितृतुल्यगुणाकरश्च प्रद्युम्न इति विख्यातस्तनयो बभूव। ततो नारदमुनिमु-

खाद्वार्तां श्रुत्वा तमात्मनः शत्रुं विदित्वा कामरूपधरः शंवरोऽनतीतदशाहमपि तोकं गृहीत्वा च समुद्रे चिक्षेप। महाकायो मीनस्तं निर्जगार। अथ मत्स्यजीविनो जालेन तं गृहीत्वाऽपरैर्मत्स्यैः सह शंवराय महामत्स्यमपि समर्पयामासुः। असुरः सूदाय प्रादात्। पाचको महानसं प्रति नीत्वा स्वधितिनातम् अकर्तीत्। सोऽथ तदुदरे बालकं दृष्ट्वा चकितः सन् मायावत्यै तं पोषणाय प्रायच्छत्। कामपत्नी रतिः साऽपि नारदाननात् सर्वं वृत्तमवगम्य तं शिशुं कामदेवावतारं मत्वा च प्रेम्णा पालयामास। नाऽतिदीर्घेण कालेन स कार्ष्णी रूढयौवनोऽभवत्। अथैकदा कमनीयकलेवरं तं मायावती प्रीत्या सौरतेर्भावैरभजत्। एतदालोक्य कृष्णलालः प्राह। मातः! जननीभावं विहाय पुंश्चलीव कथं व्यवहरसि। तच्छ्रुत्वा सा प्रत्यवदत्। प्रभो! हरकोपाग्निदग्धो भवान् कामः। अहं च तेऽधिकृता पत्नी रतिरस्मि। संप्रति वासुदेवसुतोऽत्र भवान् शंवरेण गृहादानीय समुद्रे प्रक्षिप्तः। ततो मत्स्येन निगीर्णो दाशैरत्रानीतः। देव! तमिमं सहजशत्रुं जहि। गतप्रजा ते माता कुररीव परिशोचति। एवमाभाष्य सा स्वभर्त्रे सर्वमायाविनाशिनीम् महामायां प्रादात्। ततो रुक्मिणीनंदनः शंवरमभ्येत्य तं संग्रामाय समाह्वयत्। अथाऽधिक्षिप्तो दुर्वचोभिः पदाहत उरग इव खड्गं नीत्वा सोऽसुरो गृहान्निश्चक्राम। ततस्ताम्रलोचनो राक्षसो गदां भ्राम-

यित्वा प्रद्युम्नं हन्तुं प्रचिक्षेप । सावधानः प्रद्युम्नो गदया गदां न्यवारयत् । ततो दितिजो दैतेयीं मायामवलंब्य श्रीकृष्णात्मजेऽस्त्रवर्षं मुमुचे । अथ पीडितोऽपि वैदर्भीपुत्रो मायोपमर्दिनीं महाविद्यां प्रसार्य तत्प्रतीकारमकरोत् । अथ यं यं छलप्रयोगं शंवरोऽकरोत् प्रद्युम्नस्तं तं सहसैव व्यधमत् । ततोऽवसरमवाप्य प्रद्युम्नस्तीक्ष्णतलवारेण शंवरशिरश्छित्त्वा शरीरादपातयत् । सोऽथ देवैः पुष्पांजलिभिराच्छादितो गगनचारिण्या भार्ययाऽऽकाशमार्गेण च पुरं प्रति नीतः । ततो ललनाशतसंकुलं अंतःपुरं समवाप्य सपत्नीकः प्रविवेश । अथ तत्रत्या वनिताः तं श्रीकृष्णं मत्वा लज्जया यत्र तत्र निलिल्युः । अत्रान्तरेऽसितापांगी कृष्णप्रिया रुक्मिणी तत्राऽऽजगाम । साऽथ विलोक्य तौ दंपती स्नेहस्नुतपयोधरा चिरान्नष्टं सुतं सस्मार । ततः साऽपृच्छत् । कोऽयं भद्रमुखः ? कस्य नंदनः ? जननी का इमं जठरे धृतवती ? अनेन च लब्धेयं स्त्री का ? यो मम सुतः सूतिकागृहान्नीतः । सपदि कुत्रचिज्जीवति तदात्वेतेन तुल्यवयोरूपः स्यात् । अस्मिन्मेऽधिका प्रीतिर्भवति । मे वामो भुजश्च स्फुरतीति मीमांसमानायां वैदर्भ्यां देवकीवसुदेवाभ्यां सह वासुदेवोऽपि तत्राऽऽजगाम । विज्ञातार्थोऽपि भगवाँस्तूष्णीमासीत् । अत्रान्तरे संप्राप्तो देवर्षिर्नारदः सर्वं वृत्तमेभ्यः समावेदयामास । ततस्ते तौ परिष्वज्य प्रमोदातिशयमवापुः । श्रीमती रुक्मिणी तु

प्रेमपीयूषपारावारेऽभिषिक्तेव बभूव । द्वारकावासिनोऽपि शुभसमाचारमेनं श्रुत्वा रुक्मिणीश्रीकृष्णयोर्भाग्यं मुहुर्मुहुः प्राशंसन् ।

इति श्रीकृष्णचरिते प्रद्युम्नोपाख्याननिरूपणं नाम सप्तषष्ठितमः स्तवकः ॥ ६७ ॥

आसीत् सत्राजितो नाम कश्चिद्यदुवंशीयः क्षत्रियः । स महता तपसा तेजस्विवर्यं भगवन्तं भास्करं प्रसादयामास । अथ तुष्टो दिवाकरस्तस्मै स्यमन्तकाख्यं मणिं प्रादात् । अथैकदा स सत्राजितस्तं मणिं कंठे धृत्वा दिनमणिरिव विभ्राजमानो राजसभाऽन्तिकमगात् । तं विलोक्य तत्तेजसा मुष्टदृष्टयो जना अक्षैर्दीव्यते श्रीकृष्णाय भवद्दर्शनार्थं साक्षात् सूर्य एव समागच्छतीति शशंसुः । एवमाकर्ण्य जनतावाक्यं विहस्य यदुनाथोऽब्रवीत् । सभ्याः ! नाऽयं दिनकरः किन्तु सूर्यदत्तेन मणिना ज्वलन् एषः सत्राजितः समायाति । ततः कृतकौतुकमंगलो यादवः स्वगृहं प्रविश्य देवसदने विप्रैस्तं मणिं निवेशयामास । प्रदिदिनं स मणिरष्टौ स्वर्णभारान् सृजति ।

दुर्भिक्षमार्यरिष्टानि सर्वाऽधिव्याधयोऽशुभाः ।
न संति मायिनस्तत्र यत्राऽस्तेऽभ्यर्चितो विधिः ॥

अथैकदा शौरिरुग्रसेनार्थं सत्राजितं मणिं अयाचत् । अर्थलुब्धः स भूपाज्ञोल्लंघनमनर्थमूलमिति जानन्नपि उपेक्षामकरोत् । ततः कदाचित् सत्राजिताऽनुजः प्रसेनः तं महाप्रभं मणिं कण्ठे

प्रतिमुच्य हयमारुह्य च मृगयार्थं वनमगमत् । अत्रान्तरे काश्चित् सिंहस्तत्र समाययौ । स सहयं प्रसेनं हत्वा मणिं नीत्वा च गिरिगुहां प्रविवेश । ततो जांबवान् केसरिणं हत्वा मणिमादाय च कुमार्यै क्रीडार्थं प्रादात् । अत्रान्तरे सत्राजितोऽदृष्ट्वा भ्रातरं पुनः पुनः पर्यतप्यत । ततः सोऽचिन्तयत् । पूर्वं कृष्णेन मणिर्याचितः । मया च न दत्तः । अतो मणिग्रीवो वनं गतो मे भ्राता कृष्णेनैव हत इति तर्कयामि । एवं निशम्य तद्वचो द्वारकावासिनः कर्णे कर्णेऽजपन् । तच्छ्रुत्वाऽऽत्मनि दुर्यशो लिप्तं च विज्ञाय सनागरो हरिस्तत् प्रमार्ष्टुं प्रसेनपदवीमन्वपद्यत । ततस्ते पूर्वं केसरिणा हतं साश्वं प्रसेनं विज्ञाय गिरिपृष्ठे जाम्बवता हतं पंचाननं विलोक्य च मुहुर्मुहुः सत्राजितनिश्चयं निनिंदुः । अथ यदुपतिः सर्वाः प्रजा बहिरवस्थाप्य एकाक्येव तमसाकीर्णमृक्षराजविलं प्राविशत् । सोऽथ तत्र बालक्रीडनकं कृतं मणिं समालोक्य तम् अपाहर्तुकामोऽर्भकान्तिकेऽवतस्थे । ततस्तत्रत्या धात्री विलोक्य तमपूर्वपुरुषं भीत्या चुक्रोश । तच्छब्दं श्रुत्वाऽतिक्रुद्धो जाम्बवांस्तत्रागत्य तेन सह युयुधे । अथ विजिगीषतोस्तयोः क्रव्यार्थेश्येनयोरिव आयुधाश्मद्रुमदोर्भिस्तमुलं द्वन्द्वयुद्धमभूत् । ततः श्रीकृष्णमुष्टिप्रहारैः पीडिताङ्गो जाम्बवान् विफलप्रयासो भूत्वाऽतिष्ठत् । सोऽथ लक्षणैस्तं पुराणपुरुषं विज्ञाय तुष्टाव ।

त्वं हि विश्वसृजां स्रष्टा सृज्यानामपि यच्चसत् ।
कालः कलयतामीशः पर-आत्मा तथाऽऽत्मनाम् ॥

अथाऽतितुष्टो भगवान् वासुदेवोऽपि तं परिचित्य व्याजहार । सखे ! मणिहेतोर्वयमिह प्राप्ताः । तच्छ्रुत्वा जाम्बवान् प्रीतःसन् स्वां कन्यां जाम्बवतीं तस्मै दत्त्वा यौतुके च तं महामणिमपि समर्पयामास । अत्रान्तरे नागरिका विलद्वारे स्थिता द्वादशाहानि प्रतीक्ष्य तदागमनमदृष्ट्वा च शोचंतः स्वपुरमाययुः । ततो देवकी-वसुदेवौ रुक्मिणीप्रभृतयो यादवाङ्गनाश्च तन्मुखात् कृष्णं विला-दानिर्गतं निशम्य श्रीकृष्णप्राप्तये महामायां भगवतीं दुर्गां स्तोत्रनमस्कारपूजादिभिराराधयामासुः । अत्रान्तरे सदारः सिद्धा-र्थश्च हरिः शिवाऽऽशिषा सहैव प्रादुर्बभूव । अथ नवोदितं चन्द्रमिव वासुदेवं पुनरागतं समीक्ष्य सर्वे लोका नेत्रसाफल्यमवापुः । ततो हरिः सत्राजितं सभायां समाहूय मणिप्राप्तिप्रकारं चाख्याय तस्मै मणिं समर्पयामास । सोऽथ रत्नं नीत्वाऽतिव्रीडितः सन्न-वाङ्मुखो भवनमगमत् । सोऽथ—

दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ।
उपायोऽयं समीचीनस्तस्य शांतिर्नचाऽन्यथा ॥

एवं समाकर्ण्य पतिवचनं तत्पत्नी भृशं तुतोष । ततः शुभदिनं विलोक्य सत्राजितः श्रीकृष्णचन्द्राय नवेन्दुलेखामिव सुदर्शनां

सत्यभामां प्रादात् । सोऽथ यदा मणिमपि दातुमैच्छत्तदा हरिरुवाच । महाशय ! क्षमस्व । मणिरेषः प्रभाकरभक्तस्य तवैव गृहेऽवतिष्ठतु । अकथिता अपि वयं तव रिक्थस्य भागिनः स्मः ।

इति श्रीकृष्णचरिते जाम्बवतीसत्यभामयोर्विवाहनिरूपणं नामाष्टषष्ठितमः स्तवकः ॥ ६८ ॥

अथैकदा भगवान वासुदेवो लाक्षागृहे कुंतीसमेतान् दग्धान् पाण्डवानाकर्ण्य विज्ञातार्थोऽपि कुलोचितव्यवहारपालनाय सरामः कुरूनगमत् । ततस्तौ भीष्मद्रोणकृपविदुरान् गांधारीं च समेत्य हा ! महाकष्टमापतितमित्यूचतुः । अत्रान्तरेऽक्रूरकृतवर्माणौ शतधन्वानमेत्य प्रोचतुः । सखेऽधुनाऽत्र श्रीकृष्णो नाऽस्ति । अतः सत्राजितः सकाशान्मणिस्त्वया कथं न गृह्यते ? यः पूर्वं कन्यारत्नदानमस्मभ्यं प्रतिश्रुत्य पुनरस्माननादृत्य च कृष्णाय सत्यभामां प्रादादतो हीनप्रतिज्ञः खलो भ्रातृदशां कस्मान्नाप्नुयात् ? एवं ताभ्यां प्रबोधितोऽपक्वबुद्धिः शतधन्वा सहसा शयानं सत्राजितमवधीत् । मणिमादाय च सत्वरं पलायितः । अथ सत्यभामा पितरं हतं वीक्ष्य हा तात ! हा तात ! हतास्मीति विलप्य मुमोह । ततश्चेतनां लब्ध्वा शवं तैलद्रोण्यां प्रास्य च सहसा गजसाह्वयं जगाम । साऽथ तत्र गद्गद्गिरा कांताय कृष्णाय पितृवधवृत्तं विनिवेद्य प्रतीकारार्थिनी तस्थौ । एतदाकर्ण्य विज्ञान-

विशारदावपि रामकृष्णौ शोकग्रस्तौ बभूवतुः । ततः साग्रजः सभार्यश्च हरिर्द्वारकामागत्य शतधन्वानं हन्तुं मणिं नेतुं च दृढनिश्चयमकरोत् । अथ भीतः शतधन्वा प्राणरक्षार्थं कृतवर्माणमेत्य साहाय्यं ययाचे । सोऽब्रवीत् । मित्र ! नाऽहमीश्वरयो रामकृष्णयोर्हेलनं कुर्याम् । तयोर्वृजिनमाचरन् कोनुक्षेमाय कल्पेत ? येन कंसो हतः । जरासंधश्च विजितः । तस्याऽनिष्टं मनसाऽपि कर्तुं नार्हामि । एवं प्रत्याख्यातः सोऽक्रूरमयाचत पार्ष्णिग्राहम् । सोऽप्युवाच । सखेऽहं तु राजद्रोहशब्दादेव बिभेमि । त्वमपि चिन्तय । यः सप्तहायनो बालक एकेन पाणिना गोवर्धनमुत्पाट्य लीलया दधार । तस्याग्रजश्च प्रलंबादीन् महाबलानसुरान्निजघान । कथय कस्सर्पकरण्डे मृत्यवे हस्तं क्षिपेत ?

नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ।
अनंतायादिभूताय कूटस्थायाऽऽत्मने नमः ॥

इत्थं तेनाऽपि निराकृतः शतधन्वा तयोः कुटिलतां स्वभाग्यं च निंदित्वा मणिं तत्रैव चिक्षेप । सोऽथ घोटकमारुह्य प्रस्थितः शतयोजनमयासीत् । अत्रान्तरे गरुडध्वजं रथं समारुह्य रामजनार्दनावपि तमन्वसरताम् । ततो मिथिलोपवनमवाप्य श्रान्तोऽश्वो यदाऽपतत् तदा संत्रस्तः स पद्भ्यामधावत् । कृष्णोऽपि रुषा तमनुससार । अथ पदातिर्भगवान् पदातेस्तस्य शिरश्चक्रेण छित्त्वा तद् वाससोर्मध्ये मणिं मृगयामास । सोऽथ

तत्र मणिमलब्ध्वाऽग्रजमुपेत्य च प्राह । आर्य ! वृथैव शतधनुर्हतः । तत् पार्श्वे तु मणिर्न विद्यते । तच्छ्रुत्वा बलदेव उवाच । भ्रातः ! कस्मिंश्चित् पुरुषे स मणिर्न्यस्त इति विज्ञाय तमन्वेष्टुं त्वं तु द्वारकां गच्छ । अहं परममित्रं विदेहं द्रष्टुं मिथिलां गच्छामीत्यभिधाय हलधरो जनकपुरीमगात् । प्रीतमानसो मैथिलस्तं दृष्ट्वा सहसोत्थाय नाना समर्हणैरर्हणीयं विधिवत् संपूजयामास । अथ बलरामः कतिचिन्मासांस्तत्रोषित्वा ततो हस्तिनापुरं जगाम । अथाऽवसरमवाप्य दुर्योधनोऽच्युताग्रजाद् गदायुद्धमशिक्षत् । अत्रान्तरे जनार्दनो द्वारकामेत्य शतधन्वनो निधनं मणेरप्राप्तिं च प्रियायै सत्यभामायै कथयामास । अथ कृतार्थो हरिः श्वशुरस्य परलोकहितकारिणीः क्रिया बंधुभिः कारयामास । ततोऽक्रूरकृतवर्माणौ शतधनोर्वधं श्रुत्वा भयमवाप्य परित्यज्य च द्वारकामन्यत्र पलायितौ । अत्रान्तरे द्वारावत्यां शारीरा मानसा दैविका भौतिकाश्च तापा लोकान् पीडयितुमारेभिरे । अथैकदा सभ्या उग्रसेनसभायां श्रीकृष्णसान्निधाविदमूचुः । द्वारकानाथ !

देवेऽवर्षति काशीशः श्वफल्कायागताय वै ।
स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत् सु काशिषु ॥

तत्सुतोऽक्रूरोऽपि तत्समप्रभावोऽस्ति । सोऽपि यत्र वसति तत्र देवोऽभिवर्षति । प्रजाकष्टदातॄण्यरिष्टान्यपि च न भवंति ।

तच्छ्रुत्वा वृद्धमतमवलंब्य हरिर्दूतैरक्रूरं समानाय्य प्राह । तात ! चिरादृदृष्टोऽसि । विदेशवार्तां तु कथय । ततः कथाप्रसंगे स्मयमानोऽब्रवीत् । दानपते ! शतधन्वना न्यस्तः स मणिस्त्वय्यास्ते खलु । सत्राजितोऽनपत्यत्वात् तद्दुहितुः सुता मातामहाय तिलोदकपिण्डान् समर्प्य ऋणमपाकृत्य चाऽवशेषितं दायं गृह्णीयुः । उक्तं च याज्ञवल्क्येन—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बंधुः शिष्यः स ब्रह्मचारिणः ॥ १ ॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥ २ ॥

मणिविषयेऽस्मिन् रामो न विश्वसिति । महाभाग ! कृपया दर्शयित्वा मणिं सर्वेषां चित्तसमाधानं कुरु । इमा रुक्मवेदयो निरन्तरा मखाश्च प्रतीतिकारकाः सन्ति । एवं सामभिरालब्धोऽक्रूरो वाससाच्छन्नं मणिं समादाय श्रीकृष्णाय समर्पयांबभूव । ततो जनार्दनो ज्ञातिभ्यः स्यमंतकं दर्शयित्वा तेन मिथ्याभिशापं प्रमृज्य च तं मणिमक्रूरायैव प्रत्यर्पयत् ।

य इदं मण्युपाख्यानमधीते वा शृणोति च ।
दुष्कीर्तितो विमुक्तः स यशस्वी जायतेऽत्र वै ॥

इति श्रीकृष्णचरिते हरिदुर्यशोपमार्जनं नामैकोनसप्ततितमः स्तवकः ॥ ६९ ॥

अथैकदा युयुधानादिभिर्वृतो यदुपतिः पाण्डवान् द्रष्टुमिन्द्रप्रस्थमगात् । ततः पार्था भगवन्तं वासुदेवमुपागतं दृष्ट्वा पुरस्कर्तुं युगपदुत्तस्थुः । अथ जनार्दनो युधिष्ठिरभीमयोः पादाभिवंदनं कृत्वा फाल्गुनं परिरभ्य नकुलसहदेवाभ्यां चाऽभिवंदितोऽभवत् । ततः सिंहासनासीनं पुरुषोत्तमं नवोढा व्रीडिता च द्रुपदतनया शनैरभ्युपेत्याऽभ्यनंदत् । एवं सात्यकिरपि पाण्डुसुतैः सत्कृतो नियतासने निषसाद । अत्रान्तरे पृथा समागत्य श्रीकृष्णं परिष्वज्य च बान्धवानां कुशलं पर्यपृच्छत् । ततो भगवताऽपि कृतकुशलप्रश्ना प्रेमवैक्लव्यरुद्धकंठा साश्रुलोचना च सा प्रत्यवदत् । महानुभाव ! तदैव नः कुशलमभूत् । यदा वयं त्वया सनाथाः कृताः । अथ धर्मनंदनोऽवदत् । हृषीकेश ! पुराऽस्माभिः किं सुकृतमाचरितम् ? यद्योगिनामपि दुर्दर्शो भवान् कुमेधसान्नो दृष्टिगोचरो जातः । इत्थं राज्ञाऽभ्यार्थितो हरिरिन्द्रप्रस्थौकसां नयनानंदं जनयन् वर्षोपलक्षितान् चतुरो मासांस्तत्र सुखमवात्सीत् । अथ कदाचिद्विजयः सशस्त्रः कपिध्वजं रथमारुह्य कृष्णेन साकं विहर्तुं विपिनमयासीत् । सोऽथ बहुव्यालमृगाकीर्णं वनं प्रविश्य शरैः व्याघ्रसूकरादीन् हिंस्रान् शशहरिणादीन् मेध्यांश्च पशून्निजघान । अत्रान्तरे क्षुत्तृड्भ्यां व्याकुलो वीभत्सुर्यमुनामगात् । तत्रोपस्पृश्य विशदं पानीयं पीत्वा च विशश्राम । ततो रवितनयाकूले स्थितौ कृष्णौ रुचिराननां विचरंतीं चारुदर्शनां च कन्यां ददर्शतुः ।

अथ सख्या प्रेषितोऽर्जुनः प्रमदोत्तमामपृच्छत् । सुश्रोणि ! का त्वम् ? कस्य सुता ? कुतोऽत्र समायाता ? किं चिकीर्षसि ? अहन्तु त्वां वरार्थिनीं मन्ये । यद्यगोप्यं रहस्यं तर्हि सर्वं समाचक्ष्व । तच्छ्रुत्वा साऽब्रवीत् । भद्रपुरुष ! अस्म्यहं सूर्यसुता । विष्णुं पतिमिच्छन्ती तपः समाचरामि । वीर ! श्रीनिवासं विहाय नाऽन्यं पतिं वृणे । भगवान् मुकुन्दो मे संतुष्यतु । कालिन्दीतिप्रसिद्धाऽहं पित्रादिष्टा यमुनाजलेऽच्युतदर्शनपर्यन्तं वसामि । एवमाकर्ण्य तद्वचनं फाल्गुनः परावृत्य कृष्णाय सर्वं वृत्तमावेदयामास । अथ विदितवृत्तान्तो हरिस्तां रथमारोप्य युधिष्ठिरान्तिकमाजगाम । ततो हरिरग्नये खाण्डवं वनं दातुं पार्थस्य सारथिर्बभूव । अस्मिन्नेवासरेऽतितुष्टोऽग्निदेवः पार्थाय गाण्डीवं धनुः श्वेताश्वं रथं अभेद्यं कवचं अक्षयौ तूणौ च प्रादात् । ततस्तत्र रक्षितो मयोऽर्जुनाय श्रीकृष्णाज्ञया दिव्यां सभां वितताार । यत्र दुर्योधनस्य दृशि जलस्थलभ्रमो बभूव । अथ यदुनाथो बंधुप्रियचिकीर्षया दग्धवनभूमौ विश्वकर्मणा परमाद्भुतं नगरं कारयामास । ततो राज्ञा समनुज्ञातः सुहृद्भिश्चानुमोदितः स सात्यकिर्द्वारावतीं पुनरेत्य केशवः सुपुण्ये नक्षत्रे स्वजनानामानन्दं विस्तारयन् श्रीमतीं कालिन्दीमुपयेमे । तस्याः श्रीभगवत्यनुपमोऽनुरागो बभूव ।

इति श्रीकृष्णचरिते कालिन्दीलाभनिरूपणं
नाम सप्ततितमः स्तवकः ॥ ७० ॥

अवंतिकायां विन्दानुविन्दाभिधौ राजानौ बभूवतुः ।
स्वयंवरे तौ श्रीकृष्णसक्तां भगिनीं न्यषेधताम् ॥

राजसुता सर्वथा दुर्योधनं वरीतुं नैच्छन् । ततो हरिः पश्यतां भूभुजां राजाधिदेव्यास्तनयां मित्रविन्दां प्रसह्य जहार । शुभेऽहनि च द्वारावत्यां तां पर्यणयत् । मित्रविन्दायाः शीलं सर्वा एव वनिताः प्रशशंसुः ।

आसीत्कौसलेषु नग्नजिन्नाम राजा । तस्य परमरूपवती गुणवती च सत्याऽभिधाना कन्या बभूव । सोऽथ एवं प्रतिज्ञातवान् : यः सप्तवृषभान् सहसा गृहीत्वा नासारज्जुबंधनद्वारा तान् वशवर्तिनः कुर्यात्स एव मे पुत्रीं वीर्यशुल्कां नग्नजितीं समुद्वोढुं शक्नुयात् ? एवमाकर्ण्य भूपप्रतिज्ञां विवाहेच्छयाऽनेके पार्थिवाः समागच्छन् । परं नैकोऽपि तेषु सफलोद्यमोऽभवत् । अत्रान्तरे स पार्था यदुपतिरपि तत्राऽऽजगाम । अयोध्याधिपतिः समवलोक्य समित्रं भगवन्तं सहसोत्थाय प्रणामादिभिस्तौ संपूज्य च दिव्यासनयोः प्रतिष्ठापयामास । अथ हरिर्विदित्वा भूपाऽभिप्रायं बद्धपरिकरो बभूव । सोऽथ सप्तधाऽऽत्मानं कृत्वा लीलयैव तान् न्यगृह्णात् । ततः शौरिर्दामबद्धांस्तान् विद्धनासिकानकरोत् । अथाऽतिविस्मितो राजा श्रीकृष्णाय कन्यारत्नमदात् । राजपत्न्योऽपि दुहितुः प्रियं पतिं लब्ध्वा परमानंदं लेभिरे । ततो राजाऽसंख्यातं धनं धेनुवृन्दं दासीदासगणं च यौतुके वराय प्रादात् ।

अथ स्नेहप्रक्लिन्नहृदयो राजा महत्या सेनया वृतौ दंपतीरथमारोप्य सुदूरं प्रापयामास । अत्रान्तरे दुराग्रहग्रस्ताः केचिद्भूपाः सत्यां नयन्तं श्रीकृष्णं मार्गे रुरुधुः । मित्रप्रियकृदर्जुनो गाण्डीवटंकारमात्रेणैव तान् पलायितानकरोत् । ततो वासुदेवः सत्यया सहितो द्वारकामेत्य रेमे । अथ हरिः—

सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥

इति श्रीकृष्णचरिते सत्यालक्ष्मणयोर्विवाहनिरूपणं नामैकसप्ततितमः स्तवकः ॥ ७१ ॥

आसीत् प्राग्ज्योतिषपुराधीशो भौमासुरो नाम दैत्यराजः । सोऽसुरो विधाय पुररक्षां महेन्द्राच्चामरं वरुणाच्छत्रं देवमातृसकाशाच्च कुण्डले जग्राह । अथैकदा सुमेरौ भगवता नाऽहं त्वत् संमतिव्यतिरेकेण त्वत्पुत्रं भौमं हनिष्यामीति भूम्यै वरो दत्तः । सत्यभामाऽप्यासीद्भूमिसुता । अतो भगवान् तया सहित एव गरुडमारुह्य देवद्रोहिणं तं जेतुं तस्य राजधानीमगात् । ततो गदाधरो गदया तत्प्राकारं भित्त्वा पांचजन्यं शंखं दध्मौ । तच्छब्दं श्रुत्वा मुरस्त्रिशूलमुद्यम्य हरिं हन्तुमभ्यधावत् । एवमालोक्य हरिः शरेण तत् त्रिशूलं खण्डयित्वा चक्रेण तच्छिरोऽपि चकर्त । ततः पितृवधातुरास्तस्यात्मजाः प्रतिक्रियां कर्तुं सहसोपस्थिता

बभूवुः । अथ ते यानि शरशक्त्यृष्टिशूलानि प्राक्षिपन् अमोघवीर्यः शौरिः स्वमार्गणैस्तानि तिलशः कृत्वा धरातले न्यपातयत्। ततो भौमो रणाङ्गणे निजसैनिकान् अच्युतचक्रसायकैः छिन्नाङ्गान् निशम्य गजारूढः सपद्याजगाम । सोऽथ बाणवृष्ट्या स सुपर्णं शौरिम् समाच्छादयामास। एतदालोक्य चकितो यदुपतिः तीक्ष्णसायकैः शरावलिन्तामच्छिनत् । अत्रान्तरे वैनतेयोऽपि पक्षाभ्यां तुण्डनखाद्याघातैश्च बहून् सैनिकान् यमराजधानीगमनोन्मुखानकरोत् । ततः क्रुद्धो भौमो गरुडं शक्त्या प्राहरत् । हरिप्रभावाद्विद्धोऽपि तार्क्ष्यो मालाहतो द्विप इव नाऽकंपत । अथ विफलप्रयासोऽसुरो यदुपतिं हन्तुं यावच्छूलमादत्ते ततः प्रागेव शौरिर्गजस्थस्य तस्य शिरश्चक्रेण चकर्त । अथ स किरीटं सकुंडलं च तन्मुखं भूमिपतितं विलोक्य महर्षयः साधुसाध्विति जगदुः। देवाः कुसुमैर्मुकुन्दं समाच्छादयामासुः । ततः प्रांजलिर्भूमिर्देवदेवमस्तौषीत् ।

नमः पंकजनाभाय नमः पंकजमालिने ।
नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥

ततो वसुंधरा श्रीकृष्णाय छत्रचामरकुंडलवैजयंतीश्च समर्प्य प्राह । देव ! इमं भगदत्तं तत्पुत्रं शरणागतं मत्वाऽस्य मस्तके कल्मषापहं करकमलं निधेहि । एतदुपाकर्ण्य पृथ्वीप्रार्थनां

तस्मैदत्त्वाऽभयं सकलर्द्धिमत् तद्गृहं प्रविवेशाऽच्युतः । सोऽथ तत्र विक्रमेण राजभ्यो हृतानां राजकन्यानां षट्सहस्राधिकायुतं ददर्श । ततस्ताः प्रविष्टं नरवीरं तं विलोक्य मनसैव ववंदिरे ।

भूयात्पतिरयं मह्यं धाता तदनुमोदताम् ।
इति सर्वाः पृथकृकृष्णे भावेन हृदयं दधुः ॥

ततः केशवस्ताः सुमृष्टविरजोंबरा ललना द्वारावतीं शिविकाभिः प्राहिणोत् । तथा रत्नादिपूर्णान् महाकोशानपि प्रेषयामास । किं बहुना । तं धनराशिं वीक्ष्य कुवेरोऽपि चकितो बभूव । अथ हरिः सुरेन्द्रभवनं गत्वाऽदित्यै कुण्डले देवराजाय चामरे वरुणाय च छत्रं समर्पयामास । ततः पत्नीप्रार्थनया पारिजातं समुत्पाट्य तं गरुत्मति समारोप्य च स्वपुरमानिनाय । ततस्तं सत्यभामोद्याने प्रतिष्ठाप्य द्वारावतीं सर्वसुखप्रदामकरोत् ।

अथो मुहूर्त एकस्मिन् नानागारेषु ताः स्त्रियः ।
यथोपयेमे भगवांस्तावद्रूपधरोऽव्ययः ॥

इत्थं ता रमण्यो रमापतिं पतिं समवाप्य परमानंदमन्वभूवन् ।

इति श्रीकृष्णचरिते भौमेनाहृतकन्याविवाहनिरूपणं
नाम द्विसप्ततितमः स्तवकः ॥ ७२ ॥

अथैकदा देवकी रामकृष्णाभ्यां गुरुपुत्रानयनरूपं चमत्कारं लोकात् श्रुत्वाऽतिविस्मिता बभूव। साऽथ तान् स्मरंती गद्गद्-गिराऽवदत्। वत्सौ! यथा महामुनिना सांदीपिना प्रेरितौ युवां मृतपुत्रं यमसदनात्समानीय गुरुदक्षिणां दत्तवंतौ तथा मह्यमपि भोजराजहतान् पुत्रान् प्रयच्छतममिति कामये। एवमाकर्ण्य मातृवचनं यदुपुंगवौ बाढमित्युक्त्वा योगमायामाश्रित्य च सत्वरं सुतलं संविविशतुः। दैत्यराजो बलिस्तावुपलभ्य सहसोत्थाय प्रणम्य च विधिवत् पूजयामास। सोऽथ सुखासीनौ तौ तत्रागमनकारणमप्राक्षीत्। तच्छ्रुत्वा हरिरुवाच। धर्मज्ञ! स्वायंभुवे मन्वंतरे मरीचेः कलायां ये षट्पुत्रा देवकल्पा अभूवन्। ते ब्रह्मशापादासुरीं योनिमवापुः। ततस्ते देवक्यां जाताः कंसेन च हताः। माता तानवलोकयितुमभिलषति। स्मरादय इमे मत्प्रसादेन पुनः सद्गतिं यास्यंतीति भगवद्वचनं समाकर्ण्येन्द्रसेनोऽतितरां तुतोष। ततस्तौ पुत्रान् समानीयमात्रे समर्पयामासतुः। अथ माता तानालोक्य सद्यः स्नेहस्नुतस्तनी बभूव। साऽथ तान् क्रमशः परिष्वज्य स्वांकमारोप्य च मूर्ध्नि जघ्रौ। ततो विष्णुमायाविमोहिता जननी ताँस्स्तन्यमपाययत्। अथ ते गदाभृतः पीतशेषं मातृपयः पीत्वाऽऽत्मदर्शना अभूवन्।

तेऽथ मातापितरौ प्रणम्य वासुदेवौ च नमस्कृत्य सर्वभूतानां पश्यतां दिवौकसां धाम ययुः ।

इति श्रीकृष्णचरिते देवकीमृतपुत्रागमननिरूपणं नाम त्रिसप्ततितमः स्तवकः ॥ ७३ ॥

अथैकदा वनवाससमये मत्स्यवेधं कृत्वार्जुनो वीर्यशुल्कां द्रुपदसुतां पर्यणयत् । सोऽथ तीर्थयात्रां कुर्वन्नकस्मान् मणिपुरमवाप । तत्र चित्राङ्गदां परिणिनाय । ततः पार्थः प्रभासक्षेत्रमगात् । अथैकदा हरिस्तमभ्येत्य परां प्रीतिमवाप । अथ रैवतकं दृष्ट्वा सखायौ द्वारावतीं जग्मतुः । अथ यतिवेषेण शोभितः पृथासूनुर्बलदेवादिभिः संपूजितोऽभवत् । अथ कदाचित् पर्वणि रैवतकं विलोकयितुं सपत्नीका वृष्णयो ययुः । तत्र राजमण्डले स्रग्वीकौंतेयो सुभगरूपेण मन्मथ इव रराज । अत्रान्तरे शचीसमा सुभद्राऽपि छविगणमध्ये महाछविरिव शुशुभे । ततोऽर्जुनः सुधागर्भसमुद्भवां शीतांशुदेवतामिव तां विलोक्य पुष्पायुधशरासारलक्ष्यतामयासीत् । अथ विजयः श्रीकृष्णसंकेतमवाप्य सहसा तामपाऽहरत् । ततो योद्धुमुद्यतेषु यादवेषु हरिः सस्मितमिदमाह । बान्धवाः! कन्याधनं तु परकीयमेव । अवश्यमेव गुणाढ्याय यस्मै कस्मैचित् क्षत्रियाय दास्यथ एव । कथयंतु भवंतः ? दिनेष्वेतेषु भरतखण्डे पार्थतुल्यः को गुणनिधिः ?

तच्छ्रुत्वा बलभद्रपुरस्सराः सर्वे परित्यज्य युद्धोद्यमं प्रसन्नानना बभूवुः । ततो बांधवा विपुलां धनराशिं यौतुके प्रायच्छन् ।

सगर्भा कृष्णभगिनी कथां शुश्राव पावनीम् ।
देवचित्राणि चाऽऽपश्यदतो वीरप्रसूरभूत् ॥

पार्थकल्पो वीरवरोऽभिमन्युः वीरपत्नीसुतो वीरपत्नीपतिश्च बभूव।

इति श्रीकृष्णचरिते सुभद्राहरणनिरूपणं नाम
चतुःसप्ततितमः स्तवकः ॥ ७४ ॥

अथ ताः कृष्णपत्न्य एकैकशो दश दश गुणाढ्यान पुत्रानजीजनन् ।

चार्वब्जकोशवदनायतबाहु-
नेत्रसप्रेमहासरवीक्षितवल्गुजल्पैः ।
संमोहिता भगवतो न मनो विजेतुं
स्वैर्विभ्रमैः समशकरन् वनिता विभूम्नः ॥

तस्य तासु अष्टौ महिष्य आसन् । तत्रादौ रुक्मिण्यां ये पुत्रा बभूवुः । तेषु प्रद्युम्नोऽग्रजोऽभवत् । सत्यभामासुतेषु भानुः प्रथम आसीत् । जाम्बवतीतनयेषु साम्बो ज्येष्ठो बभूव । वीरादयो नाग्नजितेः पुत्रा जाताः । श्रुताद्याः कालिन्दीतनूजा आसन् । प्रघोषप्रभृतयो लक्ष्मणासूनवोऽभूवन् । मित्रविन्दा वृकपुरोगान् सुतानजीजनन् । संग्रामजिदादयो भद्रापुत्रा बभूवुः । एवमन्यासामपि षोडशसहस्रपत्नीनां प्रत्येकं दश-दश पुत्रा जाताः । कृतवर्मसुतो रुक्मिणीतनयां चारुमतीमुपयेमे ।

अत्रान्तरे भोजकटेपुरे निवसतो रुक्मिणः पुत्र्यां रुक्मवत्यां प्रद्युम्नात् महाबलोऽनिरुद्धः सुतः प्रादुर्बभूव । ततो रुक्मी स्वसुः प्रियचिकीर्षया श्रीकृष्णपौत्रायाऽपि रोचनाख्यां स्वपौत्रीं प्रादात् । तस्मिन्नभ्युदये रुक्मिणी रामकृष्णौ साम्बप्रद्युम्नादयश्चाऽपि भोजकटं पुरं जग्मुः । अथ समाप्ते विवाहकृत्ये कालिंगप्रमुखा भूपा रुक्मिणं प्रोचुः । राजन् ! अनक्षज्ञोऽपि बलभद्रो द्यूतव्यसनी वर्तते । तच्छ्रुत्वाऽदूरदर्शी बलमाहूय तेन साकं पाशैरदीव्यत् । ततस्तत्र रामः पूर्वं शतं ततः सहस्रं ततोऽयुतं च पणमादधे । रुक्मी तत्राऽजयत् । एतदालोक्य कालिंगोऽट्टहासमकरोत् । ततो रुक्मी लक्षं ग्लहं स्थापितवान् । तत्र बलोऽजयत् । अथ कैतवमवलंब्य रुक्मी जितवानहमित्युक्त्वा तत्सर्वं वित्तं जग्राह । इत्थमनृतवदनं श्रुत्वाऽतिक्रुद्धोऽपि रेवतीपतिः कोटिसंख्यामितं धनं ग्लहमादधे । अवसरेऽप्यस्मिन् अक्षपतनानुसारेण रामो जितवान् । महाछली रुक्मी मया जितमित्याह । तच्छ्रुत्वा पक्षपातग्रस्ताः पार्ष्णिकाः सत्यमेतत्सत्यमेतदित्याहुः । अत्रान्तरेऽब्रवीदाकाशभारती । भो भोः सभ्याः ! अक्षपतनरीत्या तु बलेनैव ग्लहो जितः किन्तु कपटपटू रुक्मी सत्यं न वदति । ततो दुष्टैः प्रचोदितो विस्मृत्य च जीवनदानं रुक्मी बभाषे ।

नैवाक्षकोविदा यूयं गोपाला वनगोचराः ।
अक्षैर्दीव्यंति राजानो बाणैश्च न भवादृशाः ॥

एवं सभायां रुक्मिणाऽधिक्षिप्तो भूपैश्चोपहासितो बलभद्रः कोपं कृत्वा परिघमुद्यम्य च तं जघान । ततो धावन्तं कलिंगराजं दशमे पदे गृहीत्वा तस्य दंतान् मुष्टिप्रहारेण पातयामास । एवमालोक्याऽन्ये दर्शका राजानः सहसा दुद्रुवुः । तत्र रुक्मिणी बलभद्रयोः स्नेहभंगभयाद्धरिः साध्वसाधु वा किमपि नाऽब्रवीत् । ततो दाशार्हाः नवोढया चारुमत्या सह वरं दिव्यरथं समारोप्य भोजकटात् कुशस्थलीं समाययुः । ततो बरवध्वोर्मंगलाय पौरा महोत्सवं चक्रुः ।

इति श्रीकृष्णचरितेऽनिरुद्धाविवाहनिरूपणं नाम
पंचसप्ततितमः स्तवकः ॥ ७५ ॥

आसीच्छोणितपुरे बलिसुतो बाणो नाम भूपतिः । सोऽसुरो वदान्यो विद्वान् शिवभक्तिरतश्च बभूव । शंभुप्रसादेन तस्य देवा अपि किंकरा इव बभूवुः । अथैकदा स ताण्डवे वाद्येन मृडमतोषयत् । ततो वरं ब्रूहीति हरेणोक्ते दोः सहस्रं स ययाचे । अथ तथाऽस्त्विति भवोऽवदत् । तच्छ्रुत्वा रविप्रभेण किरीटेन तत्पदाम्बुजं स्पृष्ट्वाऽस्तौषीत् । उमापते !

नमस्ये त्वां महादेव लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामरांध्रिपम् ॥

देवाधिदेव ! भुजकण्डूतिर्मां बाधतेऽतो युद्धाभित्तां देहि । निशम्यैतद्वचनं कुपितः शर्वोऽब्रवीत् । मूढ ! मत्समेन ते त्वद्-दर्पघ्नं संयुगमचिराद्भविष्यति । एवमाकर्ण्य पशुपतिवचनं हृष्टोऽसुरो गृहं प्रविवेश । बाणस्य दुहिता उषाभिधाना परमसुन्दरी कन्या बभूव । सैकदा स्वप्ने कांतेन प्राद्युम्निना सह रतिसुख-मलभत । साऽथ तल्पं त्यक्त्वा क्वाऽसि कान्तेतिवादिनी सखीनां मध्ये सहसा समुत्तस्थौ । एतदालोक्य चकिता बाणमंत्रिसुता चित्रालेखा प्रोवाच । सखि ! भ्रांताऽसि । क्वाऽत्र सुरक्षितेऽन्तः-पुरे पुरुषसंभवः ? तच्छ्रुत्वोषा प्रत्यवदत् । आलि ! निशांतेऽत्र मया श्यामः कमललोचनः पीतवासा योषितां हृदयंगमश्च पुरुषो दृष्टः । सोऽथ पाययित्वाऽधरामृतं क्वाऽपि यातः । तमहं मृगयामि । अस्मिन् वृजिनार्णवे निमग्नां मां समुद्धर । एवमा-कर्ण्योषा वचनं चित्रलेखोवाच । वयस्ये ! चिन्तां त्यज । यदि ते मनोहर्ता त्रिलोक्यां क्वाऽप्यस्ति तदा तु तमवश्यमेव समा-नेष्ये । साऽथ देवयक्षसिद्धगंधर्वचारणपन्नगविद्याधरादीन् लिखित्वा मनुष्यांश्च लिलेख ।

मनुजेषु च सा वृष्णीन् शूरमानकदुंदुभिम् ।
व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥

ततः कुंभाण्डसुताऽनिरुद्धमलिखत् । तं वीक्ष्य बाणसुता ह्रियाऽवनतमुखी बभूव । अथ योगिनी चित्रलेखा तं कृष्णपौत्रं

विज्ञाय सहसा विहायसा द्वारावतीं ययौ। साऽथ तत्र पर्यंके सुखसुप्तं प्राद्युम्निं ददर्श। ततो योगमाश्रित्य तं गृहीत्वा शोणितपुरमानीय च सख्यै प्रियतमं दर्शयामास। अथ परितुष्टा बाणसुता दुष्प्रेक्ष्ये स्वगृहे तेन कान्तेन सह रेमे। प्रवृद्धस्नेहया तया सम्यक् सेवितः सोऽनिरुद्धो गच्छतोऽहर्गणान् न बुबुधे। अथैकदा रक्षापुरुषाः यदुवीरेण भुज्यमानां हतव्रतां च तां हेतुभिर्लक्षयित्वा नृपाय तद्वृत्तमावेदयामासुः। तच्छ्रुत्वा कुपितो बाणः सत्वरं कन्यकागारमागत्य तत्र प्रियया सहाक्षैः क्रीडन्तं यदूद्वहमदर्शत्। ततो राजाज्ञया भटास्तं बद्धुमारेभिरे। एतदालोक्य यादवः परिघमुद्यम्य च तानाततायिनो जघान। ततः प्रहार-पीडिताः सेवका भवनान्निर्गत्य पलायिताः। अथ कुपितो बलिनंदनो यथाकथंचित् नागपाशैस्तं बबंध। एवमालोक्य शोकविषादवि-ह्वलोषा भृशं रुरोद। किं बहुना। चित्रलेखया प्रबोधिताऽपि सा धैर्यं न दधे।

इति श्रीकृष्णचरिते उषानिरुद्धरमणनिरूपणं नाम
षट्सप्ततितमः स्तवकः॥ ७६ ॥

अत्रान्तरे प्रासादात् सपर्यंकं हृतमनिरुद्धं निशम्य सर्वे यादवाश्चिन्ताग्रस्ता बभूवुः। किं बहुना। तमनुशोचतां तेषां चत्वारो वार्षिका मासा व्यतीयुः। अथैकदा देवर्षिर्नारदस्तत्राऽऽ-

जगाम। तन्मुखात् सर्वां वार्तां श्रुत्वा ससैन्याः प्रद्युम्नादयो यादवा योद्धुं शोणितपुरं ययुः। ततः सांबगदनंदसारणोपनंदा द्वादशभिरक्षौहिणीभिः समंताद्बाणराजधानीं रुरुधुः। अथ प्राकाराऽट्टालगोपुरं नगरं भज्यमानमालोक्य सरोषः ससैन्यश्च बाणो नगराद्बहिराजगाम। ततो भक्तरक्षार्थं ससुतः सप्रमथश्च साक्षात्सदाशिवोऽपि नंदिवृषभमारुह्य तत्र समाययौ। अथ कृष्ण-शंकरयोः गुहप्रद्युम्नयोः सात्यकिबाणयोः कुंभाण्डबलभद्रयोः सांबबाणपुत्रयोश्च रोमहर्षणं युद्धमभूत्। ब्रह्मादयो देवाः देवयोनयश्च विमानैस्तुमुलं द्रष्टुं समागच्छन्। तत्र शौरिः पिशाचवेतालकूष्माण्डविनायकब्रह्मराक्षसादीन् शार्ङ्गधनुश्च्युतैः सायकैः द्रावयामास। एतदालोक्य पिनाक्यपि शार्ङ्गिणे नानाविधान्यस्त्राणि प्रायुंक्त। अथ चक्रपाणिरपि वायव्याग्नेयपार्वतपार्जन्य-ब्रह्मास्त्रादिभिः शिवं चमत्कृत्याऽन्ते जृंभणाऽस्त्रेण संमोहयामास। ततो बाणपृतनां वासुदेवो गदासिसायकैर्जघान। स्कन्दः प्रद्युम्न-बाणैरर्घमानो रुधिरक्लिन्नगात्रो बभूव। हलायुधमुसलार्दितौ कुंभाण्डकूपकर्णौ धरण्यां पेततुः। ततो हतानीका बाणसेनाऽ-स्तव्यस्ता बभूव। एतदालोक्य परित्यज्य च सात्यकिं बाणः श्रीकृष्णमभ्यद्रवत्। सोऽथ बाणवृष्ट्या भगवंतं सहसा समाच्छा-दयत्। अथ शौरिः सायकैस्तच्छरपंजरं छित्त्वाऽसुरस्य रथाश्व-सारथींश्चाऽपि जघान। अत्रान्तरे तन्माता कोटरा पुत्रप्राणरि-

त्वया नग्नैव कृष्णस्याग्रेऽवतस्थे । हरिः सहसा तिर्यङ्मुखो बभूव । अत्रान्तरे छिन्नधन्वा बाणः सहसा पुरं प्रविवेश । अथ प्रबुद्धस्य पिनाकिन-आदेशात् त्रिशिरास्त्रिपाच्च ज्वरो यदुपतिमभ्यधावत् । एतदालोक्य हरिर्वैष्णवं ज्वरं व्यसृजत् । ततस्तयोर्युद्धं भवितुमारब्धम् । ततो वैष्णवेन ज्वरेणार्दितो माहेश्वरो ज्वरः समाक्रंदत् । सोऽथ श्रीकृष्णं तुष्टाव । देव !

कालो दैवं कर्मजीवःस्वभावो द्रव्यं क्षेत्रं प्राण-आत्मा विकारः ।
तत्संघातो वीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥

शरण्य ! त्वत्तेजसाऽहं तप्तोऽस्मि । कृपया मां रक्ष । तच्छ्रुत्वा हरिरुवाच । त्रिशिरः ! प्रसन्नोऽस्मि । संप्रति मज्ज्वरात्तेभयं व्यपैतु । किं बहूक्त्या । य आवयोः संवादं श्रोष्यति तस्य ज्वरजनिता बाधा न भविष्यति । ततः प्रणम्य हरिं ज्वरो जगाम । अथ बाणस्तुरगमारुह्य पुनर्योद्धुं श्रीकृष्णं प्रत्याजगाम । सोऽथ यथा यथा बाणांश्चिक्षेप हरिस्तथा तथा तांश्चक्रेण चिच्छेद । ततो यदुपतिः वनस्पतेः शाखा इव चक्रेण तस्य बाहूनकृंतत् । एवमालोक्य पशुपतिर्यदुपतिमुवाच—

देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥

देव ! बाणोऽयं मम दयितोऽस्ति । अतो मयाऽस्मै दत्तमभयदानम् । यथापूर्वं भवताऽभयं प्रह्लादाय दत्तं तथाऽधुनास्मै प्रसादः प्रदीयताम् । एवमाकर्ण्य हरिवचनं हरिस्तथाऽस्त्विति व्याजहार । ततस्तुष्टो बाणो हरिहरसन्निधावेव बध्वा सह प्राद्युम्नि रथमारोप्य प्रस्थापयामास । अथ कृतकृत्याः श्रीरामकृष्णसमेता यादवा ध्वजादिभिः समलंकृतां द्वारकां जयध्वनिं कुर्वन्तः प्राविशन् ।

इति श्रीकृष्णचरिते उषाऽनिरुद्धानिरूपणं नाम सप्तसप्तितमः स्तवकः ।। ७७ ।।

अथ कदाचित् सांबादयो यदुकुमारका विहर्तुं वनमगमन् । ततस्तत्र क्रीडित्वा पिपासिता जलं विन्वंतः क्वचिन्निरुदके कूपेऽत्यद्भुतं कृकलासं ददृशुः । अथ विस्मयाविष्टास्ते तस्योपरि दयां कृत्वा चर्मजैस्तांतवैश्च पाशैस्तं समुद्धर्तुं कृतप्रयत्ना अपि सफलतां न प्रापुः । अन्ततो गत्वा ते श्रीकृष्णचन्द्राय तद्वृत्तमाचख्युः । करुणासिन्धुर्यदुपतिः तत्र गत्वा तं वीक्ष्य च वामेनैव करेण कूपाद्बहिर्निष्कासितवान् । किं बहुना । भगवत्करस्पर्शादेव स विहाय कृकलासतां संतप्तचामीकरचारुवर्णो बभूव । अथ मुकुन्दो विद्वानपि जनेषु तन्निदानं विज्ञापयितुमपृच्छत् । महानुभाव ! कस्त्वम् ? कतमेन कर्मणा दशामिमां प्राप्तवानसि ? तच्छ्रुत्वा

प्रणतिपुरस्सरं सोऽब्रवीत्। यदुपुंगव ! अहमिक्ष्वाकुदायादो नृगनामको महीपालोऽस्मि । दानिगणनायां कदाचित् ते कर्णमहं स्पृष्टवान् ? मम विषये लोका एवं व्याहरंति ।

यावंत्यः सिकता भूमेर्यावंत्यो दिवि तारकाः ।
यावंत्यो वर्षधाराश्च तावतीर्गा अदान्नृगः ॥

अथैकदा प्रतिग्रहरहितस्य कस्यचिद् द्विजस्य बंधनाद्विमुक्ता गौः मम गोधने मिलिताऽभवत् । साचाऽजानता मयाऽन्यस्मै ब्राह्मणाय दत्ता । ततस्तां नीयमानां विलोक्य प्रथमः स्वामी प्रोवाच । गौरेषा मदीया । कुतस्त्वया समासादिता ? तच्छ्रुत्वा सोऽब्रवीत् । अधुनैव राजा मह्यं दत्तवान् । अथ विवदमानौ तौ मामुपागच्छताम् । अथ तयोः प्रथमोऽवदत् । राजन्नेषा मदीयाऽस्ति । यतस्त्वयाऽधुनैव मह्यं दत्ता । एतदुपाकर्ण्य द्वितीयोऽवदत् । देव ! अद्य प्रातरेव कृताग्निहोत्रोऽहमस्या दुग्धमपिबम् । अथ धर्मकृच्छ्रगतेन मयाऽनुनीतौ । विप्र ! निष्कृतिं नीत्वा गां विसृज । तच्छ्रुत्वा सोऽब्रवीत् । राजन् ! नाऽहं निष्कृतिं नीत्वा गोविक्रयं करोमि । अथ तस्य निश्चयं ज्ञात्वा मयाऽपरः पृष्टो प्राह नरपाल ! अहमपि त्वया प्रतिश्रुतं ततोऽधिकं वित्तं गोविक्रयोपमं मत्वा न ग्रहीष्ये । अत्र श्लोकौ—

गवां लक्षं प्रकृष्टानां दास्यामेषा प्रदीयताम् ।
भवंतावनुगृह्णीतां किंकरस्याऽविजानतः ।

नाऽहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् ।
नाऽन्यद् गवामप्ययुतमिच्छामीत्यपरो ययौ ॥

एतस्मिन्नेवान्तरे याम्यैर्दूतैरहं यमक्षयं नीतः । अथ मां दृष्ट्वा यमोऽपृच्छत् । राजन् ! पूर्वं त्वं पापफलं दुःखं भोक्ष्यसे उत पुण्यफलं सुखम् ? तच्छ्रुत्वाऽहं प्रत्यवदम्—

पूर्वं देवाऽशुभं भुंज इति प्राह पतेति सः ।
तावदद्राक्षमात्मानं कृकलासं पतन् प्रभो ॥

कृपानिधान ! भवत्प्रसादादद्यापि मे स्मृतिर्न विध्वस्ता ।

देव ! देव ! जगन्नाथ ! गोविन्द ! पुरुषोत्तम !
नारायण ! हृषीकेश ! पुण्यश्लोकाऽच्युताऽव्यय !

संप्रति देवगतिं यान्तं मामनुजानीहि । मे चेतः सदा त्वत्पदास्पदं भूयादित्यभिधाय प्रणम्य परिक्रम्य विमानमारुह्य च पश्यतां जनानां देवलोकमगात् । अथ भगवान् वासुदेवः शिक्षार्थं परिजनं प्राह—

नाऽहं हलाहलं मन्ये विषं यस्य प्रतिक्रिया ।
ब्रह्मस्वं हि विषं प्रोक्तं नाऽस्य प्रतिविधिर्भुवि ॥ १ ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ २ ॥

एवमुपदिश्य जनार्दनः स बालकगणो निजमंदिरं प्रविवेश ।

इति श्रीकृष्णचरिते वदान्यनृगमोक्षनिरूपणं नाम अष्टसप्ततितमः स्तवकः ॥ ७८ ॥

अथैकदा भगवान् बलभद्रो रथमास्थाय नंदगोकुलं ययौ । स तत्र चिरोत्कण्ठैर्गोपैर्गोपीभिश्च परिष्वक्तो यशोदानंदौ प्रणम्य ताभ्यां च अभिनंदितोऽभवत् । ततो दाशार्ह ! सकृष्णस्त्वं चिरं नः पाहीत्युक्त्वा तमंकमारोप्य चानंदाश्रुभिः सिषिचतुः । सोऽथ गोपवृद्धानभिवंद्य समकक्षैश्च सत्कृतोऽभवत् । अथ सुखासीनं पर्युपागता गोपाः प्रेम्णा यादवानामनामयं पप्रच्छुः । ततो हसंत्यो गोप्योऽपि राममुपसृत्याऽपृच्छन् । राम ! पुरस्त्रीजनवल्लभः कृष्णः सुखमास्ते कच्चित् ? महाभागः स पितरं मातरं बंधून्वा कच्चित् स्मरति ? अप्यसौ जननीं विलोकयितुं सकृदपि समेष्यत्यत्र । अपि वा व्रजराजोऽस्माकमनुसेवां स्मरति ? वयं तु यदर्थं दुस्त्यजान् स्वांस्त्यक्तवत्यः । एवमभिधाय शौरेर्जल्पवीक्षणप्रहसितादीनि स्मृत्वा स्त्रियो रुरुदुः । एतदालोक्याऽनुनयकोविदोऽच्युताग्रजो हृदयंगमैः श्रीकृष्णसंदेशैस्ताः सांत्वयामास । ततो बलदेवो रात्रिषु गोपीनां प्रीतिमावहन् चैत्रवैशाखौ तत्राऽवात्सीत् । अथ कदाचित् गोपीगणैर्वृतो यदा संकर्षणो रेमे तदा वृक्षकोटराद्वरुणप्रेरिता वारुणी निःसृत्य स्वगंधेन सर्वं तद्वनं सुगंधीचकार ।

ततो हलायुधो जलक्रीडार्थं यमुनां स्थले समाजुहाव । यदा सा नाऽऽयात् तदा कुपितः सन् हलाग्रेण तां विचकर्ष । अथ सा तुष्टाव ।

राम ! राम ! महाबाहो! न जाने तव विक्रमम् ।
यस्यैकांशेन विधृता जगती जगतःपते ॥

भगवन् ! प्रपन्नां मां मोक्तुमर्हसि । तच्छ्रुत्वा कृपाकुलः संकर्षण-स्तामम‍ुंचत् । सोऽथ ताभिर्वनिताभिः सह जलं विजगाह । ततो—

वरुणप्रहिता चाऽस्मै मालामम्लानपंकजाम् ।
समुद्राभे ददौ वस्त्रे नीले लक्ष्मीरथेच्छुते ॥

ततो निशांते गोप्यः स्वस्वगेहान् ययुः । संकर्षणोऽपि च स्वसद-नमाजगाम ।

अद्याऽपि दृश्यते राजन्यमुनाऽऽकृष्टवर्त्मना ।
बलस्याऽनंतवीर्यस्य वीर्यं सूचयतीव हि ॥

इति श्रीकृष्णचरिते बलदेवयमुनाकर्षणं नाम
एकोनाऽशीतितमः स्तवकः ॥ ७९ ॥

अत्रान्तरेऽज्ञः करुषाधिपतिः वासुदेवोऽहमस्मीति कथयित्वा श्रीकृष्णाय दूतं प्राहिणोत् । सोऽथ द्वारकामेत्य सभास्थितं कमलपत्राक्षं कृष्णं राजसंदेशमगादीत् ।

वासुदेवोऽवतीर्णोऽहमेक एव नचाऽपरः ।
भूतानामनुकंपार्थं त्वं तु मिथ्याऽभिधां त्यज ॥

अपरं च । त्वं मौढ्यात् यानि चिह्नानि बिभर्षि । तानि त्यक्त्वा मां शरणमेहि । नोचेन्मह्यं युद्धं देहि । एवमाकर्ण्य पौण्ड्रक-संदेशं सभ्या उग्रसेनप्रभृतयो उच्चकैरहसिषुः ।

अथ हरिर्दूतं प्रत्यवदत् । मूढ ! त्वं यैः कृत्रिमैश्चिह्नैर्विकत्थसे । तानि त्वया धृतानि त्याजयिष्यामि । किं बहुना । रणभूमौ मया हतस्त्वं कंकादिभिर्वृतः शुनां शरणं भविष्यसि । निशम्यैतद्वचनं भगवतो राजदूतस्तदाक्षेपप्रत्युत्तरं स्वामिने निवेदयामास । ततो रथमास्थाय श्रीकृष्णचन्द्रः काशीमयासीत् । महारथः पौण्ड्रकोऽपि सैन्यं नीत्वा योद्धुं पुराद् द्रुतं निश्चक्राम । तन्मित्रं काशिराजस्तदा तस्य पार्ष्णिग्राहोऽभवत् । अथ हरिः शंखचक्राद्युपलक्षितं शत्रुं स्वतुल्यवेशं विलोक्य भृशमहसीत् । ततो रिपुगणाः असिशूल-गदाप्रासतोमरपरिघैः शौरिं प्राहरन् । अस्त्रशस्त्रनिपुणो यदुराजः शत्रुप्रहारादात्मानं रक्षित्वा गदासिचक्रेषुभिरुभयोर्गजवाजिरथ-पत्तिमद्बलं भृशमपीपिडत् । अथ वासुदेवः प्राह भो मिथ्यावा-सुदेव ! पौरुषं दर्शयित्वा स्ववाक्यं सत्यं कुरु । ततो विलोक्य प्रमादं रिपोर्निशितैर्बाणैस्तं पूर्वं विरथीकृत्याऽनंतरमवधीत् । अथ हरिश्चक्रेण काशिपतेरपि शिरः कायादपातयत् । तत्र प्रथमो हरिध्यानात्, द्वितीयश्च युद्धे संमुखमरणात् सद्गतिमवाप । एवं

ससम्बं मत्सरिणं हत्वा पौण्ड्रकं सिद्धैर्गीयमानकथामृतो यदुपतिर्द्वारकां विवेश। ततः काशिराजसुतः सुदक्षिणो मातृवर्गं पौरांश्च समाश्वास्य समित्रस्य पितुरुत्तरक्रियामकरोत्। अथ सुदक्षिणः पितृहन्तारं निहत्य ततो निष्कृतिं यास्यामीति निश्चित्य च सोपाध्यायो महेश्वरं परमेण समाधिना समाराधयामास। ततस्तुष्टः सदाशिवो यजमानाय वरं प्रादात्।

दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजम्।
अभिचारविधानेन सचाऽग्निः प्रमथैर्वृतः।
साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः॥

निशम्यैतत् वाक्यं काशिराजसुतोऽर्थमबुध्वा श्रीकृष्णचंद्रायैवाभिचारप्रयोगं चक्रे। ततः समाप्ते कृत्येऽग्निकुण्डात् मूर्तिमान् पावकः समुत्थितः। सोऽथ प्रचण्डरूपं धृत्वा सगणः पृथ्वीतलं कंपयन् द्वारकां दग्धुमारभत। एतदालोक्य सर्वे नगरनिवासिनः तत्रसुः। तेऽथ सभायामक्षैः क्रीडन्तं भगवन्तमभ्येत्य लोकेश! पुरं प्रदहतो वह्नेस्त्राहि त्राहीति जगदुः। तच्छ्रुत्वा शरणागतवत्सलो हरिरुवाच। माऽभैष्ट। अहमचिरादविताऽस्मि। अथ जनार्दनो माहेश्वरीं कृत्यां तां विज्ञाय तद्विघातार्थं सुदर्शनं चक्रं समादिदेश। ततश्चक्रपाणेस्तच्चक्रं स्वतेजसा तमग्निं विजित्य वाराणसीमेत्य च सर्त्विग्जनं तं सुदक्षिणं ददाह। अथ विष्णुचक्रं कृतकृत्यं भूयः श्रीकृष्णपार्श्वमुपातिष्ठत्।

य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् ।
समाहितो वा शृणुयात् सर्वपापैः प्रमुच्यते ॥

इति श्रीकृष्णचरिते पौण्ड्रकवधनिरूपणं नामाशीतितमः स्तवकः ॥ ८० ॥

अथैकदा सांबः स्वयंवरे दुर्योधनसुतां लक्ष्मणामपाऽहरत् । एतदालोक्य कुपिताः कौरवा अब्रुवन् । दुर्विनीतमिमं बध्नीत । येऽस्मत् प्रसादोपचितां महीं भुंजते । ते वृष्णयोऽस्माकं किं करिष्यंति ? निशम्यैतद्वचनं कर्णशलयज्ञकेतुप्रभृतयो रथमारुह्य जाम्बवतीसुतं बद्धुमारेभिरे । अथ सांबो धार्तराष्ट्राननुधावतो दृष्ट्वा रुचिरं चापं गृहीत्वा च सिंह इवैकलोऽस्थात् ! अथ कर्णाग्रगण्या जिघृक्षवस्ते धनुर्धरा आसाद्य वाणैस्तं समाकिरन् । महावीरः कार्ष्णिः स्वसायकैः सहसा तद्बन्धनमखण्डयत् । सोऽथ चतुर्भिः शरैश्चतुरो वाहान् एकेन सारथिं च विव्याध । एतदालोक्य महावीरा अपि ते तस्य तद्रणकौशलं पुनः पुनः प्राशंसन् । ततः कर्णाद्या मिलित्वा तस्याऽपि घोटकसमेतं सारथिं निहत्य तं विरथं चक्रुः । तेऽथ विवशं तं बद्ध्वा राजसुतां च नीत्वा जयध्वनिपूर्वकं पुरं प्राविशन् । अत्रान्तरे यादवाः नारदमुनिमुखाद्वार्तां श्रुत्वा सकोपा उग्रसेनप्रचोदिताः कुरून्प्रतिरणोद्यमं चक्रुः । एतदालोक्य कुलयोरुभयोः क्षेममिच्छन् रामः सन्नद्धांस्तान्

सांत्वयामास । ततः सब्राह्मणगणः संकर्षणो हास्तिनपुरं गत्वा क्वचिद् बाह्योद्याने स्थित्वा च कौरवाऽभिप्रायं ज्ञातुं धृतराष्ट्रं प्रत्युद्धवं संप्रेषयामास । सोऽथ राजसभामेत्य भीष्मद्रोणविदुर-समेतमांबिकेयमभिवंद्य दुर्योधनाय सविनयं रामागमनं निवेदयामास । ततस्ते सुहृत्तमं बलभद्रं सम्प्राप्तं समाकर्ण्य पर्यतुष्यन् । प्रथममुद्धवं सत्कृत्य मंगलपाणयो रामाभिमुखं ययुः । तेऽथ संगम्य तं प्रणम्य तस्मै गामर्घ्यं च विनिवेदयामासुः । अथ रामो बंधून् कुशलिनः श्रुत्वाऽनामयं च पृष्ट्वाऽविक्लवं वचो जगाद । राजाधिराजउग्रसेनो यद् वः समाज्ञापयति । तत् सावधानतया श्रुत्वाऽविलंबितं कुरुध्वम् ।

यद्यूयं बहवस्त्वेकं जित्वाऽधर्मेण धार्मिकम् ।
अबध्नीताथ तन्मृष्ये बंधूनामेककाम्यया ॥

एतदुपाकर्ण्य बलदेववचनं कुपिताः कौरवाः प्रत्यवदन् ।

अहो महच्चित्रमिदं कालगत्या दुरत्यया ।
आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितम् ॥

एते वृष्णयः कुंतीविवाहेन संबद्धा अस्माभिस्तुल्यतां नीताः । अस्मद्दत्तनृपासना एते विहाय लज्जामस्मानेव समाज्ञापयंति । "पयःपानं भुजङ्गानां केवलं विषवर्धनमिति" नीतिवाक्यमद्य सत्यमनुभूतमित्यभिधाय सहसोत्थाय च पुरं न्यवर्तंत । तच्छ्रुत्वा

दृष्ट्वा च दौःशील्यं कुरूणां हलायुधो जहास। सोऽथ समीपस्थान् प्रोवाच—

नूनं नानामनोन्नद्धाः शांतिं नेच्छन्त्यसाधवः
तेषां हि प्रशमो दण्डः पशूनां लकुटो यथा।

अहं तु सुसंरब्धान् यदून् सांत्वयित्वा शममिच्छन्नत्राऽऽगतः। इमे च मंदमतयो मामेव तिरस्कुर्वंति। किं बहूक्त्या? अहमद्यैव निष्कौरवां पृथ्वीं करिष्यामीत्यभिधाय हलं गृहीत्वा च समुत्तस्थौ। सोऽथ लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं विचकर्ष। अथ लोका जलयानमिवाऽऽघूर्णं गंगायां च नगरं पतद्विलोक्य हाहाकारं चक्रुः। ततो भीताः कौरवाः सलक्ष्मणं सांबं पुरस्कृत्य हलधरशरणं ययुः।

राम! रामाऽखिलाधार! प्रभावं न विदाम ते।
मूढानां नः कुबुद्धीनां क्षंतुमर्हस्यातिक्रमम्॥

एतदुपाकर्ण्य नम्रवचनं क्षमासागरः संकर्षणः सुप्रसन्नोऽभवत्। सोऽथ माऽभैष्ट इति वरं दत्त्वा विघ्नशांतिमकरोत्। ततो दुर्योधनो जामात्रे सवस्त्रां सालंकारां सर्वलक्षणलक्षितां लक्ष्मणां च सुतां प्रादात्। यौतुके च षष्ठिहायनान् कुंजरान् तुरंगसप्तशतीं रथशतीं दासीनां च सहस्रं दुहितृवत्सलो ददौ। अथाऽच्युताग्रजः ससुतः सस्नुषश्च सुहृद्भिरभिनन्दितश्च पुरं प्रविवेश। तत उग्रसे-

नादयो यादवाः कृतकार्यं हलधरं दृष्ट्वा तस्य पराक्रमं च श्रुत्वाऽतीव संतुष्टा बभूवुः ॥

इति श्रीकृष्णचरिते लक्ष्मणासांबविवाहनिरूपणं नामैकाशीतितमः स्तवकः ॥ ८१ ॥

अथ कदाचित् देवर्षिर्नारदो नरकं निहतं श्रुत्वा तथैकेन श्रीकृष्णेन सह बह्वीनां योषितां विवाहमपि समाकर्ण्य कौतूहलदिदृक्षया द्वारावतीमाजगाम । सोऽथ रत्नप्रदीपनिकरद्युतिभिः निरस्तध्वान्तं रुक्मिणीभवनमासाद्य तत्र रुक्मदंडेन व्यजनेन हरिं वीजयन्तीं च वैदर्भीं ददर्श। अथ भगवान तमालोक्य सहसोत्थाय तस्य चरणाववनिज्य च तदपः स्वमूर्ध्ना दध्रे। ततः सुधोपमया गिरा तमभिभाष्य निर्द्वंद्वाय भवते किं प्रदेयमित्यपृच्छत् । एतदुपाकर्ण्य मुनिरवोचत् । द्वारकाधीश ! त्वं साधूनां परित्राणाय खलानां च निग्रहाय भारतवर्षे समवतीर्णोऽसि। अहं तु संसारकूपपतितोत्तरणावलंबं त्वां ध्यायन् सर्वत्र विचरामि । तदनु सोऽन्यद् गेहं प्रविवेश । तत्र प्रियया उद्धवेन च सहाक्षैर्दीव्यंतं प्रभुं ददर्श। सोऽथ क्वचिद् द्विजान् भोजयंतम्, क्वचिद् विप्रावशेषितं भुंजानं क्वचन संध्यामुपासीनं क्वाऽपि पावकं पूजयंतं क्वाऽपि च विप्रेभ्यो गाश्च ददतमदर्शन् । एवं पृथक् पृथक् गृहेषु पृथक् पृथक् क्रियां कुर्वाणं हरिं दृष्ट्वा मुनिवरश्चकितो बभूव । अथा-

न्येद्युः कश्चिदपूर्वपुरुषः समागच्छत् । प्रतीहारैः प्रवेशितः स सभायां भगवंतं प्रणम्य तस्मै गिरिव्रजेऽवरुद्धानां राज्ञां जरासंधजं भयं समावेदयामास ।

कृष्ण ! कृष्णाऽप्रमेयात्मन् ! प्रपन्नभयभंजन !
वयं त्वां शरणं यामो भवभीताः पृथग्धियः ॥

एतदुपाकर्ण्य संदेशं भगवान् समीपस्थं मुनिवरं प्रोवाच । ऋषिराज ! विश्वस्मिन् तवाऽविदितं किंचिन्नाऽस्ति । अतः कृपां कृत्वा पाण्डवानां यच्चिकीर्षितं तत्कथय । तच्छ्रुत्वा देवर्षिः प्रत्यवदत् । सर्वज्ञ ! महादेवाय किं कश्चिन्मंत्रदीक्षां ददाति ? तथाऽपि नरलोकविडम्बनं भवंतं पैतृष्वस्रेयस्य धर्मराजावतारस्य युधिष्ठिरस्य वांछां श्रावये । चक्रवर्तित्वकामो राजाऽस्ति । सोऽधुना राजसूयेन मखेन त्वामाराधयितुमिच्छति । तस्मिन्महोत्सवे भवंतं दिदृक्षवो महेन्द्रादयो देवा राजर्षयश्च समायास्यंति । "यज्ञः सर्वार्थसाधक" इति श्रोत्रिया व्याहरंति ।

श्रवणात् कीर्तनाद् ध्यानात् पूयंतेऽतेन्तावसायिनः ।
तव ब्रह्ममयस्येश ! किमुतेक्षाऽभिमर्शिनः ॥

तच्छ्रुत्वा हरिः सस्मितं उद्धवपृच्छत् । सखे ! त्वमपि तु मंत्रार्थतत्त्वविदसि ? अतोऽत्र यदनुष्ठेयं तद्वद । एवमाकर्ण्य प्रियवचनं भगवतः प्रणामपूर्वकं वचनं जगादोद्धवः । देव !

महर्षिणा प्रोक्तं यत् यागं करिष्यतः पाण्डुनंदनस्य साचिव्यं त्वया कर्तव्यम् । तत् समुचितम् । पूर्वं दिग्विजयार्थं गतो भवान् जरासंधं विजित्य ततो भूपगणानपि कारागारान्मोचयिष्यति । स राजा बले नागायुतसमोऽस्ति । ब्रह्मण्यत्वात् विप्रैरभ्यर्हितो न कर्हिचित् प्रत्याख्याति । ब्राह्मणवेषधरो वृकोदरो यदि तमेत्य द्वंद्वयुद्धं भिक्षेत तदा सोऽवश्यं तस्मै दद्यात् । अथ समबलोऽपि भीमस्तव सान्निध्यात् तं निःसंशयं हनिष्यति ।

गायंति ते विशदकर्म गृहेषु देव्यो
राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ।
गोप्यश्च कुंजरपतेर्जनकात्मजायाः
पित्रोश्च लब्धशरणा मुनयो वयं च ॥

इत्याकर्ण्य मंत्रिवचनं ऋषिकृष्णयादवाश्च साधूक्तमित्यन्व मोदंत । ततः सभाविसर्जनमभूत् ।

इति श्रीकृष्णचरिते राजसूयप्रसंगो श्रीकृष्णउद्धवविचार-निरूपणं नाम द्व्यशीतितमः स्तवकः ॥ ८२ ॥

अथ हरिर्ब्राह्मे मुहूर्ते समुत्थाय हस्तपादादिप्रक्षालनपूर्वक-माचम्य च प्रकृतेः परं शुद्धमात्मानं दध्यौ । सोऽथ शुद्धोदकेन स्नात्वा दिव्यवाससी परिधाय सन्ध्यावंदनं कुर्वन् सूर्योदयात् प्रागेव वाग्यतो ब्रह्मगायत्रीं जजाप । तत उद्यंतमर्कमुपस्थाय

कृताग्निहोत्रो देवान् संपूज्य पितॄन् प्रणम्य च विप्रेभ्योऽलंकृता गाः प्रादात्। सोऽथ दृष्टमंगलपदार्थो भूषयित्वाऽऽत्मानं पौरान्तःपुरचारिणां सर्ववर्णानां च कामान् परिपूरयामास। अथाऽमात्यादीन् तदभिलाषितविषयैः प्रतोष्य हरिः प्रत्यनंदत्। ततः सुहृद्वर्गं दारागणं च दानमानादिभिः परितोष्य स्वयमुपायुंक्त। अथेन्द्रप्रस्थं गंतुकामो जनार्दनः प्रद्युम्नादीन् समाहूयोपदिदेश। वत्साः! शृणुत। वेद एव द्विजातीनां परः श्रेयस्करः स्मृतः। अहरहः संध्यामुपासीत। ऋतौ भार्यामुपेयात्। अनाश्रमी न तिष्ठेत। देवानर्चयेत्। पितॄंस् तर्पयेत्। अन्नं नात्मार्थं पचेत्। सत्यं ब्रूयात् परं प्रियं ब्रूयात्। नाल्पधनो यजेत्। ऋणं कृत्वा घृतं न पिबेत्। सति विभवे जीर्णमलवद्वासा न भवेत्। नग्नां स्त्रियं न पश्येत्। शयानं न प्रबोधयेत्। अक्षैर्न क्रीडेत्। अपूज्यपूजां पूज्यविमाननां च न कुर्यात्। निषिद्धान्नं नाश्नीयात्। पंचपिण्डाननुद्धृत्य परवारिषु न स्नायात्। मद्यं नोपसेवेत। क्षेमे सति मांसं नाश्नीयात्।

यद्ध्यायते यत्कुरुते रतिं बध्नाति यत्र च।
तदवाप्नोत्यविघ्नेन यो हिनस्ति न किंचन॥
अनुमंता विशसिता निहंता क्रयविक्रयी।
संस्कर्ता चोपहंता च खादकश्चेति घातकः॥

संस्कारात् सर्वं शुद्धं भवति। तीर्थस्नानाच्छुद्धिर्मिलति।

दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ॥
देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥

विद्यातपोभ्यां पात्रता लभ्यते । अन्नदाता धनाढ्यः, पृथ्वीदाता भूपतिः, विद्यादाता आचार्यः, गोदाता वंशवान्, औषधिदाता च दीर्घजीवी भवति । राजा वेदादिशास्त्रविद् वार्ताकुशलः, दण्डनीतिनिपुणः, वृद्धोपसेवी व्यसनरहितश्च भवेत् । व्यसनान्यष्टादश भवंति । अत्र मनुः—

मृगयाऽक्षा दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थ दूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥

भूपतिः पण्डितान् धर्मकृत्येषु, अलुब्धान् न्यायकार्येषु, अनलसान् आयव्ययकर्मसु, क्लीवान् स्त्रीषु, स्वमिभक्तांश्च सेवायां सेनासु च नियुंजीत । अन्यायेन कोशं नाऽभिवर्द्धयेत् । मंत्रमूलं राज्यं मत्वा यत्नेन तत् सुरक्षितं कुर्यात् । पूर्वं साम्ना कार्यं साधयेत् । तन्निष्फले दानेनेष्टं संपादयेत् । उभयोर्गतार्थयोर्भेदं कुर्यात् । अगतिको दण्डनीतिमवलंबेत । पुत्रवत् प्रजाः पालयेत् । प्रजा-

विरोधी राजा न चिरं नंदति । पूर्वं धिग्दण्डः, ततो वाग्दण्डः, ततो धनदण्डः, ततः कारागारदण्डोऽनंतरं च बधदण्डः । लोभ-मोहविवर्जितो भूपतिः विद्वद्भिर्ब्राह्मणैः सह व्यवहारान् पश्येत् । राज्ञा कृत्स्नमायव्ययजातमह्नः प्रथमेऽष्टमे वा भागे श्रोतव्यम् । अन्योऽन्यं विवदमानानां प्रजानां कथनं श्रुत्वा प्राड्विवाकादीनां मतं बुद्ध्वा च राजा पक्षपातरहितं निर्णयं दद्यात् । संधिविग्रहचिन्तयैव नेयः कालः । सत्कर्मरुचिश्च भवेत् । अत्र मनुः—

विहितस्यापरित्यागान्निंदितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥

धर्मार्थकामाः सममेव सेवनीयाः । अनाथ-विधवाबालकादीनां वित्तं रक्षित्वा समये देयमिति निगद्य विशश्राम ।

इति श्रीकृष्णचरिते प्रद्युम्नादिसुतशिक्षणं नाम त्र्यशीतितमः स्तवकः ॥ ८३ ॥

अथाऽच्युतो यात्रार्थं दारुकमाहूय सत्वरं रथमानीयतामित्यादिदेश । तदनु वसुदेवादीननुज्ञाप्य सराममुग्रसेनं दृष्ट्वाऽन्तः-पुरस्त्रीभिश्च कृच्छ्रादनुमतिं प्राप्तो हरिः सारथिं प्रतीक्षमाणस्तस्थौ । अत्रान्तरे सारथिः स्यन्दनमानिनाय । अथ सात्यक्युद्धवाभ्यां सह यदुपतीरथमारुह्य प्रतस्थे । परिजनास्तमनुसस्रुर्माहिष्यश्च ।

ततो वासुदेव आनर्तसौवीरमरुमत्स्यादिदेशानतीत्य रैवतकाऽर्बुदप्रभृतीन् गिरीनतिक्रम्य दृषद्वतीं सरस्वतीं च तीर्त्वा शक्रप्रस्थं समुपागमत्। अथ धर्मसूनुः पुरुषोत्तमं समुपागतं समाकर्ण्य प्रसन्नहृदयः सुहृद्वृतः सोपाध्यायश्च तमानेतुं पुरान्निरगात्। तदनुपाण्डवो दोर्भ्यां परिष्वज्य मुकुन्दगात्रं परां निर्वृतिमलभत। ततो भीमसेनो मातुलेयं परिरभ्य प्रससाद। अथाऽर्जुनेन परिष्वक्तो हरिर्यमाभ्यामभिवादितोऽभवत्। सोऽथ ब्राह्मणान् प्रणम्य वृद्धानपि ववन्दे। ततः पुण्यश्लोकः सुहृद्भिः परिवृतः सूतादिभिः संस्तूयमानश्च सुविभूषितं हस्तिनापुरं प्रविवेश। सोऽथ पौरैः पौराङ्गनाभिश्च मालादिभिः सत्कृतो मूर्धन्यहेमकुंभै रजतोरुशृंगैश्च जुष्टं कुरुराजभवनं ददर्श। ततः प्रफुल्ललोचनैरन्तःपुरजनैः प्रीत्याऽभ्युपेतः शौरिः प्रविवेश प्रासादम्। अथ स्नुषा पृथाऽरविन्दलोचनं श्रीकृष्णचन्द्रमालोक्य सहसा पर्यंकात् समुत्थाय परिषस्वजे। तदनु यदुपतिः पितृष्वसुः गुरुस्त्रीणां चाऽभिवादनं चक्रे। स्वयं च कृष्णासुभद्राभ्यामभिवादितोऽभवत्। तदनु श्रीकृष्णभगिन्याः संकेतमवाप्य चतुरा द्रौपदी रुक्मिण्याद्याः सर्वाः श्रीकृष्णपत्नीः संपूजयामास। तदनु धर्मराजः सभार्यं समित्रं सामात्यं सानुगं च जनार्दनं सुखं निवासयामास।

अथाऽन्येद्युः प्रभाते राजा ब्राह्मणक्षत्रियवैश्यादिभिर्युतः सभामध्ये विराजमानोऽतिष्ठत्। तत्राऽऽचार्यभ्रातृवर्गादीनां

शृण्वतामजातशत्रुः जगाद । भक्तवत्सलयदुपते ! ममैकं मनोरथं पूरय ।

क्रतुराजेन गोविन्द ! राजसूयेन पावनीः ।
यक्ष्ये विभूतीर्भवतस्तत् संपादय नः प्रभो ॥

देव ! लोकोऽयं भवच्चरणारविन्दसेवानुभावमिह पश्यतु । अपरं च । कुरुसृंजयानां मध्ये ये त्वां भजंति तेषामुभयेषां लाभाऽलाभौ प्रदर्शय । प्रभो ! यद्यपि समदर्शिनस्तव भेदबुद्धिर्नाऽस्ति । तथाऽपि संसेवतां जनानां सुरतरोरिव ते प्रसादोऽस्ति । सेवानुरूपफलदानेऽत्र विपर्ययो न विद्यते । निशम्यैतत् पाण्डुनंदनवचनं श्रीभगवानुवाच—

सम्यग् व्यवसितं राजन् ! भवता शत्रुकर्शन ।
कल्याणी येन ते कीर्तिर्लोकाननु भविष्यति ॥

क्रतुराडयं ऋषिमुनिपितृदेवतादीनां सर्वेषामेवाऽभीप्सितः । अतः पूर्वं सर्वान् भूमण्डलाधीशान् विजित्य जगतीं वशे कृत्वा सर्वान् संभारान् समाहृत्य च राजसूयमनुतिष्ठ । एते ते भ्रातरो लोकपालांशसंभवाः संति । अहं च मदेकप्रवणचित्तवता त्वया जित एवाऽस्मि । एतदुपाकर्ण्य हरिवचनं प्रफुल्लमुखपंकजो युधिष्ठिरःससंजयं सहदेवं दक्षिणस्यां, समत्स्यं नकुलं प्रतीच्यां सकैकेयमर्जुनमुदीच्यां, समद्रकं च भीमसेनं प्राच्यां प्रेषयामास ।

ततस्ते वीरा ओजसा नृपान् विजित्य भूरिद्रविणं च समानीय यदयते नृपाय सादरं समर्पयामासुः ॥

इति श्रीकृष्णचरिते राजसूयार्थं दिग्विजयप्रस्तावनिरूपणं नाम चतुरशीतितमः स्तवकः ॥ ८४ ॥

अथ हरिर्जरासंधं मगधेशमजितं श्रुत्वा समवलंब्य चोद्धव-मतं ब्राह्मणवेशधराभ्यां भीमार्जुनाभ्यां सह स्वयमपि विप्रवेशं धृत्वा चचाल । ततस्ते गिरिव्रजमवाप्य दानवेलायां ब्राह्मणभक्तं राजानमुपसृत्य च ययाचिरे ।

राजन्! विद्यातिथीन् प्राप्तान् अर्थिनो दूरमागतान् ।
तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥
किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः ।
किं न देयं वदान्यानां कः परः समदर्शिनाम् ॥

राजन् ! वदान्यवरं महर्षिं दधीचिं को न जानाति ? हरिश्चन्द्र राजर्षेर्नाम केन न श्रुतम् ? रंतिदेवमहीपालः कस्याऽपरिचितः ? उंछवृत्तेर्मुद्गलस्य महिमा छादितोऽपि नाऽऽच्छाद्यते । शरणागत रक्षकः शिबिः सर्वत्र प्रसिद्ध एव । बलेः कीर्तिः लोकातिशायिनी विद्यते । किं बहूक्त्या । अलर्ककपोतव्याधप्रभृतयोऽध्रुवेणैव देहेन ध्रुवलोकं प्राप्ताः । एतदुपाकर्ण्य विरुदावलीवचनं राजा

स्वराकृतिचिह्नादिभिस्तान् राजन्यबंधून् दृष्टपूर्वान् निरणैषीत् । सोऽथ शरीरं नश्वरं यशश्च कल्पान्तः स्थायि मत्वा प्रोवाच—

भो विप्रा ! व्रियतां कामो ददाम्यात्मशिरोऽपि वः ।
अविद्यो वा सविद्यो वा मम पूज्यो हि ब्राह्मणः ॥

एवमाकर्ण्य हरिरुवाच । राजाधिराज !

युद्धं नो देहि राजेन्द्र ! द्वंद्वशो यदि मन्यसे ।
युद्धार्थिनो वयं प्राप्ता राजन्या नाऽन्नकांक्षिणः ॥

अयं वृकोदरः, एष पार्थः, अहं च कृष्णोऽस्मि । तच्छ्रुत्वा मागधोऽकार्षीदट्टहासम् । ततः सोऽवदत् । नाऽहं भीरुणा त्वया सार्धं योत्स्ये । यतस्त्वं स्वपुरीं त्यक्त्वा समुद्रं शरणं गतवानसि । अर्जुनोऽयं वयसाऽतुल्यः स्वल्पसत्त्वश्चाऽस्ति । अतोऽयमपि समकक्षो न वर्तते । एष भीमस्तु मम तुल्यबलो विद्यते । एवमभिधाय भीमसेनाय महतीं गदां प्रादात् । सोऽथ द्वितीयां गदां नीत्वा स्वयमेव पुराद्बहिर्निर्जगाम । ततो रणदुर्मदावुभावेव वज्रकल्पाभ्यां गदाभ्यां मिथो जघ्नतुः । तस्मिन्नवसरे सव्यं दक्षिणं च यथा भवति तथा विचित्राणि मण्डलानि चरतोस्तयोर्युद्धमातितरां शुशुभे । ततः प्रक्षिप्तयोर्गजयोर्वज्रनिष्पेषसन्निभश्चटचटाशब्दोऽभवत् । इत्थं सप्तविंशतिदिनपर्यंतं गदायुद्धप्रवीणयोस्तयोः निर्विशेषं युद्धमभूत् । अष्टाविंशतितमे दिने वृकोदरो

मातुलेयमगदत् । माधव ! नाऽहं युधि जरासंधं जेतुं शक्नोमि । तच्छ्रुत्वाऽरिवधोपायं विचिन्त्य हरिः विटपशाखां पाटयित्वा च संकेतेन शत्रुमारणविधिं दर्शयामास । अथेङ्गितज्ञो भीमो रिपुं पादयोर्गृहीत्वा भूतले पातयामास । अथैकेन पादेन पादमाक्रम्य द्वितीयं चरणं हस्ताभ्यां च प्रगृह्य सहसाऽऽचकर्ष । ततो भिन्नसंधिर्नृपो गतजीवितो बभूव । एवं निहते मगधनाथे महान् हाहाकारो बभूव । श्रीकृष्णार्जुनौ परिरभ्य भीमसेनं पूजयामासतुः । मुकुन्दकरस्पर्शात् सद्यो विगतज्वरोऽभवद् वृकोदरः । ततो हरिः तत्पुत्रं सहदेवं मगधाधिपतिमकरोत् । अथ श्रीकृष्णशासनं शिरसि धृत्वा नवीनो भूपालः संरुद्धान् राजन्यान् सद्यो मोचयामास । ततस्ते सर्वे मिलित्वा प्रोचुः । नाथ ! श्रीमदोद्धतेन मगधाधिपेन पीडिता वयं भवत्प्रसादान्मुक्तिं प्राप्तवन्तः । इत्युक्त्वा उच्चस्वरेण श्रीकृष्णगुणगानं चक्रुः । यथा—

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमोनमः ॥

अथ दयासागरो भगवान् वासुदेवः श्लक्ष्णया गिरा प्रणतां स्तानाह—भूपालाः ! समवाप्यैश्वर्यं सर्व एव भवत्यनवधानवान् । यथा हैहयोऽवाप्य साम्राज्यं जमदग्निकामधेनुहरणात्परशुरामेण सपुत्रो हतः । नहुषो देवेन्द्रतामधिगम्य शचीसंगमाय ब्राह्मणान् शिविकां वाहयँस्तैरेव ततो भ्रंशितोऽजगरत्वमवाप । वेनोऽपि

श्रीमदांधो ब्राह्मणानधिक्षिपंस्तैरेव हुंकृतैर्हतः । राक्षसेश्वरो रावणः सीतामभिलषन् श्रीरामचन्द्रेण व्यापादितः । नरकाऽसुरो बलाददितिकुण्डलाद्याहरणान्मयैव हतः । एवमनेके नरपतयः श्रीमदादधोगतिमवापुः । संप्रति भवंतः सर्वमुत्पादिभंगुरं मत्वाऽध्वरैर्मां यजंतश्च धर्मेण प्रजाः पालयत ।

संतन्वंतः प्रजातंतून् सुखदुःखे भवाऽभवौ ।
प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥
उदासीनाश्च देहादावात्मारामा धृतव्रताः ।
मय्यावेश्य मनः सम्यङ् मामंते ब्रह्म यास्यथ ॥

ततो हरिः सहदेवेन भूपोचितैः क्षौरस्नानवस्त्रस्रग्विलेपनालंकारैः तेषां सपर्यां कारयामास । अथ तान् भोजयित्वा सुरथानारोप्य प्रियवाक्यैर्हर्षयित्वा च स्वस्वदेशान् प्रस्थापयामास । ततस्ते श्रीकृष्णोपकारं स्मरंतस्तमेव च ध्यायंतः स्वस्वसदनान्यवाप्य सुखिनो बभूवुः । अत्रान्तरे लब्धविजयोऽतितुष्टश्च जनार्दनः पार्थाभ्यां सह शक्रप्रस्थं ययौ । तेऽथ बाह्योद्यानमवाप्य शंखान् दध्मुः । तच्छब्दं श्रुत्वा सर्वे पौरा मगधेशं शान्तं मेनिरे । ततो भीमादयः पुरं प्रविश्य राजानमभिवंद्य च सर्वं वृत्तं

श्रावयामासुः । एवं केशवानुकंपनं श्रुत्वाऽऽनंदाश्रुकलेक्षणो राजा यदुवर्याय धन्यवाददानमपि व्यस्मरत् ।

इति श्रीकृष्णचरिते जरासंधवधनिरूपणं नाम पंचाशीतितमः स्तवकः ॥ ८५ ॥

अथाऽन्येद्युः प्रभाते राजसभासमासीनो राजा हरिमुवाच । देव ! त्रैलोक्यपूज्या देवा अपि यदा तवाऽनुशासनं शिरसा वहंति तदा मनुष्याणान्तु गणनैव का ? एवमभिधाय कृष्णानुमोदितो राजा यज्ञिये काले ब्रह्मवादिनो ब्रह्मणान् ऋत्विजो वव्रे । तत्र द्वैपायनः पिप्पलादः असितः सुमंतुः मैत्रेयः अकृतव्रणः जैमिनिः पैलः वैशंपायनाद्याश्च महर्षयश्च याजका अभूवन् । अथ कण्वगर्गधौम्यगौतमच्यवनवसिष्ठवामदेवविश्वामित्रादयश्च महामुनयो निमंत्रिता यज्ञदर्शनार्थं समागच्छन् । अत्रान्तरे निमंत्रणपत्रमवाप्य भीष्मद्रोणकृपविदुरा गान्धारीधृतराष्ट्रदुर्योधनाद्याश्च यज्ञसेवार्थमुपस्थिता अभूवन् । ब्राह्मणक्षत्रियवैश्यशूद्रा यज्ञदिदृक्षया समायाताः । यक्षसिद्धगंधर्वचारणकिन्नरराक्षसा राजानश्चाऽपि राजसूयं समीयुः । अथ देववर्चसो याजका अमरा यथा वरुणमयाजयन् तथा सार्वभौमं युधिष्ठिरं याजयामासुः । यज्ञमण्डपस्य पूर्वभागे ऋग्वेदज्ञा, दक्षिणे सामगाः, पश्चिमे याजुषा उत्तरेचाऽथर्वणास्तस्थुः । तत्रत्यो ब्रह्मघोषोऽन्तरिक्षस्थानपि

देवादीन् समतर्पयत् । अग्नेर्हव्यग्रहणमालोक्य महर्षयो राजर्षयश्च मुहुर्मुहुर्धर्मराजभाग्यं प्रशशंसुः । तत्र भोजनव्यवस्थायां दुःशासनः, द्विजार्चनेऽश्वत्थामा, राजसत्कारे संजयः, धनव्यये विदुरः, समाधाने कर्णः, कृताऽकृतपरीक्षायां भीष्मद्रोणौ, धनग्रहणे सुयोधनः, श्रीकृष्णचंद्रश्च विप्रपादपद्मप्रक्षालने नियुक्तोऽभवत् । तस्मिन्महाक्रतौ कोऽपि याचको निराशो न न्यवर्तत । सर्वे मुक्तकंठं महायज्ञं प्राशंसन् । अथ सोमाभिषवदिने चक्रवर्ती सदसस्पतीन् पूजयितुमुद्यतोऽभवत् । सोऽथ नारदवसिष्ठविश्वामित्रादीनां ब्रह्मर्षीणां भीष्मप्रभृती राजर्षीणां च सन्निधौ अग्रपूजार्हनिर्धारयितुं विमृशन्नपि न शशाक । अथ प्रस्तावज्ञो माद्रीनंदनः सहदेव ऊर्द्ध्वबाहुरब्रवीत् । भो भो महानुभावाः ! शृणुत मदीयं निवेदनम् ।

अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान् सात्वतां पतिः ।
एष वै देवताः सर्वा देशकालधनादयः ॥

इति विचिन्त्य श्रीभगवते वासुदेवायैव परमार्हणं देयम् । इत्थंनिगद्य च तूष्णीं बभूव । तच्छ्रुत्वा सर्वे सभासदः साधुसाध्विति वदन्तस्तं प्रशशंसुः । अथ विरलान् विलोक्योदासीनान् सहदेववाक्यमभिनन्दन् महामतिर्भीष्मोऽवदत् । अजातशत्रो ! त्वं तु स्वयमेव गुणदोषकोविदोऽसि । तव प्रश्नोऽयं वृद्धसंमाननार्थमेव । सहदेववचने पक्षपातलेशोऽपि नास्ति । अहं तद्वचनं

हृदयेनाऽभिनंदामि । षडर्घ्या भवंति । यथा स्नातकः, आचार्यः, जामाता, पितृमातृश्वशुरपक्षीयो बांधवः । ऋत्विक्, भूपतिश्चेति । राजन् ! सकलेपि भूमिदेवनरदेवसंगमेऽत्र सकलगुणनिधिरेष-वासुदेव एव पूज्यतमो मां प्रतिभाति । अत्र माघः ।

पद्मभूरिति सृजञ्जगद्रजः सत्त्वमच्युत इति स्थितिं नयन् ।
संहरन् हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः ॥

तदनु सभार्योऽतिसंतुष्टो राजा श्रीकृष्णचंद्रस्य चरणौ प्रक्षाल्य तज्जलं शिरसि निधाय षोडशोपचारैर्भगवन्तं संपूज्य च कृतकृत्यो बभूव । एवमालोक्य सुरमुनिनराः सर्वे तु जनार्दनं प्रणम्य पुष्पवृष्टिं चक्रुः । किन्तु दमघोषसुतः शिशुपालः कोपं कृत्वा स्वपीठादुत्थाय बाहुं उत्क्षिप्य च वक्तुमारभत । भो भो सभ्याः ! भवद्विधेषु धर्मधुरंधरेषु विद्यमानेषु सत्सु कुलपांसनोऽयं गोपालः काकः पुरोडाशमिव सपर्यां कथं प्राप्तुमर्हति ? कुलमस्य ययातिशापात् राज्यानर्हं । ब्रह्मर्षिसेवितान्देशान्परित्यज्य समुद्रं शरणं गतोऽयं दस्युत्वमवाप्तवानस्ति । एवमादीनि बहून्यभद्राणि वाक्यानि नष्टमंगलो दमघोषात्मजो बभाषे । यथा सिंहः शिवारुतं न गणयति तथा हरिः प्रतिज्ञापाशबद्धो नाऽजीगणत् ; उक्तं च महाकविना माघेन —

सहिष्ये शतमागांसि सूनोस्त इति यन्मया ।
प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम् ॥

अत्रान्तरे केचित्तु शपन्तः शिशुपालं विधाय कर्णौ सहसा सभामण्डपान्निर्ययुः । उक्तं च मनुना—

गुरोर्यत्र परीवादो निन्दावाऽपि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यतः ॥

ततः क्रुद्धाः पाण्डवा मत्स्यकैकयसृंजयाश्च शिशुपालजिघांसया उदायुधा उत्तस्थुः । अथ कोपाकुलः शिशुपालः कृष्णपक्षीयान् लोकान् भर्त्सयन् खड्गचर्मणी गृहीत्वा च हरिं हन्तुमुपाद्रवत् । एतदालोक्याऽच्युतस्तीक्ष्णधारेण चक्रेण चैद्यशिरश्चकर्त । अत्रान्तरे भीताः शिशुपालपक्षीया राजान इतस्ततः पलायिताः । ततः पश्यतां सर्वभूतानां शिशुपालदेहान्निःसृतं ज्योतिः श्रीकृष्णचन्द्रं समुपाविशत् ।

जन्मत्रयानुगुणितद्वेषसंरब्धया धिया ।
ध्यायंस्तन्मयतां यातो भावो हि भवकारणम् ॥

अथैकराट् ससदस्येभ्य ऋत्विग्भ्यो विपुलां दक्षिणां दत्त्वाऽन्यानपि विधिवत् संपूजयामास । ततो ब्रह्मघोषपुरस्सरः सपत्नीकः सदर्शकगणश्च सम्राड् गंगायामवभृथस्नानमकरोत् । यज्ञान्ते यजमानेन सह यः कोऽपि श्रद्धया स्नाति सोऽपि पुण्यमवाप्नोति-

यज्ञदेवप्रसादतः । ततो राज्ञा सभाजिताः सर्वे देवमानुषखेचराः श्रीकृष्णचंद्रं महाक्रतुं पाण्डवांश्च प्रशंसन्तः स्वस्वधामानि ययुः ।

इति श्रीकृष्णचरिते राजसूययज्ञनिरूपणं नाम षडशीतितमः स्तवकः ॥ ८६ ॥

अथैकदा सम्राट् युधिष्ठिरो मयक्लृप्तायां सभायां कांचनासने समासीन आसीत् । तत्र तदा पारमेष्ठ्यश्रिया जुष्टं वंदिभिश्च स्तूयमानं राजानं द्रष्टुं दुर्योधनः समाजगाम । मार्गे मयमायाविमोहितो धार्तराष्ट्रः स्थले जलं मत्वा वस्त्रान्तं जग्राह । जले च स्थलभ्रान्त्या चलन्निपपात । एवमालोक्य भीमसेनो जहास । तं विलोक्य राजानो राजपत्न्यश्च राज्ञा निवार्यमाणा अपि कृष्णानुमोदिता अहसन् । एतदालोक्य व्रीडितो राजनंदनोऽत्राङ्मुखस्तस्थौ । लोका हाहा शब्दं चक्रुः । धर्मसूनुर्युधिष्ठिरो विमना इव बभूव । ततोऽग्रजं पृष्ट्वा दुर्योधनो हस्तिनापुरमगात् । सोऽथ भ्रातृवर्गं समाहूय प्रोवाच । भ्रातरः ! युधिष्ठिरस्य सभायां यो मम मानभंगोऽभवत्तस्य प्रतीकारं विनाऽहं जीवन्नपि मृतोपमोऽस्मि । उक्तं च नयवेदिभिः—

आपदि येनाऽपकृतं येन च हसितं दशासु विषमासु ।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥ १ ॥
प्राप्य चलानधिकारान् शत्रुषु मित्रेषु बंधुवर्गेषु ।
नाऽपकृतं नोपकृतं न सत्कृतं किं कृतं तेन ? ॥ २ ॥

तच्छ्रुत्वा दुःशासनाद्या भ्रातरः, कर्णाद्याः सहृदयाः, शकुनि प्रभृतयो मंत्रिणश्च दुर्योधनमूचुः । वीरवर्य ! विमना मा भव । वयं द्रुतमेव महोपायं विचिन्त्य तव मानसीं वेदनामपाकरिष्यामह इति व्याहृत्य दुर्योधनमनः समाधानमकुर्वन् । तेऽथ कपटद्यूतेन पाण्डवान् विजित्य दुर्योधनाय संतोषं प्रददुः ।

इति श्रीकृष्णचरिते दुर्योधनमानभंगप्रतीकारंनिरूपणं नाम सप्ताशीतितमः स्तवकः ॥ ८७ ॥

आसीत्सौभपतिः शाल्वो नाम राजा । स शिशुपालस्य परममित्रमासीत् । रुक्मिणीहरणसमये यादवैः संख्ये निर्जितः स शृण्वतां सर्वभूभुजां पृथ्वीं यादवरहितां करिष्य इति प्रतिजज्ञे । सोऽथ सकृत् पांसुमुष्टिं भक्षयन् देवाधिदेवमुमाकान्त माराधयामास । संवत्सरांते भगवानाशुतोषः शरणार्थिनं राजानं वरेण छंदयामास । ततः प्रणम्य राजा जगाद ।

देवासुरमनुष्याणां गंधर्वोरगरक्षसाम् ।
अभेद्यं कामजं वव्रे सयानं वृष्णिभीषणम् ॥

अथ तथेति गिरिशादिष्टः शाल्वो हरप्रसादान्मयानिर्मितं सौभाख्यं पुरं कामगं च विमानमलभत । अथैकदा राजा पूर्वं वैरं स्मृत्वा ससैन्यो द्वारावतीमरौत्सीत् । ततः प्रद्युम्नो निजाः प्रजा

वाध्यमाना विलोक्य माऽभैष्टेति गदित्वा रथमारुह्य च योद्धुं रणांगणमगात् । अथ सांबाऽक्रूरसात्यकिचारुदेष्णप्रभृतयोऽनीकाध्यक्षायादवा रुक्मिणीतनयमनुसस्रुः। ततः शाल्वानां यदुभिः सह युद्धं भवितुमारभत । रणपण्डितः शाल्वः शस्त्रादिवृष्टिरूपां मायां प्रसारयामास । कार्ष्णिः क्षणमात्रेण तां मायां दिव्यास्त्रैर्नाशयामास । ततः शाल्वश्चतुर्भिः शरैः प्रद्युम्नस्य घोटकान् एकेन सारथिं निहत्याऽपरेण च ध्वजं चिच्छेद। अथ रौक्मणेयो द्वितीयं रथमारुह्य युयुधे । अत्रान्तरे शाल्वामात्यो द्युमत्सेनः प्राक्प्रदत्तपीडायाः प्रतीकारार्थं संमुखो भूत्वा गदया तमताडयत् । दारुकात्मजो देशं कालं च विलोक्य रुधिरक्लिन्नं मूर्छितं च रथिनं दूरमनैषीत् । ततो मुहूर्तेन लब्धसंज्ञः कार्ष्णिः सारथिमुवाच । भद्र !

अहो ! असाध्विदं कृत्यं यद्रणान्मेऽपसर्पणम् ।
न यदूनां कुले जातः श्रूयते रणविच्युतः ॥

तच्छ्रुत्वा सारथिः प्रत्यवदत् । राजनंदन! वेद्म्यहं युद्धनियमम। "सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी" । ततः कार्ष्णिः सलिलमुपस्पृश्य सूतं जगाद । सखे ! यत्र वीरो द्युमानस्ति तत्र मांद्रुतं प्रापय । अथ रणांगणगतो रुक्मिणीसुतो निजसैन्यानि विधमन्तं विलोक्य द्युमंतं बाणवृष्ट्या तं विरथं कृत्वा च तच्छिरः खड्गेन चकर्त । गदसांबसात्यकिप्रभृतयः सौभपतेः सकल

बलं जघ्नुः । किं बहूक्त्या । संछिन्नकंधराः सौभेयाः समुद्रे निपातिताः । अत्रान्तरे घोराणि निमित्तानि विलोक्य यदुपतिः स्वराज्यरक्षार्थं कुरुवृद्धान् सपृथान् पाण्डवांश्च समनुज्ञाप्य सदारः सामात्यः सपरिजनश्च द्वारावतीमाजगाम । ततः स आर्यमिश्र-सहितः सौभपतिकृतमुपद्रवं श्रुत्वाऽतिविस्मयाविष्टो बभूव । अथा-न्येद्युः शौरिर्दारुकमाहूयादिदेश । सूत ! मे रथं मायाविनः शाल्वस्याऽन्तिकमाशु प्रापय । ततः क्षीणबलः शाल्वः श्रीकृष्ण-मालोक्य सूतं निहन्तुं शक्तिं प्राक्षिपत् । वासुदेवस्तामापतन्तीं दृष्ट्वा सायकैस्तां शतधा चिच्छेद । अथ हरिः षोडशाभिर्बाणैस्तं विद्ध्वाऽकाशे भ्राम्यमाणं न्यपातयत् । पतितोऽपि शाल्वः महसोत्थाय शरेण शार्ङ्गधन्वनः सव्यं भुजं विव्याध । येन तद्धस्ताच्छार्ङ्गं शरासनं न्यपतत् । ततस्तत्र पश्यतां सर्वभूतानां हाहाकारोऽभवत् । एतदालोक्य शाल्वोऽवदत्—

यत् त्वया मूढ ! नः सख्युर्भ्रातुर्भार्या हृतेक्षताम् ।
प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥

अद्य शूरमानिनं त्वां निहत्याऽपुनरावृत्तिं नयामि । यदि वाञ्छसि प्राणरक्षां तर्हि द्रुतं पलायस्व । मम संमुखे मा तिष्ठ । तच्छ्रुत्वा हरिरुवाच ।

गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो जलदः ।
नीचो वदति न कुरुते वदति न सुजनः करोत्येव ॥

इत्थमुक्त्वा यदुपतिर्भीमवेगया गदया शाल्वं ताडयामास । ततः शाल्वो रुधिरं वमन् चकंपे । अत्रान्तरे कश्चित् पुरुष आगत्य प्रणम्याऽच्युतमुवाद । देव ! शाल्वेन भवत्पिता वसुदेवो निरुद्धः । पितृवत्सल ! तमधुना पाहि । तच्छ्रुत्वा मानुषीं प्रकृतिं गतो हरिरुवाद । अहो ! कथं वीरवरं बलदेवं जित्वाऽतितुच्छेन शाल्वेन मम पिता नीतः । नूनं विधिर्बलवानिति ब्रुवाणं गोविन्दं सौभराट् संमुखीभूय बभाषे । कृष्ण ! एष ते पिता पश्यतस्ते मया हन्यते । इत्यभिधाय खड्गेन वसुदेवशिरश्छित्त्वा च कृष्णाग्रे न्यपातयत् । ततः क्षणं ध्यात्वा हरिः याथार्थ्यं विवेद । अथ कोपाकुलो यदुनंदनो शरैः प्रहरतं तं बाणैर्विद्ध्वा गदया तस्य सौभाख्यं विमानं बभंज । अथ क्षीणशक्तिः शाल्वो मुखाद्रुधिमुद्वमन् प्राणांस् तत्याज । एवं तस्मिन् पापे निपतिते नृणां हाहेति शब्दो बभूव । दिविदेवगणेरिताश्च दुंदुभयो नेदुः ।

अत्रान्तरे कारुषो दंतवक्रो गदां नीत्वा शाल्वपौण्ड्रकशिशुपालजरासंधादीनां परलोकगतानां बंधूनां पारोक्ष्यसौहृदं कुर्वन् रणक्षेत्रमाजगाम । सोऽथ वासुदेवं विलोक्य कोपाद्दंतान् प्रघर्षयन् प्रोवाच । रे कृष्ण ! दिष्ट्याऽद्य त्वं मम दृष्टिपथं गतोऽसि । यद्यपि त्वं मातुलपुत्रत्वादबध्यस्तथाऽपि मित्रध्रुगतो वध्यः । उक्तं च—

परोऽपि हितवान् बंधुः बंधुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥

इत्यभिधाय मूर्ध्नि गदया ताडयामास । गिरिवद् गुरुर्हरिस्तिलमात्रमपि न व्यचलत् । ततो रुषान्वितः शौरिः कौमोदक्या स्तनान्तरे तमहन् । अथ प्रहारभिन्नहृदयो योद्धा मुखाद्रुधिरमुद्वमन केशवाह्वंघ्रीन् प्रसार्य व्यसुर्धरण्यां निपपात । ततः पश्यतां लोकानां तस्य सूक्ष्मतरं ज्योतिः श्रीकृष्णं समाविवेश । अथ तत्र भ्रातृशोकपरिप्लुतो विदूरथस्तद्भ्राताऽसिचर्मभ्यां साहितो योद्धुमाजगाम । तमालोक्य शौरिः क्षुरनेमिना चक्रेण सद्यस्तच्छिरोऽपजहार । एवं निहत्य रिपुचक्रं वासुदेवो भगवान् जयध्वनिपुरस्सरो द्वारावतीं समाविवेश ।

इति श्रीकृष्णचरिते शाल्वादिवधनिरूपणं नाम अष्टाशीतितमः स्तवकः ॥ ८८ ॥

आसीत्सुदामाभिधानोवेद वेदाङ्गपारगो ब्राह्मणः । तस्य गुरुकुलवाससमये श्रीकृष्णचन्द्रेण साकं सख्यमभवत् । स स्वभावेन सरलो विरक्तप्रकृतिश्चाऽभूत् । दैवयोगाद्विद्वानपि स धनाढ्यतां नाऽधिगतवान् । अथैकदा दारिद्र्यदुःखदुःखिता सुशीलाख्या तत्पत्नी सख्योपालब्धा पतिमुपसृत्य सविनयं प्रोवाच । कान्त !

धनमानय मानय मद्वचनं यदि वांछसि बंधुजनादरणम् ।
न हि चेज्जहि देशममुं सहसा परितोऽट कमण्डलुदण्डधरः ॥

श्रूयते यदत्र भवतः साक्षाल्लक्ष्मीपतिः ब्रह्मण्यः शरणागतवत्सलश्च श्रीकृष्णचन्द्रः सहाध्यायी वर्तते । महाभाग ! विहाय संकोचं तमुपैहि । महानुभावः स बहुकुटुंबिने सीदते च भवतेऽवश्यं विपुलं द्रविणं संप्रदास्यति । अद्यश्वः सात्वतांपतिः स द्वारावत्यामेवाऽस्ते । धर्मधुरन्धरः स यदा निजभक्ताय स्वात्मानमपि समर्पयति तदा का कथाऽन्यपदार्थदानस्य ? एतदुपाकर्ण्य भार्यावचनं ब्राह्मणः प्रत्यवदत् । प्रिये !

निवासाय मही सर्वा भोक्तुमन्नं न दुर्लभम् ।
वस्त्राण्यपि मिलंत्येव किं धनेन प्रयोजनम् ॥ १ ॥

असंतुष्टा द्विजा नष्टा संतुष्टश्च महीपतिः ।
सलज्जा गणिका नष्टा निर्लज्जा च कुलांगना ॥ २ ॥

किं बहूक्त्या । अयं हि परमो लाभ उत्तमश्लोकदर्शनम् इति पर्यालोच्य गमनाय मतिमकरोत् । प्रिये ! विदुषी त्वं शिष्टशिक्षां स्वयमेव जानासि यत् रिक्तपाणिर्देवगुरुनृपतिसन्निधौ न गच्छेदिति । अस्तु तावत् । अप्यस्ति किंचिदुपायनम् ? देहि द्रुतम् । अहं हरिदर्शनाय सन्नद्धोऽस्मि । तच्छ्रुत्वा विप्रपत्नी स्वभाग्यं धन्यं मेने । साऽथ चतुरो मुष्टीन् पृथुकतण्डुलान् याचित्वा तान् चैलखंडेन बद्ध्वा च पत्ये प्रादात् । ततो विप्राग्रणीः तान् समादाय श्रीकृष्णदर्शनलालसो द्वारकां ययौ ।

ब्राह्मणो बालको वृद्धः कार्यार्थी यतिरेव च ।
अनाथाऽपि विनैवाऽज्ञां राजानं द्रष्टुमर्हति ॥

सोऽथ विलोक्य स्वर्णपुरीं चकितो बभूव । कृष्णसंदर्शन-लालसया द्विजस्त्रीणि गुल्मानि तिस्रकक्षाश्च समतीत्य हरेरसंख्य-गृहेष्वेकतमं सदनं प्रविवेश । तत्र प्रियापर्यंकस्थितो मधुसूदनो दूरात् अग्रजन्मानमालोक्य सहसोत्थाय संमुखीभूत्वा च दोर्भ्यां समालिंगितवान् । अथाऽऽनंदाश्रुपूर्णेक्षणोहरिः पर्यंके तं समुप-वेश्य स्वयं सख्युः समर्हणं कर्तुमारभत । तत्रादौ तत्पादौ प्रक्षाल्य तज्जलं शिरसा दध्रे। ततो वस्त्रगंधाक्षतपुष्पनैवेद्यादिभिः तं पूजयित्वा धेनुं विनिवेद्य च तस्मै स्वागतमपृच्छत् । तस्मि-न्नवसरे द्वारकाधीशस्य विलोक्य द्विजभक्तिं श्रीमती रुक्मिणी चामरेण लक्ष्मणा व्यजनेन च तं पर्यचरत् । ततः श्रीदाम-जनार्दनौ छात्रावाससंबन्धिनीर्ललिताः कथाश्चक्रतुः । अथ हरि-रुवाच। सखे! गुरुगृहादागत्य कृतसमावर्तनकर्मणा भवता सदृशी भार्योढा न वा? विद्वन्! त्वं तु प्रायो गृहेषु धनेषु च प्रीतियुक्तो नैव भवसीति मया विदितमेव ।

कच्चिद् गुरुकुले वासं ब्रह्मन्! स्मरसि नौ यतः ।
द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥

सखे! यद्यपि जनकः, उपनेता, विद्यादाता, अन्नदाता भयत्राता चेति पंचपितरः स्मृतास्तथाऽपि वर्णाश्रमिणां ज्ञानप्रदो गुरुरपि-

देववत् पूज्यः ।

नाऽहमिज्याप्रजातिभ्यां तपसोपशमेन च ।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥

भूदेव ! गुरुसमीपे निवसतामस्माकं बहूनि वृत्तानि जातानि । तेषु गुरुदारैरिन्धनाऽऽनयनार्थं प्रेरितानां महारण्यं प्रविष्टानां नो व्यतीतेऽपि वर्षाकाले यद् दुःसहं वातवर्षमभूत् तत् स्मरसि कच्चित् ? तच्छ्रुत्वा श्रीदामाऽवदत् । ब्रह्मण्यदेव ! कथं न स्मरामि । सूर्यास्ते दिशस्तमसाऽऽवृता अभूवन् । नतमुन्नतं च सर्वं स्थलं जलमयमभवत् । ततस्तत्र महाऽनिलाम्बुभिर्निहन्यमानाः परस्परं च गृहीतहस्ता वयं इतस्तत परिभ्रमणं कृत्वा श्रान्ता वटतले निषण्णाः । अथ प्रभाते शिष्यानन्वेषमाण आचार्योऽस्मद्दशां विलोक्य दयार्द्रहृदयोऽब्रवीत् । भो भोऽन्तेवासिनः ! यूयमस्मदर्थेऽतिदुःखिता जाताः । प्राणिनां स्वात्मा प्रेष्ठः । तमनादृत्य यूयं मत्सेवारता अभवत । एतदेव हि सच्छिष्यैः गुरुनिष्कृतम् कर्तव्यम् ।

तुष्टोऽहं भो द्विजश्रेष्ठाः ! सत्याः संतु मनोरथाः ।
छंदास्ययातयामानि भवंत्विह परत्र च ॥

अत्र श्रुतिः

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥

ततः शिष्यवर्गसमेतो गुरुः स्वाश्रममागत्य स्वपत्नीं प्राह। प्रिये!

श्रूयतां धर्मसर्वस्वं श्रुत्वा चाऽप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

महानुभावे! देशं, कालं, पात्रं, च विलोक्य छात्रायाज्ञा देया। तच्छ्रुत्वा सा बाढमित्युक्त्वा विदितवृत्ता च मुहुर्मुहुः शिष्यकृत्यं प्रशशंस॥

इति श्रीकृष्णचरिते श्रीकृष्ण श्रीदामसंवादनिरूपणं नाम एकोननवतितमः स्तवकः॥ ८९॥

अथ ब्राह्मणप्रियो भगवान् प्रहसन् प्रियं प्राह। मित्र! भवता गृहात् किमुपायनं समानीतम्? भक्तैरण्वप्युपाहृतं प्रेम्णा मे भूर्येव भवेत्। तथाऽभक्तैरधिकमपि समर्पितं मे परितोषाय नोपकल्पते।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥

एवमुपाकर्ण्यऽपि प्रभुवचनं व्रीडितो विप्रः पृथुकप्रसृतिं लक्ष्मीपतये न प्रायच्छत्। अथ सर्वज्ञो भगवानचिंतयत्। पुरा नाऽयं श्रीकामो मामभजत्। किं तु पत्न्या प्रेरितोऽत्र समायातः। अवश्यमेवाऽस्मैऽसाधारणं वैभवं देयमिति निश्चित्य किमिदं किमिदमिति व्याहरन् वसनाद्बद्धान् पृथुकतण्डुलान् स्वयं जहार। सखे!

यथाऽनेनोपहारेण मे प्रीतिर्भवति तथा न षट्पंचाशता भोगेनेति निगद्य मुष्टिमात्रमन्नं चखाद । ततो यावद् द्वितीयां मुष्टिं जग्धुमाददे तावल्लक्ष्मणा श्रीपुरुषोत्तमस्य हस्तं सहसा जगृहे । साऽथ प्रोवाच । दयानिधेऽलमेतावता । सर्वसम्पद् भवताऽस्मै दत्तैव । ततो ब्राह्मणोऽच्युतमंदिरे भुक्त्वा पीत्वा रजनीमुषित्वा चाऽऽत्मानं स्वर्गस्थं मेने । अथ प्रभाते पथि श्रीकृष्णेनाऽनुगम्य कृपया पुनरागंतव्यमिति विनयोक्त्याऽऽनंदितो ब्राह्मणः स्वगृहं प्रतिजगाम । सोऽथ मार्गे चिन्तयितुमारेभे । अहो ! ब्रह्मण्य-देवस्य ब्रह्मण्यता मयाऽद्य दृष्टा ।

अधनोऽयं धनं लब्ध्वा माद्यन्नुच्चैर्न मां स्मरेत् ।
इति कारुणिको नूनं धनं मेऽभूरि नाऽददात् ॥ १ ॥
क्काऽहं दरिद्रः पापीयान् क्क कृष्णः श्रीनिकेतनः ।
ब्रह्मबंधुरितिस्माहं बाहुभ्यां परिरंभितः ॥ २ ॥

अथवा किं विचारेण । अहमपि तु कृष्णं धनं नाऽयाचे । उक्तं च—

संतोषामृततृप्तानां यत्सुखं शांतचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥

श्रान्तः प्रियाजुष्टे पर्यंके निवासितः । बालव्यजनहस्तया महिष्या च वीजितः ! किं बहुना । देववत् परिपूजितः किमतःपरं भाग्यम् ! मानो हि महतान्धनम् इति महान्तो व्याहरंतीति

विचिन्तयन् कतिपयैर्दिनैः स्वग्रामान्तिकमाजगाम । ततः स ददर्श विचित्रोद्यानैः शोभिताम् द्विजकुलैः कूजिताम्, अलंकृतां च प्रफुल्लकमलया पुष्करिण्या स्वजन्मभूमिम् । अहो किमिदम् जातम् ? कस्येदं स्थानमिति मीमांसमानं देवप्रभा नरा नार्यश्च भूयसा गीतवाद्येन महाभागं तं प्रत्यगृह्णन् । अत्रान्तरे षोडश-शृंगारसमेता सखीभिः परिवृता च लक्ष्मीकल्पा ब्राह्मणी तूर्णं प्रासादान्निश्चक्राम । साऽथ प्रेमपुलकिताऽऽनंदाश्रूणि मुंचन्ती पतिचरणयोः पतित्वा मनसैव परिषस्वजे । एवमालोक्य ब्राह्मणः सुखार्णवे निमग्न इव बभूव । सोऽथ लोकपालोपमं विभवं विलोक्य पत्नीं प्राह । प्राणप्रिये !

तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः ।
ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥

महाभागे ! विभूतिर्लब्धा । अद्यप्रभृति देवपूजां कुरु । अतिथिसेवां मा विस्मर । प्रत्यहं गोदानं कुरु । अनाथरक्षणं स्वकर्तव्यं गणय । किं बहूक्त्या । यस्य प्रसादादीदृशी विभूतिः संप्राप्ता तं वासुदेवं सततं ध्यायंती कल्याणं लभस्वेति निगद्य कृतार्थः सुदामा हरियशो गायन् सभार्यः सपुत्रपौत्रश्च चिरं ननन्द ।

इति श्रीकृष्णचरिते सुदामासमृद्धिप्राप्तिनिरूपणं
नाम नवतितमः स्तवकः ॥ ९० ॥

अथैकदा द्वारावत्यां वसतो रामकृष्णयोर्महान् सूर्योपरागोऽभवत् । तं ज्ञात्वा श्रेयोविधित्सया लोकाः पुरस्तादेव सर्वतः स्यमंतपंचकं ययुः ।

यः पुण्यं कुरुते तीर्थे ग्रहणे चन्द्रसूर्ययोः ।
सोऽक्षयं फलमाप्नोति कलंकाच्च विमुच्यते ॥

तस्मिन्नवसरेऽक्रूरवसुदेवादयः सपत्नीका यादवा द्वारकातो नंदाद्या गोपाश्च सदारा व्रजमण्डलात् समाजग्मुः । ततस्ते मिथो मिलित्वा नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरश्च मुदमवापुः । अत्रान्तरे कुंती वसुदेवमुवाच । आर्यभ्रातः ! अहमात्मानमकृताशिषं मन्ये । यद् भवादृशा अपि सत्तमा आपत्सु मद्वार्तां नाऽनुस्मरथ । तच्छ्रुत्वा शौरिः प्रत्यवदत् ।

अंब ! माऽस्मानसूयेथा दैवक्रीडनकान्नरान् ।
ईशस्य हि वशे लोकः कुरुते कार्यतेऽथवा ॥

अथ रामकृष्णौ पितरौ परिष्वज्य प्रणम्य च प्रेम्णा साश्रुकण्ठौ तूष्णीमेवासतुः । ततो यशोदानंदराजौ द्वावेवांकमारोप्य पुत्रविश्लेषजन्यं शोकं जहतुः । अथ रोहिणीदेवक्यावपि यशोदया सह मेलनं कृत्वा परमां प्रीतिमवापतुः । ततो गोप्योऽपि चिराद् दृष्टं श्रीकृष्णं नेत्रद्वारैर्हृदये प्रवेशितं गाढमाश्लिष्य योगिनामपि दुर्लभं तद्भावमध्यगमन् ।

तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ।
ब्राह्मणेभ्यो ददुर्धेनूर्वासः सुग्रुक्ममालिनीः ॥

ततस्ते कृष्णेऽस्माकं भक्तिरस्त्वित्यभिप्रेत्य ब्राह्मणेभ्यः स्वाद्वन्नं ददुः । अथाऽन्येद्युः हरिः आत्मभावमापन्ना गोपीर्विविक्त उपसंगतः पृष्ट्वाऽनामयमुवाद । सख्यः ! अपि स्मरथ ? बंधुहितं कर्तुं व्रजाद् गतान् विलंवितांश्चाऽस्मान् ।

यथा वायुर्घनानीकं तृणं तूलं रजांसि च ।
संयोज्याऽऽक्षिपते भूयस्तथा भूतानि भूतकृत् ॥

मयि भूतानां भक्तिरमृतत्वाय कल्पते खलु । यथा घटशरावादीनि चतुर्विधशरीराणि स्वकारणेष्वाकाशादिषु वर्तंते तथा जीवाऽऽत्माऽपि स्वरूपेण व्याप्तस्तिष्ठति । एवमेव जडचेतनात्मकं जगत् परात्मनि मयि आभातं पश्यत । इत्थं श्रीकृष्णेन शिक्षिता गोप्यः तदनुस्मरणध्वस्तजविकोशाः सर्वगतं भगवन्तमवापुः ।

आहुश्च-ते नलिननाभ ! पदारविन्दं
योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलंबं-
गेहं जुषामपि मनस्युदियात्सदा नः ॥

इति श्रीकृष्णचरिते बंधुसमागमनिरूपणं नाम
एकनवतितमः स्तवकः ॥ ९१ ॥

अत्रान्तरे बलरामः कुरूणां पाण्डवैः सह युद्धोद्यमं श्रुत्वा प्रागेव तीर्थाऽभिषेकव्याजेन माध्यस्थभावमवलंब्य च द्वारकातो विनिर्ययौ। सोऽथ प्रभाते स्नात्वा देवर्षिपितृमानवान् संतर्प्य च ब्राह्मणसंवृतः प्रतिस्रोतं सरस्वतीं प्रययौ। ततः स पुष्करप्रयाग-गंगायमुनापृथूदकादीनि तीर्थानि गत्वा यत्र शौनकादयः सत्रमासते तत् नैमिषारण्यमगमत्। ततो व्रतस्था मुनयोऽच्युता-ग्रजमागतमालोक्य सहसोत्थाय च तं विधिवत् समानर्चुः। तस्मिन्नवसरे व्यासशिष्यो रोमहर्षणो नाऽऽसनं तत्याज न च समुत्थाय प्रणत्या वासुदेवं समपूजयत्। एतदालोक्य कुपितो हलधरोऽब्रवीत्। अहो! प्रतिलोमजोऽयं सूतो धर्मपालान् विप्रान् अस्मांश्च अतीत्य दिव्यासनमधितिष्ठति। अतः पूज्य-पूजातिक्रमणकर्ताऽयं दुर्मतिर्वधमर्हतीत्यभिधाय करस्थेन कुशाग्रेण तमहनत्। एतदालोक्य सर्वे मुनयो हाहाकारं चक्रुः। तेऽथ संकर्षणं प्रोचुः। यदुनंदन! प्रसन्ना वयमस्मै ज्ञानयज्ञसमाप्ति-पर्यंतं व्यासासनं प्रायच्छाम। अजानता भवता यथाऽब्राह्मणवधः क्रियते तथाऽस्य वध आचरितः। सम्प्रति लोकसंग्रहार्थमस्य पापस्य प्रायश्चित्तं कर्तुमर्हति। तच्छ्रुत्वा रौहिणेयः प्रोवाच। अस्तु। ततः श्रुत्वा मुनिजनप्रार्थनां वासुदेवो रोमहर्षण-पुत्राय उग्रश्रवसे कथाव्यासाधिकारं प्रादात्। अत्र श्रुतिः—

अंगादंगात् संभवासि हृदयादधि जायसे ।
आत्मा वै पुत्रनामाऽसि स जीवशरदः शतम् ॥

ततस्तुष्टा मुनयः प्रोचुः । राजन् ! भूपालास्तु प्रजाकंटकशोधनेन पवित्रा भवंति । वनेऽस्मिन् इल्वलसुतो विल्वलो नाम दानवोऽस्ति । स दुरात्मा पर्वणि पर्वणि अत्रागत्याऽस्माकं यागं दूषयति । कृपया तं पापं जहि । एतदेव नः परं शुश्रूषणमस्ति । एतदुपाकर्ण्य मुनिवृन्दवचनं तालाङ्को बाढमित्युक्त्वा च तत्रैव न्यवसत् । अथागतायां पूर्णमास्यां यज्ञशालायां वल्वलेन विनिर्मितं पांसुवर्षणं वीक्ष्य रामो दैत्यदमनाय हलं मुसलं च सस्मार । अथ ते तूर्णमुपतस्थतुः । अथ बलभद्रो बृहत्कायं भिन्नांजनचयोपमं च तं हलाग्रेणाकृष्य मुशलेनाऽहनत् । ततः स निर्भिन्नललाटोऽसृक् समुत्सृजन् वज्रहतः शैल इव धरण्यां निपपात । अथ तुष्टा महर्षयस्तस्मै अम्लानपंकजां मालां दिव्ये वाससी शुभ्राण्याभरणानि च प्राददुः । ततस्तैरनुज्ञातः प्रलंबघ्नो ब्राह्मणैः सह कौशिकीमगात् । ततः सरयूमनुलोमेन च प्रयागमुपगम्य कृतस्नानो देवर्षिपितॄंस्तर्पयामास । अथ पुलहाश्रमं गत्वा शालग्रामशिलार्चनमकरोत् । अथ गोमतीं गण्डकीं च गत्वा विपाशां शोणं च ददर्श । सोऽथ गयामेत्य जीवत्पितृकत्वेन श्राद्धाऽधिकाराऽभावात् ब्राह्मणभोजनादीनि पुण्यकार्याण्यकरोत् । ततो गंगासागरसंगमे स्नात्वा सेतुबंधतीर्थमगमत् । ततो महेन्द्राद्रौ

श्रीपरशुरामं दृष्ट्वा तं प्रणम्य च कृतार्थोऽभवत् । ततो गोदावरीं, पंपां, भीमरथीं कावेरीं च दृष्ट्वा श्रीशैलं प्राप । तत्र स्कन्दं विलोक्य मुमुदे । अथ कृतमालां ताम्रपर्णीं च विलोक्य मलयाचलं समारुरोह । तत्राऽगस्त्यं प्रणम्य तुतोष । ततो मुनिना प्रेरितो दक्षिणार्णवसमीपस्थां कन्याख्यां दुर्गां ददर्श । अथ पंचाप्सरसं नाम सरः समवाप्य सस्नौ । तत्र द्विजेभ्यो गोदानं दत्त्वाऽतिजहर्ष । ततः केरलादीन् देशान् दृष्ट्वा गोकर्णक्षेत्रमगमत् । तत्र शिवदर्शनं कृत्वा परमान्तुष्टिमवाप । अथ तापीं पयोष्णीं च दृष्ट्वा दण्डकारण्यं प्रविवेश । ततो रेवां स मनुतीर्थं समुपस्पृश्य प्रभासमागत्य च विशश्राम ।

इति श्रीकृष्णचरिते बलभद्रतीर्थयात्रानिरूपणं नाम द्विनवतितमः स्तवकः ॥ ९२ ॥

अथैकदा दुर्योधनधनंजयौ रणे साहाय्यं याचितुं युगपदेव द्वारावतीमियतुः । ततो हृषीकेशप्रासादमवाप्य व्याजनिद्रितस्य यदुपतेः चरणसन्निधौ पार्थः शीर्षस्थाने च सुयोधनः समुपाविशत् । अथाऽपरेक्षीरार्णवोपमे स्फटिकपर्यंके शयानो हरिर्यावदुत्तिष्ठते तावत् कृतांजलिं फाल्गुनमपश्यत् । ततो हरिमुवाच पार्थः । नाथ ! कृतेष्वपि नानोपायेषु युद्धशांतिरशक्या । तच्छ्रुत्वा हरिरुवाच । अहमुदासीनोऽस्मि । अतः कस्याऽपि पक्षं



यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

नाऽश्रयिष्ये । यदि सारथिं कर्तुमिच्छसि तर्हि स्वीकरोमि युद्धे समागमनम्। अथाऽर्जुनो वाढमित्युक्त्वा कृतार्थो बभूव। अत्रान्तरे धार्तराष्ट्रोऽवदत्। यदुपुंगव! प्रागागतो भवदीयं साहाय्यमहमपि वांछामि। तच्छ्रुत्वा हरिरुवाच। राजन्! श्रुतवानसि यन्मया निगदितम्। यद्यपि भवान् पूर्वमायातस्तथाऽपि प्रथमदर्शनात् श्वेतवाहन एव मामवृणोत्। देव! तुलायामेकस्यामहमयोद्धा। द्वितीयस्यां च चतुरंगिणी सेना। तच्छ्रुत्वा देशकालज्ञो राजाऽक्षौहिणीमेव नीत्वाऽतुष्यत्। ततो यदुपतिनिदेशेन कृतवर्मा ससेनो राजानमनुससार। अथ निवर्तमानं सुयोधनं भीष्मोऽपृच्छत्। कुरुराज! केशवः कं पक्षमशिश्रयत? एतदुपाकर्ण्य राजाऽवदत्। सैन्यं पर्याप्तं मह्यं दत्त्वा केवलं सारथ्यमेव पार्थस्याङ्गीचकार द्वारकाधीशः। अथाऽनुभवी प्रोवाच भीष्मः। राजन्! मम वचनमन्यथा मा गणय।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥

इति श्रीकृष्णचरिते रणनिमंत्रणप्रदर्शननिरूपणं नाम त्रिणवतितमः स्तवकः॥ ९३॥

अथ नियतदिने गरुडध्वजः सात्यकिचेकितानादिभिर्युतः पाण्डवशिविरमयासीत्। तत्र पार्थादिभिः सत्कृतोऽतितुष्टोऽभवत्।

अथ युधिष्ठिरो मंत्रणागारे हरिमुवाद । मातुलेय ! यद्यपि धीमान् पुरोहितः सदुपदेशेन प्रबोधितवान् दुर्योधनम् । परंतु सिकतासु वारिबिन्दव इव वृथैवजातास्ते सदुपदेशाः । त्वमसि चतुरचूड़ामणिः । अतः कठिनां समस्यां त्वमेव पूरयितुं समर्थः । तच्छ्रुत्वा जनार्दनोऽवदत् । अस्तु । लोकहितार्थमहमिदानीमेव यामि । अथ कौंतेयोऽब्रवीत् । केशव ! क्षुद्रबुद्धिर्दुर्योधनः पापमित्रसाहाय्येन यथाऽस्मानपीडयत्तथा कदाचित् त्वां बाधेतेति ब्रुवाणं मधुसूदनो जगाद । राजन् ! मा कुरु संशयम् । नाऽसौ प्रगल्भते । यदि मोहमुपगताः कुरुराजसेना असाम्प्रतं कुर्युस्तदा मत्क्रोधकवलीकृता मुहुर्तान्नभविष्यंतीति ब्रुवाणे विष्वक्सेने राजाऽभ्यधात् । जगद्गुरोस्ते कः शिक्षागुरुतां प्रयाति ? किं बहुना । भवानेव संदेहे प्रमाणमिति निगद्य पुनः प्राह । श्याम-सुंदर ! त्वया माता कुंती त्ववश्यमेव समाश्वासनीया । अथ प्रस्थातुकामं माधवं भीमार्जुननकुलसहदेवा अपि प्रोचुः । यदुपते ! कदा वयं कृतार्थं पुनरागतं च त्वां द्रक्ष्यामः । देव ! राजचक्रे सुयोधनं तत्तद्ब्रूयाः येनाऽसावस्माभिः सह प्रशममेव समभिलषेत् ? अत्रान्तरे वाष्पपर्याकुलेक्षणा कृष्णाऽवदत् । व्रजराज ! सभायां दुःशासनेन तथाकृष्टामपि मामवलोक्य निर्वैराः पाण्डवाः संधिमिच्छंति । यथा चीरहरणसमये त्वं मम लज्जां रक्षितवानसि तथाऽधुनाऽपि वेणीमर्यादां रक्ष । तच्छ्रुत्वा

हरिरुवाच । क्षत्रिये ! माऽभैषीः । त्वमप्यचिरात् प्रत्यग्रभग्नवलया रिपुस्त्रियो द्रक्ष्यसि । सोऽथ मैत्रदैवते मुहूर्ते ससात्यकिर्मेघनादेन रथेन प्रययौ । ततो मार्गे भार्गवादयो मुनयोऽपि सौहार्दात्तमनुसस्रुः । अथ दिनान्ते बृहत्कूले मुक्तवाहनो हरी रात्रिं निनाय । अथ धृतराष्ट्रो दूतैर्हरेरागमनं श्रुत्वाऽतितुष्टो भीष्मप्रमुखान् पूज्यान् सुयोधनादीन् सुतांश्च समाहूय प्रोवाच । महाशयाः ! भगवान् मध्वरिः प्रातरस्मान् समेष्यतीति किंवदन्ती भुवि प्रसृता । अतोऽमूल्यानिरत्नानि हस्त्यश्वस्यंदनं च नीत्वा वर्त्मनि मंत्रिणो हरिं प्रत्युद्व्रंत्विति ब्रुवाणे राजनि भीष्मद्रोणकृपविदुरा भूयो भूयो भूपविचारं प्रशशंसुः । अत्रान्तरे विहस्य दुर्योधनोऽब्रवीत् । तात ! केशवोऽतोऽधिकामपि सपर्यामर्हतीति सत्यं किन्तु सोऽस्मान् संधिप्रस्तावेन युद्धसमारंभभीतान् मंस्यते । अतः कथय किमस्य समाधानम् ? असावेकाकी शस्त्रशास्त्रविद्याविचक्षणः पाण्डवपृष्ठपोषकोऽस्ति । अतएवैकाकिनमेनं निगृह्य बंधनालये स्थापयामीति मे गूढोऽभिप्रायः । तच्छ्रुत्वाऽतिखिन्ने धृतराष्ट्रे भीष्मोऽवदत् । राजन् ! नेदं कुलव्रतं भारतानाम् । नाद्यावधि केनाऽपि कौरवेण कृत ईदृशः कस्याऽपि विश्वासघातः । देव ! पैशून्यपण्डितोऽयं तव तनयः शलभ इव कृष्णकृष्णवर्त्मानमासाद्य सद्य एव कथाशेषतां यास्यतीत्यभिधाय संरंभशिथिलांशुको देवव्रतो राजभवनान्निश्चक्राम । शेषा च सभा किंकर्तव्यविमूढा

बभूव । अथ प्रभाते कौस्तुभधारी कंसारिः सर्वसमृद्धिसमन्वितं कुरुराजनगरं प्रविवेश । सोऽथ घंटापथे पौरकन्याभिः लाजैः, वनिताभिः कुसुमैः, नागरिकैश्च मालादिभिः सत्कृतो महेन्द्रभवनोपमं हर्म्यमवाप्य स्वर्णसिंहासनस्थमाम्बिकेयं ददर्श । ततः स नृपतिपुरोधसा कल्पितार्पितां सत्कृतिं समवाप्य संतुतोष । अथ हरिरुवाच। राजन्! धृतिं धारय । श्वः कथा भविष्यतीत्यभिधाय प्रस्थितो विदुरगृहस्थां कुंतीं प्रियवाक्यैः समाश्वासयामास । ततो भगवान् दुर्योधनप्रासादं प्रविवेश । अथ तत्र मिथ्या प्रणयितां दधानेन तेन भोक्तुं निमंत्रितो वासुदेवोऽब्रवीत् । नरनाथ !

संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः ।
न च त्वं प्रीयसे राजन् ! न चैवाऽपद्गता वयम् ॥

एवं युक्त्या तन्निमंत्रणं विनिवार्य विदुरान्तिकमगात् । तत्र विदुरपत्न्या विनिवेदितं शाकादिकमेव भुक्त्वा नीतिनिपुणेन तेन साकं विचित्राः कथाः कुर्वन् दिनं निनाय । अथ रात्रौ महामतिर्विदुरो नानोपाख्यानैश्चिन्ताग्रस्तं राजानं प्रबोधयामास । अथाऽन्येद्युः समुनिवृन्दः शौरिः भीष्मादिभिः समन्वितामाम्बिकेयेन च विभूषितां राजसभामाजगाम । तत्र पुण्डरीकाक्षं समुपागतं समाकर्ण्य सकर्णो दुर्योधनोऽपि समागत्य निजासनमलंचकार । अथ समासीनेषु सभ्येषु हरिरुवाच । भो भो राजाधिराजपुरस्सरा

महानुभावाः ! जगद्विनाशचकितैरस्माभिर्यदिहोच्यते तद्वैचित्रवीर्य भीष्मद्रोणकर्णदुर्योधनदुःशासनादिभिः सावधानतया श्रोतव्यम् । हितोपदेशवचरतावदेव प्रीत्या समभिधीयते यावत् संसदि तत् प्रत्याख्यानविकुंठतां नायाति । गुणेन कुलं कुलेन च गुणो विभूषितो भवति । राजन् ! विशुद्धे शशांककुले समवतीर्य तनयस्नेहमोहेन कथमुत्पथमास्थितोऽसि । पुरा सगरययातिनहुषादयोऽनेकेऽपि चक्रवर्तिनो नृपा अभूवन् किन्तैःसह पृथ्वीयं गता ? अत्र श्रुतिः "मा गृधः कस्यस्विद्धनम्" । उक्तं च—

मांधाता च महीपतिः कृतयुगालंकारभूतो गतः ।
सेतुर्येन महोदधौ विरचितः क्वाऽसौ दशास्यान्तकः ।।
अन्ये चाऽपि नृगादिभूमिपतयो याता दिवं भूपते !
नैकेनाऽपि समं गता वसुमती मन्ये त्वया यास्यति ।।

अपरं च—

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य पर्याप्त्यै इति कृत्वा शमं व्रजेत् ।।

लोभं पापमूलं मत्वा तं परित्यज । क्षणभंगुरा इमे भोगाः । कारुणिका नृपा रजोगुणासक्तिं न सेवंते । जगति ये निर्लोभविभवार्थिनः सत्पक्षपातसक्ताश्च भवंति तेषां पदे पदे मित्राणि विद्यन्ते । उक्तं च नीतिनिपुणैः ।

यांति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुंचति ॥

बांधवैः सहैव विभूतिभोगः सुखं जनयति। न्यायार्जितेन धनेनैव गृहस्थाश्रमः सुखप्रदः स्वर्गोपमश्च प्रथितः। येषां रत्नमुकुटं विनयः मणिकुण्डले सच्छास्त्रं त्यागश्च कंकणं तेषां जडमण्डनैः किम् ? शमशीलाः पाण्डवाः पंचभिरेवग्रामैः संतोषमेष्यंति। अन्यथा भूमिपालानां भ्रातृणां च विनाशकालः समुपस्थितः। भूपाल! संशयपंजरं युद्धं महात्मानो न प्रशंसंति। उपेक्षितोऽयं समयो वेणुसंघर्षजनितवह्निवल्लोकान्दहेत्। यतो मित्रबंधुक्षयात् जयोऽपि पराजयोपमोऽस्ति। विनष्टेऽस्मिन् राजचक्रे समग्राऽपि मेदिनीयं वीरविहीना भविष्यति। एषां अप्सरोपमा ललना वैधव्याग्निदग्धाः कां गतिं यास्यंतीति शोचत। अङ्गारकारणात्कैश्चंदनचम्पकवनानि दह्यंते ? पृथिव्यां कोऽसौ धर्मात्माऽस्ति यो युधिष्ठिराज्ञां माल्यवन्नांगीकरोति ? मातंगकुंभस्तनीं चामरग्राहिणीं च राजलक्ष्मीं भीमसेनेन विना कोऽन्यः सेवितुं शक्नोति ? अद्याऽपि हिरण्यपुरवासिनां गेहेषु पार्थचाप-यशो ललनाभिः सहर्षं गीयते। किं बहुना। यस्य पराक्रमं साक्षात् त्रिपुरान्तकोपि प्रशंसति। प्रज्ञानयन! सत्यमवलम्ब्य सर्वसंरक्षणं कुर्विति भारतहितां भारतीं कृष्णभाषितामप्यकृष्णां श्रुत्वा सर्वे मनसा कृष्णमपूपुजन्। ततः कण्वनारदजामदग्न्यप्रभृतयो मुनिगणा

अपि श्रीकृष्णाशयमवलंब्य नानोपाख्यानैर्धृतराष्ट्रं दुर्योधनं च प्रबोधयामासुः । निशम्यैवं हितावहमुपदेशं गांधारीधृतराष्ट्रौ सुयोधनमादिशताम् । वत्स ! श्रीकृष्णशिक्षां मानय । पितामहवाक्यं पूजय । महर्षीणां च शिक्षणं मत्वा स्वकुलं मित्रकुलं च विनाशाद्रक्ष । वृथा दुराग्रहमवलंब्य पार्थकोपाग्नौ बालपतंगवत्पतित्वाऽऽत्मानं मा नाशय । संप्रति पाण्डवैः संधाय कीर्तिमहापयन् सुखं च लब्ध्वा चिरंजीव । स्मर स्मर पाण्डवसौजन्यम् । ये विस्मृत्यापकारान् अधुनाऽपि तव हिताय प्रयतन्ते । पश्य पश्य राज्यार्धभागिनस्ते पंचैव ग्रामान् नीत्वा संतुष्टा भवंति । पितृदायं तेऽभिवांछंति तत्र तेषां को दोषस्त्वमेव विचिन्तयेति निगद्य प्रत्युत्तरश्रवणेच्छया वृद्धौ विरेमतुः । तच्छ्रुत्वा प्रस्फुरिताधरपल्लवस्ताम्रलोचनश्च दुर्योधनो जगाद । पूज्यौ ! क्षत्रियेष्वग्रजपुत्र एव पट्टाधिकारी भवति । युधिष्ठिरोऽवरजपुत्रोऽस्ति । अतो न सिंहासनाधिकारी । अपरं च नेयं वैश्यसभा यत्र तुलयैव कार्यं भवति । क्षत्रियसभायां तु युद्धेनैव जयपराजयनिर्णयो दृष्टः श्रुतश्च । लोकेऽवश्यं भाविनो भावा अनिवर्तिन एव तिष्ठंति । किं बहूक्त्या ।

कातराः संधिमिच्छंति युद्धकाले ह्युपस्थिते ।
सूच्यग्रं नैव दास्यामि विना युद्धेन केशव ! ॥

इत्यभिधाय कर्णानुमत्या भगवन्तं निग्रहीतुं प्रायतत । अत्रान्तरे

प्रतिभावान् सात्यकिस्तेषां तदिङ्गितं विज्ञायाऽऽकृष्णकर्मणे कृष्णाय तद्रहस्यं समावेदयत् । अथ सावधानः कंसारिः कोपानलज्वाला-जटाभिस्तां सभां समापूरयन् घोरं वपुर्दर्शयामास । तस्मिन्नवसरे भास्वरत्विषस्तस्य सर्वदेवमये शरीरे भयानकत्वमालोक्य तत्रत्या महीपाः सहसा मुमुहुः । एवमधोक्षजो भगवान् विश्वरूपं दर्शयित्वा मुनिमण्डलीं समामंत्र्य च राजमंदिराद्बहिराजगाम । ततो गरुडध्वजेन रथेन विदुरावसथं गत्वा कुंतीं ददर्श । साऽथ भ्रातृजं परिष्वज्य गद्गदगिराऽभाषत । कृष्ण ! त्वया मद्वचसा धर्मनंदनो वाच्यः । यद् ब्रह्मसुलभमार्जवं क्षात्रिये त्वयि न शोभते । पुरा विदुरा समरपराङ्मुखं सुतमेवमुपदिदेश ।

क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥

एवं पृथावचनमाकर्ण्य हरिः साधुवादैस्तां समाश्वास्य गुप्तरीत्या कर्णान्तिकं गत्वा च प्रोवाच । दानवीर ! त्वं त्रैलोक्यचक्षुषा रविणा कुंत्यां जातोऽसि । अतस्त्वमपि पाण्डुमहीपतेः क्षेत्रजसुतोऽसि । संप्रति विहाय कौरवान् सोदरान् पाण्डवान् समुपैहि । ततोऽमरोपमैस्तैः सह शक्रइव वसुमतीं भुंक्ष्व । श्रुत्वैतत् केशववचनं कर्णोऽब्रवीत् । यदुराज ! अनुगृहीतोऽस्मि हितशिक्षया । अहमपि परम्परयाऽऽत्मसंभवं वेद्मि किन्तु येन साकमहं सर्वसुखमन्वभवं तं सहृदयं दुर्योधनं कथं त्यक्तुमुत्सहे ? लोकेऽ-

स्मिन् विश्वासघातसमोऽपराधो नाऽस्ति। अच्युत ! किरीटिना मयि हते भीमेन च दुर्योधने निपातिते युधिष्ठिरोऽवश्यमेव कृत्स्नां भुवं समधिगामिष्यति । अद्यैव मया स्वप्ने धवलाम्बरो युधिष्ठिरोऽस्थि-संचयसमारूढः पायसं च भुंजानो दृष्टः । देव ! मत्कथाऽजात-शत्रवे सर्वथा नाऽख्येया । अन्यथा स मामग्रजं मत्वाऽखिलमपि साम्राज्यं तृणवत् त्यक्ष्यति । वैकुण्ठ ! विधातृविहितेऽस्मिन् क्षत्रक्षेत्रक्षये वीरव्रताद् पाण्डवान् विजयशालिनो द्रक्ष्यसीत्यभिधाय कर्णो विरराम । निशम्यैतत् कर्णवचनं हरिः पुनः पुनस्तस्यौदार्यं प्रशंसन् सात्यकिं नीत्वा च दारुकप्रेरितैर्हयैः सत्वरमेव पाण्डव-शिविरमाजगाम । अथ भगवान् पाण्डवानुपेत्य दुरन्तरं कौरवा-ऽभिप्रायमावेदयामास । तच्छ्रुत्वाऽजातशत्रुसेनासु सत्त्वोत्साहस-मन्वितो विजयारंभविभ्रम-संरंभो बभूव ।

इति श्रीकृष्णचरिते कुरुपाण्डवयुद्धसमारंभनिरूपणं नाम चतुर्णवतितमः स्तवकः ॥ ९४ ॥

अथ प्रभाते युधिष्ठिरः श्रीकृष्णानुमत्या पावकजातं धृष्टद्युम्नं सेनापतिं परिकल्प्य ससैन्यः कुरुक्षेत्रं प्रतस्थे । ततः सोत्साहं परिसर्पतो राजसमुद्रस्य तस्य वाहिनीसंघर्षप्रभवो महास्वनो दिवलोकमपि समापूरयामास । अथ कृष्णपुरोगमाः पाण्डवाः कुरुक्षेत्रमासाद्य हिरण्वतीतीरे स्वस्थानानि परिकल्पयामासुः ।

ततः कृष्णार्जुनादेशमवलंब्य विराटद्रुपदप्रभृतयो राजानोऽपि परिखापरिरूढानि शिविराणि रचयित्वा सुखेन तस्थुः। अथ सैनिका अपि चमूपतिनिर्दिष्टस्थानेषु निजनिजहस्त्यश्वरथं प्रतिष्ठाप्य निश्चिन्ता युद्धप्रतीक्षां कर्तुमारेभिरे। अत्रान्तरे कुरुपतिरपि भूभुजसहस्रवृतः पृथ्वीं प्रकम्पयन् रणक्षेत्रमाजगाम। सोऽथ विलोक्य नरेश्वरान् द्रोणकृपकर्णसमेतो भीष्ममुपसृत्य प्रोवाच। पितामह! महारणेऽस्मिन् अपरः कार्तिकेय इव शक्तिमान् भवानेव नः सेनानीरस्तु इत्यभिधाय तमभिषिषेच।

अथ धर्मक्षेत्रे कुरुक्षेत्रे सैन्येष्वेकीभूतेषु हृषीकेशः पांचजन्यं शंखं दध्मौ धनंजयश्च देवदत्तं शंखमधमत्। तच्छ्रुत्वा भीष्मद्रोणकृपकर्णसुयोधना अपि शंखनादं चक्रुः। अत्रान्तरेऽर्जुनो विलोक्य विपक्षे गुरुजनान् करुणया गोविन्दमभाषत। अहोवत! वयं महत्पापं कर्तुं व्यवसिताः। यद्राज्यसुखलोभेन स्वजनं हन्तुं समुद्यताः। एवं शोकविवशं पार्थं दृष्ट्वा मधुसूदनोऽभाषत। सखे! धैर्यसारस्य ते केयमकाण्डे कायरता? मानधनस्त्वं धर्म्यां कुलस्थितिं सर्वथा हातुं नार्हसि?

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नाऽनुशोचंति पण्डिताः॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥

एवं विविधैः शास्त्रवचनैः प्रबोधितः पार्थः क्षात्रधर्ममवलंबमान आत्मानं षड्विकाररहितं मेने । सोऽथ निमित्तमात्रमात्मानं शत्रुहन्तारं मत्वा योद्धुं रथमारुरोह । ततो भवितुमारब्धं युद्धम् । श्रीजामदग्न्यशिष्यप्रेरितविशिखावली समुल्ललास । समवाप्यावसरं शांतनवो धनंजयमभ्यधावत । अथ शरवृष्टिभिर्दुर्लक्ष्ये संग्रामे परस्पराऽभिहतसैन्यं जन्यमभूत् । ततः प्रथमेऽह्नि भीष्मकृतं सैन्यसंहारं दृष्ट्वा युधिष्ठिरो मुक्तकण्ठं भीष्मपराक्रमं प्रशशंस । अथ देवव्रतो द्वितीयेऽह्नि युधिष्ठिरेण सह, तृतीये दिवसे सात्यकिना, चतुर्थे वासरे भीमसेनेन, पंचमे दिने नकुलेन, षष्ठे घस्रे सहदेवेन, सप्तमे दिने विराटेनाऽष्टमे नवमे दिवसे च द्रुपदेन साकं युयुधे । ततः प्रत्यहं देवव्रतेन क्षीयमाणं हस्त्यश्वरथपादातं स्वसैन्यं विलोक्य सर्वथा युधिष्ठिरो जयाशां तत्याज । एवं पाण्डवदले विदीर्णे लज्जामुत्सृज्य च पलायमानेषु भूपेषु केशवोऽर्जुनमादिदेश । पार्थ ! सत्यसंधं भीष्मं जहि । तच्छ्रुत्वा क्षात्रधर्मं निन्दन् कौंतेयः पितामहमुपाद्रवत् । एवं शरवर्षिणं पार्थं दृष्ट्वा भटा निवृत्य पुनर्युयुधिरे । अथ भीष्मः शरपंजरप्रयोगमकरोत् । तत्र कंसारिर्भीष्मचापच्युतसायकैश्छादितं फाल्गुनं वीक्ष्य कोपाकुलो रथमुत्सृज्य रथाङ्गं नीत्वा च देवव्रतमुपाद्रवत् । एवमालोक्य वीरपुंगवो भीष्मो विहस्य प्रोवाच । भगवन् ! प्रतिज्ञाभंगेनाऽलम् । संजातोऽहमद्य पुण्यभाजां धुरीणः । यस्य

वधाय स्वयं जगन्नाथः समुद्यतः। एवमाकर्ण्य हरिरुवाच। शांतनव! यथाऽहं भवदीयकीर्त्या प्रसीदामि तथा न स्वकीर्त्या। अथार्जुनशराकीर्णे कुरुकानने भीष्मः पुनरपि चत्रसंहारं चकार। एवं घोरे तस्मिन् व्यतिकरे दिनान्तं ज्ञात्वा श्रान्ताः पाण्डवा युद्धावसानं चक्रुः। ततो रजन्यां म्लानमुखो राजा रहसि जनार्दनं जगाद। कृष्ण! स्वल्पं सैन्यमवशिष्टम्। शौरे! मण्डलीकृतचापस्य पितामहस्य पुर आखण्डलोऽपि परिभवास्पद-मिति जाने। राज्येनाऽलम्। एतदुपाकर्ण्य हरिरुवाच। राजन्! माऽभैषीः। स्वयमहं योत्स्ये। विजयलाभाय सर्वमहं करिष्ये। देव! त्वदर्थमकार्यमपि कार्यं गणयामि। तच्छ्रुत्वा राजोवाच। अच्युत! नाऽहं कामात् त्वां मिथ्यावादिनं कुर्याम्। इतो गत्वाऽहं स्वयमेव भीष्मं जयोपायं पृच्छामि। यतः पूर्वमपि स शुभाशिषा मां समयोजयत्। इति निश्चित्य गूढचारी स श्रीकृष्णादिभिः सह भीष्मान्तिकमगात्। सोऽथ भक्त्या प्रणम्य पितामहं स्वजयोपायमप्राक्षीत्। तच्छ्रुत्वा देवव्रत उवाच। वत्स! मयि जीवति युष्माकं जयवाञ्छाऽतिकठिना। पितृप्रसादादहमस्मि स्वाधीन-मरणः। त्वं धर्मनिष्ठोऽतिथिश्चाऽसि। अतोऽहं ब्रवीमि। ममेषवः संत्रस्तविशस्त्रस्त्रीपूर्वेषु न पतंति। अतः क्लीवेन शिखण्डिना मां निपातयेति देवव्रतेनोक्ते व्रीडावनतमुखो राजा विफलप्रयास इव दुःखेन स्वशिविरं न्यवर्तत। अथ प्रभाते रथमारुह्य

पार्थसारथिर्भगवान् प्रतस्थे । पुरस्कृत्य वीरान् शिखण्डी भीष्ममभिदुद्राव । देवव्रतोऽब्रवीत् । पार्षत ! कामं प्रहर । श्मश्रुविहीनेऽनुजने भीष्मशरा न कदाऽपि पतंति । एतदुपाकर्ण्य शिखण्डी प्रत्यवदत् । जरठ ! युद्ध्यस्व वा मा युद्ध्यस्व । नाऽद्य त्वं जीवन् शिबिरमुखमवलोकयिष्यसीत्यभिधाय पार्थरक्षितो बाणजालेन तमपूरयत् । राजवेणुवनानिलो गांगेयोऽनादृत्य तं कृष्णाऽर्जुनौ विद्ध्वा पाण्डवचमूं विवेश । एवमालोक्य धृष्टद्युम्नादयो वीरास्तीक्ष्णैः शरैरखण्डब्रह्मचारिणं शांतनवं पीडयामासुः । अत्रान्तरे द्रोणाचार्यदुर्योधनप्रभृतयो महारथा भीष्मरक्षार्थं समाजग्मुः । किं बहुना । पश्यतां लोकानां पृथ्वी रुण्डमुण्डमयी समभवत् । ततः फाल्गुनेरितः शिखण्डी कर्णान्ताकृष्टसायकैः खण्डपरशुप्रभावं भीष्मं बबाधे । अथ पितामहस्तास्मिन् सुभटसंहारे वर्तमाने स्वपक्षरक्षार्थं घोरमस्त्रं समुदीर्य धनंजयमभ्यधावत् । ततस्तत्र पार्थाग्रे शिखण्डिनमालोक्य विमना इव महास्त्रं संजहार । अत्रान्तरे वसवस्तमभ्युपेत्य प्रोचुः । कंदर्पदर्पदलन ! अस्मदाभिकांक्षितस्ते संन्यासकालः समुपस्थितः । ततस्तास्मिन् श्लथोद्यमे पार्थप्रमुखाः सर्वे सायकैस्तं समपूरयन् । अथाऽवसरज्ञः शिखण्डी तस्मै हेमपुंखशरावलीं प्राहिणोत् । दृढप्रतिज्ञो भीष्मस्तां शैखण्डीं शरमालां पेशलां शैरीषीं स्रजमिव प्रहसन् जग्राह । ततः पार्थशरैर्विदार्यमाणगात्रो गंगापुत्रः समीपस्थं दुःशासनं सस्मित-

मुवाद । वत्स ! पश्य पश्य ।

अर्जुनस्य इमे बाणा नेमे बाणाः शिखण्डिनः ।

इत्यभिधाय पार्थाय शक्तिं चिक्षेप । महेन्द्रसुनुस्तां विशिखैः खण्डितामकरोत् । ततः शरविद्धगात्रो भीष्मोऽपराह्णे सहस्रांशु रिवाऽस्पृष्टभूमी रथादपप्तत् । अथ संग्रामे स्तब्धे नभः स्पृशि हाहाकारे च संजाते प्रशान्तात्मा पितामहो निर्जदिव्यभावं भेजे । अत्रान्तरेऽशरीरिणी वाग् जगाद । भीष्म ! त्वं स्वच्छन्दमरणोऽसि । अतो योगमास्थायोत्तरायणसमयं प्रतीक्षस्व । तच्छ्रुत्वा देवव्रतो विरक्तोऽपि विहाय सर्वान् कामानात्मचिन्तनपरायणो बभूव । अथ त्रिदशवाहिन्या प्रेरिता हंसरूपिणो मुनयोऽपि तत्रागत्य भीष्मं ब्रह्मज्ञानं श्रावयामासुः । ततः शरतल्पगतो भीष्मः प्रणतान् कौरवान् पाण्डवांश्च सांत्वयित्वा प्रोवाच । वत्स दुर्योधन ! पाण्डवैः सह संप्रत्यपि संधिं कुरु । वीरवैकर्तनः ! पाण्डवास्ते भ्रातरः । अतस्तैः साकं शमं भजस्व । तच्छ्रुत्वा कर्णोऽवदत् । पितामह ! सर्वमहं वेद्मि । देव ।

भवितव्यं भवत्येव नारिकेलफलाम्बुवत् ।
व्रजत्येव हि गंतव्यं गजभुक्तकपित्थवत् ॥

देवव्रत ! विस्मृत्य मम दोषं समराय मामनुजानीहि । एतदुपाकर्ण्य भीष्मोऽवदत् । अस्तु यद्रोचते तुभ्यम् । ततो गतेषु सर्वेषु

देवव्रतो भगवच्चरणारविन्दचंचरीकतामवलम्ब्य परमानन्दसुख-मन्वभवत् ।

इति श्रीकृष्णचरिते भीष्मपराक्रमप्रदर्शनं नाम पंचनवतितमः स्तवकः ॥ ९५ ॥

अथैकादशेऽहनि शकटव्यूहं रचयित्वाऽभिषिक्तो द्रोणाचार्यो योद्धुं प्रातिष्ठत । सर्ववीरशिरोमणिः स प्राज्यतेजसा संपन्नः साक्षाद्धनुर्वेद इव रराज । अथ रणवाद्यमभूत् । तच्छब्दं श्रुत्वा क्रौंचव्यूहं परिकल्प्य च युधिष्ठिरोऽपि योद्धुमुद्यतो बभूव । अथ भिद्यमानेषु सैन्येषु निपतत्सु च गजवाजिषु सहसा रक्तकल्लोलिनी प्रादुर्बभूव । अत्रान्तरे रुक्मरथोद्रोणः पांचालवाहिनीं प्रविश्य बाणैस्तां विदलितामकरोत् । सोऽथ शिखण्डिसात्यकिप्रभृतीन् महारथान् विदार्य जीवन्तं युधिष्ठिरं बद्धुमियेष । अत्रान्तरे निजसैनिकानां कोलाहलं श्रुत्वा समायातः श्वेताश्वस्तान् ररक्ष । अथाऽन्येद्युः सुशर्मप्रमुखास्त्रिगर्ताः फाल्गुनं समाह्वयन् । किरीटी समामंत्र्याऽग्रजं संग्रामाभिमुखो बभूव । ततः संशप्तकगणोत्सृष्टै-र्निरन्तरशरैर्भुवनाभोगे पिहिते तमोवेष्टितरात्रिरिव जगदभूत् । अथ वज्रिनन्दनस्त्वाष्ट्रं महास्त्रं प्रायुंक्त । येन ते ससंभ्रमाः पार्थसहस्राणि ददृशुः । ततः कर्णान्ताकृष्टसायकेन किरीटी सुधन्वनः शिरः कायादपातयत् । ततो भगदत्तोयोद्धुमुद्यतोऽभवत् । तमालोक्य हरिरुवाच । सखे ! पूर्वं पृथ्वीप्रार्थनया मया

नरकायाऽस्त्रं प्रदत्तम् । तस्मादसौ गृहीतवान् । संप्रत्यहं समाकृष्टवान् तत् सामर्थ्यम् । तच्छ्रुत्वा पार्थोऽर्धचन्द्रेण तस्य प्रियान् प्राणानपाहरत् । अथाऽपरेद्युः दुर्योधनो गुरुमुपेत्य प्राह—देव ! युधिष्ठिरं जीवन्तं गृहीत्वा माम् परितोषय । अथ गुरुप्रेरणया संशप्तका धनंजयं नीत्वा दक्षिणां दिशं जग्मुः । अत्रान्तरे परशुरामशिष्यो द्रोणश्चक्रव्यूहमरीरचत् । एतदालोक्य सरलहृदयोऽजातशत्रुः सौभद्रमुवाच । वत्स ! त्वमपि विक्रमे कंसारिसमोऽसि । अतः पितुरविद्यमानतायां व्यूहं विदार्याऽग्रे प्रविश । तच्छ्रुत्वा बाढमित्युक्त्वा च षोडशवर्षीयोऽभिमन्युः सारथिं समचोदयत् । ततो महतामपि विमोहने समरे प्रवृत्ते तीक्ष्णविक्रमोऽभिमन्युः व्यूहं विदार्य प्रविवेश । तस्मिन्नवसरेऽयं गृहीतोऽयं हतोऽयं बहूनपि निहंतीति सौभद्रेयरथं प्रति राज्ञां निनादोऽभवत् । अथ वीरः शरवर्षिणो वीरान् सायकैः पराजित्वाऽश्मकभूपतेः शिरो भल्लेन चकर्त । सोऽथ मद्रराजानुजं हत्वा कर्णभ्रातरमपि जघान । पुरा यथा देवाऽसुरसंग्रामे गुहेन पराजिता दानवा दुद्रुवुस्तथाऽत्राऽपि कौरवाः सौभद्रेणाक्रान्ता अधावन् । ततो वीरो वैकर्तनात्मजं वृषसेनं निपात्य दुर्योधनोत्तराधिकारिणं लक्ष्मणमप्यवधीत् । एवं प्रियपुत्रं वीरगतिं प्राप्तं दृष्ट्वा दुर्योधनः परित्यज्य महाशोकं महारथैः सह सौभद्रमुपाद्रवत् । अत्रान्तरेऽभिमन्युरक्षार्थं समागतान् युधिष्ठिरादीन् भार्गववराद् दृप्तो

द्वाररक्षको जयद्रथो निवारयामास । ततोऽभिमन्युः कृपकर्ण-द्रोणद्रौणिसुयोधनान् सायकैर्विद्राव्य भल्लेन बृहद्बलशिरश्चिच्छेद । अथ संमुखागतं दौःशासनिं पृषत्केन पराङ्मुखं कृत्वा कुंजरारूढं भोजं जघान । ततो गांधारसैन्यं निहत्य शकुनिं क्षतजोक्षितमकरोत् । ततो राधेयो गुरुमभ्येत्य प्रोवाच । देव ! बालोऽप्ययमबालचरितः काकुत्स्थसमं विक्रमं धृत्वाऽशेषं कुरुसैन्यं क्षपयति । तच्छ्रुत्वा गुरुरुवाच : वीर ! सत्यमेतत् । अस्याऽमर्यादं धैर्यं प्रौढविक्रमं चाऽऽलोक्य कस्य कायो रोमांचकंचुको न भवति ? सकार्मुकः सचक्रश्चाऽयं देवानपि जेतुं शक्तः । अतः पूर्वमस्य सर्वायुधविनाशने यत्नः क्रियताम् । एवं निश्चित्य सकर्णो द्रोणः सर्वमहारथैः सह सौभद्रमभिचक्राम । ततो मण्डलीकृतकार्मुकोऽर्जुनसूनुः संमुखापतितांस्तान् शरैर्न्यरुणत् । अथ कर्णः पार्श्वेन तस्याऽऽनतं धनुश्चिच्छेद । हार्दिक्यो रथं गौतमश्च सारथिं जघान । ततस्ते मिलित्वा विरथं छिन्नधन्वानं च तं समंतात् परिवव्रुः । अथ स दीप्तखड्गमनेकतारकं च चर्मादाय मण्डलानि चरन् दुर्लक्ष्यो बभूव । एतदालोक्य द्रोणः क्षुरप्रेण तस्य खड्गं द्विधा चकार । अथ धैर्यनिधिः सौभद्रश्चक्रेण राजचक्रक्षयमकरोत् । एतज्ज्ञात्वा द्रोणप्रमुखाः शरैस्तच्चक्रं खण्डशोऽकुर्वन् । ततो वीरो गदया सुबलात्मजं कालकेयं जघान । ततो दौःशासनिसौभद्रेयौ मिथो मण्डलानि चरंतावभिजघ्नतुः । एवं

गुरुप्रहाराभिहतावुभावपि महाभुजौ धरण्यां निपेततुः । अथ महारथा धराशायिनमपि पार्थसुतं बाणैर्जघ्नुः । अत्रान्तरे दौःशासनिः शनैः शनैरुत्थाय सायकांचितसर्वाङ्गं विकीर्णाकुल कुंतलं च पंडुपौत्रं गदया मूर्ध्नि ताडयामास । एवमनिलैर्बालरसाल इव तस्मिन्वीरे निपतिते सर्वं जगदुद्यानं वीतशोभमभूत् ।

अथ भुवि पतितेऽर्जुनसूनौ शोकार्त इव सूर्योऽस्ताद्रिकंदरां प्रविवेश । ततो युधिष्ठिरप्रमुखा आहवे संमुखहतमशोच्यमपि स्नेहाच्छुशुचुः । अत्रान्तरे जिष्णुर्विमना इव शिविरमाययौ । सोऽथ म्लानमुखान् सर्वान् विलोक्य पप्रच्छ । कच्चित् ममात्मजो द्रोणविहितचक्रव्यूहं प्रविश्य कूटयोधिभिः कौरवैर्युध्वा न समायातः ? हा ! मयाऽसौ बालो व्यूहप्रवेशस्तु शिक्षितो न निर्गमोपायः ? एवमाभाष्य श्रुत्वा च तनयवीरगतिवृत्तं स्थाणुरिव निश्चलो बभूव । एवमालोक्य शोकं च संस्तभ्य हृषीकेशोऽवदत् । पार्थ ! महावीरोऽसौ नश्वरं शरीरं परित्यज्य यशोमयीं दिव्यां तनुं प्रविवेश । अथ द्रौपदीसुभद्रोत्तराऽपि तद्वृत्तं श्रुत्वा मूर्छिता बभूवुः । ततस्ता-अपि केशवेन प्रबोधिता गर्भं स्मृत्वा च यथाकथंचिद्धैर्यमधारयन् । तस्मिन् समये पश्चात्तापयुतो युधिष्ठिरः स्वात्मानं पुनः पुनर्निनिन्द । ततः संज्ञां लब्ध्वा तत्र जयद्रथं हेतुं च श्रुत्वा शोकविह्वलोऽपि गाण्डीवी जगाद । भो भो महारथाः ! श्वो यदि दिवाकरसादये जयद्रथो हतो न भवेत् तदाऽहमनृत-

शान्तये दहनं प्रवेद्यामि । ततश्चिन्तिताः सर्वे सुषुपुः । अथ कृष्णाज्ञया जपपरोऽर्जुनः पवित्रशयने निदद्रौ । सोऽथ स्वप्ने सात्रिष्णुं शशिशेखरं शिवं ददर्श । ततः कृतांजलिः स देववेवं तुष्टाव । प्रसन्नो हरस्तस्मै दिव्यास्त्रं ददौ । अत्रान्तरे जयद्रथश्चारैर्भाषितां पार्थप्रतिज्ञां श्रुत्वा भयातुरो दुर्योधनं व्यजिज्ञपत् । आर्य ! यदद्य करणीयं तत्कुरुष्व । ततः सानुगः कुरुपतिस्तं द्रोणपार्श्वं नीत्वा सर्वं वृत्तमस्मै समावेदयामास । तच्छ्रुत्वा भारद्वाजोऽब्रवीत् । राजन् ! माऽभैषीः । श्वोऽहं त्रिदशैरपि दुर्भेद्यं महाव्यूहं रचयित्वा त्वां रक्षिष्यामि । अथ प्रभाते स्नात्वाऽग्निं संपूज्य च कुरुपाण्डवा रणांगणमवतेरुः । ततो द्रोणः शकटव्यूहं रचयित्वा तन्मध्ये पद्मव्यूहं कल्पयित्वा कृतवर्मादिभिः सुरक्षिते च सूचिव्यूहे जयद्रथं स्थापयामास । अत्रान्तरे कपिकेतनं रथमारुह्य कृष्णसारथिः पार्थो योद्धुं तत्र समाजगाम । सोऽथ पूर्वोत्सृष्टशरं गुरुं प्रणम्य दीप्तशरजालैस्तं समवाकिरत् । ततोऽर्जुनो जयद्रथाकांक्षी आचार्यं प्रदक्षिणीकृत्य वातरंहसा व्यूहं प्रविवेश । अत्रान्तरे रथरक्षकौ युधामन्यूत्तमौजसावपि प्राविशताम् । ततो यत्र यत्र धनंजयो गतस्तत्र तत्र हा हतोऽस्मि । एष हंति वयं पतिता इति सर्वत्र निनादः प्रससार । ततोऽर्जुनः कृतवर्माणं जित्वा यवनकांबोजौ जघान । अथ गुरुः शिष्यं निरोद्धुं ब्रह्मास्त्रमचालयत् । शिष्योऽपि ब्रह्मास्त्रेणैव तत्परिहारं कृत्वा भोजमजैषीत् । अत्रान्तरे श्रुतायुधो

वरुणदत्तां गदां हरये प्राहिणोत् किन्तु सा प्रतिनिवृत्य तमेव जघान। अत्रान्तरे कौरवेश्वरो गुरुमुपसृत्य बभाषे। देव! पार्थकृतं नृपकदनं तु पश्य। गतोदके सेतुबंधः कल्याणाय न भवति। तच्छ्रुत्वा गुरुरुवाच। राजन्! पार्थो युवाऽतः सुपर्णवेगो वृद्धं मां समुल्लंघ्य समायातः। मया च भीमसात्यकि-प्रभृतयो वीरा निरुद्धाः। ततोऽर्जुनो विन्दानुविन्दयोः सैन्यं हत्वा क्लान्तान्हयान् वीक्ष्य कृष्णं प्रोवाच। सखे! पूर्वं घोटकान् विगतशल्यान् कृत्वा जलं पायय। तच्छ्रुत्वा हरिर्हयान् पीतजलान् विधाय पुनरयोजयत्। अथ स्वल्पावशिष्टे दिने सैंधवकांक्षिणः पार्थसायकैः कौरवचमूः पुनः पुनश्चकंपे। ततो विद्रुतेषु भूपेषु गजघटावने च भग्ने द्रोणानुबद्धकवचो दुर्योधनो योद्धुमाययौ। एतदालोक्य हरिरुवाच। सखे! पूर्वमेनं कुलांगारं जहि। ततस्तयोर्महेन्द्रनमुचिसदृशं युद्धमभूत्। परंतु जयपराजयनिर्णयो न बभूव। ततः पार्थो रहस्यं विदित्वा तत् कवचोच्छित्तये यद् दिव्यास्त्रं प्राक्षिपत् तदश्वत्थामा दूरादेव महास्त्रेण चिच्छेद। एतदालोक्य पार्थः शरैस्तं विद्ध्वा युद्धविमुखं चकार। अत्रान्तरे द्रोणो युधिष्ठिरं गृहीतुं सृंजयकेकयाञ्जित्वा शरैराजानमपि विरथं चकार। ततो राजा शक्तिं चिक्षेप। गुरुस्तामपि ब्रह्मास्त्रेण भस्मसादकरोत्। अथ सहदेवरथं समारुह्य राजाऽन्यत्र जगाम। सोऽथ पार्थं दूरे गतं विचिन्त्य भयकंपितो

बभूव। एतदालोक्य सत्त्वनिधिः सात्यकिः भीमे च सैन्यरक्षाभारं निक्षिप्य स्वयं स्यन्दनमारुह्य युद्धार्थमग्रे ययौ। ततो द्रोणसात्यक्योः स्कन्दतारकयोरिव विस्मयावहं युद्धमभूत्। ततो गुरुदृष्टिं वंचयित्वा सात्यकिरग्रे प्रविवेश। अत्रान्तरे गुरुः समीपस्थं दुःशासनमुवाच। वीर! कथमितस्ततो धावसि? जयद्रथं रक्ष। नैषा कौरवसभा। यत्र त्वमनर्थं कृतवान्। निशम्यैवं कोपाकुलो दुःशासनो बहून् पांचालानवधीत्। अत्रान्तरे क्रुद्धो धृष्टद्युम्नो विशिखैर्द्रोणं मूर्छितमकरोत्। ततो लब्ध्वा चेतनां रक्ताक्षो गुरुर्भूमिपालानां शिरोभिः क्ष्मामपूरयत्। अत्रान्तरे शिशुपालसुतो रुक्मरथोऽपि गुरवे यां शक्तिं चिक्षेप। गुरुस्तां सायकैः खण्डयामास। ततः पार्थशंखध्वनिमश्रुत्वा युधिष्ठिरो भीममुवाच। वत्स! त्वं द्रुतं गत्वा पार्थस्य सहायको भव। तेन विना मम जीवनं भारभूतमस्ति। तच्छ्रुत्वा मारुतिः पक्षिराज इव स्यंदनेन द्रुतमभ्यधावत्। ततो द्रोणभीमयोर्युद्धमभूत्। अथाऽवसरमवाप्य भीमो गुरुरथं दोर्भ्यामुत्क्षिप्य दूरे चिक्षेप। अत्रान्तरे कर्णसैन्यं विदारयन् सात्यकिरपि तत्राऽऽजगाम। ततो भीमकार्मुकशब्दं श्रुत्वा श्रीकृष्णधनंजयावपि शंखौ प्रदध्मतुः। तच्छब्दं श्रुत्वा भीमसात्यकी सुधासिक्ताविव बभूवतुः। अत्रान्तरे दुर्योधनो गुरुमुपसृत्य जगाद। प्रभो! किं करवाणि? तच्छ्रुत्वाऽऽचार्योऽवदत्। राजन्! नैष वार्तालापसमयः। तूर्णमितो गत्वा

सिन्धुराजं रक्ष । अधुनैव रणद्यूते जयपराजयनिर्णयो भविष्यति। ततः कर्णसुयोधनौ भीमसात्यकिभ्यां सह युयुधाते । तस्मिन्नवसरे कर्णः कुंतीवचः स्मृत्वा वृकोदरं न जघान । अत्रान्तरे कंसारिः भीमं संकटापन्नं ज्ञात्वा प्रोवाच । सखे ! पूर्वं भीमं रक्ष । ततः पार्थे समुपस्थिते कर्णाऽर्जुनयोर्युद्धमभूत् । ततः कर्णसहायार्थमश्वत्थामा समाजगाम । पार्थस्तमपि शरैरपीडयत् । अथ वीरचक्रं विदार्याऽपि पार्थो महारथैर्गुप्तं जयद्रथं नाऽससाद । अत्रान्तरे सात्यकिभूरिश्रवसोर्युद्धमभूत् । तत्र सात्यकिं श्रान्तं ज्ञात्वा हरिरुवाच । सखे ! तव शिष्यं चण्डपराक्रमोऽयं हन्तुं प्रयतते । अतो द्रुतं रक्ष । तच्छ्रुत्वा धनंजयः प्रहाराभिमुखस्य भूरिश्रवसो भुजं भल्लेन चिच्छेद । ततो राहुमुखान्मुक्तश्चन्द्र इव लब्धावसरः सात्यकिः कृष्णादिभिर्निवार्यमाणोऽपि वृत्तमविज्ञाय ध्यानासक्तस्य तच्छिरश्चकर्त । अथ प्रतिज्ञां स्मरन्नर्जुनो भास्करेऽस्ताचलचूडावलंबिनि निविडराजमण्डलं प्रविश्य महारथैर्गुप्तं सैंधवं ददर्श । सोऽथ कोपारुणया दृशैव भीतं तं कर्णान्ताकृष्टसायकेन विव्याध । अत्रान्तरे हा सिंधुराजो हतो हा सिन्धुराजो हत इति महास्वनः सर्वत्र प्रससार । ततो जयद्रथोऽपि कृष्णसारथिं पार्थं निरंतराकृष्टैः सायकैरपूरयत् । अथ दिनान्ते मधुरिपुः सव्यसाचिनमुवाच । सखे ! जातो दिनान्तः । दिव्यपत्रिणास्य शीघ्रं शिरश्छिन्धि । पुरा वृद्धक्षत्रोऽस्य पिताऽस्मै वरं प्रादात् ।

वत्स ! यदा तव शिरो भूमौ पतिष्यति तदैव मे मरणं भविष्यति । अद्यश्वः स स्यमन्तपंचके तपश्चरति । निशम्यैतत् कंसारिवचनं जिष्णुर्जवात् तच्छिरश्चिच्छेद। अथ संध्याध्यानस्थः पिता पुत्रशिरोऽङ्कस्थं दृष्ट्वा सद्यः प्राणांस् तत्याज । ततः प्रतिज्ञार्णवं समुत्तीर्य पार्थो निवृत्तः । अथ ससैन्याः पाण्डवाः श्रीकृष्णनीतिं प्रशंसन्तः सिंहनादं चक्रुः । पाण्डवशिविरे सर्वत्र हर्षः प्रससार । एकस्मिन्नेव दिने च सप्ताक्षौहिणीर्गमयित्वा दुर्योधनश्चिन्तार्णवे निमग्न इव बभूव ।

इति श्रीकृष्णचरिते जयद्रथवधनिरूपणं नाम
षण्णवतितमः स्तवकः ॥ ९६ ॥

अथ भगिनीपतिमरणाद् दुःखितो दुर्योधनो गुरुमुवाच । देव ! त्वयाऽऽश्वस्तमपि जयद्रथं पार्थो जघान। तच्छ्रुत्वाऽऽचार्योऽवदत् । राजन् ! यावत्तव वैरिणो न हन्मि तावन्निधनाय दीक्षितोऽहं कवचं न त्यक्ष्यामि । ततो रात्रावेव पुनर्युद्धं भवितुमारब्धम् । पाण्डवपक्षीयाः कौरवपक्षीयान कौरवपक्षीयाश्च पाण्डवपक्षीयां जघ्नुः । तस्यां रात्रौ द्रोणः कालाग्निसाम्यमधात् । ततस्तत्रात्मश्लाघां कर्णोऽकरोत् । कृपाचार्यस्तां न सेहे । विषयेऽस्मिन् घोरविरोधस्तयोरभवत् । अश्वत्थामा मातुलपराभवं न सेहे । अतः कर्णेन सह योद्धुमुद्यतोऽभूत् । ततो बुद्धिमान् कुरुपतिः प्रणत्या तान् सांत्वयामास । अथ कर्णो धृष्टद्युम्नमुखा-

ञ्जित्वा राजकदनमकरोत् । अथ कृष्णवचनात् कृष्णरात्रौ कृष्णाकोप इव घटोत्कचः कर्णमुपाद्रवत् । ततस्तयोस्तुमुलं युद्धमभूत् । तस्मिन्नवसरे घटोत्कचाऽलंबुसयोर्माययाविमोहिता बहवो योधाः कृतान्तनगराऽतिथयो बभूवुः । ततस्तत्र घटोत्कचो नाराचैरुल्मुकैश्च कर्णमपीपिडत् । धैर्यसागरः कर्णः सर्वं सेहे । अथ राक्षसः कर्णाय यच्चक्रमक्षिपत् । कर्णस्तदपि सायकैश्चिच्छेद । अवसरेऽस्मिन् विद्रुते च सैन्ये राधेय एव एकाकी तत्र तस्थौ । अत्रान्तरे कुरुपतिः कर्णमभ्येत्य प्रोवाच—सखे ! धन्योऽसि । परमस्मत् सैन्यसंहारं तु पश्य । या शक्तिस्त्वयाऽर्जुनवधाय रक्षिता तयाऽयमेव कथं न हन्यते ? मित्र ! यदा रात्रावेव सर्वसंहारो भविष्यति तदा पार्थवधाय प्रातः कां शक्तिं प्रयोजयिष्यसि ? निशम्यैवं मित्रवाक्यं कर्णः शक्रदत्तां तां शक्तिं नभःस्थले चिक्षेप । सा वीरवक्षःस्थलं भित्त्वा सद्य एव त्रिदिवं जगाम । इत्थं घटोत्कचे हते कौरवाः कर्णं प्रशशंसुः । पाण्डवा मम्लुः । श्रीकृष्णचन्द्रो जहर्ष । एतदालोक्य पार्थोऽपृच्छत् । कृपानाथ ! शोकसमये कथं प्रसीदसि ? तच्छ्रुत्वा हरिरुवाच । सखे ! हैडिम्बवधेन कर्णो जितः । यदि स घटोत्कचे तां नाऽपातयिष्यत् तदा सा त्वामवश्यमहनिष्यत् । ततः श्रांताः सर्वे विशश्रमुः । अथ प्रभाते गुरुर्युयुधे । ततो द्रोणेन सह युद्धयमानौ विराटद्रुपदौ वीरगतिमलभताम् । अथ कंसारिः

चेदिपांचालमत्स्यानां रणे कदनं कुर्वाणं द्रोणं वीक्ष्य पार्थमुवाद। सखे! महोपायं विनाऽस्य मरणं कठिनम्। तच्छ्रुत्वा सर्वे पाण्डवास्तब्धा अभूवन्। अत्रान्तरे गुरुः पांचालान् प्रविश्य धृष्टद्युम्नं हन्तुमियेष। ततो रणे रुद्रकल्पं गुरुं विलोक्य देशकालज्ञो भीमसेनः श्रीकृष्णमतमवलंब्य गदयाऽश्वत्थामाभिधं गजं हत्वा द्रोणाग्रे पुत्रवधमुच्चैरश्रावयत्। तच्छ्रुत्वा भीमवचस्यश्रद्धानो गुरुर्युधिष्ठिरं पप्रच्छ। अथ श्रीकृष्णप्रेरितो राजाऽश्वत्थामा हतः कुंजरो वा नरो वा। अत्रान्तरे युधिष्ठिरं वहंतो ये हया भूमिं न पस्पर्शुस्तेऽसत्यभाषणात् तूर्णं नीचगामिनो बभूवुः। अथोत्साहविहीनो गुरुर्निश्चलस्तस्थौ। ततो धृष्टद्युम्नोऽवदत्। अहो! मृतेऽपि पुत्रे ब्राह्मणस्त्वं हिंसा न त्यजसि? एवमाकर्ण्य गुरुः शोकक्रोशविह्वलो भूत्वा चापं च तत्याज। सोऽथ मौनमवलंब्य चाऽन्तरं ज्योतिःस्वरूपं दध्यौ। अत्रान्तरे पाण्डवैर्निवार्यमाणोऽपि क्रोधान्धो धृष्टद्युम्नो ध्यानासक्तस्य गुरोः शिरः केशेष्वाकृष्य खड्गेन चकर्त। तत्रत्याः सर्वे लोकाः पुनः पुनर्धृष्टद्युम्नं निनिंदुः। अस्यामेव वार्तायां सात्यकिधृष्टद्युम्नयोर्मध्ये महाकलहोऽभवत्। जनार्दनस्तं प्रशमयामास। अत्रान्तरे समायातोऽश्वत्थामा दुर्योधन-प्रेरणया कृपाचार्यमुखात् पितृमरणं श्रुत्वा क्रोधाकुलोऽश्रुपूर्णनयनश्च जगाद। हा ममाऽपि पिता प्राप्तवान् केशाकर्षणम्? हे वकव्रतयुधिष्ठिर! मम तातं निहत्य

कथं मयि जीवति प्राप्स्यसि मेदिनीम् ? हा तात ! क्व मां विहाय गतोऽसि ? मातुल ! एषोऽहं पूर्वं नरपशुं धृष्टद्युम्नं हत्वा महीमिमामकृष्णामपार्थामपि करिष्य इत्यभिधाय शत्रुक्षयार्थं प्रदीप्तं नारायणास्त्रं संदधे । येन जगत्त्रयी विचचाल । ततो नारायणास्त्रनिहता पाण्डवचमूः स्वल्पावशिष्टाऽभवत् । जिष्णुरपि गुरुकृतमुपकारं स्मृत्वा विरागमभजत् । युधिष्ठिरोऽपि पुनः पुनरात्मानं निनिन्द । अत्रान्तरे भीमं दह्यमानं विलोक्य दयालुः पार्थो वारुणास्त्रं व्यसृजत् । ततो निजाऽस्त्रगतिं निरुद्धामवलोक्य रथादवरुह्य संकटपतितं भीमं भुजाभ्यामाचकर्षतुः । ततो द्रौणिर्दिव्यास्त्रं द्विः प्रयोज्यं न भवतीति विज्ञाय सात्यकिपार्षतौ जित्वा पौरवं सुदर्शनं जघान । एवं पाण्डवसैन्येषु हतेषु जिष्णुर्युद्धमेव स्वधर्मं मत्वा बाणवर्षैर्द्रौणिमवारयत् । सोऽपि सायकैस्तां शरवृष्टिं चिच्छेद । अत्रान्तरे महर्षिः कृष्णद्वैपायनस्तत्राऽऽजगाम । तं विलोक्याऽऽश्वत्थामा कृतांजलीरथादवततार । सोऽथ प्रणम्य पप्रच्छ । ऋषिराज ! मम दिव्यास्त्राणि सकृष्णे पार्थे कथमफलानि भवंति । तच्छ्रुत्वा मुनीन्द्रोऽवदत् । पुरा एतौ नरनारायणावृषी षष्टिं वर्षसहस्राणि तपः कृत्वा पुरारिं तोषयित्वा च नारायणतुल्यतामवाप्तवन्तौ । अतोऽयं कृष्णो लिंगार्चनव्रतो दुर्जयः । अर्जुनश्चाऽस्य सखा । त्वमपि रुद्रांशोऽसि । एतदुपाकर्ण्य शांतकोपो द्रौणिः पिनाकिनं प्रणम्य कृष्णार्जुनावपि

देवतुल्यावमन्यत । अथ पार्थो व्यासं विलोक्य पप्रच्छ । मुनिवर्य ! मयाऽद्य शूलहस्तः पुरुषो दृष्टः? तच्छ्रुत्वा मुनिवर्योऽब्रवीत् । वत्स ! सोऽस्ति सदाशिवः ।

बालचन्द्राऽवतंसं तं गजासुरविघातकम् ।
आशुतोषं भज शिवं विजयाऽभीष्टसिद्धये ॥

ततो गते मुनिवरेऽर्जुनः पार्वतीपतिं तुष्टाव । अथ दिनान्ते सर्वे स्व स्व शिविराणि गत्वा मिथो वीरगाथां चक्रुः ।

इति श्रीकृष्णचरिते द्रोणवधनिरूपणं नाम
सप्तनवतितमः स्तवकः ॥ ९७ ॥

एवं पंचदशेऽहनि द्रोणाचार्ये वीरगतिं प्राप्तेऽश्वत्थाम्नोऽनुमत्या दुर्योधनः कर्णं सेनानायकमरोत् । तस्मिन्दिने कौरवाणां मकरव्यूहः पाण्डवानां चार्धचंद्राकारो व्यूहोऽभवत् । ततस्तुमुले रणसंकुले गजारूढो भीमसेनः कुलूताधिपतिं गजस्थं जघान । अथ पांड्यद्रौण्योर्द्वंद्वयुद्धमभूत् । तत्राऽऽश्वत्थामा भल्लेन वीरवर्यस्य शिरश्चिच्छेद । अथ गाढपांसुना प्रसृतेऽन्धकारे नकुलोम्लेच्छराजमवधीत् । तस्मिन्विमर्दे कर्णः कुंतीवचः स्मृत्वा वशावर्तिनमपि माद्रीसुतं न जघान । अथ युद्धार्थमुपस्थितः कर्णो दुर्योधनं जगाद । सखेऽद्य त्वत्प्रसादमानविभवानामानृण्यप्राप्तये रणेऽर्जुनं हत्वा चिरकांक्षितं ते संकल्पं पूरयिष्यामि । यद्यपि स्वगुणकीर्तनं लोके निन्द्यं गण्यते तथाऽपि कर्तव्यकाले मूकताऽपि

न प्रशस्यते । अहं पार्थात् सर्वथाऽधिकः किं चाऽस्य सारथिः कृष्ण इत्याधिक्यं मां तुदति । महाराजः शल्यो यदि मम सारथ्यमंगीकुर्यात् तदा तु पार्थं जेतुमहमुत्सहे । तच्छ्रुत्वा यदा स्वाभीष्टसिद्धये राजा मद्रराजमभ्येत्य सविनयं स्वाभिप्रायमुवाच । तदा पूर्वं तु मद्रपतीराधेयसारथ्यं न स्वीकृतवान् । ततो विचिंत्य राजाऽऽह वीर ! पुरा यदा देवाऽसुरसंग्रामे शक्रादयः सुरगणा ब्रह्मविष्णुमहेश्वरान् साहाय्यं ययाचिरे तदा शिवो योद्धा ब्रह्मा सारथिः विष्णुश्च शरोऽभवत् । ततो दैत्यान् विजित्य सदाशिवः स्वर्गराज्यं देवेभ्यः प्रायच्छत् । इत्थं दुर्योधनेनोक्ते शल्यः स्मृत्वा च युधिष्ठिरप्रार्थनां स्वच्छन्दवादी भविष्याम्यहं सूतपुत्र-सारथिरिति प्रत्युत्तरमदात् । ततः शल्यः कर्णरथे श्वेताश्वान् योजयित्वा तमारुह्य च दिवि सूर्यस्य गरुडाग्रज इव सुसज्जितां रश्मिमालां हेलया जग्राह । अत्रान्तरे कृष्णसारथिः श्वेताश्वोऽर्जुनः संमुखो बभूव । ततो वीरप्राणहारिणि रणे प्रवृत्ते कर्णः शल्यमवदत् । मद्रराज ! शक्रोऽप्यद्य मयाहतमर्जुनं दृष्ट्वा दिव्यस्त्राणि व्यर्थानि मंस्यते । तच्छ्रुत्वा शल्योऽवदत् । सूतपुत्र ! शिशुवद् वृथा प्रलापं मा कृथाः । तच्छ्रुत्वा कर्ण उवाच—

सूतो वा सूतपुत्रो वा यो वा कोवा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ॥

शल्य उवाच । गंधर्वसमरे त्वयि विद्रुते वने कौरवा रक्षिताः ।

गोहरणविग्रहे येन च भवद्विधानां मानिनां दिव्यवासांसि हृतानि। तं पार्थं जेतुं कथमुत्सहसे? एतदुपाकर्ण्य कोपं संस्तभ्य कर्णोऽवदत्। हस्तस्थकंकणार्थं क्वाऽऽदर्शोऽपेक्ष्यते? अथ कर्णकिरीटिनौ शंखौ दध्मतुः। एतदालोक्य शौरिशल्यावपि शंखावधमताम्। ततो वैकर्तनः पाण्डवाय यां धवलपत्त्राग्रां विशिखावलीं प्राहिणोत्। धनंजयस्तां शरैश्चिच्छेद। ततः कपिध्वजो नाराचै राधेयरथरक्षिणां महारथानां वक्त्राणि जहार। एतदालोक्य कोपाकुलः कर्णो भार्गवाऽस्त्रेण पार्थास्त्रवृष्टिं हत्वा सभीमं कृष्णमपि बाणैरपूरयत्। तस्मिन्नवसरे कर्णपार्थास्त्रैः पाण्डवकौरवसेनासु विपुलः क्षयोऽभूत्। अथ कर्णो धनंजयाय सर्पमुखमस्त्रं प्रजिघाय। एतदालोक्य हरिः घोटकान् धरातले समुपवेशयामास। ततः येन फणी पार्थस्य नम्रकिरीटाग्रं जग्राह। अथार्जुनो बाणैः कर्णवर्म छित्त्वा तद् गात्रमप्यपीडयत्। ततः कर्णो ब्रह्मास्त्रं प्रायुंक्त। पार्थस्तन्निरोधं कृत्वा कर्णविद्याविघाताय शाक्रमस्त्रं प्रादुश्चक्रे। एवमालोक्य कर्णस्तदस्त्रं हत्वा किरीटिनो ज्यां चिच्छेद। अथ धनंजयोऽभिनवां मौर्वीं धृत्वा कर्णमददमनाय रौद्रमस्त्रं विदधे। अत्रान्तरे कर्णेन ब्रह्मास्त्रे प्रक्षिप्ते रौद्रास्त्रं शिथिलं बभूव। ततो विधिवशादंगराजस्य सव्यरथचक्रं मही न्यागिलत्। अथो विषमस्थितः कर्णोऽवदत्। कौंतेय! मुहूर्तमात्रं तिष्ठ। मयाऽस्मिंश्चक्रे समुद्धृते यथेष्टमस्त्रं मुंच।

यतो भवादृशः शूरो व्यसनस्थे विशस्त्रे च नहि प्रहरति। निशम्यैवं कंसारिः प्रहसन् प्रोवाच । अंगराज ! दिष्ट्याऽद्य त्वं धर्मं जानीषे ? यदा बहुभिर्मिलित्वाऽभिमन्युर्बालो हतस्तदा धर्मः क्व गत आसीत् ? अपरं च सभायां कृष्णां यदुक्तवान् तदपि स्मर । नूनं क्षुद्रनृपाणां धर्मवृत्तयो विपत्स्वेव प्रस्फुरन्तीति जनार्दनेनोक्ते मन्युपूरितोऽर्जुनः पूर्वं आग्नेयास्त्रेण कर्णप्रेरितं ब्रह्मास्त्रमवधीत् । ततोऽर्जुनः पावकास्त्रं प्रायुंक्त । कर्णो वारुणास्त्रेण तन्निरोधमकरोत् । अथाऽर्जुनो मनसा हरं ध्यात्वा कांचनभूषितं शरं संधाय च कर्णाय व्यसृजत् । ततस्तेन हारविभूषिते कण्ठे निर्भिन्नो वैकर्तनः क्रकचोत्कृत्तहेमताल इव भूतले निपपात । एवं सेनानायके हते केवलः शल्यः शल्यमिव कौरवाधिपतिं ययौ । ततः कुरुपतिरभिन्नहृदयं कर्णं वीरगतिं प्राप्तं ज्ञात्वा जगच्छून्यमिवाऽमन्यत । अत्रान्तरे धृतराष्ट्रं पुनरपि जयकांक्षिणं विचिन्त्य संजयोऽवदत् ।

हते भीष्मे मृते द्रोणे कर्णे च निधनं गते ।
आशा बलवती राजन् ! शल्यो जेष्यति पांडवान् ?

ततः कर्णदेहाऽभ्युद्गतं तेजः सहसा दिनमणिमण्डलं समाविवेश। अथ शिविरमायाताः प्रसन्नाः पाण्डवाः मुहुर्मुहुः श्रीकृष्णनीतिमेव सर्वकामफलप्रदां मेनिरे ।

इति श्रीकृष्णचरिते कर्णवधनिरूपणं नामाष्टनवतितमः स्तवकः ॥ ९८ ॥

एवं पार्थेन कर्णे हते दुर्योधनोऽश्वत्थाम्नोऽनुमत्या शल्यं यदा सेनापतिमकरोत् तदा धैर्यमापन्नं धृतराष्ट्रं संजयोऽब्रवीत्। राजन्!

विहाय संधिप्रस्तावं तव पुत्रः सुयोधनः।
विनायकं प्रकुर्वाणो रचयामास वानरम्॥

ततो राज्ञां संहारमण्डले पुनर्घोरे संग्रामे प्रवृत्ते पुरस्कृत्य कृपद्रौणि-सुयोधनान् शल्यहार्दिक्यसौबलाः पाण्डवचमूं विविशुः। अथ बलिना शल्येन गजेन सरोजिनीव पाण्डवसेना चकंपे। तत्रादौ भीमशल्ययोर्युद्धमभूत्। अथ भीमसहायतार्थं युधिष्ठिरः सम्मिलितोऽभवत्। राजा शरैः शल्यायुधानि छित्त्वा तद्रथमपि खण्डितमकरोत्। एतदालोक्य मद्रराजाऽपरं रथमारुह्य एकेन शरेण ध्वजं चिच्छेद। द्वाभ्यां सारथिं चतुर्भिश्च घोटकान् निजघान। अथ धर्मसूनुः द्वितीयं स्यन्दनं समारुह्य पुनर्योद्धुमुद्यतोऽभवत्। अत्रान्तरे मद्रराजो बहून् सैनिकान् रथहयकुंजरसमेतान् संजहार। ततः कोपाकुलो युधिष्ठिरः सहस्रघ्नीं शक्तिं शल्याय प्राहिणोत्। तया भिन्नहृदयो मद्रेशः सहसैव धरण्यां पतित्वा वीरगतिमवाप। ततो नाथहीना सेना चन्द्रहीना रात्रिरिव विगतप्रभा बभूव। अथ भीमोऽवशिष्टान दुर्योधनानुजान् कृतान्तान्तिकं प्रेषयामास। अत्रान्तरे पाण्डवसेनासु दुर्योधनः क्व? द्रौणिश्च क्वेति विपुलः कोलाहलोऽभवत्। अथाऽर्जुनः सपुत्रं सबलानुगं जघान।

नकुलोऽर्धचंद्रेण शकुनिशिरश्चकर्त । सहदेवः ससैन्यं शकुनिसुतमुलूकं जघान । एवं सैन्ये निःशेषिते निहतवाहनो दुर्योधनो रणादपसृत्य पद्भ्यामेव प्रायात् । कौरवसैन्ये कृपद्रौणिकृतवर्माण एवाऽवशिष्टाः । ततो मार्गे दुर्योधनः संजयं दृष्ट्वा प्रोवाच । भद्रपुरुष ! त्वं मम जनकमुपसृत्य ब्रूहि यत् तव ज्येष्ठपुत्रः सुहृदा कर्णेन विहीनो दुःशासनादिभिर्भ्रातृभिश्च रहितो दुःखाद् ह्रदं प्रविवेश । ततः संजयमुखाद् वृत्तं श्रुत्वा त्रयोऽपि ते तमुपसृत्य शुशुचुः । अथ धर्मनंदनो रात्रौ पार्थादिभिः सह संभाषमाणो दुर्योधनं सस्मार । अहो ! यस्य शासनं सार्व्वभौम-महीपा शिरसाऽवहन् । सोऽसहायः पदातिरगमत् । विचित्रो भगवान् विधिरिति लोकोक्तिः अक्षरशः सत्या । अत्रान्तरे संजयो हस्तिनापुरमेत्य धृतराष्ट्राय सर्वं वृत्तमावेदयामास । तच्छ्रुत्वाऽम्बिकेयः पुनः पुनः स्वभाग्यं निनिन्द । अथ प्राज्ञो-विदुरोऽवदत् । राजन् ! भगवतः श्रीकृष्णस्य वचनं न श्रुतं तस्य फलमेतत् । किं बहुना । एकस्य दुर्योधनस्य दोषेण सर्वराजसंक्षयोऽभवत् । संप्रत्यपि दुर्योधनो युधिष्ठिरं गत्वा क्षमां याचेत तदा तु शांतिस्थापनं सुलभमिति निगद्य महामतिर्विदुरो विरराम ।

इति श्रीकृष्णचरिते शल्यवधनिरूपणं नाम
नवनवतितमः स्तवकः ॥ ९९ ॥

अथ द्रौणिप्रमुखास्त्रयो वीरा ह्रदे प्रविष्टं मानधनं राजानमूचुः । राजन् ! परित्यज्याधिं सहसोत्तिष्ठ। रणे च रिपून्जहि। तच्छ्रुत्वा राजोवाच । विपदि सहायका यूयं धन्याः । सखायः! प्रातर्ममाऽपि क्षत्रियोचिता गतिर्भविष्यति । अत्रान्तरे मृगयातो गृहान्निवर्तमाना लुब्धकास्तेषां वार्तालापं श्रुत्वा पूर्वाऽपरप्रसंगेन तं दुर्योधनं ज्ञात्वा धनाशया तद्वृत्तं भीमाय निवेदयामासुः । ततः श्रीकृष्णवचसा सपरिजनो राजा सलिलान्तः स्थं सुयोधनमुवाद । वीर ! रजतकर्पूररजनीपतिसुंदरं शुभ्रं यशः किमर्थं मलिनीकरोषि ? रणे दिक्पालोपमान् भूपान् घातयित्वा स्वप्राणरक्षां कुर्वाणो न लज्जसे ? एतदुपाकर्ण्य धर्मनंदनवचनं दुर्योधनो जले स्तम्बेरम इव श्वसन प्रोवाच । राजन् ! नाऽहं भीरुः । विश्रामार्थं करोमि सलिलावगाहम् । यथा वीरविहीनाचमूः बुधविरहिता च गोष्ठी न शोभते तथा स्वजनशून्या लक्ष्मीरपि न राजते । मया भुक्तां वैराग्यमुक्ताभरणां जरतीं योषितमिव पृथ्वीं भुंक्ष्व। तच्छ्रुत्वाऽर्जुनोवाच । अस्तु तवैकेन साकं भीमेन युद्धम्। सचेत्त्वया जितस्तर्हि सर्वेऽपि वयं जिताः। ततोऽपरो दण्डधर इव गदापाणिर्धार्तराष्ट्रो योद्धुमुद्यतोऽभवत् । ततः श्रीकृष्णसंकेतमवाप्य कृष्णानिकारं स्मृत्वा गदामादाय च तत्पुरोवर्ती बभूव भीमः । अत्रान्तरे तीर्थयात्रातो निवृत्य समायातो तटस्थो हलायुधोऽपि तत्र सम्मिलितोऽभवत् । सोऽथ बद्धवैरयोस्तयोः

संघर्षं दृष्ट्वाऽत्यखिद्यत । ततस्तौ चित्रमण्डलचारिणौ वीरौ मोक्षाक्षेपधावनाविप्लुतिसमयस्थानादिभिर्मुहूर्तमात्रमयुध्येताम् । अथ क्रुद्धः कौरवपतिः गदया भीमस्य पार्श्वदेशं पीडयामास । एवमालोक्य भीमोऽशनिकल्पां गदां भ्रामयित्वा कुरुराजाय प्राहिणोत् । स प्रहारो विफलोऽभवत् । ततो वृकोदरो द्वितीयां गदां प्राक्षिपत् । साऽपि धरण्यां निपपात । ततः कौरवेण प्रहृतो भीमो महतीं पीडामवाप्य विह्वलो बभूव । अथ भीमेनाभिहतो धार्तराष्ट्रो धरण्यां पतित्वा सहसोत्थाय च गदाऽघातेन भीमं धराशायिनमकरोत् । ततः पार्थप्रश्नमाकर्ण्य हरिरुवाच । सखे ! भीमस्तु केवलो बलवान् किन्तु कुरुपतिः पराक्रमी गदायुद्धविशारदो रणाकुशलश्चाऽप्यस्ति । धर्मयुद्धेन तु भीमः कौरवेश्वरं सर्वथा जेतुमसमर्थः । यदि मायामवलंब्य वृकोदरोऽस्य कुर्यादुरुभंगं तदा तु भवितुमर्हति जयाशा । अन्यथा दुर्जयोऽयं महावीरो दुर्योधनः । अत्रान्तरे विनशनम् समायातो बलदेवस्तयोर्युद्धमालोक्य तटस्थोऽपि जगाद ।

युवां तुल्यबलौ वीरौ हे राजन् ! हे वृकोदर !
एकं प्राणाधिकं मन्ये उतैकं शिक्षयाऽधिकम् ॥

ततो वासुदेवसंकेतेन भीमः सत्वरं समुत्थाय जयो रंध्रप्रहारिणामिति नीतिवाक्यमनुसृत्य च कुरुराजाय गदां चिक्षेप । युद्धवीरो धार्तराष्ट्रो गदया गदां न्यपातयत् । ततोऽवसरमवाप्य पाण्डवो

द्वितीयां गदां प्राक्षिपत्। दैववशात् सा तदूरुयुगे भुजंगीव निपपात। ततस्तेन मर्माघातेन त्रुटितोरुसंधिः कौरवपतिः वज्राहतो गिरिरिव दिवं विलोकयन् धराशायी बभूव। ततोऽपकारान् श्रावयन् भीमो लक्ष्मीविलाससदनं कुरुपतिशिरश्चरणेन पस्पर्श। एवमन्यायमालोक्य कोपकरालो हलायुधः प्रोवाच। अहो! युद्धवीरस्य व्याजहतस्य च शिरः कोऽपशुः पदास्पृशेदिति निगद्य तं भीमं क्रोधाग्निना दग्धुमुद्यतो बभूव। अत्रान्तरेऽनर्थापत्तिमालोक्य जनार्दनो नानाविनतिवाक्यैरग्रजं शमयामास। ततो विपद्भूताग्निदीपाणां प्रभावोऽयमितिवादिनं कृष्णचन्द्रं निजामुत्कटां रुजं संस्तभ्य दुर्योधनोऽवदत्। गोपालबाल! मूर्खाणां संज्ञां कृत्वा वंचितोऽस्मि। त्वया भीष्मप्रमुखा वीराः कपटेनैव निपातिताः। मया सुहृद्भिः सह भुक्तं, कान्ताभिर्विहृतम्, अग्रजैर्हुतम्, निष्कंटकं राज्यं कृतम्, अन्ते क्षत्रियोचितं मरणं च प्राप्तम्। अतो मत्सदृशो भाग्यवान् कोऽस्ति पृथ्वीमण्डले? ततो लज्जिता इव पार्थाः श्रीकृष्णं पुरस्कृत्य जयं नादयन्तो रथानारुह्य च शिविरं ययुः। ततो हरिः गांधारीधृतराष्ट्रावुपसृत्य प्रोवाच। राजन्! धर्मसूनुना प्रेरितोऽहमत्रायातः। यदा पुनः पुनः प्रार्थितोऽपि दुर्योधनो हठं नाऽत्यजत् तदा युद्धमभूत्। संप्रति विहाय विषादं पाण्डवान् स्वसुतान् गणय। 'यतो धर्मस्ततो जय' इति शाश्वतं वाक्यं गुरुजनेभ्य श्रुतं तत् सत्यमेव।

ततो निवृत्ते हरौ राजा भवितव्यं बलवत्तरं मत्वा यथाकथंचिच्छान्तिमवाप ।

इति श्रीकृष्णचरिते भीमदुर्योधनयुद्धनिरूपणं नाम शततमः स्तवकः ॥ १०० ॥

अत्रान्तरे रात्रौ कृपद्रौणिहार्दिक्या दुर्योधनमुपसृत्य तद्दशां च विलोक्य नितरां व्यथिता बभूवुः । ततः कृपाचार्यो राज्ञो युद्धवीरत्वं पुनः पुनः प्रशशंस । अथ कृतवर्माऽवदत् । कुरुपते ! मा कुरु चिन्ताम् । यावत्प्राणास्तावत् तव हितार्थं पुरस्कृत्य गुरुपुत्रं प्रयतिष्यावहे । तच्छ्रुत्वा गद्गद्गिरा राजोवाच । महावीर ! समयेऽन्तिमे त्वमेव मम सेनानीरसि । ततो द्रौणिरम्बुदनिर्घोषं कृत्वा प्रतस्थे । अथ घोरसत्त्वघनेगहने श्रमात् कृपकृतवर्माणौ तु निदद्रतुः किन्तु दुर्योधनदशां ध्यायन्नश्वत्थामा नाऽलभत निद्राम् । अत्रान्तरे न्यग्रोधशिखराश्रितं वायसवर्गं पेचकेन निपातितमालोक्य तामेव नीतिं पाण्डववधे निर्धारयामास द्रौणिः । सोऽथ क्रुधा क्रूरां धियं कृत्वा कृपभोजौ प्रबोधयामास । ततोऽब्रवीत् कृपीसुतः । अहन्त्विदानीमेव गत्वा प्रसुप्तान् पाण्डवान् हन्मि । तच्छ्रुत्वा कृपाकुलः कृपः प्रत्यवदत् । भागिनेय ! नैतदुचितम् । पावककल्पा वयं प्रातरेव कुरुपतिसमीहितं संपादयिष्यामः । अथ दृढप्रतिज्ञोऽश्वत्थामा रथेन तमस्येव कौरवद्विषां शिविरं प्रायात् । कृपभोजौ च द्वारदेशमध्य-

तिष्ठताम् । ततः प्रविष्टो गुरुपुत्रो भैरवं त्रिपुरारिं विलोक्य तमेव शरणं ययौ । सोऽथ विरूपाक्षं तोषयितुं ज्वलिते तत्रत्ये महावह्नावात्मानं पातयितुमियेष । ततस्तुष्टो हरोऽवदत् । आंगिरस ! मा कुरु साहसम् । श्रीकृष्णप्रेरणयाऽत्र स्थितोऽस्मि । मां कृष्णात् पृथङ्मा गणय । अवशिष्टा इमे पाण्डवपक्षपातिनः कालपक्वाः संतीत्यादिश्य सदाशिवस्तिरोदधे । सोऽथ शयानं धृष्टद्युम्नं पादाघातेन प्रबोध्य जघान । ततो युधामन्युं वीरं निपात्युत्तमौजसमपिन्यवधीदश्वत्थामा । ततः सुप्तान् कृष्णासुतान् कालकवलितान् कृत्वा तन् साहाय्यार्थं समुद्यतं शिखण्डिनमपि-ससैन्यं यमालयं प्रेषयामास द्रौणिः । अत्रान्तरे घनांधकारे वीररथकुंजरवाजिनां क्षयं द्वारदेशस्थौ भोजगौतमौ चक्रतुः । ततस्त्रयोऽपि मिलित्वा गता भुवि पतितं भग्नशक्तिं गदाग्रेण च क्रव्यादान् वारयंतं कुरुराजं ददृशुः । ततस्ते तस्य वदनोद्वान्तं शोणितमाशु परिमृज्य सर्वपांचालसंहारकथामृतं ववृषुः । निशम्यैवं किंचिच्छेपजीवोऽपि वृत्तकंधरोऽव्यक्तभाषितैस्तान् प्रशशंस । सोऽथ पार्श्वस्थं द्रौणिं यत्नेन परिष्वज्य पुनर्नः संगमः स्वर्गे भूयादित्या-चचक्षे । ततो दयितामिव गदामंगे विधाय चिरं भुक्तां वसुमतीं दोर्भ्यामवगूह्य च वीरगतिं स्मरन् देवाङ्गनाप्रणयी बभूव दुर्योधनः ।

इति श्रीकृष्णचरिते दुर्योधनस्वर्गप्राप्तिनिरूपणं नाम
एकोत्तरशततमः स्तवकः ॥ १०१ ॥

अथ प्रभाते ज्ञातवृत्ता कृष्णा मूर्छिता भुवि न्यपतत्। ततो लब्धसंज्ञा द्रुपदात्मजा मर्मभेदिभिः परिदेवनैः पाण्डवानां हृदयानि विदारयामास। अथ भीमो मरणे कृतनिश्चयां तां विज्ञाय रथमारुह्य द्रौणिजिघांसया प्रातिष्ठत। एवमालोक्य हरिः द्रौणिं रुद्रांशं भीमं च पवनांशं मत्वाऽन्यानपि पाण्डवान् तमनुसर्तुं समुद्यतानकरोत्। ततः पादचारी गुरुपुत्रः शरणमनवाप्य सरस्वतीतटे पाण्डवविहीनां महीं कर्तुं ब्रह्मशिरोनामकमस्त्रं व्यसृजत्। अथ ब्रह्मास्त्रात् प्रकाशितासु दिक्षु प्राणवियोजकं तेजो वीक्ष्य पार्थो हरिं तुष्टाव।

कृष्ण! कृष्ण! महाबाहो! भक्तानामभयंकर!
त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥

एवं संस्तुतो हरिरुवाच। सखे! माऽभैषीः। प्राणसंकटे समुपस्थिते द्रोणपुत्रेण ब्रह्मास्त्रं प्रयुक्तम्। अयमुपसंहारं न जानाति त्वं तु जानास्यतः स्व प्रयुक्तब्रह्मास्त्रतेजसाऽस्य शक्तिं जहि। अथ पार्थो हरिमुखात् तत् प्रतीकारं श्रुत्वाऽपः स्पृष्ट्वा प्रणम्य च जनार्दनं ब्रह्मास्त्रसंहाराय ब्रह्मास्त्रमेव प्रयुयोज। अथोपसंहाराऽनंतरं क्रोधताम्राक्षोऽर्जुनो वेगेन गौतमीपुत्रमासाद्य दाम्ना बद्ध्वा च तं कटकमानिनाय। अत्रान्तरे भगवानाह।

मैनं पार्थाऽर्हसि त्रातुं ब्रह्मबन्धुमिमं जहि।
योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥

मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ॥

एवं हरिणा प्रेरितोऽपि पार्थो "न हिंस्यात् सर्वा भूतानि" ब्राह्मणो न हंतव्य इत्यादीनि धर्मशास्त्रवाक्यानि स्मृत्वा क्षमामेव समालंबे। सोऽथ स्वशिविरं समेत्य शोचंत्यै प्रियायै तमाततायिनं न्यवेदयत् । अथ कृष्णा पशुवत् पाशबद्धं बालहत्ययाऽवाङ्मुखं च तं गुरुपुत्रं विलोक्य सरलस्वभावत् विस्मृत्यापराधं प्रणनाम । दयार्द्रहृदया च प्रोवाच। आर्यपुत्र !

मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ।
अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥

स एष भगवान् द्रोणः प्रजारूपेण वर्तते ।
तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥

एवमाकर्ण्य सकरुणं द्रौपदीवचनं तत्रत्याः पुरुषाः स्त्रियश्च सर्वे मुक्तकण्ठं द्रुपदनंदिनीं प्रशशंसुः। अथ हरिः प्रोवाच। महाशयाः! "ब्राह्मणो न हंतव्यः" "आततायिनं हन्यात्" इति मयैवोभयमाम्नातम्। अपरं च आहरिष्ये शिरस्तस्येति च भीमेन प्रतिज्ञातं पार्थेन चाऽनुमोदितम् । अतः सर्वसम्मतं निर्णयं मन्यध्वम् । येन 'सर्पस्तु म्रियेत यष्टिश्च न त्रुट्येत्' । रशनाबद्धमेनं विमुच्य मणिना हीनं च कृत्वा शिविरान्निः सारयत । उक्तं च—

वपनं द्रविणादानं स्थानान्निर्यापणं तथा ।
एष हि ब्रह्मबंधूनां वधो नान्योऽस्ति दैहिकः ॥

अत्र केचित् कथयंति ब्राह्मणस्य चूडारत्नंशिखा । तस्याश्छेदनं पार्थोऽसिना चकार ।

इति श्रीकृष्णचरितेऽश्वत्थामनिग्रहनिरूपणं नाम
द्व्यधिकशततमः स्तवकः ॥ १०२ ॥

ततः सह कृष्णया पुत्रशोकातुराः पाण्डवा बंधूनां निर्हरणादिकं कृत्यं चक्रुः । अथ श्रीकृष्णपुरस्सराः पाण्डुनंदनाः स्त्रीगणसहिताश्च तिलोदकमिच्छतां मृतवीराणां कल्याणाय गंगातटं ययुः । जाह्नव्यां स्नात्वा तेऽथ पितृतर्पणं कृत्वा च कृतार्था बभूवु । ततो माधवो गांधारीसहितं धृतराष्ट्रं पृथां कृष्णां च नानेतिहासोपदेशैः सांत्वयामास । अथैकदा कुटुम्बसंहारेण व्यग्रचित्तं राजानं दृष्ट्वा हरिर्हयमेधार्थं प्रेरयामास । तच्छ्रुत्वा राजोवाच । देव !

यथा पंकेन पंकांभः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥

एतदुपाकर्ण्य हरिरुवाच । राजन् ! चतुर्विधं कर्म । अप्रशस्तम्, प्रशस्तं, श्रेष्ठं, श्रेष्ठतमं चेति । तत्र लोकविरुद्धं वधबंधचौर्यादिक-

मप्रशस्तम् । लोकैः श्लाघनीयं बंधुवर्गपोषणादिकं प्रशस्तम् । स्मृत्युक्तं वापीकूपतडागादिकं श्रेष्ठम् । वेदोक्तं यज्ञरूपं श्रेष्ठतमम् । 'यज्ञो वै विष्णुः यज्ञियेस्थ' इति श्रुतेः । अथ कदाचित् कृतार्थो हरिः पाण्डवानामंत्र्य शैनेयोद्धवाभ्यां सह रथमास्थाय च गंतुकामोऽभवत् । अत्रान्तरे भयविह्वलोत्तरा माधवं समुपेत्य प्राह—

पाहि पाहि महायोगिन्! देवदेव! जगत्पते!
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥

एवमाकर्ण्य भक्तवत्सलो भगवान् प्रणिधानेन द्रौणिचेष्टां विज्ञाय सुदर्शनचक्रेण सर्वेषामेव पाण्डवानां रक्षां व्यधात् । ततो दीनबंधुः कुरुवंशविवृध्यै स्वमायया वैराट्या उदरं प्रविश्य तत्रत्यं बालं ब्रह्मास्त्रतो ररक्ष । अथ प्रस्थातुकामं जनार्दनं पृथा प्राह—हृषीकेश! तव महिमा वर्णनातीतोऽस्ति ।

विपदः संतु नः शश्वत्तत्रतत्र जगद्गुरो ।
भवतो दर्शनं यत् स्यादपुनर्भवदर्शनम् ॥

ततः शौरिर्दूरागतान् पाण्डवान् सांत्वनेन निवर्त्य स्वनगरीमयासीत् । अत्रान्तरे रेवतीसहितो हलधरो नैमिषारण्यमगात् । तत्र महर्षयस्तं याजयामासुः । ततः समाप्ते महाक्रतौ दत्तदक्षिणः

श्रीबलभद्रो रेवत्या सहावभृथस्नानमकरोत् । अथ मिलितौ रामकृष्णौ परममुखमवापतुः ।

इति श्रीकृष्णचरिते उत्तरागर्भरक्षणनिरूपणं नाम त्र्यधिकःशततमः स्तवकः ॥ १०३ ॥

अस्ति विदेहेषु मिथिलापुरी । तत्र श्रीकृष्णभक्तः श्रुतदेव-नामा ब्राह्मणः प्रतिवसति स्म । स यदृच्छालाभसंतुष्टः स्वदार-निरतः शान्तो दान्तः सुशीलश्चाऽभवत् । तेष्वेव दिनेषु जनकपुरीं बहुलाश्वसंज्ञको राजा शास्ति स्म । स नीतिनिपुणोऽ-तिथि पूजकः सतां परिपालकश्च बभूव । सौभाग्यादुभावप्यच्युत-प्रियावास्ताम् । अथैकदा जनार्दनो दिव्यं स्यन्दनं समारुह्य विदेहान् गंतुकामोऽभवत् । अत्रान्तरे कण्वाद्या महामुनयस्तत्र समाययुः । यदुपतिस्तान् समालोक्य विसृज्य यात्रां पूर्वं विप्र-वर्यान् विधिवत संपूज्य च प्रोवाच । महाशयाः !

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥

यस्याऽऽत्मबुद्धिः कुणपे त्रिधातुके-
स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिलेन कर्हिचित्-
जनेष्वभिज्ञेषु स एव गोखरः ॥

एवमाकर्ण्य हरिवचनं सर्वे मुनयो लोकसंग्रहायैव प्रभुरयं व्यवहारो-यमिति निश्चित्य साश्चर्या बभूवुः । सोऽथ मुनिभिः सह रथमारुह्य जगाम विदेहान् । ततो राजाऽच्युतमागतमाकर्ण्य पुरस्कृत्य पौरान् अभीयाय । अथ प्रणिपत्य सर्वान् पाद्यार्घ्यादिभिः समानर्च । अथ मैथिलश्रुतदेवौ युगपत् तान् न्यमंत्रयेताम् । ततो भगवानुभयोः प्रियचिकीर्षया उभाभ्यां रूपाभ्यां द्वयोरेव-गृहमाविवेश । अथ राजा षोडशोपचारैर्जनार्दनं सत्कृत्य तुष्टाव ।

को नु त्वच्चरणांभोजमेवंविद् विसृजेत्पुमान् ।
निष्किंचनानां शांतानां मुनीनां यस्त्वमात्मदः ॥

श्रुतदेवोऽपि स्वगृहान् प्राप्तं समुनिवृन्दं माधवं नत्वाऽतिहृष्टो ननर्त । सभार्यः सोऽथ वृसीषु तान् समुपवेश्य चरणप्रक्षालनं कृतवान् । ततस्तदंभसाऽन्वयं स्नापयित्वा कृतकृत्यो बभूव । सोऽथ गंधपुष्पधूपदीपफलताम्बूलतुलसीदलादिभिः केशवं समा-राधयामास । ततः श्रुतदेवोऽब्रवीत् ।

शृण्वतां गदतां शश्वदर्चतां त्वाभिवंदताम् ।
नृणां संवदतामंतर्हृदि भास्यमलात्मनाम् ॥

एतदुपाकर्ण्य प्रणतार्तिहा पाणिना पाणिं गृहीत्वा प्रहसन्नुवाच ।

न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् ॥

एवमुभावेव भक्तौ परितोष्य हरिः पुनर्द्वारावतीमाययौ। मुनयोऽपि च यथाभिमतं देशं गताः।

इति श्रीकृष्णचरिते भक्तजनमनोरथपूर्णकरणनिरूपणं नाम चतुरुत्तरशततमः स्तवकः ॥ १०४ ॥

अथैकदा द्वारावत्यां कस्याश्चित् विप्रपत्न्या जातमात्रः किल कुमारको भुवं स्पृष्ट्वैव ममार। ततो ब्राह्मणो मृतपुत्रं गृहीत्वा राजद्वार्युपधाय च तं तारस्वरेण रुरोद।

ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः।
क्षत्रबंधोः कर्मदोषात् पंचत्वं मे गतोऽर्भकः॥

यत्र राजा दुःशीलः, अजितेन्द्रियः, जीवहिंसानिरतश्च भवति तस्य दुर्भिक्षदारिद्र्यादिदुःखपीडिताः प्रजा अहर्निशं सीदंति। एवं यथा यथा तस्य पुत्रा अम्रियंत तथा तथा राजद्वारि विसृज्य तान् विलपन्नरोदीत्। अथैकदा केशवान्तिके तिष्ठन्नर्जुनस्तत् करुणाक्रन्दनं श्रुत्वा दयार्द्रहृदयो विप्रान्तिकमेत्य प्रोवाच। भूदेव! रुदितेनालम्? कारणं वद। तच्छ्रुत्वा समाश्वस्तो द्विजः संक्षेपेण सर्वं वृत्तं पार्थाय समावेदयामास। एतदुपाकर्ण्य फाल्गुनोऽवदत्। विप्र! रक्षिष्याम्यहं तव संततिम्।

धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः।
ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः॥

तच्छ्रुत्वाऽजन्मा प्रोवाच । कौंतेय ! "अज्ञात्वा वृश्चिकमंत्रं सर्पकरण्डे हस्तं मा क्षिप" । ततः समालंब्य माहृमं मगाण्डीवो विजयो ब्राह्मण्याः प्रसूतिकाले संप्राप्ते सूतिकागृहमध्यातिष्ठत । अथ पाहि पाहीति विप्रवाक्यं श्रुत्वाऽर्जुनः शुद्धांभः समुपस्पृश्य महादेवं नमस्कृत्य दिव्यास्त्रमंत्रान् संस्मृत्य च सज्जीकृतधनुस्तस्थौ । ततो नानास्त्रप्रयोगैः शरपंजरं रचयित्वाऽरिष्टं न्यरुणत् । अत्रान्तरे विप्रपत्नी सुतं सुषुवे । वारेऽस्मिन् रुदन् पुत्रोऽजायत किन्तु दर्शनमदत्त्वैव स सद्यो दिवं जगाम । एतदालोक्य चिन्तितो ब्राह्मणः पुनः पुनः पार्थं निनिन्द । अथ कृष्णमित्रो विद्यामास्थाय यमराजधानीं संयमिनीं ययौ । तत्राऽपि द्विजसुतमलब्ध्वा प्रतिज्ञानुसारेण पावकं विविक्षुरभवत् । एवमालोक्य भगवान् वासुदेवः "सततमात्मानं गोपायीत" इति श्रुतिवाक्यं स्मारयन् तं मरणान्निवारयामास । सोऽथ सपार्थो दिव्यं रथमास्थाय लोकालोकमतीत्य च निविडं तमः प्रविवेश । ततः स सुदर्शनचक्रेण प्रकाशितं प्रदेशं कृत्वाऽग्रे चलन् नंदसुनंदनादिभिः निषेव्यमाणं परमेष्ठिनामपि पतिं भूमाभिधानं परमपूरुषं ददर्श । अथ श्रीकृष्णार्जुनौ तं प्रणम्य बभाषाते । प्रभो ! कृत्वा कृपां देहि द्विजदारकान् । निशम्यैवं हरिवाक्यं भगवान् भूमाऽब्रवीत् । मया युवयोर्दर्शनार्थं द्विजदारका आनीताः । युवां धर्मगुप्तये मेकलया भुव्यवतीर्णौ । कृतकार्यौ त्वरया ममांतिकमागच्छतम् ।

एवं परमेष्ठिना समादिष्टौ कृष्णौ ओमित्युक्त्वा भूमानमभिवंद्य द्विजदारकान् नीत्वा च प्रहृष्टौ द्वारावतीमाजग्मतुः। ततस्तौ यथारूपं यथावयश्च पुत्रान् द्विजाय प्रायच्छताम्। एतादृशान्यनेकानि वीर्याणि प्रदर्शयन् पुष्कलदक्षिणैर्यज्ञैर्देवांश्च पर्यतोषयन् भगवान् वासुदेवो विषयसुखान्यपि बुभुजे।

इति श्रीकृष्णचरिते ब्राह्मणसुतसमर्पणं नाम पंचोत्तरशततमः स्तवकः॥ १०५॥

अस्ति द्वारावतीसमीपे पिण्डारकाख्यं तीर्थम्। तत्राऽत्रिकश्यपादयो महर्षयः श्रीकृष्णदर्शनं कृत्वा तीर्थस्नानार्थमगमन्। अत्रान्तरे दुर्दैवविमोहिताः क्रीडन्तो यदुनंदना जांबवतीसुतं सांबं स्त्रीवेषेण वेषयित्वा तानुपसृत्य च विनीतवत् पप्रच्छुः। भो भोः कण्वाऽसितवामदेवप्रभृतयो मुनिवराः! एषाऽसितेक्षणान्तर्वत्नी साक्षात्प्रष्टुं विलज्जती अस्मन्मुखेन पृच्छति। यत् आसन्नप्रसवेयं पुत्रकामा किंस्विज्जनयिष्यति? तच्छ्रुत्वा कोपाकुलो दुर्वासा ऋषिगणमतं विज्ञाय प्राह। कुलाङ्गाराः! कपटवेषेयं युवतिरचिरात् युष्मत्कुलनाशनं मुसलं जनयिष्यति। तच्छ्रुत्वाऽतिसंत्रस्तास्ते यावदुदरं विमुच्य पश्यंति तावत् लोहमयं मुसलं प्राप्नुवंति। एतदालोक्य चिन्तातुरा मिथो जगदुः। अहो! मंदमतिभिरस्माभिः किं कृतम्?

स्वकीयेनैत्रपरशुना स्वकीया एव पादाश्छिन्नाः । ततस्ते म्लानमुखा यादवसभामेत्य राजाधिराजायोग्रसेनाय सर्वां स्वकुचेष्टामावेदयामासुः । तेऽथ विप्रशापममोघं मत्वा स्वकुलक्षयस्य चाऽवधिं ज्ञात्वा पुनः पुनर्दौर्भाग्यं निनिंदुः । ततो भयसंत्रस्तास्ते द्वारकौकसस्तन्मुसलं चूर्णयित्वा सलिले प्राक्षिपन् । अत्रान्तरे कश्चिन्मत्स्यस्तं क्षिप्तं लोहमग्रसीत् । अवशिष्टानि चूर्णानि समुद्रतरलैरुह्यमानानि वेलायामेरका अभूवन् । ततो मत्स्यजीविभिः जालेनाऽन्यैर्मत्स्यैः सह सोऽपि मत्स्यो गृहीतः । तद्विदारणदशायां तस्योदरान्निर्गतं लोहमवाप्य व्याधस्तं शराग्रं कृतवान् । विज्ञातार्थोऽपि हरिः तस्य प्रतीकारं कर्तुं नैच्छत् । प्रत्युत यद्भाव्यं तद् भविष्यतीत्यभिधाय स्वयं निर्भीकः स्वपरानपि भयरहितांश्चकार ।

इति श्रीकृष्णचरिते यदुकुलशापनिरूपणं नाम
षडुत्तरशततमः स्तवकः ॥ १०६ ॥

अथैकदाऽऽत्मभूर्देवराजादिभिर्निर्जरैः सह कृष्णदिदृक्षया द्वारकामुपजगाम । ततो हरिं विलोक्य प्रजापतिस्तुष्टाव ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

अथाऽवसरमवाप्य परमेष्ठी प्राह । प्रभो ! पुराऽस्माभिः भूमिभारावताराय विज्ञापितस्त्वंसमवतीर्य सर्वं देवकृत्यं संपादितवानसि ।

सम्प्रति पंचविंशाधिकं शरच्छतं व्यतीयाय । अतो यदि मन्यसे तदा तु स्वधाम पुनः प्रविश । स लोकपालान् वैकुण्ठकिंकरान्नः पाहि । निशम्यैतद् पद्मभूवचनं मायामनुजविग्रहो भगवानुवाच । हंसवाहन ! मया युष्मत्कार्यं कृतम् । इदानीं शौर्यवीर्यसमन्वितस्य मदोद्धतस्य यदुवर्गस्य द्विजशापतो विनाशकालः समुपस्थितः । अस्यान्तेऽहं तव भवनं स्वयमेष्यामि । एतदुपाकर्ण्य हरिवचनं बाढमुक्त्वा च सदेवगणो विरंचिः स्वधाम प्रत्यपद्यत ।

अथाऽन्येद्युः द्वारावत्यां विलोक्य महोत्पातान् द्वारकाधीशो यदुवृद्धान समाहूय प्रोवाच । महानुभावाः ! अपि जानीथ शापवृत्तान्तं यूयम ? जिजीविषुभिरस्माभिर्नैवाऽत्रवस्तव्यम् । तच्छ्रुत्वा ते प्रोचुः । हरे ! नाऽत्र चिंतावसरः । जीवः स्वकर्मफलमेव भुंक्ते । "रोगमूलं कासः शोकमूलं च हासः" इति लोका व्याहरंति । विप्रावमानं कृत्वा शापो मूर्खैर्लब्धः । ततो हरिरुवाच । षड् भावविकारा भवंति । जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति वेदानुशासनम् । अतो नाऽत्र विस्मयः कर्तव्यः । य आरोहति स एव पतति । उक्तं च—

कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्याऽऽपदोऽस्तं गताः ।
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरः क्षितितले कोऽर्थी गतो गौरवम् ।
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥

वयं त्वद्यैव पुण्यपवित्रतीर्थं प्रभासं यास्यामः । पुरा दक्षशापात् यक्ष्मणा गृहीतो नक्षत्रेशः तत्र स्नात्वा किल्बिषान्मुक्तिमवाप्य भूयश्च कलोदयं भेजे । वयमपि तत्राप्लुत्य सुरानग्निहोत्रेण पितॄन् तिलोदकेन विप्रांश्च सुधोपमभोजनेन तर्पयिष्यामः । एवं भगवताऽऽदिष्टा यादवा रथानारुह्य सोमतीर्थं सहसा ययुः ।

इति श्रीकृष्णचरिते ब्रह्मादिदेवसंदेशनिरूपणं नाम सप्तोत्तरशततमः स्तवकः ॥ १०७ ॥

अथ प्रभाते जगन्नाथं विविक्त उपसंगम्योद्धवोऽवदत् सविनयम् । धर्मज्ञशिरोमणे ! यादवकुलमेतत् संहृत्य भवानपि लोकं संत्यक्ष्यति । केशव ! नाऽहं क्षणार्धमपि तवांघ्रिकमलं त्यक्तुं समुत्सहे । अतो मामपि स्वधाम नय । कर्मवर्त्मसु भ्रमन्तो मानवास्त्वद्वार्तयैव तरिष्यंति । एतदुपाकर्ण्य भक्तवचनं प्रीतमना हरिरुद्धवं समभाषत । सखे ! सत्यमभिहितं भवता । ब्रह्माद्या-देवा मामाह्वयंति । शापनिर्दग्धमेतत् कुलं मिथः कलहं कृत्वा ध्रुवं नंक्ष्यति । किं बहुना । पुरीमेतां कल्लोलमालाकुलोऽब्धिः सप्तमेऽह्नि संप्लावयिष्यति । मया परित्यक्ते महीतले सर्वत्र कलियुगः प्रसरिष्यति । त्वमपि स्वजनबंधुषु परित्यज्य स्नेहं मयि च मनः समावेश्य समदृष्ट्या गामट । मित्र ! यदिदं दृश्यते श्रूयते वा विचिन्त्यते तदिदं सर्वमविद्यायुक्तेन मनसा कल्पितमस्ति । वस्तुतस्तु

सर्वं नश्वरमवगच्छ। आर्य ! अद्याऽहं त्वां यदुत्रवधूतयोः पुरातन-मितिहासमेकं श्रावयामि । तच्छ्रुत्वा परमं संतोषं समवाप्स्यसि । आसीदस्मत्पूर्वपुरुषो राजर्षिर्यदुः । स एकदाऽश्वमारुह्य मनोविनोदार्थं वनं जगाम । स क्वाऽपि शीतलच्छायायां समासीनं कमप्यकुतोभयं तरुणमवधूतं च ब्राह्मणं दृष्ट्वाऽपृच्छत् । ब्रह्मन् ! नमस्करोमि । सुविशारदेयं बुद्धिः त्वया कुतः समासादिता ? यामासाद्य भवाँल्लोके बालवद्विचरति । देव ! कामलोभदवाग्निना जनेषु दह्यमानेषु गंगांभसि द्विप इव त्वं कथं न तप्यसे ? एतदुपाकर्ण्य भूपवचनं द्विजः प्रत्यवदत् । राजन् ! पृथिव्यां मे बहवो गुरवः संति । तेभ्यः शिक्षां समादाय मुक्तोऽहं सर्वत्र निर्भयो विचरामि ।

पृथिवीवायुराकाशमापोऽग्निश्चन्द्रमा रविः ।
कपोतोऽजगरः सिंधुः पतंगो मधुकृद् गजः ॥
मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः ।
कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत् ॥
एते मे गुरवो राजंश्चतुर्विंशतिसंख्यकाः ।
एभ्यः शिक्षां समादाय सुखेन विचराम्यहम् ॥

(१) तात ! जनैः पादाघातादिभिः पीड्यमानाऽपि पृथ्वी यथा न प्रचलति तथाऽवलंब्य क्षमां पराऽपकारान् विद्वान् सहेत ।

(२) वायुर्यथा सर्वत्र प्रविशन्नपि न क्वाऽपि विषज्जते । एवं विद्वानपि सुखदुःखादिचिन्ताशून्यः सन् विषयान् भुंजानोऽपि तत्रासक्तिं न कुर्यात् ।

(३) यथाऽऽकाशस्य सर्वगतस्याऽपि न घटपटादिभिः संगः परिच्छेदो वा । एवमात्मनोऽप्यसंगत्वं सदैव ज्ञानी जानीयात् ।

(४) यथा जलं शीतलं स्वच्छं मिष्टं सरलं च भवति । एवं मुनिरपि क्रोधरहितः स्वच्छान्तःकरणः प्रियंवदोऽहंकाररहितश्च भवेत् ।

(५) अग्निर्यथाऽऽकाररहितोऽपि काष्ठस्थितस्तत्तत् स्वरूपो भवति । एवं विभुरपि परमात्मा स्वमायया सृष्टमिदं देवतिर्यगादि शरीरं प्रविष्टस्तथा तथा प्रतीयते ।

(६) यथा जन्ममरणाद्या भावाः कालेन देहस्यैव जायंते नत्वाऽऽत्मनः । एवं कलानामेवोत्पत्त्यादयो विकारा भवंति न तु चंद्रस्य ।

(७) एकोहि सूर्यो जले यथा प्रतिबिम्बितः स्थूलमतिभिः तद्गतभेदेन लक्ष्यते । तथा देहाद्युपाधिं प्रविष्टः स्वेनरूपेणैकोऽप्यात्मा देहाद्यात्माभिमानिभिः भेदेनैव बुद्ध्यते । वस्तुतस्तूभयोरेकत्वात् ।

(८) क्वाऽपि केनाचित्सह नाऽतिस्नेहः कर्तव्यः। कुर्वन् कपोत इव संतापं लभते। आसीत्पुष्करारण्ये क्वाऽपि महान् वटवृक्षः। तत्र कपोतदंपती प्रतिवसतः स्म। अथैकदा बभूव गर्भिणी कपोती। समुपस्थिते काले पक्षिणी स्वपत्युः सान्निध्यौ नीडेऽण्डानि सुषुवे। अथाऽवसरे कोमलांगतनूरुहाः शिशवोऽभूवन। ततः पुत्रवत्सलौ तौ प्रजाः पुपुषतुः। ततस्तौ तेषां कूजितं श्रुत्वा परमां मुदमवापतुः। अथैकदा तौ मातापितरावन्नार्थं काननं जग्मतुः। अत्रान्तरे कोऽपि व्याधस्तत्रागत्य जालं प्रसार्य च तान् पारावतशावकान्जगृहे। अथ समायाता कपोती तान् जालसंवृतान् वीक्ष्य भृशदुःखिता बभूव। ततोऽजमायाविमोहिता सा स्वयमपि बन्धनमवाप। ततो मोहमापन्नो विहगो विललाप।

अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः।
अतृप्तस्याऽकृतार्थस्य गृहस्त्रैवर्णिको हतः॥

सम्प्रति विधुरोऽहं जीवितुं नेच्छामि। गृहिणी गृहमुच्यते न पुनः काष्ठसंघात इत्यभिधाय मरणे कृतनिश्चयोऽज्ञः स्वयमपि शिक्षु न्यपतत्। क्रूरकर्मा हिंस्रस्तान् सर्वानेव नीत्वा संपन्नसिद्धिर्गृहं प्रययौ।

(९) स्वादु विरसं वा पुष्कलं स्वल्पं वा प्रयासं विनाऽऽपतितं भोजनं अद्यात्। एवमाजगरीं वृत्तिं अजगराच्छिक्षितवानस्मि।

(१०) मुनिः गंभीरोऽलुब्धश्च भवेत् । यथाऽनंतपारोऽपि जलनिधिरलुब्धस्तिष्ठति कदाचिदपि मर्यादां नाऽतिक्रामति ।

(११) देवमायां स्त्रियं दृष्ट्वा यतिः तद्भावैः समाकृष्टो न भवेत् । अन्यथाऽग्नौ पतंगवत्पातित्वा नश्यत्येव ।

नारीमयं यंत्रमिदं नराणां वीर्यप्रतापादिविचूषणाय ।
विनिर्मितं तत्र जनो जुहोति स्वपौरुषं ह्येतदतीव चित्रम् ?

(१२) मधुमक्षिकाः प्रत्यहं पुष्पेभ्यो रसं गृह्णंति परमुपभोगं स्वयं न कुर्वंति । ततोऽन्य एव बलादाच्छिद्य मधु गृह्णंति । अतो मुनिः यावता देहो वर्तेत तावताऽन्नेन स्तोकं स्तोकं ग्रासं ग्रसेत् । मधुकरीं वृत्तिं धृत्वा गृहानहिंसन्नातिष्ठेत् । ज्ञात्वैवं साधुः इदं सायंतनभोजनार्थम् इदं श्वस्तनभोजनार्थं एवं भिक्षान्नं न संगृह्णीत । किन्तु पाणिपात्रो भवेत् । मक्षिकेव संग्रही परैर्हन्यते ।

(१३) बलवानपि गजो दारुमयीं हस्तिनीं दृष्ट्वा कामान्धो गर्ते पतति । अतो यतिः कामवशगो न भवेत् ।

(१४) सुगंधलुब्धो भ्रमरोऽसंतोषात् परित उत्पतन् सूर्यास्ते कमले बन्धनमवाप्नोति । प्रयतमानः स काष्ठं तु छेत्तुं समर्थो भवति किंतु प्रेम्णा न कमलम् । अन्ते च जीवनं गमयति । अत्र श्लोकः—

रात्रिर्गमिष्यति भविष्यति सुप्रभातं ।
भास्वानुदेष्यति हसिष्यति पंकजश्रीः ॥
इत्थं विचिन्तयति कोशगते द्विरेफे ।
हा ! हन्त ! हन्त ! नलिनीं गज उज्जहार ॥

(१५) वनवासी कदाचिदपि ग्राम्यगीतं न शृणुयात् । गीतमोहितो हरिणोऽवश्यं बंधनमवाप्नोति । महामुनी ऋष्यशृंगो योषितां नृत्यगीतवाद्यानि जुषन्नासां क्रीडनक इव बभूव ।

(१६) रसविमोहितो मीनो यथा वडिशेन मृत्युमृच्छति । एवं जिह्वालौल्यान्मनुष्योऽपि म्रियते ।

(१७) आशापाशबद्धो यतिर्न भवेत् । अन्यथा कष्टमनुभवति ।

आसीद्विदेहेषु पिंगलाख्या वेश्या । रूपलावण्यसंपन्ना सा भूलोकस्थाऽपि देवलोकस्थां तिलोत्तमां जिगाय । अथैकदा सा कमपि कमनीयं युवानं दृष्ट्वा मुमोह । पुरुषोऽपि तां विलोक्य पंचशरसायकैर्विद्धोऽभवत् । सोऽथ तस्या अहन्येव विहारेच्छां विज्ञाय प्रोवाच । सुभगे ! श्रुतिवाक्यं माऽवमन्यस्व । "प्राणं वा एते प्रस्कंदंति ये दिवा रत्या संयुज्यन्ते । ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते" । एतदुपाकर्ण्य सा रूपाजीवा धृतिं धृत्वा तं प्रतीक्षन्ती सायाह्ने गृहद्वारि तस्थौ । अधिकधनाशया

सा तस्यां रात्रौ न कमपि समायातं स्वीचकार । एवं ध्वस्तनिद्रा निराशा च सा मुहुर्मुहुरात्मानं वेश्यावृत्तिं च निनिन्द । ततो निशान्ते लब्धज्ञाना सा प्रोवाच । अहो !

विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ।
याऽन्यमिच्छंत्यसत्यस्मादात्मदात्काममच्युतात् ॥

अद्य भगवान् विष्णुर्नूनं ममोपरि दयादृष्टिं प्राक्षिपत् । यया दुराशा निरस्ता । एवं निश्चित्य शान्तिमवलंब्य च शय्यामुपविवेश । अत्र श्लोकः—

आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यथा संछिद्य कान्ताशां सुखं सुष्वाप पिंगला ॥

(१८) नृणां यद्यत् प्रियतमं वस्तु तस्य तस्य परिग्रहो दुःखाय भवति । यथा परिगृहीतामिषमुखं कुररं पक्षिणं निरामिषाः श्येनगृध्रादयो जघ्नुः । एतदालोक्य स परित्यज्य मांसं सुखमाविन्दत् ।

(१९) बालको मानान्नप्रसीदति । अवमानाच्च न विषीदति । एवं यतिरपि मानावमानौ न गणयेत् ।

(२०) आसीत् क्वाऽपि विवाहार्थिनी कुमारी । तां वरीतुं बहवो वराः समागच्छन् । अथ बंधुषु क्वाऽपि यातेषु सा

स्वयमेव तानर्हयामास । ततस्तेषामभ्यवहारार्थं रहसि शालीनव-र्त्यास्तस्याः प्रकोष्ठस्थाः शंखाः स्वनं चक्रुः । अथ सव्रीडा सा एकैकशस्तान् पृथक् चकार। यदैकस्माच्छंखाद् ध्वनिर्नाऽभवत् तदा सा पर्यतुष्यत् ।

वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ।
एक एव चरेत्तस्मात् कुमार्या इव कंकणः ॥

(२१) आसीत् क्वाऽपि कश्चिदिषुकारः। स एकाग्रमनसा यदा बाणमृजूकर्तुमैच्छत् तदा भेर्यादिघोषैः पार्श्वे गच्छंतं नृपतिमपि न ददर्श । आसनजये श्वासजयः । तस्य प्राणाधीनं मनो निश्चलं भवति । प्राणबंधनं हि सौम्य ! मन इति श्रुतेः ।

(२२) गृहारंभोऽत्यतिदुःखाय भवति । सर्पः परकृतं वेश्म प्रविश्यैव सुखं लभते । अतो विवेकिभिरन्यनिर्मितगृहेणैव निर्वाहः कर्तव्यः ।

(२३) ऊर्णनाभिः यथा हृदयात् ऊर्णां संतत्य तया विहृत्य भूयस्तां ग्रसति । एवमेव परमेश्वरोऽपि स्वत एव सृष्टिं रचयित्वा तत्र विहारं कृत्वा च स्वस्मिन्नेवोपसंहरति ।

(२४) पेशस्कृता कुड्यां प्रवेशितः कीटो भयेन तं ध्यायन् पूर्वरूपमपरित्यजन्नपि तत्सारूप्यं याति । यदा तेनैव देहेनाऽन्यसारूप्यं दृश्यते देहान्तरेण सारूप्यं घटतेऽत्र किमाश्चर्यम् ?

यत्र यत्र मनो देही धारयेत्सकलं धिया ।
स्नेहाद् द्वेषाद् भयाद्वापि याति तत्तत् सरूपताम् ॥

राजन् ! एवं चतुर्विंशतेः गुरुभ्य एतेभ्यः शिक्षां गृहीत्वा मानाऽवमानौ च समौ गणयित्वा बालवद् विचरामि । किं बहुना ।

न सुखं देवराजस्य न सुखं चक्रवर्तिनः ।
सुखमेव विरक्तस्य मुनेरेकान्त वासिनः ॥

एवमभिधाय स विरक्तो यथाऽभिमतं स्थानमगात् । अस्माकं मूलपुरुषो राजर्षिर्यदुरपि सर्वसंगाविनिर्मुक्तो भूत्वाऽन्ते परमपदमाविन्दत् ।

इति श्रीकृष्णचरिते गुरुशिक्षानिरूपणं नामाष्टोत्तरशततमः स्तवकः ॥ १०८ ॥

अथोद्धवोऽपृच्छत् : कृपानिधान ! भक्तिलक्षणं कथयतु भवान् ?

श्रीकृष्णः—सखे ! स्वेष्टदेवे परानुरक्तिर्भक्तिः कथ्यते ।

उद्धवः—कतिविधा सा यदुपते !

श्रीकृष्णः— नवधा—(१) तत्रादौ श्रवणं श्रुतिस्मृतिपुराणादीनाम् । (२) कीर्तनम्—एकाक्षरमंत्रादोङ्कारादारभ्य श्रौतस्मार्तस्तवानामुच्चारणं।तम् । (३) स्मरणम्—मनसेष्टदेवगुणचिन्तनम् । (४) पादसेवनम्—प्रत्यक्षदृष्टस्य चरणसेवाऽ-

प्रत्यक्षस्य च प्रतिमापादुकयोः प्रक्षालनम् । (५) अर्चनम् – षोडशोपचारैः पंचोपचारैर्वा पूजनम् । (६) वंदनम्— देवता-सान्निध्ये साष्टाङ्गप्रणामो वा नमस्कारः । (७) दास्यम्—भगवते कर्मार्पणम् वा तस्य कैंकर्यम् । (८) विश्वासो मित्र-वृत्तिश्च सख्यम् । (९) आत्मसमर्पणम्—शरणागतत्वम् ।

उद्धवः—देव ! भक्तलक्षणं कथय कृपया ?

श्रीकृष्णः—

वाचो वेगं मनसः क्रोधवेगं विधित्सावेगमुदरोपस्थवेगम् ।
एतान्वेगान्यो विषहेदुदीर्णांस्तं मन्येऽहं ब्राह्मणं वा स्वभक्तम् ॥

उद्धवः—प्रभो ! भक्त एषु नवसु लक्षणेषु कस्य माहात्म्ये-नाऽऽशु सद्गतिं प्राप्तुं शक्नोति ?

श्रीकृष्णः—नामसंकीर्तनस्य । यथा वाचकजपेन वाच्यः समायाति । तथा नामस्मरणादहं वश्यो भवामि ।

सांकेत्यं पारिभाष्यं वा स्तोभं हेलनमेव च ।
मम नामालिस्मरणं सर्वपापप्रणाशनम् ॥

उद्धवः—देव ! कानि कानि तव पूजापदानि ?

श्रीकृष्णः—सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ।
भूरात्मा सर्वभूतानि भद्र ! पूजापदानि मे ॥

उद्धवः---कतिविधा पूजा ?

श्रीकृष्णः---वैदिकी तान्त्रिकी चेति द्विविधा । तयोर्वैदिकी यज्ञेषु देवार्चनपूर्विकाऽग्निद्वारा भवति ।

इष्ट्वेह देवतायज्ञैः स्वर्लोकं याति याज्ञिकः ।
भुंजीत देववत् तत्र भोगान् दिव्यान्निजार्जितान् ॥

द्वितीया च केवलप्रतिमार्हणेन ।

उद्धवः---कतिविधा प्रतिमा ?

श्रीकृष्णः---प्रोवाच । अष्टधा ।

शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाऽष्टविधाः स्मृताः ॥

तास्वेकतमां स्वेष्टदेवस्य मूर्तिं सम्मुखे स्थापयित्वा यथा देहे तथा देवे इत्यादेशमनुसृत्य वित्तशाठ्यं परित्यज्य च शीघ्रतायां पंचोपचारैः अवकाशे षोडशोपचारैः अनुपस्थितौ मानसोपचारैश्च संपूजयेत् । सकामौ ब्रह्मचारिगृहस्थौ योग्यतानुकूलैः पदार्थैर्देवी-देवौ च पूजयित्वा सर्वानभीष्टान् लभेते । निष्कामौ वानप्रस्थ-परिव्राजौ सामर्थ्यभावान्मानसपूजाप्रभावेण सद्गतिलाभभाजौ भवतः । मानसपूजाया नामान्तरं निराकारोपासनेति केचित् । प्रतिमार्चनस्य योगेन सह सम्बन्धोऽस्ति । तच्छ्रुत्वोद्धवोऽपृच्छत् । महाभाग ! योगलक्षणं कृपया वद ।

श्रीभग०—चित्तवृत्तिनिरोधो योगः ।

उद्धवः—कतिविधः ?

श्रीभग०—सोऽष्टविधः । यथा—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि ।

तत्र **अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहा यमाः** । मनोवाक्कायकर्मभिः परपीडाऽभावोऽहिंसा । अहिंसा परमोधर्म इति स्मृतिः । अहिंसा व्रतपालनात् सर्वभूतेषु वैरत्यागरूपो महाँल्लाभो जायते । द्वितीयाद्वै भयं भवतीति श्रुतेः । सतोहितं सत्यम् । तस्य रक्षणात् धरातलस्थनिधेः कालस्याऽपि च ज्ञानं भवति । परवस्तुहरणपराङ्मुखत्वम् अस्तेयं । अस्तेयव्रतिनो गृहे चौरो न प्रविशति न च धनहानिर्भवति । अष्टविधमैथुनत्यागो ब्रह्मचर्यम् । ब्रह्मचारी मेधावी कान्तिमान् दीर्घायुश्च भवति । कौपीनतुम्बिकामात्रधारणं अपरिग्रहः । अपरिग्रहात् कस्या अपि वार्तायाश्चिन्ता न भवति । शौचसंतोपतपःस्वाध्यायेश्वरप्राणिधानानि नियमाः । शुचेर्भावः कर्म वा शौचं तद् द्विविधम् । बाह्यमाभ्यंतरं चैति । अत्र मनुः ।

अद्भिर्गात्राणि शुद्ध्यंति मनः सत्येन शुद्ध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥

लोभत्यागः संतोषः । संतोषादपूर्वसुखलाभो भवति । वैधक्लेश-

जनकं कर्म तपः । तपसा पापक्षयो भवति । वेदादिसच्छास्त्राणां पठनं पाठनं च स्वाध्यायः । स्वाध्यायाद् विद्यावृद्धिर्भवति । ईश्वरप्रणिधानं परमात्मचिन्तनम् अनेन परमानंदप्राप्तिर्भवति । मतिमान् पूर्वं यमान् सेवित्वाऽनंतरं नियमान् सेवेत । आसनम् । पंचप्रकारकरचरणादिसंस्थानविशेषे । यथा——

पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा ।
वीरासनमिति प्रोक्तं क्रमादासनपंचकम् ॥

आसनसाधनया नीरोगताप्राप्तिर्भवति । प्राण आयम्यते येन स प्राणायामः । प्राणनिरोधान्मनः शुद्धिर्भवति । इन्द्रियाणां स्व स्व विषयेभ्यो निराकरणं प्रत्याहारः । अनेन मनोनिग्रहो भवति । यमादिगुणसंपन्ने आत्मनि मनसः स्थितिर्धारणा । अनया ध्याने मनो लगति । निर्विषयं मनो ध्यानम् । उक्तं च——

ब्रह्मैवाऽस्मीति सद्वृत्त्या निरालंबतया स्थितिः ।
ध्यानशब्देन विख्याता परमानंददायिनी ॥

समाधीयतेऽस्मिन् सर्वमिति समाधिः ।

ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ।

स च द्विविधः । सविकल्पको निर्विकल्पश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकारा-

कारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभाणेऽपि मृद्भाणवत् द्वैतभाणेऽप्यद्वैतं वस्तु भासते । निर्विकल्पकस्तु ज्ञातृज्ञानादिभेदलयापेक्षया द्वितीय वस्तुनि तदाकारकारिताया बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारित-लवणानवभासेन जलमात्रावभासवद् द्वितीयवस्त्वाकारांकारित-चित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते ।

इति श्रीकृष्णचरिते भक्तियोगनिरूपणं नाम नवोत्तरशततमः स्तवकः ॥ १०६ ॥

उद्धवः—देव ! आर्यावर्तस्य सीमानं वद ।

श्रीहरिः—

आसमुद्रात्तु वै पूर्वात् आसमुद्रात्तु पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यमार्यावर्तं प्रचक्षते ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

अथोद्धवोऽपृच्छत् । देव ! वर्णाश्रमधर्मानुपदिश । तच्छ्रुत्वा श्रीभगवानुवाच । सखे ! ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णाः । तेषां धर्माः । यथा—

शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवम् ।
सत्यं दया च मद्भक्तिर्ब्रह्मप्रकृतयस्त्विमाः ॥

तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ।
स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयास्त्विमाः ॥
आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनम् ।
अतुष्टिरर्थोपचयैर्वैश्यप्रकृतय-स्त्विमाः ॥
शुश्रूषणं द्विजगवां देवानांचाऽप्यमायया ।
तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः ॥
अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ।
कामः क्रोधश्च तर्षश्च स्वभावोऽन्तेवसायिनाम् ॥
अहिंसा सत्यमस्तेयमकामक्रोधलोभता ।
भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥
विद्या शिल्पं भृतिः सेवा गोरक्षा विपणिः कृषिः ।
गिरिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ॥

उद्धवः—द्विजाः के ?

श्रीभगवानाह—द्विर्जायन्त इति द्विजाः । गर्भाधानादारभ्य श्मशानान्ताः समंत्रा येषां क्रियास्ते द्विजाः । तत्रादावृतुकाले पर्वादिविचारं कृत्वा गर्भाधानम् । तत्र युग्मासु रात्रिषु पुत्रा अयुग्मासु च कन्या जायंते । अपरं च । पुरुषस्य वीर्याधिक्ये पुत्रः स्त्रियो रजोऽधिक्ये कन्या । समत्वे च नपुंसकः । द्वयोरसावधानतयाचांगहीनसंततिजन्म भवति । ततो गर्भचलनात्पूर्वं पुंसवनाख्यं कर्म । षष्ठेऽष्टमे वा मासि सीमन्तोन्नयनम् । इमौ

संस्कारौ सकृदेव कार्यौ न प्रतिगर्भम् । गर्भकोशात्कुमारे जाते जातकर्म । "दशरात्रेऽव्युष्टे नामकरणम्"* द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यंतरस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् । अयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितम् । चतुर्थे मासि निष्क्रमणं सूर्यावेक्षणम् । षष्ठे मास्यन्नप्राशनम् । सांवत्सरिकस्य चूडाकरणम् तृतीयेवाऽप्रतिहते ।

उद्धवः——मुण्डनविषये को विचारः ?

श्रीकृष्णः——गंगायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥
मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ।
वर्जयित्वा कुरुक्षेत्रं विशालं विरजां गयाम् ‡ ॥
प्रयागे वपनं कुर्यात् गयायां पिण्डपातनम् ।
दानं दद्यात्कुरुक्षेत्रे वाराणस्यां तनूं त्यजेत् ॥

गर्भाधानमवधिं कृत्वा जन्मनो वाऽष्टमे वर्षे ब्राह्मणस्योपनयन-संस्कारो, राज्ञ एकादशे, द्वादशे च वैश्यस्य स्यात् ।

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥ याज्ञ० ॥

---

* इति गोभिलसूत्रम् ।

‡ नैमिषं पुष्करं गयामित्यपि पाठान्तरम् ।

योऽसौ गर्भाधानाद्या उपनयनान्ताः क्रिया यथाविधि कृत्वाऽस्मै वेदं प्रयच्छति स गुरुः। यः पुनरुपनयनमात्रं कृत्वा वेदं ददाति स आचार्यः। नैष्ठिको ब्रह्मचारी यावज्जीवमाचार्यसन्निधौ वसेत्। तपः प्रभावात्सोऽमृतत्वमवाप्नोति तस्य पुनर्जन्म न जायते।

उपकुर्वाणो मंत्रब्राह्मणात्मकं वेदमधीत्य ब्रह्मचारिनियमान् परिपाल्य गुरवे यथाशक्ति दक्षिणां दत्त्वा च स्नायात्। अशक्तौ तदाज्ञां गृहीत्वैव स्नायात्। अखण्डितब्रह्मचर्योऽनन्यपूर्विकां कान्तामसपिण्डां यवीयसीं लक्षण्यां च स्त्रियमुद्वहेत्। लक्षणानि वाह्यानि तनुलोमकेशदशनादीनि मनुप्रोक्तानि गृहीतव्यानि। आभ्यंतराण्याश्वलायनोक्तविधिना ज्ञातव्यानि। पूर्वस्यां रात्रौ गोष्ठवल्मीककितवास्थानह्रदेरिणक्षेत्रचतुष्पथश्मशानेभ्यो मृत्तिकां गृहीत्वा पिण्डाष्टकं कर्तव्यम्। तत्रानुक्रमेण प्रथमे पिण्डे स्पृष्टे धान्यवती द्वितीये पशुमती तृतीये यज्ञशुश्रूषणपरा चतुर्थे चतुरा पंचमे रोगिणी षष्ठे बंध्या सप्तमे व्यभिचारिणी अष्टमे च विधवा भवेत्।

उद्धवः——पुरुषपरीक्षाऽपि कथय ?

श्रीकृष्णः——

यस्याऽप्सुप्लवते वीजं ह्लादिमूत्रं च फेनिलम्।
पुमान् स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः॥

उक्तं च विवाहप्रकरणे——

असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

वर्णक्रमेण ब्राह्मणस्य चतस्रो भार्याः। क्षत्रियस्य तिस्रः। वैश्यस्य द्वे। शूद्रस्य चैका। सवर्णा तु सर्वेषां मुख्यैव स्थिता। पूर्वस्याः पूर्वस्या अभावे उत्तरोत्तरा भवति।

उद्धवः—देव ! विवाहभेदान् समाचक्ष्व ?

हरिरुवाच—सखे ! ब्राह्मदैवार्षप्राजापत्यासुरगांधर्वराक्षस-पैशाचभेदादष्टविधः। यत्र योग्यवराय समाहूय यथाशक्त्यलंकृता कन्या दीयते स ब्राह्मः। यज्ञानुष्ठाने ऋत्विजे यथाशक्त्यलंकृता कन्या वितीर्यते स दैवः। यत्र गोमिथुनमादाय कन्या दीयते स आर्षः। सह धर्मं चरतामित्याभाष्य यत्र कन्या दीयते स प्राजापत्यः। धनं पुष्कलं नीत्वा यत्र कन्यादानं भवति स आसुरः। परस्परानुरागेण गान्धर्वविवाहो भवति। युद्धेनाऽपहरणाद्राक्षसः। यत्र च छलेन कन्याहरणं भवति सोऽष्टमोऽधमोः पैशाचो विवाहः। अनिन्दिते विवाहेऽनिन्दिताः प्रजा भवंति निंदिते च निन्द्याः प्रजा जायंते।

उद्धवः—स्त्रियः स्वतंत्रा अस्वतंत्रा वा ?

श्रीहरिः—**रक्षेत्कन्यां पिता विन्नां पतिः पुत्रस्तु वार्धके।**
अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित् स्त्रियाः॥

उद्धवः—स्त्री सत्कारे को विचारो धर्मशास्त्रस्य ?

श्रीहरिः—यत्र नार्यस्तु पूज्यंते रमंते तत्र देवताः ।
यत्रैतास्तु न पूज्यंते सर्वास्तत्राऽफलाः क्रियाः ॥

उद्धवः—साध्वीमहिमानं वर्णय ।

श्रीहरिः—मृते जीवति वा पत्यौ यानाऽन्यमुपगच्छति ।
सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥

उद्धवः—स्त्रीणामाचारविषये भाषस्व ।

श्रीकृष्णः—अनुक्त्वा गृहान्न निर्गच्छेत् । नाऽनुत्तरीया व्रजेत् । न त्वरितं धावेत् । न परपुरुषं भाषेताऽन्यत्र वणिक-प्रव्रजितवृद्धवैद्येभ्यः । न नाभिं दर्शयेत् । आगुल्फाद् वासः परिदध्यात् । न स्तनौ विवृतौ कुर्यात् । न हसेदप्रावृता । भर्तारं तद्बंधूंश्च न द्विष्यात् । गणिकाधूर्ताऽभिसारिणीप्रव्रजिताप्रेक्ष-णिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र न तिष्ठेत । कुसंगतिर्दुःखाय सुसंगतिश्च सुखाय भवति ।

इति श्रीकृष्णचरिते ब्रह्मचर्याश्रमदिग्दर्शनं नाम दशोत्तरशततमः स्तवकः ॥ ११० ॥

उद्धवः—प्रभो ! गृहिण आवश्यककृत्यमुपादिश ।

हरिरुवाच—सखे !

ब्राह्मे मुहूर्ते चोत्थाय धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

ततः कृतशौचः स्नात्वा सन्ध्यामुपासीत । अथ कृतप्राणायामः सावित्रीं जपित्वा विवाहाग्नौ स्मार्तं कर्म वैतानिकाग्निषु च श्रौतं कर्म कुर्वीत । अथ वेदार्थान् विविधानि च शास्त्राण्यवगच्छेत् । स्व गृह्योक्तान् देवान् पितॄन् ऋषींश्च देवादितीर्थेन तर्पयेत् । ततो रविहरिहरहिरण्यगर्भावतारेष्वेकतमं मां वा सर्वदेवमयं ज्ञात्वा समाराधयेत् । सुपठितो वेदमंत्रैः साधारणविद्यो ओं विष्णवे नमः, ओं ब्रह्मणे नमः, ओं शिवाय नमः, श्रीरामाय नमः, श्रीकृष्णः शरणं मम, ओन्नमो भगवते वासुदेवाय, ओं क्लीं-कृष्णाय गोविन्दाय गोपीजनवल्लभाय नमः इत्यादिमंत्रैर्माजपेत् ।

उद्धवः—प्रभो ! के पंचयज्ञाः ?

श्रीहरिः—सखे ! (१) बलिकर्म भूतयज्ञः । (२) स्वधा पितृयज्ञः । (३) होमो देवयज्ञः । (४) स्वाध्यायो ब्रह्मयज्ञः । (५) अतिथिसत्कारश्च मनुष्ययज्ञः ।

उद्धवः—किमर्थमेते क्रियन्ते यज्ञाः ?

श्रीहरिः—चुल्ली । पेषिणी । मार्जनी । उलूखलम् ।

उदकपात्रस्थानं चेति पंच सूना गृहस्थस्य। तद्दोषपरिहारार्थं पंच-महायज्ञविधिः प्रचलितः।

उद्धवः——गृहस्थः कदा भुंजीत ?

श्रीहरिः——पूर्वं वृद्धबालकबालिकागर्भिणीसुवासिनी प्राघूर्णिकांश्च भोजयित्वाऽवशिष्टमन्नं दंपती खादेताम्।

उद्धवः——देव ! गृहस्थहिताय के साधारणधर्माः ?

श्रीहरिः——**सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।**
प्रियं च नानृतं ब्रूयादेषधर्मः सनातनः॥

जलमंजलिना न पिबेत्। शयानं न प्रबोधयेत्। नाऽक्षैः क्रीडेत्। धर्मघ्नव्याधिग्रस्तैर्वा न संविशेत्। उच्छिष्टं कस्यचिन्न दद्यात्। साधुविप्रसर्पक्षत्रियधनाढ्यांश्च नाऽवमन्येत। नाऽत्मानं निन्देत्। आमृत्योः श्रियमाकांक्षेत्। मर्मोद्घाटनं कस्याऽपि न कुर्यात्। आमंत्रणादृते परपाकरुचिर्न स्यात्। अतिभोजनं न कुर्यात्। वाक्पाणिपादचापल्यं वर्जयेत्। शत्रुषु न विश्वसेत्। विश्वासघातम् न कुर्यात्। महद्भ्यो मानं नेच्छेत्! कृतघ्नो न भवेत्। जनपदकुलाचारविरुद्धं कर्म नाचरेत्। वकवृत्तिं न धारयेत्। प्रथमप्रहरे धर्मसेवां कुर्यात्। द्वितीयतृतीयप्रहरयोरर्थार्जनं कुर्यात्। स्वाध्याय विरोध्यर्थं नेहेत। सदैव शुद्ध गात्रः शुद्धवस्त्रः शुद्धचित्तः निकृत्तकेशश्मश्रुनखः प्रसन्नाननश्च स्यात्।

उपास्य पश्चिमां सन्ध्यां हुताग्नींस्तानुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नाऽतितृप्याऽथ संविशेत् ॥

उद्धवः—स्पर्शाऽस्पर्शविषये किं करणीयम् ?

श्रीहरिः—

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्य प्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥
दीर्घकाष्ठे शिलापृष्ठे नौकायां सरितस्तटे ।
विवाहे बहुसम्पर्के स्पर्शदोषो न विद्यते ॥
वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ॥

उद्धवः—मांसभक्षणत्यागेन किं फलम् ?

श्रीहरिः—

वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
यद् ध्यायते यत् कुरुते रतिं बध्नाति यत्र च ।
तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ॥
अनुमंता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥

उद्धवः—प्रभो ! पात्रलक्षणं कथय ।

श्रीहरिः—

न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥
दातव्यं प्रत्यहं पात्रे निमित्ते तु विशेषतः ।
याचितेनाऽपि दातव्यं श्रद्धापूतं तु धर्मतः ॥

उद्धवः—कीदृशी गौर्दातव्या ?

श्रीहरिः—

हेमशृंगी रौप्यखुरी सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमथो नयत्यात्मानमेव च ॥

उद्धवः—पुत्रकर्तव्यं कथयतु भवान् ?

श्रीकृष्णः—पुन्नाम्नो नरकात् त्रायत इति पुत्रः ।

जीवतो वाक्यकरणान्मृताहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥
वृद्धौ तु मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥

उद्धवः—स्त्रीपुत्रधनलाभाय च 'कथं भवदीया' प्रार्थना क्रियते ?

श्रीहरिः—(ओं क्लीं)

पत्नीं मनोरमां देहि मनोवृत्ताऽनुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥

देवतासान्निध्ये जपेनाऽनेन स्त्रीलाभो भवति ।

देवकीसुत गोविन्द वासुदेव जगत्पते ॥
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ।

सप्रणवस्याऽस्याऽनुष्ठानेन पुत्रप्राप्तिर्भवति ।

नंदादिगोकुलत्राता दाता दारिद्र्यभंजनः ।
सर्वमंगलदाता च सर्वकामप्रदायकः ॥

सप्रणवस्य पुनः पुनरुच्चारणं श्लोकस्यास्य वांछितार्थप्रदमस्ति ।

उद्धवः—दक्षिणा द्रव्याणि कथयतु भवान् ?

स्वर्णं रौप्यं धरा धेनुः वस्त्रं पात्रं गजो हयः ।
यज्ञादिपुण्यकार्येषु दक्षिणाः कथिता बुधैः ॥

इति श्रीकृष्णचरिते गार्हस्थ्यधर्मनिरूपणं नाम
एकादशोत्तरः शततमः स्तवकः ॥ १११ ॥

उद्धवः—देव ! वानप्रस्थधर्मान् गद !

श्रीहरिः—पुत्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भुक्त्वा च यो भगवदाराधनं करोति स वानप्रस्थः । स च द्विविधः । अश्मकुट्टः, दंतोलूखलिकश्च । तस्य धर्मो यथा—

भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥

श्मश्रुजटालोमभृत्, ऊर्द्धवरेताः, त्रिषवणस्नायी, पंचाग्निमध्यस्थो ग्रीष्मे, स्थण्डिलेशयो वर्षासु हेमन्ते चार्द्रवासा भवेत् । जटित्वं अग्निहोतृत्वं भूशय्या मृगचर्मधारणम्, नीवारफलवृत्तिता, वनेवासः कंदमूलफलाहारश्चेति वानप्रस्थवृत्तयः संति ।

उद्धवः—प्रभो ! संन्यासविषयं प्रतिपादय ।

श्रीहरिः—सर्वं गृहादिकं त्यक्त्वा मुण्डितमुण्डो गैरिककौपीनाच्छादनं दण्डं कमण्डलुं च बिभ्रत् भिक्षावृत्तिः निर्जने वने तीर्थे वा स्थितः केवलमीश्वराराधनं करोति यः स संन्यासी । वानप्रस्थ आयुषस्तृतीयभागं वने स्थित्वा चतुर्थमायुषो भागं संन्यासेन नयेत् । यदा मनसि सर्ववस्तुषु वैतृष्ण्यं भवेत् तदा संन्यासमिच्छेदन्यथा पतितः स्यात् ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥
काषायवासाः सततं ध्यानयोगपरायणः ।
ग्रामान्ते वृक्षमूले वा वासं देवालयेऽपि वा ॥

समः शत्रौ तथा मित्रे तथा मानाऽपमानयोः ।
भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेत् क्वचित् ॥
न स्वादु भुंक्ते दैवाच्च स्त्रीमुखं न हि पश्यति ।
न वांछितं भक्ष्यवस्तु याचते गृहिणं व्रती ॥ श० क० ॥

इति श्रीकृष्णचरिते वर्णाश्रमधर्मनिरूपणं नाम
द्वादशोत्तरशततमः स्तवकः ॥ ११२ ॥

उद्धवः—प्रभो ! अनाथप्रेतसंस्कारेण किं फलं लभ्यते ?

श्रीहरिः—

अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः ।
पदे पदे यज्ञफलमनुपूर्वं लभंति ते ॥ परा० ॥
असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत् ॥ गृ० प० ॥

उद्धवः—के शुद्धिहेतवः ?

श्रीहरिः—

कालोऽग्निः कर्म मृद्वायुर्मनोज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥
कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ।
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः ॥ प्रचे० ॥

दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ॥

उद्धवः——मृतसूतके संकल्पितार्थस्य किं करणीयम् ?

श्रीकृष्णः——

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥
भुंजानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥
(उभयत्र [जननमरणयोः] दशाहानि कुलस्यान्नं न भुज्यते)
यज्ञादिषु सुसिद्धान्नं प्रमादाद्दूषितं भवेत् ।
ततः किंचित्समुद्धृत्य शेषं भुंज्युरसंशयाः ॥

उद्धवः——सूतिशावयोः कस्य प्राधान्यम् ।

श्रीहरिः——

शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ।
शावेन शुद्ध्यते सूतिर्नसूतिः शावशोधिनी ॥
विवाहोत्सवयज्ञादिष्वंतरा मृतसूतके ।
शेषमन्नं परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् ॥

उद्धवः——यस्य पापस्य प्रायश्चित्तं नोक्तं तस्य किं करणीयम् ?

श्रीहरिः—

देशं कालं वयः शक्तिं पापं चाऽवेक्ष्य यत्नतः ।
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ॥

उद्धवः—

अभक्ष्याणामपेयानामलेह्यानां च भक्षणे ।
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ?

श्रीहरिः—

पद्मोदुंबरविल्वानां पलाशस्य कुशस्य च ।
एतेषामुदकं पीत्वा षड्रात्रेण विशुद्धयति ॥

उद्धवः—मद्यपानं द्विजैः कर्तव्यं न वा ?

श्रीहरिः—सर्वथा न कर्तव्यम । उक्तं च—

गौडी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥
पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ।
मधूत्थं सैरमारिष्टं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशं तु सुरां मद्यं सर्वेषामधमं स्मृतम् ॥
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥

उद्धवः—प्रायश्चित्तविषयेऽवस्थादि नियमोऽस्ति न वा ?

श्रीहरिः—अस्ति । यथा—

अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः ।
प्रायश्चितार्धमर्हति स्त्रियो रोगिण एव च ॥

उद्धवः—के महापातकिनः ?

श्रीहरिः—

ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ।
एते महापातकिनो यश्च तैः सह संवसेत् ॥

उद्धवः—कथमेतेषां शुद्धिः ।

श्रीहरिः—

तीर्थस्नानं गवान्दानं व्रतं यज्ञं जपं तपः ।
शास्त्रोक्तानि यदा कुर्युस्तदा पापक्षयो भवेत् ॥

इति श्रीकृष्णचरिते प्रायश्चित्तनिरूपणं नाम
त्रयोदशोत्तरशततमः स्तवकः ॥ ११३ ॥

उद्धवः—देव ! वैराग्यलक्षणं प्रतिपादय ।

श्रीहरिः—विरागस्य भावो वैराग्यम् । तस्य चतस्रः संज्ञा भवंति । तासु यतमानसंज्ञा प्रथमा । व्यतिरेकसंज्ञा द्वितीया । एकेन्द्रियसंज्ञा तृतीया । वशीकारसंज्ञा च चतुर्थी । उक्तं च—

वैराग्यमाद्यं यतमानसंज्ञं, क्वचिद्विरागो व्यतिरेकसंज्ञः ।
एकेन्द्रियाख्यं हृदि रागमोक्षस्तस्याऽप्यभावस्तु वशीकृताख्यम् ॥

भिक्षाशनं भवनमायतनैकदेशः ।
शय्या भुवः परिजनो निजदेहभावः ॥
वासश्च जीर्णपटखण्डनिबद्धकन्था ।
हा हा तथापि विषयान्न जहाति चेतः ॥

केनाऽप्यनर्थरुचिना कपटं प्रयुक्तं ।
एतत्सुहृज्जनयबंधुमयं विचित्रम् ॥
कस्याऽत्र कः परिजनः स्वजनो जनो वा ।
स्वप्नेन्द्रजालसदृशः खलु जीवलोकः ॥

गंगातरंगकणशीकरशीतलानि ।
विद्याधराऽध्युषितचारुशिलातलानि ॥
स्थानानि किं हिमवतः प्रलयंगतानि ।
यत्सापमानपरपिण्डरता मनुष्याः ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः ।
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ॥
जराजीर्णैरंगैर्नट इव वलीमण्डिततनुः ।
नरः संसारान्ते विशति यमधानीयवनिकाम् ॥

इति श्रीकृष्णचरिते वैराग्यनिरूपणं नाम
चतुर्दशोत्तरशततमः स्तवकः ॥ ११४ ॥

उद्धवः—देव ! कति द्वीपाः कथं च तेषां स्थितिः ?

श्रीहरिः—एषा सप्तद्वीपा वसुमती । द्वयोर्दिशा गता आपो यत्र स द्वीपः । काकाक्षिगोलकन्यायेन द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः । ते जम्बुप्लक्षशाल्मलिकुशक्रौंचशाकपुष्कराभिधानाः सप्त । तेषां पूर्वस्य यद्विस्तारमानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो वहिः समं रचिताः । यथा सिंधुभ्यो वहिरेकैकशो द्वीपाः । एवं द्वीपानामपि वहिः सिंधवः । उक्तं च—

प्रियव्रतोऽभ्यषिंचत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्मेण द्वीपास्तांश्च निबोध मे ॥
जंबुद्वीपे तथाऽग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चाऽपि तेन मेधातिथिः कृतः ॥
शाल्मले च वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौंचद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिश्चैव सवनं कृतवान् सुतम् ॥ मा० पु० ॥

भूमेरूर्ध्वं क्षारसिन्धोरुदक्स्थं, जंबुद्वीपं प्राहुराचार्यवर्याः ।
अर्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं क्रौंचं च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरंतरमेकमेकं समुद्रयोर्द्वीपमुदाहरंति ॥ सि० शि० ॥

आग्नीध्रस्य नव पुत्रा अभूवन् । १—तेषु नाभिः, २—किंपुरुषः, ३—हरिवर्षः, ४—इलावृतः, ५—रम्यः, ६—हिरण्यः, ७—कुरुः, ८—भद्राश्वः, ९—केतुमालश्चेति । एषां नवानां नामभिरेव नव वर्षाणि प्रथितानि । तत्रादौ जम्बूद्वीपो 'भारतवर्षम्'——

(लंकातः ममारभ्य गांधारकाश्मीरनयपालभूतदेशब्रह्मश्याम-कामरूपपर्यन्तम्)

प्लक्षद्वीप इलावृतखण्डम् । (ईरानकाबुलगज्जनतातारचि-त्रालयप्रभृतयः) शाल्मलः किं पुरुषो देशः । (चीनरूसजय-पानादि प्रदेशाः)

क्रौंचो हरिवर्षः । (फ्रांसरोममिश्रंग्लेण्डशार्मण्यादयः प्रदेशाः)

कुशः कुरुः । (तुरुष्कयवनार्वाद्यादेशाः) शाको रम्यः (आस्ट्रेलिया विभागः) केतुमालो हिरण्यः (एफ्रिकेतिप्रसिद्धा-भूभागः) पुष्करो भद्राश्वः । (उत्तरदक्षिणाम्रिकाभिधो देशः) भरतखण्डंविहाय प्रदेशेषु अन्येषु वर्णाश्रमविभागो नाऽस्ति । उक्तं च——

"यतोहिकर्मभूरेषा ततोऽन्याभोगभूमयः" ।

इति श्रीकृष्णचरिते द्वीपादिनिरूपणं नाम
पंचदशोत्तरशततमः स्तवकः ॥ ११५ ॥

उद्धवः——देव ! दमः कः ? शमः कः ? तितिक्षा का ? धृतिः का ? श्रद्धा का ? क्षमा का ? मौनंकिम् ? दानं किम् ?

तपः किं? शौर्यं किम्? सत्यं किम्? ऋतं किम्? शौचं किम्? त्यागः कः? धनं किम्? यज्ञः कः? दक्षिणा का? बलं किम्? भाग्यं किम्? लाभः कः? विद्या का? ह्रीः का? श्रीः का? सुखं किम्? दुःखं किम्? मूर्खः कः? पण्डितः कः? उत्पथः कः? पंथाः कः? स्वर्गः कः? नरकः कः? बंधुः कः? गृहं किम्? धनी कः? दरिद्रः कः? कृपणः कः? ईश्वरश्च कः? कृपया कथय।

तच्छ्रुत्वा हरिरुवाच——सखे! इन्द्रियनिग्रहो दमः। मनोनिग्रहः शमः। विहितकष्टसहनं तितिक्षा। जिह्वोपस्थयोर्वेगधारणं धृतिः? गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा। सत्यपि बलेऽपराधसहिष्णुताक्षमा। निंदात्यागो मौनं। द्रोहत्यागो दानम्। कामत्यागस्तपः। स्वभावविजयः शौर्यम्। परमात्मदर्शनं सत्यम्। प्रियं सत्यं च कथनमृतम्। कर्तृत्वाभिमानराहित्यं शौचम्। इहामुत्र च सर्वकर्मफलत्याग एव त्यागः। स्वधर्मपालनं धनम्। मयि दृढप्रत्ययो यज्ञः। ज्ञानोपदेशदानं दक्षिणा। प्राणायाम एव बलम्। मम भाव एव भाग्यम्। मद्भक्तिरेव लाभः। आत्मनि प्रतीतस्य देवमनुष्यादिभेदस्य बाधो विद्या। निषिद्धकर्मसु हेयत्वबुद्धिर्लज्जा। दिव्यगुणार्जनमेव मण्डनम्। धर्मानुकूल्येन स्वातंत्र्यमेव सुखम्। विषयजन्य सुखापेक्षैव दुःखम्। देहगेहादिषु ममत्वबुद्धिर्मूर्खः। बंधं मोक्षं च यो वेत्ति स पण्डितः।

प्रवृत्तिमार्ग उत्पथः । निवृत्तिमार्गएव सन्मार्गः । सत्त्वगुणोदयः स्वर्गः । तमोगुणाधिक्यं नरकः । हितोपदेष्टा गुरुरेव बंधुः । नीरोगशरीरमेव गृहम् । दयादाक्षिण्यादिगुणैर्यः सम्पन्नः स एव धनी । असंतुष्टो निर्धनः । अजितेन्द्रिय एव कृपणः शोच्यः । विषयवितृष्ण एव ईश्वरः स्वतंत्रो न भूपादिरिति ।

इति श्रीकृष्णचरिते दमादिनिरूपणं नाम
षोडशोत्तरशततमः स्तवकः ॥ ११६ ॥

एतदाकर्ण्य बार्हस्पत्योऽवदत् । नाथ ! क्षमादिसद्गुणान् दृष्टान्त द्वारा प्रबोधय । तच्छ्रुत्वा हरिरुवाच । सखे ! समाकर्णय पुरातनमितिहासम् ।

न तथा तप्यते विद्धः पुमान् बाणैर्हि मर्मगैः ।
यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥

आसीदवन्तिषु कश्चित्कदर्यो वार्तावृत्तिः कामी लुब्धोऽतिकोपनश्च द्विजः । उक्तं च——

आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ।
यो लोभात्संचिनोत्यर्थान् स कदर्य इति स्मृतः ॥

स्वार्थपरायणः स प्रियभाषणेन बान्धवान् हवनेन देवान् श्राद्धेन च पितॄन्नकदाऽपि प्रसादयामास । धर्मकर्मविहीनः शून्यालये

निवसन् स स्वात्मानमपि कदाचिन्नाऽतोषयत् । एवं दुःशीलस्य तस्य पुत्रादयोऽपि प्रियं नाऽचरन् प्रत्युत द्रुह्यंते स्म । ततस्तस्य पंचमहायज्ञभागिनो देवता अपि चुक्रुधुः । उक्तं च—

चत्वारो धनदायादा धर्माग्निनृपतस्कराः ।
तत्र ज्येष्ठावमानेन त्रयः कुप्यंति बांधवाः ॥

ततो धर्मे नष्टे बह्वायासपरिश्रमोऽप्यर्थोऽपि ज्ञातिदैवकालादिभ्यो गृहीतः शनैः शनैर्निधनमगच्छत् । अथ कामभोगाविवर्जितः स स्वजनैरुपेक्षितश्च दुरत्ययां चिन्तामवाप । अथैकदा निर्विण्णः सोऽचिन्तयत् । अहो ! मया वृथैवाऽऽत्मा परितापितः ।

प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ।
इह चाऽऽत्मोपतापाय मृतस्य नरकाय च ॥

यशस्विनां यशो गुणिनां गुणाश्च स्वल्पोऽपि लोभःश्वित्रो ललितं रूपमिव नाशयति ।

अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
आये दुःखं व्यये दुःखं धिगर्थान् कष्टसंश्रयान् ॥

अनृतं स्तेयं हिंसा दंभः कामः क्रोधः स्मयः मदः भेदः अविश्वासः वैरं स्पर्धा व्यसनानि चाऽर्थमूला नानाऽनर्था भवंति । मातृपितृभ्रातृसुहृत्पत्नीप्रभृतयोऽपि काकिण्या भिद्यंते । प्रथमं भारतेजन्म

ततो देवदुर्लभं मानुष्यं ततो द्विजाग्र्यतामप्यवाप्य मादृशा ये स्वार्थं घ्नंति तेऽवश्यमशुभां गतिं यास्यंति ।

वाल्ये न शिक्षिता विद्या यौवने नार्जितं यशः ।
किं कृतं तेन जातेन जननीक्लेशकारिणा ॥

नूनमद्य ममोपरि भगवाँस्तुष्टः । येनाऽहमेतां दशांनीतः । साम्प्रतमहं कालावशेषेण परमार्थं साधयामि । इत्थं पुनः पुनः पर्यालोच्य हृदयग्रन्थीनुन्मुच्य च स दत्तसर्वस्वः परिव्राड् बभूव । सोऽथ भिक्षार्थं नगरग्रामांश्चाऽलक्षितो विवेश । यद्यपि खलाः प्रवयसं तं दृष्ट्वा पर्यभवँस् तथाऽपि स न चुकोप न चाऽखिद्यत । एकोऽस्य दंण्डं जग्राह । अपरश्च कमण्डलुम् ।

क्षिपंत्येकेऽवजानंत एष धर्मध्वजः शठः ।
क्षीणवित्त इमां वृत्तिमग्रहीत् स्वजनोज्झितः ॥

एवं स प्राप्तं प्राप्तं भौतिकं दैहिकं दैविकं च दुःखं सेहे । सोऽथ भिक्षुः मयि मनः समावेश्य प्रक्षीणबन्धनः सुरदुर्लभां गतिमलभत ।

इति श्रीकृष्णचरिते कदर्यसद्गतिनिरूपणं नाम
सप्तदशोत्तरशततमः स्तवकः ॥ ११७ ॥

उद्धवः—देव ! पुरुषशुभ लक्षणानि कथय ?

श्रीहरिः—सखे !

धन्यो मातृमुखः पुत्रो धन्या पितृमुखी सुता ॥
शिरो ललाटश्रवणे ग्रीवा वक्षश्च हृत्तथा ।
उदरं पाणिपादं च पृष्ठं दश महत्सुखम् ॥
पंचदीर्घं चतुर्ह्रस्वं पंचसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगंभीरं त्रिविशालं प्रपूज्यते ॥
बाहुनेत्रद्वयं कुक्षी द्वौ तु नासा तथैव च ।
स्तनयोरंतरं चैव पंचदीर्घं प्रशस्यते ॥
ग्रीवाथ कर्णौ पृष्ठं च ह्रस्वे जंघे सुपूजिते ।
चत्वारि यस्य ह्रस्वाणि पूजां प्राप्नोति नित्यशः ॥
सूक्ष्माण्यंगुलिपर्वाणि दंतकेशनखत्वचः ।
पंच सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रं च दंताश्च ललाटं च शिरस्तथा ।
हृदयं चैव विज्ञेयमुन्नतं षट् प्रचक्षते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगंभीरमुदाहृतम् ।
उरः शिरो ललाटं च त्रिविस्तीर्णं प्रशस्यते ॥

कटिर्विशाला बहुपुत्रभागी,
विशालहस्तो नरपुंगवः स्यात् ।

उरो विशालं धनधान्यभागी,
शिरो विशालं नरपूजितः स्यात् ॥
नेत्रस्नेहेनसौभाग्यं दन्तस्नेहेन भोजनम् ।
हस्तस्नेहेन चैश्वर्यं पादस्नेहेन वाहनम् ॥

उद्धवः——देव ! स्त्रीशुभलक्षणान्यपि कथय ।

श्रीहरिः——सखे !

यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना ।
भवेदखण्डभोगा च या मध्याङ्गुलिसङ्गता ॥
उन्नतो मांसलोऽगुष्ठो वर्तुलोऽतुलभोगदः ।
वक्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभंजकः ॥
राज्ञीत्व सूचकं स्त्रीणां पादपृष्ठं समुन्नतम् ।
रोमहीने समे स्निग्धे जंघे च क्रमवर्तुले ॥
सा राजपत्नी भवति विशिरे सुमनोहरे ।
नितंबबिंबो नारीणां उन्नतो मांसलः पृथुः ॥
महाभोगाय संप्रोक्तः तदन्योऽशर्मदो मतः ।
निर्लोमहृदयं यस्याः समं निम्नत्ववर्जितम् ॥
ऐश्वर्यं चाऽप्यवैधव्यं प्रियप्रेमा च सा भवेत् ।
अंभोजमुकुलाकारमंगुष्ठांगुलिसंमुखम् ॥
हस्तद्वयं मृगाक्षीणां बहुभोगाय जायते ।
मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजा ॥

पद्मेन भूपतेः पत्नी जनयेद् भूपतिं सुतम् ।
चक्रवर्तिस्त्रियाः पाणौ नंद्यावर्तः प्रदक्षिणः ॥
शंखातपत्रकमठा राजमातृत्वसूचकाः ।
ललनालोचने शस्ते रक्तान्ते कृष्णतारके ॥
गोक्षीरवर्णविशदे सुस्निग्धे कृष्णपक्ष्मणी ।
भ्रुवोरंते ललाटे वा मशको राज्यसूचकः ॥
वामे कपोले मशकः शोणो मिष्टान्नदः शुभः ।
तिलकं लांछनं वाऽपि हृदि सौभाग्यकारणम् ॥

उद्धवः—किं वेदे शकुनचर्चाऽस्ति ?

श्रीहरिः—अस्ति । यथा—

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद ।
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिंजलः ॥ नि० दै० ॥

इति श्रीकृष्णचरिते पुरुषस्त्रीशुभलक्षणनिरूपणं
नाम अष्टादशोत्तरशततमः स्तवकः ॥ ११८ ॥

उद्धवः—प्रभो ! वृषभादिपशुपीडनं विनाऽपि किं दूरदेशयात्रा भवति ?

श्रीहरिः—भवति । सखे ! अग्न्यादितत्त्वानां साहाय्येन यथा देशान्तरगमनं सौकर्येण भवति तथा पशुपृष्ठाऽऽरोहणेन न। विरंचिर्हंसारूढो गगने विचरति । श्रीमती गंगा मकरमारुह्य

जले विहरति । सदाशिवश्च वृषभं समारुह्य पृथिव्यां कैलासादि-यात्रां करोति । यथा यात्रार्थं त्रयः प्रदेशा भूलोकसमुद्राकाशा-स्तथैव तेषां यात्रायै त्रीण्येव यानानि विहितानि । तत्रादौ शिल्पविद् भूगोल यात्रार्थं धरित्री तले समंकृत्वा तत्र सुपुष्टशला-काद्वय [(रेल मार्ग) Railway] स्थापित मार्ग विद्धीत । अथ सुपुष्टं दृढं च लोहमयं महिषाकारं षट्चक्रमष्टचक्रं दशचक्रं द्वादशचक्रं वा महाभारवन्तं शकटं [(ऐंजिन) Engine] निर्माय तं लोहशलाका रचिते मार्गे उत्तोलनयंत्र [Crane] साहाय्येन स्थापयेत् । शकटोपरि भवंति त्रयः कोष्ठाः [(टंकी) Tanks] । तत्र मध्यमकोष्ठश्चतुष्कोणः पार्श्वस्थौ च सुवर्तुलौ भवेताम् । अग्रे च ग्रीवा [(सीटी) Whistle] ततः पार्श्व-स्थकोष्ठौ जलपूर्णौ कृत्वा मध्यमकोष्ठस्थे खनिजार्धदग्धप्रस्तर [Coal] चये तज्जन्यानेवज्वलितांगारान् प्रक्षिपेत् । ततो धमनी-यंत्र[(धोंकिनी) Bellows]द्वारा वायुसाहाय्यमवलंब्य पावको-ऽचिरेण कालेन जलं क्वाथितं करोति । अथ वाष्पे जायमाने प्रधानो महामाहिषाकारः शकटोऽसंख्यातघोटकानां बलं धारयति । यंत्रेणैव शकटस्य चालनं यंत्रेणैव च निरोधो भवति । अथ प्रस्थिते प्रधानशकटेऽन्या अपिसंयोजिता गंत्र्यो [(रेल) Train] धावंति । तत्रस्था नरा नार्यश्च स्वल्पेनैव कालेन बहूनि योजनानि गन्तुं समर्था भवंति । एवं समुद्रयात्रिणोऽपि पूर्वं दृढां पुष्टां

विस्तीर्णां च नावं रचयित्वा तस्यां बृहत्कायं महिषाकारं लोहमयं दृढं पुष्टं भारवन्तं च महाशकटं [(जलयानं) Ship] स्थापयंति। ततो नौरग्निजलवायुवेगमवाप्य महाशक्तिशालिनी छरछरायमाणा समुद्रोपरि धावति । मनुष्यास्तु भवंति श्रान्ताः परमग्निप्रभृतयो देवाः प्राप्तपदार्था न कदाऽपि विश्राम्यंति ।

एवं नक्रनौकाऽपि भवितुमर्हति । कर्णधारः सिंहशावकवत् नक्रशावकानपि पालयित्वा पंकिले जलाशयोपान्ते तेषामावासाय विश्रामस्थानं कारयेत । अथ लध्वीं नौकां रचयित्वा सयुगकाष्ठ पृष्ठे तां स्थापयेत् । ततः समुत्पाटितदंष्ट्रयोर्मकरयोः पृष्ठभागे पूर्वं काष्ठफलकं धृत्वा ततोऽल्पां नौकां रचेत् । अथायसदण्डेन साकं संयोजितं लोहमयं कविकं [लगाम] घोटकवत् तयोर्मुखे संनिवेश्य नौकाग्रभागस्थापिते कीलके शृंखलां टंकयेत् । एवं लघु-शृंखलाखंडेन तयोः पुच्छे वेष्टयित्वा नौकापृष्ठस्थितकीलकेन सह तद्योजयेत् । एवमग्रतः पृष्ठतश्च बंधने संजाते मकरौ जले निमज्जनं कर्तुं न शक्नुतः । ततः सुखेन सरोवरादिषु नक्रनौका तर्तुं समर्था भवति ।

नदीतरणसमये प्रार्थनां करोति नौकासंचालकः ।

इमं मे गंगे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

ऋ० सं० ॥

हे गंगे ! हे यमुने ! हे सरस्वति ! हे शुतुद्रि ! यूयम् इमम् मे मम स्तोमं स्तोत्रं सचत आसेवध्वम् । परुष्ण्या सह हे मरुद्वृधे ! आर्जीकीये त्वमपि आसिक्न्या वितस्तया सुषोमया च सह आशृणुहि आभिमुख्येन स्थित्वा शृणुहि । नि० दु० भा० ।

एवमेव गगने विमानम् [(उडनखटोला) Aeroplane] उड्डीयते । व्योमयाने द्वे सदने भवतः । तयोरेकं शिरोगृहं यत्र यात्रिणस्तिष्ठंति । द्वितीयं च तलगृहं तत्र संचालकः [(पायलेट) Pilot] तिष्ठति । दर्शकानां पुरो भागे त्रीणि लोहफलकानि भवंति । तेष्वेकं संमुखे द्वे च पार्श्वे । येन दर्शकदृष्टिरधोभागं न पश्यति । संचालकस्याग्रेऽग्नियंत्रं भवति । यदाऽसौ भ्रामयति कलद्वारा तद्यंत्रं तदा सहसा विद्युत्समुत्पद्यते । ततो विद्युद्बलेन चक्रं [(हैन्डल) Handle] भ्रमितुमारभते । तद्बलेन विमानं नभस्युत्पतति । संचालको दूरवीक्षणयंत्रेण [(दुर्बीन) Telescope] पर्वतादीन् विलोकयन् यात्रां करोति । किं बहूक्त्या विमानमारुह्ययात्री अहोरात्रेण सहस्रकोशपरिमितं भूभागं सारल्येन समुल्लंघते । विमान संचालकः स्वेष्टसिद्ध्यै अग्निं प्रार्थयेत् । अत्र वेदाज्ञा । श्रुतिः ।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥

यजु० । अ० ४० ॥

भावार्थः——स्थलयानजलयानव्योमयानानां मध्येऽग्निं प्रतिष्ठाप्य संचालकाः सविनयं प्रार्थयंते । हे अग्ने ! नय प्रापय स्थलयानारूढं धरायां, जलयानारूढं सागरे, वायुयानारूढंचाकाशे सुपथा शोभनेन मार्गेण राये धनलाभाय, अस्मान् यात्रिणः, विश्वानि सर्वाणि, वयुनानि प्रज्ञानानि, विद्वान् जानानः, युयोधि पृथक् कुरु, अस्मत् अस्मत्तः, जुहुराणं मार्गच्युतिसंज्ञकमनिष्टं, यतो भूयिष्ठां बहुतरां ते तुभ्यं, नम उक्तिं नमस्कारोक्तिं, विधेम कुर्याम । अर्थात हे अग्निदेव ! त्रैलोक्ययात्रां कर्तुकामा वयम् । परंच भवदीयसाहाय्यं विना कार्यमेतत् कठिनम् । कृपां कृत्वा ऽस्मभ्यं तादृशं ज्ञानं देहि । यदवाप्य वयं विश्वविहरणसंज्ञकं कार्यं सारल्येन कर्तुमर्हामः ।

इति श्रीकृष्णचरिते भूमियानजलयानव्योमयानादिनिरूपणं नाम एकोनविंशत्युत्तरशततमः स्तवकः ॥ ११९ ॥

उद्धवः——देव ! मर्त्याः प्रायेण विषयानापदां पदं जानन्तोऽपि श्वखराजवत् कथं सेवंते ? तच्छ्रुत्वा हरिरुवाच——सखे ! अविवेकिनो हृदि देहादावहमितिबुद्धिर्यदोपसर्पति तदा सत्त्वप्रधानमपि मनो दुःखात्मकं रज उत्सर्पति । तत इदमेवमिदमेवं भोक्तव्यमिति संकल्पः समुत्पद्यते । अथाऽहोरूपमहोभाव इति दुर्धरः कामः स्यात् । ततो विषयान् भोक्तुं करोति कर्माणि । सोऽथ संयोगे सुखं वियोगे च दुःखं गणयति ।

ज्ञानवान् मनोनिग्रहं कृत्वा परिणामे विषोपमैर्विषयैर्न समाकृष्यते। अप्रमत्तः स परमानंदस्वरूपे मयि मनः समावेश्य सुखनिधानं समधिगच्छति। अत्र श्रुतिः—

यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥
उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदंति॥

अथोद्धवोऽपृच्छत्। प्रभो! आत्मज्ञानमुपदिश।

श्रीहरिरुवाच—सखे! आत्मज्ञानतत्त्वमेतत्।

परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्।
विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च॥

अयमात्माऽव्ययः शुद्धः स्वयंज्योतिश्चाऽस्ति। देहोऽयं काष्ठवज्जडो वर्तते। यावदात्मनो देहादिभिः संबंधोऽस्ति तावदेव सुखदुःखमयः संसारः। स्वरूपाऽऽवरकाऽविद्या। तया कृताऽविवेकेन तत्राऽहं ममाऽध्यासमात्रमेव। "असंगो ह्ययं पुरुष" इति शास्त्रं प्रतिपादयति। देवमनुष्याद्याकारे आत्मन्यविद्यमानेऽपि स्थूलोऽहं कृशोऽहं ममैतेऽनुकूला एते प्रतिकूला एवं विषयान् ध्यायतोऽस्य जीवस्य सुखदुःखादिसंसृतिर्न निवर्तते। यथा

स्वप्नान् पश्यतो जनस्य स्वप्नदृष्टपदार्थजन्या पीडा भवति तथा प्रबुद्धस्य न जायते। एवं हर्षशोकादयोऽहंकारस्यैव नत्वाऽऽत्मनः। सुषुप्तादौ तेषामदर्शनात् । देहेन्द्रियप्राणमनोऽभिमान आत्मान्तर्हितो गुणकर्ममूर्तिश्च जीवः परमेश्वराधीन एव संसारे परिभ्रामति । वस्तुतो मूलशून्यं नानायोनिरूपै रूपितं मनः प्रभृतिभिश्च संबद्धं एतदहंकरणं भगवदाराधनस्वरूपेण ज्ञानखड्गेन छित्त्वाऽऽनंदेन पृथिवीं मुनिर्विचरति । यदस्य विश्वस्य कारणं ब्रह्म तदात्मकमेवैतन्न ततः पृथक्। एवं निगमसाधनैर्निश्चयात्मको यो विवेको जायते तज् ज्ञानम् । कटककुंडलादिरूपेण यद्धिरण्यं तत् कुंडलादिकार्यस्य उत्पत्तेः प्राङ् नाशाच्च पश्चात् तदेव मध्येऽपि नानानामभिर्व्यवहारं प्राप्यमाणं भवति । तद्वदस्य विश्वस्य कारणभूतोऽहमेवाऽद्यंतमध्ये नानाव्यवहारालंबनं च मत्तः पृथङ् न विश्वमस्ति । अत्र श्रुतिः—यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यम् । किं बहूक्त्या ।

ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥

उद्धवः—प्रभो ! कलिदमनोपायान्वद ।

श्रीहरिः—स्वर्णं गंजां वेश्यागृहं द्यूतागारं च कलियुग वसतिं जानीयात् । आचार्यो राजा वा योग्यायैवाऽधिकारं

दद्यात्कुलपक्षपातं च न कुर्यात् । गुरुं देववद् गणयेत् । मादक-द्रव्याणि नोपसेवेत । सति सपिण्डे दूरतो दत्तकपुत्रं न गृह्णीयात् । ब्राह्मणो गाम् क्षत्रियवैश्यौ माहिषीं शूद्रश्चाजां पालयेत्। गोमांस-भक्षणं मातृमांसभक्षणसदृशं गणयेत् । लम्बीं बृहतीं वा शिखा मवश्यं रक्षेत् । ज्ञानप्रचाराय वा देशजयाय वा धनार्जनाय वा विद्याध्ययनाय किंवा सत्यामावश्यकतायां यथाशक्ति द्वीपान्तरयात्रां कुर्यात्। बांधवाऽनुमत्या सवर्णया सह द्विजः सर्वत्र भारते विवाहं कुर्यात् । द्वीपान्तरे स्वयंपाकीस्यात् । सर्वथाऽलाभेस्वदेशेऽन्य-द्वीपवासिनीं अपि पत्नीं कुर्यात् । पुत्रेसति कारणं विनैव द्वितीयं विवाहं सर्वथा न कुर्यात् । राजा प्रतिग्रामं गोचरभूमिं रक्षेत् । वैश्यः प्रतिशतमेकमुद्रातोऽधिकं कुसीदं न गृह्णीयात्। यावच्छक्यं गृहकलहं जातिमध्ये राजकुले वा न प्रक्षिपेत् । अति धनं नीत्वा कन्यादानं न कुर्यात् । विवाहादिकृत्येषु ऋणं कृत्वाऽतिव्ययं न कुर्यात् । पूर्वजार्जितगृहकूपादिविक्रयमसामान्यकारणं विना न विदधीत । राजद्वारवद्देवद्वारेऽपि प्रवेशे निरोधं नह्यर्हति । ज्ञातिवहिष्कारं कस्याऽपि न कुर्यात् । संस्कारेण सर्वपापविनिर्मुक्ति-र्भवति । प्रतिमंदिरं शंखेन सह वराहदंतमपि रक्षेत्। देवेषु भेदबुद्धिं न कुर्यात् । गोदानं वृक्षारोपणं च यज्ञानुष्ठानसमं गणयेत् । दुर्भिक्षेराष्ट्रविप्लवे च स्पर्शाऽस्पर्शविचारं पक्वाऽपक्वविचारं भक्ष्या-ऽभक्ष्यविचारं च न कुर्यात् । अनाथविधवारक्षणं शतगोदानसमं

ज्ञेयम् । भगवन्नामोच्चारणं परमेश्वरप्राप्तेः प्रथमं सोपानं गणयेत् । सजातीयः सजातीयोन्नतिं स्वकीयामुन्नतिं गणयेत् । दत्त्वा च न परिकीर्तयेत् न च प्रतिगृह्णीयात् । धर्मविरोधिनां विश्वासं न कुर्यात् । निवासार्थमत्युच्च गृहाणि न रचयेत् । गृहानुकूलं भोजनं कुर्यात् । जीविकानुकूलं वेशं परिकल्पयेत् । सर्वेष्वेवकार्येषु स्वदेशीयवस्तूनि संगृह्णीयात् । राजद्रोहं धर्मद्रोहं च महापापं जानीयात् । अन्नं न निन्देत् । परस्त्रियं परनिन्दां च परिहरेत् । परित्यक्तस्वधर्मं विधर्मिणं वाऽऽचार्यः तीर्थस्नानजपदानोपदेशैः शोधयित्वा स्वधर्मजनसंख्यावृद्धिं कुर्यात् । आश्रमादाश्रमंगच्छेत्। यत्र प्रतिदिनं हवनं, ब्राह्मणभोजनं वेदघोषो हरिकीर्तनं च भवति । तत्र रोगः शोकः उपद्रवश्च न जायते ।

यत्राऽग्निर्देवप्रतिमा धेनुर्वेदस्य पुस्तकम् ।
विप्रः साधुर्हरेर्भक्तः कालिस्तत्र न तिष्ठति ॥

इति श्रीकृष्णचरिते ज्ञानोपदेशनिरूपणं नाम
त्रिंशत्युत्तरशततमः स्तवकः ॥ १२० ॥

उद्धवः——प्रभो ! कृपया हंसावतारप्रसंगमुपदिश ?

श्रीभगवानुवाच——सखे ! सनकादयो ब्रह्मर्षयो ब्रह्मणो मानसपुत्राः संति । एकदा ते पितरं ब्रह्माणं योगस्य सूक्ष्मां गतिं पप्रच्छुः । वेदमूर्ते ! चित्तमिदं गुणेषु (विषयेषु) प्रविशति । गुणाश्च चित्तवृत्तिषु प्रविशंति । अतो मुमुक्षुः उभाभ्यां पृथक्

कथं भवेत् ? तच्छ्रुत्वा देवरत्नोऽपि स्वयंभूः प्रश्नस्य मूलकारण-मवगंतुं सहसा समर्थो न बभूव । ये कर्मप्रधाना भवंति तेषां कर्मपरायणाबुद्धिः निष्कर्मवस्तुविचारे कुंठितेव तिष्ठति । ततो विवशो विरंचिर्मामस्मरत् । अथाऽहं धृत्वा च हंसस्वरूपं तदग्रे प्रादुरभूवम् । ततस्ते मामालोक्य समुत्थाय प्रणम्य चोचुः । कृपानाथ ! शुभागमनं भवतः । भविष्यंति सांप्रतं सर्वेऽस्माकं पूर्णा मनोरथाः । अथाऽहमवोचम् । महाभागाः ! अवगतं मया सर्वम् । यूयमात्मतत्त्वमपृच्छत । किन्त्वात्मात्वेक एव । तत्र नानात्वं नाऽस्ति । अतः भवान् कोऽस्ति ? प्रश्नोऽयं न स्थितिमेति । अत्र श्रुतिः ।

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥
मनसैवेदमाप्तव्यं नेह नानास्ति किंचन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ उप० ॥

अपरं च । सत्यं ज्ञानमनन्तं ब्रह्म । अयमात्मा ब्रह्म । प्रज्ञान-मानंदं ब्रह्म । तत्त्वमसि । सर्वं खल्विदं ब्रह्म । तज्जलानितिशांत उपासीत । इत्याद्याः श्रुतयः प्रमाणम् । आत्मा निर्विकारः । यदि शरीरविषये प्रश्नस्तदाऽप्ययं न समीचीनः । यतः सर्वाणि शरीराणि पंचभूतात्मकान्यतोऽभिन्नानि । तत्त्वदृष्ट्या यन्मन्यते श्रूयते वा दृश्यते तत् सर्वमहमेव । मत्तः पृथक् किमपि नाऽस्ति । वर्णिनः ! चित्ते गुणा विशंति गुणेषु च चेतः । अत्र न संदेहः ।

किन्तु चित्तं गुणश्चोभावपि न तु जीवस्य स्वभावो न च स्वरूपमस्ति । ते तु तस्य अज्ञानकल्पितं शरीरमात्रं उपाधिश्चाऽस्ति । वस्तुतो जीवोऽयं ममैवांऽशोऽस्ति । विषयाणां निरन्तर चिन्तनेन चित्तं विषयेषु प्रविशति । तद्रूपं च भवति । गुणाऽभिव्यक्तिरपि चित्तेनैवं भवति । अतो विवेकिनो गुणरहितं शुद्ध-स्वरूपं मां निश्चित्य चित्तं विषयं च परित्यजंति । महामुनयः ! जाग्रत्स्वप्नसुषुप्तयः इमास्तिस्रः अवस्था बुद्धेरेव वृत्तयः संति । इमा गुणाननुसृत्य आयान्ति च यांति । जीवात्माऽयं अवस्थाभ्यः परोऽस्ति । यतः स आसां साक्षी वर्तते । इदं अवस्थात्रयात्मकं संसारबंधनमेव जीवं गुणवृत्तिषु प्रक्षिपति । इमा अवस्थाः स्वकीया ज्ञात्वाऽयं बद्धो भवति । यदाऽयं स्वरूपं चिन्तयति तदाऽयं बुध्यते । यदहं आभ्योऽवस्थाभ्यो विलक्षणः साक्षी तुरीय-तत्त्वं परमात्मन एव स्वरूपोऽस्मि । एवं ज्ञाने संजाते चित्तगुण-योर्युगपदेव त्यागो भवति । बंधनमिदमहंकारादेव जायते । विद्वानहंकारं सर्वाऽनर्थमूलं ज्ञात्वा तमपाकरोति । यावत्पुरुषस्य नानात्वभ्रांतिर्युक्तिभिर्न नश्यति तावत्स जाग्रदपि सुप्तोऽस्ति । अयं निर्णयोऽस्ति यदात्माऽतिरिक्तस्य कस्याऽपि वस्तुनः सत्ता-नाऽस्ति । देहाद्यसत्पदार्थात् समारभ्य यावन्तो भेदा विभेदा स्वर्गाद्या लोकाश्च संति । तद्द्वारा च यावंति कर्माणि प्रतीयंते । तानि सर्वाणि स्वप्नसदृशान्येवाऽवगंतव्यानि । मुनिवराः !

इन्द्रियवर्गैर्दृश्यमानाः सर्व एव पदार्थाः क्षणिकाः संति । प्रतिक्षणमेषामुत्पत्तिर्विनाशश्च संजायते । अयमात्मा जाग्रदवस्थायां इन्द्रियद्वाराविषयान् सेवते । स्वप्ने हृदय एव जाग्रदवस्थावत् विषयाननुभवति । सुषुप्तिसमये चाऽयं सर्वान् विषयान् संहृत्य लयं करोति । अतस्त्रयाणां गुणानां कार्यभूता यास्तिस्रो वृत्तयः संति तासां दर्शको नियंता चाऽऽयमात्मैवाऽस्ति । सत्त्वरजस्तमोभि रेवमनस एव जाग्रत्स्वप्नसुषुप्तिसंज्ञकास्तिस्रोऽवस्था भवंति । ताः सर्वाः मम मायया मय्येव प्रतीयंते । एवं शास्त्रवचनैः गुरुजनवाक्यैः युक्तिभिश्च ज्ञानखड्गं तीक्ष्णं कृत्वा हृदयस्थं संशयागारमहंकारं छिन्द्यात् । जगदिदं मनोविलासितं भ्रांतिमात्रं च ज्ञातव्यम् । वस्तुत एक एव विज्ञानस्वरूपः परमात्मा नानारूपैर्विभाति । ज्ञात्वैवं मुमुक्षुः पुत्रेषणां, वित्तेषणां, राज्येषणां च परित्यज्य परमानंदसुखमनुभवति । शरीरमिदं प्रारब्धाधीनम् । यावत् प्रारब्धकर्माण्यवशिष्टानि तावदिदं जीवितं तिष्ठति । ज्ञानी जीवनकाले समाधियोगमारुह्य आत्मतत्त्वस्य साक्षात्कारं करोति । मुनिवर्याः ! यन्मया प्रोक्तं तत् सांख्ययोगयोरहस्यमस्ति । स्वयमहं परमात्मा युष्मानुपदेष्टुं हंसावतारं धृत्वाऽऽगतोऽस्मि । अहमेव शमदमसांख्ययोगसत्यकीर्तिश्रीणाम् परमाऽधिष्ठानमस्मि ।

सखे ! एवं मुनिजनसंशयं छित्त्वा तैः स्तुतः पूजितश्चाऽहम न्तर्धानमगाम् ।

उद्धवः—देव ! किं कामासक्तोऽपि वैराग्यवान् भवितुमर्हति ?

श्रीहरिः—कथं न ? शृणु पुरातनमितिहासम् । सखे !

संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ।
तस्याऽनुगस्तमस्यंधे पतत्यंधानुगांऽधवत् ॥

आसीच्चन्द्रवंशे भूपमणिः पुरूरवा नाम राजा । स रूपेऽपरो मन्मथ इव कामिनीनां हृदयहर्ता बभूव । अथैकदा महेन्द्रभवने देवर्षिनारदमुखात् तस्य रूपशीलौदार्यद्रविणविक्रमादीन् गुणाञ्छ्रुत्वा सुरलोकसुंदरीरत्नमप्युर्वशी स्मरशरार्दिता तदन्तिकमाजगाम । अथ नरपतिर्ललनारत्नमालोक्य हृष्टतनूरुहः श्लक्ष्णया गिरा प्रोवाच । वरवर्णिनि ! ते स्वागतम् । इदमासनमलंकरोतु भवती । किं त्वदभिलषितं वयं करवाम तद्विधेहि । देवि ! यदि तुभ्यं रोचते तर्हि मया सह रमस्व । प्रीतिरावयोः शाश्वतीः समा भूयात् । एतदुपाकर्ण्य प्रणयवचनमुर्वशी प्रत्यवदत् । स्मरसुंदर ! कस्याः कान्तायास्त्वयि मनो दृष्टिश्च न सज्जेत । किं बहूक्त्या तव दर्शनमासाद्य रिरंसया देवांगनानामपि विवेकधैर्यादिकं सर्वं सहसैव पलायते । ललितविग्रह ! यदि मत्संगमं वांछसि तदा तु मदुक्तमंगीकुरु । एतौ द्वावुरणकौ यौ मया पुत्रवत् परिपालितौ त्वयि तावन्न्यासरूपेण तिष्ठतां यावत् त्वया सहाऽहं रंस्ये । घृतं मे भक्ष्यं स्यात् । अमृतं वा आज्यमितिश्रुतेः ।

रतिसंगमादन्यत्र नग्नं नेक्षे । एवमाकर्ण्याप्सरसो वचनं राजा तथाऽस्त्विति प्रतिज्ञातवान् । ततः पुरूरवाः सर्वाङ्गसुंदर्या तया सह सुरविहारेषु चैत्ररथादिषु कामं रेमे । एवं पद्मकिंजल्कगंधया तया सह रममाणस्तन्मुखामोदमुषितश्च राजा बहूनहर्गणान्मुमुदे । अथैकदा देवराजो गंधर्वानुवाच । भद्रपुरुषाः ! सर्वसुखप्रदमपि हर्म्यमुर्वशीरहितं मह्यं न रोचते । तच्छ्रुत्वाऽऽखंडलप्रेरिताः स्वर्लोकगायकाः निशीथे राजभवनमवाप्य राजनि जायया निक्षिप्तौ मेषशावकौ जह्रुः । अथाप्सरा नीयमानयोः पृथुकयोराक्रंदितं श्रुत्वा हाऽल्पवीर्येण वीरमानिनाऽहं हताऽस्मि । अहो ! दस्युभिर्हृतापत्याऽहं तु विलपामि किन्तु रक्षको नारीवत् त्रस्तो सुखं स्वपिति । एवं वाक्सायकैर्विद्धो राजा निस्त्रिंशमादाय विवस्त्रोऽपि रुषाऽभ्यद्रवत् । कपटकलानिपुणा गन्धर्वास्तौ विमृज्याऽलक्षिता बभूवुः । अत्रान्तरे विद्युतो व्यद्योतन्त । ततो राजा मेषशिशू समादाय समागच्छत् । तस्मिन्नेवावसरे विलोक्य राजानं नग्नमुर्वशी सपद्यंतर्दधे । अथैलोऽपि शयने जायामदृष्ट्वा विह्वलः सन् भुवं बभ्राम । अथैकदा कुरुक्षेत्रे सखीसमेतां प्रियामालोक्य राजोवाच—

अहो जाये ! तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।
मां त्वमद्याऽप्यनिर्वृत्य वचांसि कृष्णवावहै ॥

उर्वश्युवाच—राजन् !

मा मृथा पुरुषोऽसि त्वं मा स्म त्वाऽद्युर्वृका इमे ।
क्वाऽपि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥

स्त्रियो ह्यकरुणाः प्रियसाहसाः क्रूरा दुर्मर्षाश्च भवंति । एता अल्पार्थेऽपि विस्रब्धं पतिं भ्रातरं चाऽपि घ्नंति । अज्ञेष्वलीकविश्रंभं विधाय त्यक्तसौहृदा नवं नवमाभिवांछंति । राजन् ! संवत्सरांते एकरात्रं मया सह वत्स्यासि । अपत्यानि च ते भविष्यंतीत्यभिधाय सा दिवमुत्पपात । सोऽथ विरहकातरः पर्यटन् नैमिषारण्ये श्रीमत्प्रातः स्मरणीयस्य महर्षेर्दधीचाश्रममगात् । ततः प्रणम्य मुनिवरं पप्रच्छ । महात्मन् ! विदग्धांगनाविरहकातरं मां ज्ञानोपदेशेन समुद्धर । तच्छ्रुत्वा करुणार्द्रहृदयो महर्षिरुवाच । राजन् ! चिन्तितो मा भव । समाकर्णय शिक्षाम् ।

किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ।
किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतम् ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्द्धते ॥

दौर्गंध्याद्यात्मकोऽशुचिः कायः क्व ? सौमनस्याद्याश्चात्मनो गुणाः क्व ? अविद्ययाऽध्यासः कृत एव । किमयं देहः पित्रोर्जनकत्वात् ? किं वा भार्याया भोगप्रदत्वात् ? अथवाऽग्नेरंत्येष्ट्यां तदाहुतित्वात् । अहोस्वित् श्वगृध्रकाकादीनां भक्ष्यत्वात् । किं वाऽऽत्मनः

शुभाऽशुभफलभोगित्वात्। किं वा मित्रबांधवादीनामुपकारित्वात्। एवं कस्यायमिति निर्णेतुं न शक्यते। तस्मिन् कलेवरे त्वङ्मांसस्नायुमज्जाऽस्थिरुधिरेभ्योऽमेधेभ्योऽन्यत् किं विद्यते ? वीर्ये कृमयो विष्ठायां कृमयोऽऽसृजि चाऽपि कृमय एव संति। अतो विवेकी स्त्रीषु स्त्रैणेषु च न विश्वसेत्। आवर्तः संशयसमुदायस्य, भवनं अविनयस्य, पत्तनं साहससमूहस्य सान्निधानं दोषौघस्य, गृहं कपटस्य, क्षेत्रमप्रत्ययस्य, सर्वमायाकरण्डं यन्महद्भिर्नरपुंगवैरपि दुर्ग्राह्यं स्त्रीयंत्रं धर्मनाशाय विषममृतमयं लोके केन सृष्टं ? एताः कार्यहेतोर्हसंति च रुदंति। मिथ्यावचनैर्विश्वासयंति परं स्वयं न विश्वसंति। तस्मात् कुलशीलवता विदुषा श्मशानघटिका इव सदैव नार्यो वर्जनीयाः। नरपाल ! भक्त्या श्रीमन्नारायणं सदाशिवं वा स्मर। उक्तं च—

एको देवः केशवो वा शिवो वा, एकं मित्रं भूपतिर्वा यतिर्वा।
एको वासः पत्तने वा वने वा, एका भार्या सुंदरी वा दरी वा॥

निशम्यैतन्मुनिराजवाक्यं राजा सविनयं जगाद। कृपासागर ! मोहो नष्टः स्मृतिश्च मया लब्धा। ततो लब्धानुज्ञो भूपो व्यचिन्तयत्। अहो ! कामकश्मलचेतसो मम मोहविस्तारो महाभूत्। देव्या गृहीतकंठस्य मम आयुः खण्डा वृथा गताः। हा नरदेवशिखामणिरहं मोहेन योषितां क्रीडामृगः कृतः। हा चक्रवर्तिन-

मपि मां त्यक्त्वा यांतीं स्त्रियं नग्न उन्मत्तवद्रुदन्महमन्वगमम् । स्वार्थाऽकोविदं पण्डितमानिनं मान्धिक् । योऽहं समृद्धराज्याधीश्वरोऽपि स्त्रीभिर्गोखराजवज्जितः । सम्प्रति पुंश्चल्याऽपहृतचित्तं मां भगवन्तमधोक्षजं विनाऽन्यः को मोचयितुं प्रभुः ? यद्यपि देवी सूक्तिभिः मां प्राबोधयत्तथाऽपि तदा मम मोहो नाऽपगतः । ऋषीणामाद्यानां वाचमर्थोऽनुधावतीति सत्या लोकोक्तिः । उद्धव ! एवं निश्चित्य राजा उर्वशीमोहं परित्यज्याऽत्मन्यात्मानमवगम्य च ज्ञानविधूतमोहो बभूव ।

तच्छ्रुत्वोद्धवः प्रोवाच । भगवन् ! तव सन्निधानान्मम मोहो विनष्टः । दयासागरेण भवता ज्ञानमयः प्रदीपो भृत्याय दत्तः ।

नमोऽस्तु ते महायोगिन् ! प्रपन्नमनुशाधि माम् ।
यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ॥

एतदुपाकर्ण्य सुहृद्वचनं हरिरुवाच । सहृदय ! संप्रति मयादिष्टो वदरिकाश्रमं गच्छ । तत्र मत्पादतीर्थोदके स्नात्वा पवित्रो भव । ततः समाहितधिया ज्ञानविज्ञानसंयुतो मद्धर्मनिरतो भव । अथोद्धवः प्रणम्य यदुपतिं भर्तृपादुके मूर्धनि निधाय च विशालां ययौ । सोऽथ निरन्तरं हरिं ध्यायन् जीवन्मुक्तो भूत्वाऽऽत्मज्ञानेन मुक्तिमवाप । अत्र श्रुतिः ।

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥**

**इति श्रीकृष्णचरिते उद्धवयात्रानिरूपणंनाम
एकविंशत्युत्तरशततमः स्तवकः ॥ १२१ ॥**

अत्रान्तरे तीर्थाटनं कुर्वन् श्रीकृष्णसभायां श्रीमद्दानवीर-महर्षिदधीचिसुतो निगमागमपारगः पिप्पलादमुनिः (कणादः) सशिष्यवृन्दः समाजगाम । तं विलोक्य ससभ्यः श्रीमन्महाराजाधिराज उग्रसेनः सहसोत्थाय पाद्यार्घ्यादिभिः विधिवत् संपूजयामास । ततः श्रीकृष्णचन्द्रप्रेरणया वृद्धो राजा सविनयं पप्रच्छ । कृपानाथ ! देवोपासनाविषये मामुपदिश । तच्छ्रुत्वा मुनिरुवाच । राजन् ! एकस्मादात्मनोऽन्ये देवा अंगानि भवंति ।

देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवतेति ।

"अग्निर्देवता वातो देवता सूर्यो देवता चंद्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता" ॥ यजुः ॥

उग्रसेनः—कति देवाः के च ते ?

पिप्पलादः—त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति । स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवाः । तत्राऽष्टौ

वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशशादिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशशाविति । बृ०

उग्रसेनः—एषां पूजनेन परमेश्वरपूजा भवति न वा ?

पिप्प०—भवति । यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवंति । तासां महाभाग्याद्देकैकस्या अपि बहूनि नामधेयानि भवंति ।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥

भाष्यम्—'इन्द्रं मित्रं वरुणम्' इत्येतैरभिधानै "अग्निम् आहुः तत्त्वविदः अथो अपि च योऽयं दिव्यः दिविजः दिविजायते सुपर्णः सुपतनः गरुत्मान् गरणवान् स्तुतिभिः तद्वान् रसानां वा गरित आदित्यः अयमपि सः एवाग्निरित्याहुः किं बहुना इममेवाग्निम् एकं महान्तम् आत्मनम् अनन्यत्वेन पश्यंतः विप्रा मेधाविनः आत्मविदः बहुधा वदंति—अग्निम् यमम् मातरिश्वानम् ॥

उग्र०—परमेश्वरोऽप्यङ्गीकरोति न वा देवाऽर्चनम् ?

पिप्प०—स्वीकरोति । महाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते ।

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥ यजुः ॥

भाष्यम्—यत् इदं वर्तमानं जगत् तत्सर्वं पुरुष एव । यद्भूतं अतीतं जगत् यच्च भाव्यं भविष्यं जगत् तत्सर्वं पुरुष एव ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः ।
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ ऋ० सं०

भाष्यम्—पुरुषः परमेश्वरः तच्छक्तिः परमेश्वरी वा समाज्ञापयति । अहं रुद्रेभिः एकादशरुद्रैः शिवैः प्राणैर्वा एकारश्छांदसः वसुभिः पृथिव्यादिभिरष्टभिर्वसुभिः गुरुप्रभृतिभिर्ग्रहैर्वा चरामिपर्यटामि भक्तैः समर्पितं नैवेद्यं अद्मि वा। अहम् आदित्यैः द्वादशमासाधिपतिभिः सूर्यैः इन्द्रादिदेवगणैर्वा उत वा विश्वदेवैः अग्निपुरोगमैर्वैदिकदेवैः गणेशादिलौकिकदेवैर्वा चरामीति उपरोक्त क्रियापदेन सह सम्बन्धः । अहम् मित्रावरुणौ दिनरात्र्यभिमानिनौ उभौ देवौविभर्मि धारयामि पोषयामि वा । अहम् इन्द्राग्नी इन्द्राग्निसंज्ञकौ याज्ञिकदेवौ हरिहरौ वा । अहम् अश्विनौ सूयाचन्द्रमसौ स्ववैद्यौ वा उभौ विभर्मीति पूर्वोक्तं क्रियापदं योजतीयम् ॥

उग्र०—वेदेषु ये देवास्ताँल् लोके कथं व्याहरंति ?

पिप्प०—वेदेषु ये ये शब्दा देवतावाचकास्ते सव मिथः सर्वदेववाचकाः भवंति परं तत्र न कुत्राऽपि विरोधः । यथा इन्द्रशब्दो वेदे सूर्यादिवाचको लोके च स्वर्गाधिपतिः। वेदे यज्ञः। लोके विष्णुः । विष्णुः यद्विषितो भवति । विष्णुर्वैयज्ञ इति श्रुतेः । वेदे अग्निः । वेदान्तपक्षे आत्मा वै यज्ञ इति शतपथ ब्राह्मणम् । लोके गणेशः । अग्निर्हि भूयिष्ठभाग् देवतानाम । अग्निर्वै सर्वा देवताः । आग्निर्धूमकेतुः अग्रणीर्भवति । धूम्रकेतुर्ग-

णाध्यक्ष इति गणेशनामावली । वेदे तिस्र एव देवताः तिस्रो देवीः इति नैरुक्ताः । लोके महाकाली । महालक्ष्मीः । महासरस्वती चेति । वेदे अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्यो द्युस्थानः । लोकेऽग्निः शिवः वायुरिन्द्रो वा ब्रह्मा । सूर्यश्च विष्णुरिति । अग्निवाय्वर्काः शिवविरंचिहरयः ।

उग्र०—किं देवा अपि भवंति सपत्नीकाः ?

पिप्प०— भवंति । अत्र श्रुतिः । **आ द्वाभ्यां हरिभ्यामिन्द्र याहि कल्याणीर्जाया सुरणं गृहे ते ॥** दै० का० ॥

हे भगवन् ! इन्द्र ! यदि तावत् तव द्वौ हरी सन्निहितौ ततस्तावेव रथे युक्त्वा ताभ्यां हरिभ्यां आयाहि । तस्मात् तव कल्याणीः जायाः सुरणं यद्यद्रमणीयं तत् तत् सर्वं ते तव गृहे वर्तते । ततः पुनरस्तं प्रयाहि ॥

लोके—लक्ष्मीनारायणौ । सावित्रीहिरण्यगर्भौ । उमामहेश्वरौ । शचीपुरंदराविति । वेदे—अग्नीषोमौ लोके सूर्याचंद्रमसौ । वेदे—अग्नाविष्णू । लोके—शिवकेशवौ । रामलक्ष्मणौ । रामकृष्णौ वा । वेदे—मित्रावरुणौ । लोके—नरनारायणौ । कृष्णार्जुनौ । वेदे—रुद्रः प्राणवाचकः । लोके—शिवः । रुद्रा एकादश स्मृताः । वेदे—क्षेत्रस्य पतिः । लोके—भैरवः । भैरवः क्षेत्रपालः । वेदे—यमः अग्निरपि यमः । लोकेमृत्यु यमः । वेदे—हिरण्यगर्भः ।

लोके—ब्रह्मा विष्णुर्वा । वेदे—विश्वकर्मा । लोके—विधाता । वेदे—मरुतः । लोके—मितराविणः । पवनपुत्रो हनूमान वा । वेदे—उमा । लोकेऽप्युमापार्वती । वेदे—पृथिवी । लोके—श्रीसीता । विष्णुपत्नी गौर्वा । वेदे—प्रकृतिपुरुषौ । लोके—श्रीसीतारामौ श्रीलक्ष्मीनृसिंहौ । श्रीराधाकृष्णौ । शक्तिशिवौ वा । वेदे—अश्विनौ । लोके—रामलक्ष्मणौ । रामकृष्णौ वा । वेदे—वरुणः । लोकेऽपि वरुणः । सर्वाणितीर्थानि वा । दरियावजीति केचित् । वेदे—इन्द्राग्नी । लोके—हरिहरौ । वेदे—मातरः नद्यः । लोके—चामुण्डाद्यादेव्यो वर्णमाला वा । वेदे—विश्वेदेवाः । लोके—सर्वदेवाः । वेदे—अष्टवसवः लोकेऽष्टौ ग्रहाः । राहुकेत्वोरैक्यात् । वेदे—इन्द्रियगणसमेत आत्मा । लोके—सप्तर्षयः । वेदे—त्र्यम्बकः लोकेऽपि त्रिकालज्ञः सदाशिवः । वेदे—पंचतत्त्वानि । लोके—पंचदेवाः । पृथिवीशक्तिः । तेजः सूर्यो गणेशः शिवश्च । वायुर्ब्रह्मा । जलं आकाशश्च नारायणः ।

उग्र०—परमेश्वरस्य साकारनिराकारविषये को विचारो भवतः ?

पिप्प०—राजन् ! अनंतशक्तिसंपन्नः सः ।

चिन्मयस्याऽप्रमेयस्य निष्कलस्याऽशरीरिणः ।
साधकानां हितार्थाय ब्रह्मणो रूपकल्पना ॥

यथा गोशरीरे घृतमस्ति । परं तत् तस्याः शरीरं पोषयितुं न शक्तम् । यदा गोपालः तच्छरीराद् दुग्धं निःसार्य ततो दध्नः

घृतमुत्पाद्यचाऽन्नेन सह खादयेत् तदा सा गौः पुष्टा भवति । एवं शालग्रामनर्मदेश्वरा प्रतीकोपासनया जाते स्थिरे चित्ते ज्ञानेन ध्यानेन वा भगवत्प्राप्तिर्भवति ।

उग्र०—ऋषिराज ! जातोऽहं विगतसंदेहः । तच्छ्रुत्वा-ऽतितुष्टो मुनिवरः प्राह भूपाल ! त्रयस्त्रिंशद्देवानामत्रसंग्रहः । कोटि शब्दोऽत्र कक्षावाचको न हि संख्या वाचकः ।

ब्रह्मा रुद्रः कुमारो हरिवरुणयमा वह्निरिन्द्रः कुबेरः ।
चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वीभुजंगाः ।
सिद्धा नद्योऽश्विनौ द्यौर्दितिरदितिसुता मातरश्चंडिकाद्या ।
वेदास्तीर्थानि यज्ञा गणवसुमुनयः पांतु नित्यं ग्रहाश्च ॥ पं०तं० ॥

उग्र०—परमेश्वरः कदाऽवतारं धारयति ?

पिप्प०—यदा यदा हि धर्मस्य ग्लानिर्भवति भूतले ।
अभ्युत्थानमधर्मस्य तदाऽवतरति प्रभुः ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय जायते वै युगे युगे ॥

उग्र०—कृपयाऽवतारान् समाचक्ष्व ?

पिप्प०—(१) ब्रह्मा (२) हंसः (३) वराहः (४) नारदः (५-६) नरनारायणौ (७) कपिलः (८) दत्तात्रेयः (९) यज्ञः (१०) ऋषभदेवः (११) पृथुः

(१२) मत्स्यः (१३) कूर्मः (१४) धन्वंतरिः (१५) मोहिनी (१६) नृसिंहः (१७) वामनः (१८) परशुरामः (१९) श्रीरामः (२०) बलरामः (२१) हयग्रीवः (२२) व्यासः (२३) कृष्णः (२४) कल्किश्च भविष्यति ।

उग्र० —सोमरसपाने वा तीर्थाऽऽचमनविषये वद ?

पिप्पलादः—

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतः सं तदाशत ॥*

॥ साम० ॥

भाष्यम्—हे ब्रह्मणस्पते ! मंत्रस्वामिन् ! सोम ! (चरणामृत तीर्थजल वा) ते पवित्रं शोभनमङ्गं विततं सर्वत्र विस्तृतम् । स प्रभुः प्रभविता त्वं गात्राणि पातुरंगानि पर्येषि परिगच्छसि । विश्वतः सर्वतः तव तत्पवित्रितम् अतप्ततनूः पयोव्रतादिना असंतप्तगात्रः आमः अपरिपक्वः नाश्नुते न व्याप्नोति । शृतास

* पुरा त्वभूवन् सोमयागादयो बृहद्यज्ञाः । दिनेष्वेतेषु यज्ञस्थानं देवागारैर्गृहीतम् । सोमयज्ञाऽभावे देवपूजनमेव यागं मत्वा तीर्थजलं चरणामृतं वा पिबंति लोकाः । अधुना चरणामृतपाने विनियोगोऽस्त्यस्य मंत्रस्य । ये भगवदर्चायां कायिक कष्टानि सहंते ते परिपक्काः संतः पुण्यप्रभावात् सद्गतिं लभन्ते । ये त्वाऽपक्कास्ते सांसारिकयातनां सहंते ॥

इत् शृता एव परिपक्वा एव वहंतः यागं वहंतः तत् पवित्रं समासत व्याप्नुवंति ॥

उग्र०—पवित्रौषधिविषये कथय ?

पिप्पलादः—राजन् !

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनैनु बभ्रूणामहꣳशतं धामानि सप्त च ॥

यजु० अ० १२ । ७५ ॥

भाष्यम्—या ओषधीः ओषधयः ‡ ब्राह्मीतुलसीविल्वाभिधानाः पूर्वा जाताः अन्याभ्य ओषधीभ्यः प्रथमोत्पन्नाः । देवेभ्यः ब्रह्माविष्णुमहेशेभ्यः (अर्थाय) त्रियुगं त्रिकालं वसंते प्रावृषि शरदि च पुरा सृष्ट्यादौ वा पूर्वस्मिन्हि वर्षेऽग्निक्षेत्रे ओषधय उत्पद्यंते मनैनु मन्ये जानामि । बभ्रूणां बभ्रूवर्णानां अहं शतं सप्त च धामानि जाने (शतायुर्वै पुरुष इति श्रुतेः) वर्षात्मकानि शिरः स्थानि मुखदृङ्नासाख्यानि सप्तस्थानानि वेद ।

उग्रसेनः—आसनविषयं कथय ?

पिप्प०—संतिभेदाः किंतुसंक्षेपोऽयम् । कृष्णाजिनज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।

---

‡ ब्राह्मीबुद्धिवर्धिनी तुलसीज्वरनाशिनी विल्वपत्राण्यतीसार निवारणानि अतएव भक्ताः देवेभ्यः समर्पयंति सेवन्ते च । पूर्वकथितान्यौषधानि ॥

उग्रसेनः——जपमालाविषयं कथय ? पिप्पलादः——

या फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पति प्रसूतास्ता नो मुंचत्वꣳहसः ॥ † य० १२ । ८९ ॥

भाष्यम्——या ओषधयः फलिनीः फलिन्यः (रुद्राक्षतरवः) या अफलाः फलरहिताः (तुलस्यः) अपुष्पाः पुष्परहिताः (चंद्रनादयः) याश्च पुष्पिण्यः पुष्पवत्यः (कमलनालिकाप्रभृतयः) ताः सर्वा ओषधयः बृहस्पतिप्रसूताः बृहस्पतिप्रेरिताः सत्यो नोऽस्मान् अंहसः पापात् रोगरूपात् मुंचन्तु पृथक् कुर्वन्तु ।

उग्र०——कस्मै कर्मणे केन रूपेण परमात्मनं यजेत् ?

पिप्प०——ब्रह्मवर्चसकामो ब्रह्माणं, इन्द्रियकाम इन्द्रं, प्रजाकामः प्रजापतिम्, लक्ष्मीकामो दुर्गाम्, तेजस्कामोऽग्निं, वसुकामो वसून्, शक्तिकामो रुद्रान्, अन्नकामोऽदितिं, स्वर्गकाम आदित्यान्, राज्यकामो विश्वान्देवान्, प्रजाऽऽतंकेच्छुः साध्यान्, आयुष्कामः अश्विनीकुमारौ, पुष्टिकामः पृथिवीम्, प्रतिष्ठार्थी द्यावाभूमी, रूपेच्छुः गंधर्वान्, योषित्काम उर्वशीम्, आधिपत्यार्थी परमेष्ठिनम्, यशस्कामो यज्ञपुरुषम्, निधिकामो वरुणम्,

---

† देवपूजकाः केचिद्रुद्राक्षमालया जपंति । अपरे तुलसीमालया यजंते । इतरे चंदनमालया जपंति । अन्ये च पद्मबीजमालया स्वेष्टदेवं स्मरंति । एवमेव चंदनकुंकुमहरिद्रादिभिस्तिलकं कृत्वा भक्तजना स्वेष्टदेवं पूजयंति स्वयं च भूषितललाटा भवंति ।

विद्याकामो महादेवं, दाम्पत्यसुखार्थी पार्वतीम्, धर्मलाभार्थी महाविष्णुं, संतानार्थी पित्रीश्वरान्, रक्षाकामः पुण्यजनान्, ओजस्कामो मरुतान्, राज्यकामो मनून्, अभिचारार्थी निर्ऋतिम् भोगार्थी चंद्रमसम्, अकामश्च परमपुरुषं यजेत। एवमनेकदेवोपासनेनाऽपि तस्यैव पूजा भवति नाऽन्यस्य यतः स सर्वदेवमयः सति विभवेऽग्रद्वारैव तान् यजेत। धनाऽभावे साधारणविधिना तान् संपूज्य वैदिकान् पौराणिकान्वा मंत्रान् जपेत्।

उग्रसेनः——देव! श्रुतयः कथं श्रीकृष्णावतारस्तुतिं चक्रुः?

पिप्प०—राजन्! शृणु प्रलये श्रुत्यभिमानिन्यो देवता भगवंतमुपसृत्य यथा शयानं सम्राजं समभ्येत्य प्रत्यूषे वंदिनः स्तुतिभिः प्रबोधयंति तथा तं प्रबोधयामासुः। यथा—हेऽजय! त्वं सर्वोपरि विराजमानो भव। याऽत्र परप्रतारणकुशला माया स्वैरिणीव हावभावकटाक्षैः लोकान् वंचयति ताञ्जहि। अस्या निवारणं कर्तुं भवानेव समर्थोऽस्ति नत्वयं जीवात्मा। यतस्त्वमेव सर्वज्ञः सर्वशक्तिसंपन्नश्चाऽसि। जगति या या आराधना यानि यानि ज्ञानानि या या क्रियाशक्तयश्च संति तासां सर्वासां प्रबोधकस्त्वमेवाऽसि नाऽन्यः कश्चित्। अत्र श्रुतिः।

यतो वा इमानि भूतानि जायंते येन जातानि।
जीवेति यत् प्रयंत्यभिसंविशंति तद् ब्रह्मेति॥

देव ! यद्यपि त्वमवर्णनीयोऽसि तथाऽपि सृष्टिं रचयित्वा सगुण-स्वरूपमपि दधासि । अथवा स्वेच्छया सच्चिदानंदस्वरूपं श्री-विग्रहं कृत्वा च यदा क्रीडसि तदैव वयं यथाशक्ति तव स्तुतिं कर्तुं समर्था भवामः । यद्यपि वेदेषु इन्द्राग्निवरुणादयोऽपि देवाः स्तूयंते तथाऽपि मंत्रद्रष्टारो महर्षयश्चराऽचररूपं इदं विश्वं ब्रह्म-स्वरूपमेवाऽनुभवंति । अर्थात् प्रलये यदा जगन्नश्यति तदा त्वमेक एवाऽवशिष्यसे । यथा घटशरावादीनि पात्राणि मृत्ति-कया निर्मीयंते तस्यामेव च लीयंते । वाचारंभणं विकारो नाम-धेयं मृत्तिकेत्येव सत्यम् । सर्वं खल्विदं ब्रह्मेति श्रुतेः । एवमस्य जगतस्त्वत्त एवोत्पत्तिस्त्वय्यैव च लयो भवति । पृथ्वीवत् पृथिव्या एव विकारवाँस्त्वं नाऽसि । सर्वत्रैकरसत्वात् । यथा मृण्मयपात्रेषु मृत् तत्त्वमस्ति तथा च पार्थिवपात्राणां वर्णनेन तस्या एव वर्णनं भवति । एवमिन्द्राग्निवरुणादीनां स्तुत्या तवैव स्तुतिर्भवति अत्रोदाहरणम् । मनुष्यः काष्ठे पाषाणे वा यत्र कुत्राऽपि पदं निदध्यात् परं तत् पृथिव्यामेव स्थितिमेति । अत्र श्रुतिः ।

तदे॒वाग्निस्तदा॑दि॒त्यस्तद्वा॒युस्तदु॑ च॒न्द्रमाः॑ ।
तदे॒व शु॒क्रं तद्ब्रह्म॒ ता आपः॒ स प्र॒जाप॑तिः ॥ यजु० ३२ । १ ।

लोकेऽपि——

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

हे त्रिगुणमायामृगीनर्तक ! सर्वकारणत्वेन त्वमेव भजनीय इति कृत्वा यदा विद्वांसः तव समस्तपापक्षपणसमर्थं कथामृताब्धिमवगाह्य त्रिविधदुःखानि तत्यजुः । तदा हे पुरुषोत्तम ! स्वरूपसाक्षात्कारेण विधुताशयकालगुणा भक्ता अजस्रसुखानुभवं कुर्वन्तः परमपदभाजो भवंतीत्यत्र किमाश्चर्यम् ? तद्यथा पुष्करपलाशे आपो न श्लिष्यंते एवं ब्रह्मज्ञानिनि पापं न श्लिष्यते । अत्र श्रुतिः **"न कर्मणा लिप्यते पापकेनेति"** । हे देव ! यदि प्राणिनः तव भक्तास्तर्हि ते सफलजीवना भवंति । अन्यथा ते भस्त्रेव परप्रतापनायैव जीवंति । अस्मिन् संसारे भवदनुग्रहं विना कोऽपि प्राणी सुखमधिगंतुं न शक्नोति । यत् अहंकारादयो भवदीयं प्रवेशमवाप्यैव ब्रह्माण्डमरीरचन् । अतो भवत्कृपाकटाक्षं विना शाश्वतं सुखं दुर्लभम् । येऽन्नमयप्राणमयमनोमय विज्ञानमयानंदमयकोशास्तेषु पुरुषरूपेण स्थितोऽहमस्मीति शब्दस्फूर्तिकारकोऽपि त्वमेवाऽसि । भवदस्तित्वेनैव कोशेषु तेष्वस्तित्वाऽनुभवो जायते । अभावेऽप्यंतिमावधिरूपेण विराजसे । एवं सर्वान्विते सर्वाऽवधौ च सत्यप्यसंग एवाऽसि । वस्तुतो यत्किमपि वृत्तिद्वाराऽस्ति वा नाऽस्तिरूपेणाऽनुभूयते तेभ्यः सर्वेभ्यः कार्यकारणेभ्यो भवानेव परः । अत्र श्रुतिः ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ।

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परागतिः ॥क० उ०॥

देव! मुनिभिर्भवत्प्राप्तेर्बहवो मार्गाः प्रदर्शिताः। तेषु स्थूलदृष्टयः शाखाचन्द्रन्यायमवलंब्य मणिपूरचक्रस्थं ब्रह्म ध्यायंति। आरुणयो हृदयस्थं सूक्ष्मं दहरं ब्रह्मोपासते। अनंत! हृदयात् उत्कृष्टं तवोपलब्धिस्थानं सुषुम्णाख्यं ज्योतिर्मयं मूर्धानमुदसर्पत्। यत्समेत्य योगी पुनः संसारे न पतति। अत्र श्रुतिः।

शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे वहंति ॥

प्रभो! भवतैव देवमनुष्यखगमृगाद्या योनयो रचिताः। सदा सर्वत्र सर्वेषु रूपेषु च भवानेव विराजते। अतः कारणरूपेणाऽप्रविष्टेऽपि प्रविष्ट इव भाति। ततो नानायोनीरनुसरन् क्वचिदुत्तमः क्वचिन्मध्यमः क्वचिच्चाऽधम इव प्रतीयते। अत्रोदाहरणम्। यथाऽग्निः स्वतस्तारतम्यहीनोऽपि काष्ठानुसारेण दीर्घह्रस्वस्थूलसूक्ष्मरूपोऽवभासते तथा त्वमपि भासि। यत्र प्रविशति तत्समो भूत्वा तत्र प्रविशति। समःप्लुषिणा समोनागेन समोमशकेनेत्यादिश्रुतेः। ज्ञात्वैवं विवेकिनः कर्मफलेच्छां परित्यज्य विरक्ता भवंति। निर्मलबुद्ध्या सत्याऽसत्ये परिचित्य सांसारिकेषु मिथ्याप्रपंचेषु न पतंति। अत्र श्रुतिः—

एको देवः सर्वभूतेषुगूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताऽधिवासः साक्षी चेता केवलो निर्गुणश्च ॥

देव ! जीवात्मा येषु शरीरेषु तिष्ठति तानि तस्य कर्मानुकूलान्येव मिलंति । एवं सत्यपि स कार्यकारणरूपैरावरणादिभी रहितोऽस्ति । वस्तुतस्तेषामावरणादीनां सत्तैव नाऽस्ति । तत्त्वज्ञास्तु एवं व्याहरंति यत् समस्तशक्तिसम्पन्नस्य भवत एव तत् स्वरूपमस्ति । अतोऽनंशेऽपि तमंशं भवदीयं कथयंति । अनिर्मितमपि च निर्मितं प्रतिपादयंति । एवं यदा जीवेऽपि वाह्यं आभ्यंतरं वाऽऽवरणं भोक्तृत्वं अपरिच्छिन्नत्वं च नाऽस्ति । तदा भवत्संबंधे तु कः कथयितुं शक्तः ? ज्ञात्वैवं महात्मानः स्वकल्याणाय भवच्चरणसरोरुहे सेवंते । भवदुपासनां विना स्वस्वरूपस्योपलब्धिः सर्वथैव कठिनाऽस्ति । किं बहूक्त्याऽस्मिन्मर्त्यलोके हरिभक्तिरेव सर्वार्थसाधिका मुनिवरैर्निर्धारिता । अत्र श्रुतिः ॥

"तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पंथा विद्यतेऽयनाय ॥"
ज्ञाज्ञौ द्वावजावीशानीशावजाह्येका भोक्तृभोगार्थयुक्ता ।
अनंतश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विंदते ब्रह्ममेतत् ॥

हे भगवन् ! परमात्मतत्त्वलाभः कठिनतमोऽस्ति । त्वं तस्यैव ज्ञापनाय नानाऽवतारान् धारयसि । ततस्तैर्याया लीलाः करोषि तास्ता अमृतार्णवादपि मधुराः प्रमोदप्रदाश्च संति । ये जनास्तं

सुधारसं सेवंते तेषां सर्वाः क्लान्तयो द्रुतमेव विनश्यंति । ते परमानंदाम्बुधौ निमज्जंति । केचिद्धरिभक्तास्त्वीदृशाः संति ये मुक्तितोऽपि विशिष्टां भवदीयां लीलाकथां यदा गणयंति तदा स्वर्ग-सुखस्य तु गणनैव का ? किं बहूक्त्या भवदीया भक्ताः परित्यज्य गृहान् परमहंसपूजितौ भवच्चरणौ सेवमानाः पवित्रं कथामृतं च पिबन्तः सुखेन समयं यापयंति । अत्र श्रुतिः ।

यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं स च विचैति सर्वम् ।
तमीशानं वरदं देवमीड्यं निचाय्येमां शांतिमत्यंतमेति ॥

प्रभो ! नश्वरमिदं शरीरमेकस्मिन् दिने भस्मीभूतं भविष्यति । सावधानमनुष्योऽनेनैव साधनेन भवंतमधिगंतुं शक्नोति । देहोऽयं जीवात्मनः इच्छानुसारं कार्यं करोति । बंधुवत् सुहृद्वच्चाहित-माचरति । यदा भवद्दत्तं शरीरमेवमुपकरोति तदा भवदीय-कृपायास्तु पारो न लभ्यते । देव ! जीवात्मनः सहजहित-चिन्तकः प्रियतम आत्मा च त्वमेवाऽसि । सर्वदैव सत्पथदर्शनाय च जागर्षि । ईदृशं सौकर्यं समवाप्याऽपि लोकाः सख्यादिना भवंतं नोपसेवंते भवति च न रमंते तेऽवश्यं शोचनीयाः । इमे दारापत्यगृहादय स्वप्नोपमाः । एषां मोहः कल्याणाय न भवति । प्रत्युताऽधोगतिं नयंति । अतः त्वमेव सदा ध्येयो ज्ञेयश्च त्वमेव । अत्र श्रुतिः ।

असुर्या नाम ते लोका अंधेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छंति ये के चाऽऽत्महनो जनाः ॥

हे देव! जितप्राणा जितचित्ता जितेन्द्रियाश्च महायोगिनो यत्तत्त्वं हृदिउपासते । तव शत्रवोऽपि त्वां स्मरन्तस्तदेव तत्त्वं प्रापुः । शेषनागदेहसमभुजदण्डविषक्तबुद्धयः परिछिन्नदृष्टयश्च गोप्योऽपि कामतो ध्यानात् तदेव तत्त्वं ययुः । एवं वयं श्रुत्यभिमानिन्यो देवता अपि तवांघ्रिसरोजं वर्णयंत्योऽपरिच्छिन्नं त्वां पश्यंत्यस्तव कृपाविषयतया तत्समा एव जाताः । उक्तं च—

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।
नित्यं हरौ विदधतो यांति तन्मयतां हि ते ।
तस्मात् केनाऽप्युपायेन मनः कृष्णे निवेशयेत् ॥

भगवन्! अत्र पूर्वसिद्धं त्वाम् अर्वाचीनोत्पत्तिविनाशवान् को नु पुमाञ्जानाति? यत आद्यर्षिर्ब्रह्मदेव उदपद्यत। "यो ब्रह्माणं विदधातिपूर्वमितिश्रुतेः" यदनु उभयविधानिवृत्तिनिष्ठाः सनकादयः प्रवृत्तिनिष्ठा मरीच्यादयश्च समुत्पन्नाः । अन्ये मनुष्यादयस्तु ततोऽप्यर्वाचीनाः । यदा तु भवान् सर्वं संहृत्य शयीत । तस्मिन् समये न स्थूलमाकाशादि न सूक्ष्मं महदादि नोभयं सदसद्भ्यामारब्धं शरीरं न चिदचिदात्मकं मनो वा न कालजवो न च वेदादिशास्त्रमासीत् । अतो ज्ञानस्य दुर्लभत्वाद्भगवदेकशरण-

तया श्रवणकीर्तनादिरूपाभक्तिरेव सुकरा निर्धारिता । प्रभो ! येऽसतः पदार्थस्योत्पत्तिं तथा सत्पदार्थस्य विनाशं स्मरंति ते भ्रमाविष्टाः । अत्र श्रुतिः ।

सदेव सौम्येदमग्र आसीत् । सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः । अत्र स्मृतिरपि ।

नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

इति श्रुतिस्मृतिविरोधात् । एवं ये चाऽऽत्मनि भेदं स्मरंति तेऽप्यारुषितैरेवोपदिशंति । अत्र श्रुतिः । एकमेवाऽद्वितीयं ब्रह्म ।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥

इत्यादिश्रुतिविरोधात् । देव ! त्रिगुणमयः पुमानिति कृत्वा भेद व्यवहारोऽज्ञानकृत एव । तथा ये कर्मफलव्यवहारं सत्यं स्मरंति "अक्षय्यं ह वै चातुर्मास्य याजिनः सुकृतं भवतीति तदपि ते आरुषितैरेव वदंति ।" यथेह कर्मचितो लोकः क्षीयते एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयत इत्यादि श्रुतिविरोधात् । एवं प्राणिषु यो भ्रमः संजायते स त्वयि न संभवति । यतस्त्वं मायातः परः ज्ञानस्वरूपश्चाऽसि । नहि सूर्ये कदाऽपि तमस्तिष्ठतीति । अत्र श्रुति वाक्यं । **"आदित्यवर्णं तमसः परस्तात्"**

इति । हे देव ! स्तम्बादारभ्य प्रजापति पर्यंतं सर्वमसत् । त्रिगुणात्मकं प्रकृतिकार्यत्वात् । जडमनित्यं तुच्छमपि मनः चैतन्यरूपात्मवद् विभाति । अतो मनोभेदादेव तदध्यासेनात्मभेदव्यवहारो न वस्तुत आत्मनि भेदोऽस्तीति । सर्वाधारस्य चैतन्यरूपस्य तव सन्निधानात् तस्य दर्पणवत् स्वच्छत्वेन चैतन्यग्रहणयोग्यत्वाच्च तथा भातीति भावः । सर्वं खल्विदं ब्रह्मेति श्रुत्यनुगुणविद्वदनुभवात्तु कस्याऽपि केनाऽपि भेदोनाऽस्ति । आत्मभेदस्तु दूरापास्तः । आत्मज्ञानिनस्त्वशेषविश्वमिदं सदिति जानंति । आत्मोपादानकत्वात् । अत्र दृष्टान्तः । यथा जनाः कनकस्य विकृतिं कटककुंडलादि नहि त्यजंति किन्तु तदात्मतया कनकरूपत्वेनैव स्वीकुर्वंति तथा स्वेनोपादानभूतेन कृतं तदनु प्रविष्टं पुरुषरूपं च सर्वमिदं भोग्यभोगात्मकं आत्मतयाऽवसितं विद्वद्भिरिति सारांशः । हे प्रभो ! ये जनाः सर्वत्र त्वद्दृष्ट्या त्वां परिचरंति ते तिरस्कृत्य मृत्युं तन्मूर्ध्नि पदं निदधति । त्वयि कृतसौहृदाः स्वयमकल्मषा भूत्वा भक्तिमार्गोपदेशेन प्रतिबंधकपापं निराकृत्य परानपि मुक्तियोग्यान् कुर्वन्ति । ये च तद्विमुखास्ते यदाऽऽत्मानमपि न पुनंति तदा तेऽन्यांस्तु कथं पुनीयुः । किं बहूक्त्या त्वद्भजनविमुखांस्तान् विबुधानपि वेदरूपया वाचा पशूनिव तत्तत् कर्माधिकारित्वेन बध्नासि । अत्र श्रुतिः—

तस्य वाक्तंतिर्नामानि दामानि तदस्येदं वाचा तंत्यानामभि-

दामभिः सर्वं सितमिति । सर्वेश्वर ! विश्वसृजो ब्रह्मादयो लोकपाला महेन्द्रादयो देवा अपि तव पूजां कुर्वंति । तथा ये त्वया यस्मिन् कर्मणि नियुक्ताः ते चकिताः संतः तत्कार्यं निर्वहंति । अत्र श्रुतिः ।

भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचमः ॥

यथा प्रजाभिर्दत्तं बलिं माण्डलिका गृहीत्वा ते सम्राजे निवेदयंति । एवमिन्द्राद्या देवा अपि यजमानद्वारा दत्तं हविः स्वयं नीत्वा तुभ्यं समर्पयंति । यद्यपि भवान् मनोबुद्धीन्द्रियादिभिः करणैः सर्वथा रहितोऽस्ति तथाऽपि वाह्याऽभ्यंतरकरणशक्तिभिः सर्वदैव सम्पन्नोऽस्ति । भवान् स्वतः सिद्धः स्वयं ज्ञानवान् स्वयं प्रकाशश्चाऽस्ति । अतः किमपि कर्मकर्तुं इन्द्रियाधीनो न भवति । अत्र श्रुतिः ।

न तस्य कार्यं करणं च विद्यते न तत्समश्चाऽप्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥

त्वद्भजनमंतरेण मायानिवृत्तेरशक्यत्वात् तन्निवृत्त्यर्थं विवेकिनः त्वद् भजनं कुर्वन्ति । हे भगवन् ! यदा सृष्टिसमये परमेश्वरस्य तव मायया सह विहारेच्छा भवति तदाऽवेक्षणमात्रेण विचित्र कर्मयुक्तैर्लिङ्गशरीरैः स्थावरजंगम शरीरविशिष्टाः प्राणिनः

संजायन्ते। परमकारुणिकस्य तव कश्चित् स्वीयः परो वा नाऽस्ति। येन विषमासृष्टिः स्यात्। आकाशवद् व्यापकस्य शून्यतुलां दधतश्च तव सर्वथा व्याप्यदोषा न लगंति। अत्र श्रुतिः।

"यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति एवमेवाऽस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंति।"

हे परमेश्वर! त्वं नित्य एकरसश्चाऽसि। यदि जीवा असंख्या नित्या व्यापकाश्चस्युस्तदा तेऽपि भवत्साम्यमेव समेष्यंति। ततो न ते शासनं मंस्यंते न च त्वं शास्तैव भवितुमर्हसि। श्रूयते चाऽन्तः प्रविष्टः शास्ता जनानाम्। नियंत्रणं तेषां तदैव त्वं कर्तुं शक्नोषि। यदा ते त्वत्तः समुत्पन्नाः त्वत्तश्च न्यूना भवेयुः। तेषां जीवानामेकता विभिन्नता वा त्वत्त एव जाताऽत्र संदेहो नाऽस्ति। अतएव तेषु कारणरूपेण स्थितोऽपि त्वं तेषां नियंताऽसि। यद्यपि त्वं तत्र समत्वेन स्थितोऽसि। तथाऽपि तव याथार्थ्यं न कोऽपि वेद। ये लोकाः कथयंति यद् वयं सर्वं रहस्यं विद्मः। वस्तुतः ते न जानंति। अत्र श्रुतिः।

यस्याऽमतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम्॥ त० उ०॥

किं बहुना। जनानां त्वमगोचरोऽसि। विभिन्नमतित्वाद् वस्तु-ज्ञानेऽपि विभिन्नता उत्पद्यते। अत एकस्याऽन्येन सह मतविरोधः

स्वतः सिद्ध एव। वस्तुतो भवतः स्वरूपं समस्तमतेभ्यः परमस्ति। हे प्रभो! श्रुत्याऽजत्व प्रतिपादनात् उभयोः प्रकृति-पुरुषयोरुत्पत्तिर्न घटते। न हि प्रकृतेर्जीवरूपेणोत्पत्तिः संभवति जीवानां जडत्वापत्तेः। न च पुरुषस्य जीवरूपेणोद्भवः संभवति पुरुषस्य विकारित्वप्रसंगात्। अत उभय योगेन प्राणाद्युपाधयो जीवा जायंते। अत्र दृष्टांतः। यथा बुद्बुदा न केवलेन वायुना न केवलेन जलेन वा भवंति। किन्तु ताभ्यां मिलित्वा तद्वदित्यर्थः। तत्र यथा वायुर्निमित्तं जलमुपादानम्। एवमत्राऽपि प्रकृतिर्निमित्तं पुरुष उपादानम्। यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति एवमेवात्मनः सर्वे प्राणादयो व्युच्चरंति। अस्य चेतनाऽचेतनप्रपंचस्य परमात्मोपादानत्व श्रवणात्। उपादानत्वादेव नानाप्रकारेन्द्रियांतःकरणाद्युपाधिभिः सह ते त्वत्त उत्पन्ना जीवाः परमकारुणिके त्वयि लीना बभूवुः। अत्र दृष्टान्तद्वयमाहुः। तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा इव लीयंते। यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यंते। एवं स्वापादौ विशेषमात्रलयान् कारणस्य विद्यमानत्वात् सामान्यतो वर्तन्त एव। अत्र श्रुतिः—

यथा सौम्य! मधु मधुकृतोनिस्तिष्ठंति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां गमयंति ते यथा न विवेकं लभंते अमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः सर्वाः प्रजाः सति-

संपद्य न विदुः सति संपद्यामह इति । तथा मुक्तौ तु सर्वोपाधेर्लयात् अर्णवे सरित इव लीयंते । अत्र श्रुतिः—

"यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥"

दयासागर ! विद्वांसोऽमी पुजीवेषु तव मायया देहाद्यात्माभिमानलक्षणं दुस्तरं भ्रमं ज्ञात्वा प्रतिक्षणं वर्धमानं श्रवणकीर्तनादिना मायानियंतरि त्वयि मनोवृत्तिं विदधति । भवद्विमुखेषु ऋतुत्रयात्मकोऽयं कालो भ्रूभंगरूपं जन्ममरणादिलक्षणं भयं सृजति । किंच भवच्छरणमुपेयुषां संसारभयं कथं स्यात् ? अर्थात् कदाऽपि न भवति । प्रभो ! इदं मनो जितेन्द्रियैरप्यदांतं तुरग इवादम्यं च वर्तते । गुरुचरणसेवां विना ये तद्वशीकर्तुं प्रयतंते तेऽवश्यं खिद्यंते । अत्र दृष्टान्तः । यथाऽकर्णधारा वणिजो जलधौ निमज्जंति तथा ते बहुदुःखदुःखिताः संत इह संसारसमुद्रे विषीदंति पुनः पुनः । अत्र श्रुतिः—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नाऽस्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाऽभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥

लोकेऽपि गुरुलक्षणं प्रोक्तं विद्वद्भिः—

प्राकृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा ।
देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः ॥

ईदृशस्य गुरोराज्ञापालनेन स्वत एव मनो निश्चलं भवति ।

हे भगवन् ! त्वमखण्डानंदस्वरूपः शरणागतवत्सलश्चाऽसि । भवति विद्यमाने सति स्वजनसुतात्मदारधनधामधरासुरथादिभिः किम् ? अत्र श्रुतिः—

"एतस्यैवानंदस्याऽन्यानि भूतानि मात्रामुपजीवंति" ।

किं च ये जना इमं सत्यसिद्धान्तं विस्मृत्य दांपत्यभोगयोग्यसुखेष्वेव रमंते । तेषां तृप्तयेऽत्र कः शाश्वतः पदार्थोऽस्ति ? एतानि विषयसुखानि तु सर्वाणि नश्वराण्येव भणितानि किं बहूक्त्या । तानि स्वरूपतः सारहीनानि सत्तारहितानि च संति । अतः स्वर्गाऽपवर्गसुखेच्छुभिः स्वजनादीनुपेक्ष्य त्वद्भजनमेव सर्वदा कर्त्तव्यम् ? हे करुणानिधान ! दूरदर्शिनो ये महर्षयः संति ते नित्यानंदे आत्मारामे च त्वयि सकृदपि मनो निधाय पुरुषसारं विवेकधैर्यक्षमाशांतिप्रमुखं न किमपि गणयंति । तथा गृहानपि नोपासते । किन्तु पृथिव्यां यानि बहुपुण्यावहानि तीर्थानि देवमंदिराणि हरिजनसदनानि च विद्यंते तानि सेवंते । तत्रैव स्थित्वा च हरिस्मरणं कुर्वंति । भवत्पदांबुजं हृदि निधाय शुद्धान्तःकरणाः निरहंकाराः पवित्रपादपद्मसलिलाश्च भगवत् प्रेरणयैव तीर्थसेवनं कुर्वंति । किं बहूक्त्या तीर्थं तु तान्पुनाति ये हरिभक्तिप्रसारणेन तीर्थाभिधानं सार्थकं कुर्वन्ति । अत्र स्मृतिः—

अत्रैव गंगा यमुना त्रिवेणी गोदावरी सिन्धु सरस्वती च ।
सर्वाणि तीर्थानि वसंति तत्र यत्राऽच्युतोदारकथाप्रसंगः ॥

हे नाथ ! यथा मृत्तिकया निर्मितो घटो मृन्मय एव भवति तथा मत्सकाशादुत्पन्नं जगदपि मदेवाऽस्ति । एतदनुमानं तर्केण बाध्यते । मतउत्पन्नमपि क्वचिन्मिथ्या भवति । यतः कारणकार्ययोः निर्देश एव तयोर्भेदद्योतकोऽस्ति । यद्येवं भेद निषेधार्थमेव कथ्यते तदा तु पितृपुत्रयोर्दंडघटनाशयोः सत्यपि कार्यकारणभावे एकस्माद् द्वितीयो भिन्न एव । एवं सर्वत्रैव कार्यकारणयोरेकता सदृशी नाऽवलोक्यते । यदि कारणशब्देन निमित्तकारणमगृहीत्वा केवलोपादानकारणस्यैव ग्रहणं भवेत् । यथा कुण्डलस्य सुवर्णं तथाऽपि क्वचित् क्वचित् कार्यस्याऽसत्यतैव सिद्धा भवति । यथा रज्जौ सर्पः । अत्रोपादानकारणे सत्येऽपि तत्कार्यं सर्पः सर्वथैव मिथ्याऽस्ति । यद्येवं कथ्यते यत् प्रतीतिमापन्नस्य सर्पस्य केवला रज्जुरुपादानकारणं नास्ति । तत्राऽविद्याया भ्रमस्याऽपि च संयोगोऽस्ति । तदा त्वेवं ज्ञातव्यम् । यत अविद्यया सद्वस्तुसंयोगेन च जगतोऽस्य उत्पत्तिर्जाता । अतो यथा रज्जौ प्रतीयमानः सर्पो मिथ्या तथा सद्वस्तुनि अविद्यासंयोगेन प्रतीतं इदं नामरूपात्मकं जगदपि मिथ्याऽस्ति । यदि व्यवहारसिद्ध्यर्थमेव जगतः सत्ताऽभीष्टा स्यात् । तर्हि नाऽस्त्यत्र काचिदनिष्टापत्तिः । यदत्र पारमार्थिकसत्यमगणयित्वा केवलं व्यावहारिकं सत्यं स्वीक्रियते । भ्रमोऽयं व्यावहारिके जगति अंगीकृतकालदृष्ट्या अनादिरस्ति । अविवेकिनो भ्रमेण प्रेरिताः

अंधपरंपरया एनं मन्यंते। एतादृश्यामवस्थायां कर्मकाण्डप्रतिपादिकाः श्रुतयः तानेव भ्रमे पातयंति ये कर्मजडाः संति। श्रुतीनां तात्पर्यं तत्र कर्मफलस्य नित्यताद्योतनाय नाऽस्ति। प्रत्युत् प्रशंसया तेषु कर्मसु नियोजनायाऽस्ति। प्रभो! जगदिदं उत्पत्तेः प्राङ् नासीत्। प्रलयान्ते च न स्थास्यति। अनेन ज्ञायते यदिदं मध्यभागे त्वदात्मके जीवात्मनि यथा शुक्तिकायां रजतम् तथा सर्वमिदं श्रुत्या ब्रह्मविद्भिश्च निर्णीतम्, मिथ्यैव भाति। अतएव वयं श्रुतयः जगद्वर्णनमेवं कुर्मः। यथा मृत्तिकायां घटः लोहे शस्त्रं सुवर्णे च कुंडलादीनि नाममात्रेण संति। वस्तुतो मृत्तिका लोहः सुवर्ण एव चाऽस्ति। एवं परमात्मनि वर्णितं जगन्नाममात्रमस्ति। सर्वथैव मिथ्या तथा मनसः कल्पनैव विद्यते। अविवेकिन एव संसारं सत्यं गणयंति न च विवेकिनः। प्रभो! यदा जीवो मायामोहितो भूत्वा अविद्यां गृह्णाति तदा तस्य स्वस्वरूपाद्या आनंदादिगुणा आवृता भवंति। सोऽथ गुणजन्यवृत्तिषु इन्द्रियेषु देहेषु च लिप्तो भवति। ततस्तान् स्वकीयान् मन्यमानो दत्तचित्तेन परिचरति। तेषां च जन्ममृत्युजराव्याधीन् स्वकीयानेव मत्वा महामोहचक्रे च पतित्वा परिभ्राम्यति। परंतु हे देव! यथा सर्पः कंचुकेन सह संबंधं न रक्षति प्रत्युत त्यजति। तथा त्वमपि मायया सह संबंधं न रक्षसि। अतएव षडैश्वर्याणि सदा भवंतं सेवंते। अणिमाद्यष्टसिद्धिषु नवनिधिषु च भवतां

निवासः । भवतामैश्वर्यमपरिमितं, धर्मोऽसाधारणः, यशोऽनुपमं, श्रीरलौकिका, ज्ञानं सर्वतोमुखं, वैराग्यं चाद्भुतमस्ति । स्वामिन् ! योगारूढोऽपि जनो यदि हृदयस्थं विषयवासनावर्गं नोन्मूलयति । सोऽसावधानो हृदयस्थमपि भवंतं नाऽधिगच्छति । प्रमादाद् यथा मणिग्रीवो मणिं अन्विष्यति तथा सोऽविवेकी वर्तते । ये साधकाः सदा इन्द्रियाणि तर्पयितुं लग्नाः संति । विषयेभ्यश्च विरक्ता न भवंति ते यावज्जीवं मरणाऽनंतरं च दुःखान्येव भोक्ष्यंति । ईदृशा दंभिनः लोकानुरंजनाय धनार्जनाय च क्लिश्यंते । ततस्ते उभयलोकभ्रष्टाः स्वजीवनांते पश्चात्तापातिरिक्तं किमपि फलं नाऽप्नुवंति । प्रभो ! भवतो यथार्थस्वरूपज्ञाता जनः भवता दत्तं पुण्यपापकर्मणोः फलं सुखदुःखात्मकं न जानाति । न च भुनक्ति । किन्तु स भोक्तृभोग्यभावत उपरि तिष्ठति । ततो विधि-निषेधपराणि शास्त्राण्यपि निवृत्तानि भवंति । यतस्तानि देहाभि-मानिभ्य एव संति । ये भवत् स्वरूपं न जानंति तेऽपि यदि प्रतिदिनं प्राचीनानां नवीनानां वा लीलागुणगानं श्रुत्वा तद्द्वारा भवंतं हृदये स्थापयंति । हेऽचिन्त्यशक्ते ! त्वमेव मोक्षप्रदाताऽसि । नाथ ! ज्ञानिनो भक्तांश्च विहाय सर्वेऽप्यन्ये शास्त्रीयबंधनैर्बद्धाः संति । तान्युल्लंघ्य च दुःखान्येव प्राप्नुवंति । देव ! भवदीयस्य महिम्नः पारं ब्रह्माद्या देवगणा इन्द्राद्या लोकपालाश्चाऽपि प्राप्तुं समर्था न भवंति । किं बहूक्त्या भवदीयस्य वर्णनाऽतीतस्य

विभवस्याऽन्तं यदा भवानपि स्वयं नाऽधिगच्छति तदाऽनंतस्याऽन्तं कोऽन्यः प्राप्नुयात् ? यथाऽऽकाशे वायुना प्रक्षिप्ताः सूक्ष्मा रेणुकणा इतस्तत उड्डीयंते तथा भवति कालवेगेन प्रेरिताः सप्ताऽऽवरणैः समेताः क्रमशो दशगुणा अनेके ब्रह्माण्डाः सततं परिभ्राम्यंति । तव विभूतीनामंतो नाऽस्ति । वयं श्रुत्यभिमानिन्यो देवता अपि भवतो यथार्थवर्णनं कर्तुमसमर्थाः । भवतोऽतिरिक्त वस्तूनि वर्णयंत्यो वयमन्ते स्वकीयं निषेधमपि कर्तुं लगामः । ततो भवत्येव स्वसत्तां समर्प्य सफला भवामः । तच्छ्रुत्वा हृष्टरोमा उग्रसेन उवाच । मुनिवर्य ! कृतार्थोऽस्मि भवदुपदेशात् । ततः स प्राप्तवैराग्यो राज्यादिव्यवस्थां कृत्वा वनं जगाम । तत्र सर्वसंगाविनिर्मुक्तो भगवति वासुदेवे दृढां धारणां निधाय परमसुखं लेभे । सोथ समाधिद्वारा नश्वरं देहं त्यक्त्वा परमात्मनि लीनो बभूव । दर्शकाः पुष्पवृष्टिं चक्रुः । ततो यादवा राजाधिराज्यस्य विधिनाऽन्त्येष्टि क्रियां चक्रुः । पवनरेखा च तमनुससार ।

इति श्रीकृष्णचरिते उग्रसेनपिप्पलादसंवादो नाम
द्वाविंशत्युत्तरशततमः स्तवकः ॥ १२२ ॥

उपनयतु मंगलं नः सकलमंगलालयः श्रीमान् ।
दिनकरकिरणविबोधितनवनलिननिभेक्षणः कृष्णः ॥

अथैकदा श्रीकृष्णदर्शनलालसो देवर्षिर्नारदो यदुराजसभामाययौ ।

तमालोक्य वसुदेवपुरस्सरा यादवाः समुत्थाय विधिवत्तं संपूज्य च दिव्यासने समुपवेशयामासुः । अथाऽऽनकदुंदुभिरुवाच । ब्रह्मर्षे ! मेऽद्यजीवनं सर्वथैव सफलं जातम्—

समस्तसंपत् समवाप्तिहेतवः, समुत्थितापत् कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः, पुनन्तु मां ब्राह्मणपादरेणवः ॥

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः ।
तत्राऽपि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥

तच्छ्रुत्वाऽतिसंतुष्टो मुनिवरोऽब्रवीत् । शौरे ! सत्यमुक्तं भवता ।

तपंतु तापैः प्रपतंतु पर्वतादटंतु तीर्थानि पठंतु चाऽऽगमान् ।
यजंतु यागैर्विवदंतु वादैर्हरिं विना नैव मृतिं तरंति ॥

वसुदेवः—सत्यम् दयानिधे ! पुरात्वहं प्रजाकामनया भगवन्तमादिपुरुषमपूजयम् । सम्प्रति कृतकृत्योऽहं ब्रह्मज्ञानविषयिणीं चर्चां कर्तुमिच्छामि । कृपयोपदेशं दत्त्वा ममाऽभिलाषं पूरय ? ततो ऋषिवरोऽब्रवीत् । महानुभाव ! ब्राह्मणानां जन्म तु प्राणिनामुपकारं कर्तुमेव भवति । नाऽन्यस्मै प्रयोजनाय ।

ब्राह्मणस्य च देहोऽयं क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चैव प्रेत्यानंतसुखाय च ॥

वसुदेवः—प्रभो ! तत्रादौ प्रणवमहिमानं वद ?

नारदः—ओमिति ब्रह्म । ओमितीदꣳ सर्वम् । ओमित्ये-

तदनुकृति हस्म वा । अध्यो श्रावयेत्याश्रावयंति । ओमिति सामानि गायंति । ओं॑ शोमिति शास्त्राणि श॑ंसंति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रस्तौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति । प्रजापतिर्लोकानभ्यतपत् । तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत् तामभ्यतपत् तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवंत भूर्भुवः स्वरिति । तान्यभ्यतपत् तेभ्योऽभितप्तेभ्यओङ्कारः संप्रास्रवत् तद्यथा शंकुना सर्वाणि पर्णानि संतृणान्येवमोंकारेण सर्वावाक् संतृणा ओङ्कार एवेद॑ं सर्वम् ओंकार एवेद॑ं सर्वमिति । तै० उ० ॥

वसु०—देव ! सृष्टिः कथमुत्पन्ना कृपया कथय ?

नार०—शौरे ! समाकर्णय संक्षेपतः ।

तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम् ।
तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त्तप॑स॒स्तन्म॑हि॒ना जा॑यतैक॑म् ॥

ऋ० मं० १० सू० १२९ मं० ३ ॥

भाष्यम्—तम आसीत् । अंधेनैव तमसा गूढम् निगूढं अविशिष्टं अप्रकेतं अप्रज्ञातं अग्रे प्राक् सृष्टेरित्यर्थः । तदा हि न द्रष्टा न दर्शनम् नाऽपि दृश्योऽयं आसीदित्यभिप्रायः । सांख्यास्तु तमः शब्देन प्रधानसाम्यापन्नं गुणत्रयमुच्यमानमिच्छंति । ते हि

परमार्षं सूत्रमधीयते । "तम एव खल्विदमग्रे आसीत् ।"

तस्मिंस्तमसि क्षेत्रज्ञ एव प्रथमोऽध्यवर्तत इति । सलिलं सद्भावे लीनं सर्वमिदं जगत् सन्मात्रस्यैव भावस्योपरि लीनमासीत् । तुच्छ्येन तुच्छेन सूक्ष्मीभूतेन पटमण्डपस्थानीयेन कर्मणा यत् अपिहितं इदमेव जगत् आसीत् । सर्वकालापेक्षितमनादिमत्त्वात् संसारस्य । तपसः तस्यैव कर्मणा महिना महिम्ना माहाभाग्येन कारणावस्थायाम् एकं अपि सत् अनेकधा उपस्थिते सर्गकाले प्रतिनियतकर्मभोगार्थम् अजायत इति । दु० नि० भा० ॥

"असद्वाइदमग्र आसीत् । ततो वै सदजायत । तथा च । सदेव सौम्येदमग्र आसीत् । सन्मूलाः सौम्येमाः सर्वाः प्रजाः । सदायतनाः सत्प्रतिष्ठा इति । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नाद्रेतः । रेतसः पुरुषः" ॥ बृ० उ० तै० उ० ॥

वसुदेवः—महर्षे ! ततः किम् कथय कृपया ?

नारदः—आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषत् । स ईक्षत लोकान्नु सृजा इति । स इमांल्लोकानसृजत् ।

वसु०—अथ किम् महर्षे ! कृपया सम्यक् समाचक्ष्व ?

नारदः---"स वै नैव रेमे । तस्मादेकाकी न रमते । स द्वितीयमैच्छत् । स हैतानास । यथा स्त्रीपुमांसौ संपरिष्वक्तौ । स इममेवात्मानं द्वेधाऽपातयत् । ततः पतिः पत्नीचाऽभवताम् । सोऽकामयत । बहुस्यां प्रजायेयेति । सोऽतप्यत (यस्य ज्ञानमयं तपः) स तपस्तप्त्वा इदꣳ सर्वमसृजत् । यदिदं किंच । तत् सृष्ट्वा तदेवाऽनु प्राविशत्" ॥ तै० उ० ॥

यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति । एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंति ।

वसुदेवः---देव ! धर्मलक्षणं समाचक्ष्व कृपां कृत्वा ?

नारदः---शौरे ! 'यतोऽभ्युदयोऽत्र निःश्रेयससिद्धिश्च परत्र लभ्यते स एव धर्मः' ॥ वै० द० छा० ॥

वसुदेवः---देव ! धर्मकल्पवृक्षस्य कतिस्कन्धाः कथय ?

नारदः---शौरे ! त्रयो धर्मस्कन्धाः । यज्ञोऽध्ययनं दानमिति ॥ छा० उ० ॥

वसुदेवः---देव ! यज्ञः कतिविधः कृपया समाचक्ष्व ?

नारदः---शौरे ! दर्शपौर्णमासज्योतिष्टोमचातुर्मास्यराजसूयाश्वमेधादिभेदाद्बहुविधः । अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येव यो ज्ञाता तं विंदतेऽथ यदिष्टमित्याचक्षते ।

ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविन्दते। अथ यत् सत्रा-यणमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येणह्येव सत् आत्मनस्त्राणं विंदतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येवात्मा-नमनुविद्य मनुते। अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणाऽनुविंदतेऽथ यदरण्यायन-मित्याचक्षते ब्रह्मचर्यमेव तदरश्चह वैण्यश्चार्णवौ ब्रह्मलोके तृतीय-स्यामितो दिवि तदैरं मदीयꣳ सरस्तदश्वत्थसोमसवनस्तदपराजिता पूर्वब्रह्मणः प्रभुविमितꣳ हिरण्यमयम्। तद्य एवेतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविंदंति तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ छा० उ० ॥

वसुदेवः—देव! अनुग्रहं कृत्वा यज्ञफलं प्रतिपादय?

नारदः—शौरे! "स्वर्गकामो यजेत्" इति श्रुतेः।

एह्येहि तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहंति।
प्रियं वाचमभिवदंत्योऽर्चयंत्यः एष वः पुण्यः सुकृतो ब्रह्मलोकः॥

स य इदमविद्वान् अग्निहोत्रं जुहोति यथांगारानपोह्य भस्मनि जुहुयात् तादृक् तत् स्यात्।

वसुदेवः—देव! किमध्ययनं कर्तव्यम् कल्याणार्थिना?

नारदः—शौरे! प्रणवादारभ्य सांगोपांगा वेदा अध्येत-व्याः। अथ त्रयो वाव लोकाः। मनुष्यलोकः पितृलोको देव-

लोकश्चेति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नाऽन्येन कर्मणा कर्मणापितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठः तस्माद्विद्यां प्रशंसंति ।

वसुदेवः––देव ! दानं किं तथा कति विधश्च तत् ?

नारदः––शौरे ! बहुविधानि दानानि । तेष्वष्टौ प्रधानानि । तत्रादावन्नदानम् । जलदानम् । औषधिदानम् । विद्यादानम् । कन्यादानम् । गोदानम् । पृथ्वीदानम् । अभयदानंचेति ।

वसुदेवः––धर्मज्ञानं कथं जायते कृपया समाचक्ष्व ?

नारदः––वेदवाक्येभ्यः, अत्र राजर्षिः मनुः––

वेदप्रणिहितो धर्मः अधर्मस्तद्विपर्ययः ।

वसुदेवः––कोऽस्ति वेदकर्ताः देव ! कृपया कथय ?

नारदः––साक्षात्परमपूरुषः यस्य निःश्वसितं वेदा इति ।

वसुदेवः––किं प्रमाणम् ? इति बहुधा लोकाः पृच्छंति ।

नारदः––श्रुतिवाक्यम् स्वतः प्रमाणम् । यथा हि––

यो ब्राह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तꣳहदेवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ श्वे० ॥

न कश्चिद्वेदकर्तास्ति वेदस्मर्ता स्वयंभुवः ।
वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम ॥ म० स्मृ० ॥

अरेऽस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसइतिहासपुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि । तथा च अग्नेः (शिवात्) ऋग्वेदः । वायोः (ब्रह्मणः) यजुर्वेदः । आदित्यान (विष्णोः) सामवेद इति । ३० ॥

वसुदेवः——देव ! वेदज्ञानदानविषये पात्राऽपात्रविचारः कर्तव्यो न वा ? कृपया निवारय संदेहम् ।

नारदः——विद्या सुपात्राय दीयते किन्तु न कुपात्राय । अत्र श्रुतिः ।

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवेऽयताय मा ब्रूया वीर्यवती तथा स्याम् ॥

भाष्यम्——विद्या ह वै ब्राह्मणमाजगाम । विद्या किल कामरूपिणी भूत्वा विद्याऽधिदेवता वै संयतात्मानं विदितवेदांगवेदार्थं कश्चिदाजगाम । तमेत्य प्रह्वीभूत्वोवाच । किम् इति । गोपाय मा रक्ष माम् । ते अहं गुप्ता सती शेवधिः भविष्यामि । सुखनिधानमित्यर्थः । आह कुतः पुनस्त्वां रक्षामि । उच्यते । असूयकः पराऽपवादशीलः । अनृजुः यस्य मनोवाग्देहेषु असमाः प्रवृत्तयः । अयतः विप्रकीर्णेन्द्रियः यत्किंचनकारी अशुचिः एवं लक्षणाय न मा ब्रूयाः । त्वम् । किं तया भविष्यति । तथा वीर्यवती अहं तव स्याम भविष्यामि । नि० दु० भा० ॥

वसुदेवः—देव ! गुरुर्महिमानं कृपया श्रावय ?

नारदः—शौरे ! शृणु सावधानतया ;

य आवृणोत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाहतं ॥

भाष्यम्—य आवृणात्त्यवितथेन कर्णौ । य आवृणात्ति आभिनात्ति अपिहिताविव सन्तौ कर्णौ । विवृणोति । अवितथेन सत्येन ब्रह्मणा कथं पुनरावृणात्ति अदुःखंकुर्वन्नमृतं संप्रयच्छन् येहि किंचिदावृणात्ति न दुःखयति अथ पुनः सुखमुत्पादयति । किंच अमृतत्त्वप्राप्तिहेतु ज्ञानं संप्रयच्छन् आह । य आवृणात्ति तस्मै किम् इति । उच्यते तं मन्येत पितरं मातरं च नेतरौ मातापितरावित्यभिप्रायः । उक्तं च मनुना—

उत्पादकब्रह्मदात्रोर्गरीयान् मंत्रदः पिता ।
ब्रह्म जन्महि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥

तस्मै मातापितृभूताय गुरवे न द्रुह्येत् । कतमच्चनाऽह । कदाचिदपि आपन्नापि कष्टवानित्यभिप्रायः । नि० दु० भा० ॥

वसुदेवः—देव ! गुरुद्रोहिणः का दशा भवति ?

नारदः—शौरे ! स कदाऽपि सुखं न लभते ? अत्र श्रुतिः—

अध्यापिता ये गुरुं नाद्रियंते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥

भाष्यम्——अधुना इतरान् दुष्टशिष्यान् अभिशपंती विद्या इदमाह। "अध्यापिता ये गुरु" नाद्रियंते इत्यादि। अध्यापिताः संतो ये गुरुं प्रति नाद्रियंते नादरं कुर्वंति। के पुनस्ते इति उच्यते। विप्रा मेधाविनः सन्तो गृहीतविद्याः। कथं पुनर्नाद्रियंते? वाचा मनसा कर्मणा वा। आह किं तेषामिति? उच्यते यथैव ते तस्य गुरोः न भोजनीयाः न भोज्याः न भोजनार्हाः तथैव तान् तत् श्रुतम् अपि न भुनक्ति न पालयति श्रुतफलेन न संयुनक्ति इत्यर्थः। तत्रादिगुरुः पिता यो गर्भाधानसंस्कारं करोति। ततः पुरोहितो यो नामकरणादारभ्य श्मशानांतं कार्यं कारयति। किं बहुना द्वादशाहकृत्यं कारयित्वा श्राद्धान्नमपि स्वीकरोति। तत आचार्यो यो यज्ञोपवीतसंस्कारं कारयित्वा गायत्रीमंत्रोपदेशं करोति। पुराऽऽसीच्छात्राणां काशीयात्रा परिपाटी। प्राचीनकाले द्वादश-वर्षपर्यन्तं शास्त्राण्यपाठयन् आचार्याः। ततः शिक्षको य लौकिक विद्यां पाठयति। ततोऽतिथिः गुरुः। ततश्च भक्तिज्ञानयोरुप-देशकः। महामतिश्चाणक्यस्तु गुरुविषये एवमाह।

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्वत्राऽभ्यागतो गुरुः॥

दिनेष्वेतेषु श्रुतिस्मृतिपुराणप्रतिपादितां वर्णाश्रमपद्धतिं परित्यज्य नानागुरवः कपोलकल्पिताः स्वार्थसाधिकाश्च वाणी रचयित्वा परमेश्वरस्थाने स्वचित्रपूजां कारयंति। अतएवोक्तं केनाऽपि विदुषा।

गता गीता भीतिं निगमपदवी दूरमत,
विनष्टाः श्रुत्यर्थाः क्वचिदपि पुराणं न सरति ।
इदानीं रैदासप्रभृतिवचसा मोक्षपदवी,
न जाने को हेतुः शिव! शिव! कलेरेषमाहिमा ॥

शौरे! विद्वन्माहात्म्यं समाकर्णय पुरातनमितिहासम्। "आसी-दार्यावर्ते जानश्रुतिर्नाम राजर्षिः। स पुत्रपौत्रवान् श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवसथान् मापयांचक्रे सर्वत एव मेऽत्स्यन्तीति। अथ ह हꣳसा निशायामतिपेतुस्तद्धैवꣳ हꣳसोहꣳसमभ्युवाद हो हो वि भल्लाक्ष २! जानश्रुतेः पौत्रा-यणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधा-क्षीरिति। तमु ह परः प्रत्युवाच कम्वर एनमेतत्सन्तꣳ सयुग्वा-नमिव रैयिक्वमात्थेति यो नु कथꣳ सयुग्वा रयिक्व इति। यथा कृताय विजितायाधरेया संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किं च प्रजाः साधु कुर्वंति यस्तद्वेद यत् स वेद स मयैतदुक्त इति। जानश्रुतिः पौत्रायण उपशुश्राव। स ह संजिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रयिक्वमात्थेति यो नु कथꣳ सयुग्वा रयिक्व इति। यथा कृताय विजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वंति यस्तद्वेद यत्सवेद स मयैतदुक्त इति। स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय तꣳ होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्छेति। सोऽधस्ताच्छकटस्य

पामानं कर्षमाणमुपोपविवेश । तꣳ हाभ्युवाद त्वं नु भगवः सयुग्वा रयिक्व इत्यहꣳ ह्यरा३ इति ह प्रतिजज्ञे स ह क्षत्ताऽविदमिति प्रत्येयाय । तदुह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे तꣳ हाभ्युवाद । रयिक्वेमानि षट् शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवताꣳ शाधि यां देवतामुपास्स इति । तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र । तवैव सह गोभिरस्त्विति तदुह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे । तꣳ हाभ्युवाद रयिक्वेदꣳ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति । तस्या ह मुखमुपोद् गृह्णन् उवाचाजहारेमाः शूद्र अनेनैव मुखेनालपयिष्यथा इति हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास स तस्मै होवाच । वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाऽप्येति यदा सूर्योऽस्तमेति वायुमेवाऽप्येति यदा चन्द्रोऽस्तमेति वायुमेवाऽप्येति । यदाप उच्छुष्यंति वायुमेवापियंति वायुर्ह्येवैतान् सर्वान् संवृङ्क्त इत्याधिदैवतम् । अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणꣳ श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्त इति । तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥" छां० उ० ॥

वसुदेवः—देव ! विद्याभेदानुपदिश ?

नारदः—शौरे ! द्वे विद्ये वेदितव्ये । अपरा परा च । तत्राऽपरा ऋग्वेदोयजुर्वेदःसामवेदोऽथर्ववेदः । शिक्षा-कल्पो-व्याकरणं-निरुक्तं-छंदो-ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणि-पादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूत योनिं परिपश्यंति धीराः । अत्र श्रुतिः—

"यस्मात्परं नापरमस्ति किंचिन्, यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ मु० उ० ॥"

वसुदेवः—देव ! कृपयाऽन्नमहिमानं श्रावय ।

नारदः—शौरे ! "अन्नाद्वै प्रजाः प्रजायंते । याः काश्च पृथिवीᳪश्रिताः । अथो अन्नेनैव जीवंति । अथैनदपि यंत्यंततः । अन्नᳪ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवंति । येऽन्नं ब्रह्मोपासते । अन्नᳪ हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । अन्नाद् भूतानि जायंते । जातान्यन्नेन वर्धंते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । अन्नं न परिचक्षीत । तद् व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादः । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतद-

ममन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या । अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः ।"

वसुदेवः—देव ! भोजनविषये पात्राऽपात्र विचारः कर्तव्यो न वा ?

नारदः—शौरे ! अवश्यमेव कर्तव्यः । "अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो भागस्तत्पुरीषं भवति । यो मध्यमस्तन्मांऽसं योऽणिष्ठस्तन्मनः । आपः पीतास्त्रेधा विधीयते तासां यः स्थविष्ठो भागस्तन्मूत्रं भवति । यो मध्यमस्तल्लोहितं, योऽणिष्ठः, स प्राणः । तेजोऽशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तदस्थि भवति । यो मध्यमः स मज्जा, योऽणिष्ठः सावाक् । अन्नमयऽंहि सौम्य मनः आपोमयः प्राणः तेजोमयी वागिति ॥" छां० उ० ॥

वसुदेवः—देव ! एकादशीव्रतविषये को विचारो भवतः ?

नारदः—शौरे ! "पंचज्ञानेन्द्रियाणि पंचकर्मेन्द्रियाणि एकादशं मनः एतानि यदा विजित्य व्रतं क्रियते तदा एकादशीव्रतं भवति । अस्यां तिथौ कृष्णपक्षे एकादशकलाक्षीणो भवति चन्द्रमाः शुक्लपक्षे च एकादशकलापूर्णो भवति सुधांशुः । अतः एकादशीव्रतकर्ता क्षयरोगेण न पीड्यते । अत्र विधिः । एका-

दर्शीव्रतकर्ता उपोषितः सदैव संवत्सरं न निन्देदितिव्रतं धृत्वा चैत्रे सुपात्राय केसरं दद्यात् । कदाऽपि नाऽग्निं निन्देदितिव्रतं धृत्वा जलदानं वैशाखे कुर्यात् । ज्येष्ठे तपन्तमादित्यं सर्वथा न निन्देदितिव्रतं कृत्वाऽन्नदानं कुर्यात् । आषाढे ऋतुं सर्वथा न निन्देदितिव्रतं कृत्वा वस्त्रदानं कुर्यात् । श्रावणे वर्षन्तं मेघं नहि कदाऽपि निन्देदितिव्रतं कृत्वा पात्रदानं कुर्यात् । भाद्रपदमासे सौदामिनीं न कदाऽपि निन्देदितिव्रतं धृत्वा वेदादिसद्ग्रंथदानं कुर्यात् । आश्विनेऽन्नं न कदाऽपि निन्देदिति नियमं कृत्वौषधि-दानं कुर्यात् । कार्तिके देवद्विजगुरुवेदान्न कदाऽपि निन्देदिति प्रतिज्ञां कृत्वा ब्राह्मणान् भोजयेत् गोदानं च कुर्यात् । मार्गशीर्षे सर्वथा ऋतून्न निन्देदितिव्रतं धृत्वा साधूनभ्यागतांश्च भोजयेत् । पौषे वायुं न कदाऽपि निन्देदितिव्रतं धृत्वा कम्बलदानं कुर्यात् । माघे जलनिन्दा सर्वथैव त्याज्येति नियमं कृत्वा तिलतैलदानं च कुर्यात् । फाल्गुने लोकान्पशूंश्च न निन्देदितिव्रतं धृत्वा घृतदानं च कुर्यात् । एवं व्रतकर्ता यथावत् फलं लभते ।"

वसुदेवः—देवर्षे ! कृपया सांख्यतत्त्वमुपदिश ?

नारदः—शौरे ! आदौ भेदशून्यं ज्ञानमेवाऽऽसीत् । ततो वाङ्मनसोरविषयं एकं सत्यं ब्रह्म मायाया "अहं बहुस्यामिति" संकल्पस्य फलरूपेण द्विधा समभवत् । अथ तयोर्द्विधा भूतयोरं-शयोर्मध्ये एकतरः पदार्थः (जातः) कार्यकारणरूपिणी प्रसिद्धा

सा प्रकृतिरभिधीयते ; यस्त्वन्यतमो भावो ज्ञानं चैतन्यरूपः स पुरुषोऽभिधीयते । अथ पुरुषप्रेरितेन कालरूपेण क्षोभ्यमानायाः प्रकृतेः सकाशात् सत्त्वरजस्तमः संज्ञका गुणा अभूवन् । तेभ्यो गुणेभ्यः क्रियाशक्तिमत् सूत्रमभवत् । तेन सूत्रेण संयुतो ज्ञानशक्तिमान् महानभवत् । एकमेव तत्त्वं क्रिया ज्ञान-शक्तिभ्यां द्विधोच्यते नतु तत्त्वद्वयमिति तात्पर्यम् । विकुर्वतस्ततो महतो यो विमोहनो जीवस्य देहाद्यध्यासरूप भ्रमहेतुरहंकारः संजातः । सच सात्विकराजसतामसभेदेन त्रिविधोऽभवत् । तन्मात्रादीनां कारणम्, मनः शब्द उपलक्षणं देवानां सच चिदचिन्मयः । स्वतो जडोऽपि चिदाभासाग्राहकत्वादुभय ग्रंथि रूप इत्यर्थः । तामसात् तन्मात्रिकात् पंचमहाभूतरूपो बभूव । राजसाद्दशेन्द्रियाण्यभूवन । सात्विकाद्देवतादश बभूवुः । एकादशं मनश्चन्द्रश्च बभूव । ततो महदादयो मिलित्वा क्रीडास्थानमण्ड-मुत्पादयामासुः । सलिलस्थितात् लोककारणभूतं पद्ममभूत् । ततो ब्रह्मानारायणो बभूव । सच वेदांल्लोकांश्च रचयामास । योगादिसाधका दिव्यलोकानवाप्नुवंति । हरिभक्तो वैकुण्ठं याति । जीवात्माऽत्र कर्मणोत्तमागतीः प्राप्नोति । कर्मणैव च स्थावरत्व-मेति । किं बहुना ।

अणुर्बृहत् कृशः स्थूलो यो यो भावः प्रसिद्ध्यति ।
सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥

शौरे ! ज्ञानविज्ञानसंभवमिमं देहं लब्ध्वा यो भक्तियोगेन भगवन्तं यजते । स जीवात्माऽत्र प्रकृतिपुरुषविवेकेन ज्ञानमवाप्य जीवन्मुक्तो भूत्वाचाऽन्ते परमपदं लभते ।

इति श्रीकृष्णचरिते सांख्यतत्त्वनिरूपणं नाम त्रयोविंशत्युत्तरशततमः स्तवकः ॥ १२३ ॥

वसुदेवः—देव ! मनोलक्षणं कथय ?

नारदः—शौरे ! यदेकस्मिन् समये कार्यद्वयं कर्तुं न शक्नोति तदेव मनः। "युगपज् ज्ञानाऽनुपपत्तिर्मनसो लिङ्गम्"। न्या० द० । सर्वेष्विन्द्रियेष्वस्यैव प्राधान्यम् । अस्य चत्वारि दशान्तराणि । संकल्पविकल्पात्मकं मनः । निश्चयात्मिका बुद्धिः । चेततीति चित्तम् । अहमिति अभिमानरक्षणसमयेऽहंकारः । कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिः अधृतिः ह्रीः श्रीः धीरिति मन एव । अस्य शुद्धिः सर्वथा रक्षणीया । आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । जीवात्माऽस्यैव शुद्ध्यर्थं प्रार्थयते । यथा—

यज्जाग्रतो दूरमुदेति दैवं तदु सुप्तस्य तथैवेति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥

॥ यजुः ॥

उ० भाष्यम्—यन्मनः जाग्रतः पुरुषस्य दूरं उदैति उद्-गच्छति चक्षुः प्रभृतीन्यपेक्ष्य । यच्च दैवम् देवो विज्ञानात्मा सोमेन गृह्यत इति दैवम् । उक्तं च—मनसैवाऽनुद्रष्टव्यमेतदप्रमयं ध्रुवम् । तदुसुप्तस्य तदः स्थाने यदोवृत्तिः । उकारः समुच्चयार्थीयः । यच्च मनः सुप्तस्य तथैव तेनैव प्रकारेण एति । यच्च दूरंगमं दूरं गच्छतीति दूरंगमम् । अतीतानागत वर्तमानव्यवहितविप्रकृष्ट ग्रहीतृ । ज्योतिषां श्रोत्रादीनां विज्ञाननेतृणाम् मध्य एकमेव ज्योतिः । तत् मे मनः शिवसंकल्पम् । संकल्पः काममूलपदार्थस्यरूपादेः सुरूपताज्ञानवतः कामप्रभृति शांतसंकल्पम् अस्तु भवतु ।

मन एव मनुष्याणां कारणं बंधमोक्षयोः ।
बंधाय विषयासक्तं मुक्त्यै निर्विषयं मनः ॥

वसुदेवः—देव ! जीवलक्षणं ममाचक्ष्व ?

नारदः—वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः सचाऽनंत्याय कल्पते ॥
नैव स्त्री न पुमानेष न चैवाऽयं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥

अतति सततं गच्छतीत्यात्मा । "इच्छा द्वेषप्रयत्नसुखदुःखान्यात्मनो लिङ्गम्" न्या० द० ॥

आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनो युक्तं भोक्तेत्याहुर्मनीषिणः ॥

वसुदेवः—देव ! जीवाऽऽत्माऽयं कर्मभिः शुभमशुभं वा फलं लभते न वा ? कृपया कथय ?

नारदः—शौरे ! कर्ता कर्मानुसारं फलं लभते । उक्तं च—

नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाऽशुभं ॥

"तद्य इह रमणीयचरणा अभ्याशोह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा" ॥ छां० ३० ॥

इति श्रीकृष्णचरिते जीवलक्षणनिरूपणं नाम
चतुर्विंशत्युत्तरशततमः स्तवकः ॥ १२४ ॥

वसुदेवः—देव ! कष्टे प्राप्ते भोज्याऽभोज्यविचारो रक्षणीयो न वा ? कृपया समाचक्ष्व ?

नारदः—शौरे ! सततमात्मानं गोपायीतेतिश्रुतिवाक्यमनुस्मरन् आत्मरक्षा सर्वथैव कर्तव्या । अत्राऽऽख्यायिका—

"मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास । स हेभ्यं कुल्माषान् खादंतं बिभिक्षे तꣳहोवाच । नेतोऽन्ये विद्यंते यच्च ये म इम उपनिहिता इति । एतेषां मे देहीति होवाच तानस्मै प्रददौ हंतानुपानमित्युच्छिष्टं वै मे पीतꣳस्यादिति होवाच । न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमां न खादान्निति होवाच कामो म उदपानमिति । स ह खादित्वाऽतिशेषान् जायाया आजहार साग्र एव सुभिक्षा बभूव तान् प्रतिगृह्य निदधौ । स ह प्रातः संजिहान उवाच यद्बताऽन्नस्य लभेमहि २ धनमात्राꣳ राजाऽसौ यक्ष्यते समा सर्वैरार्त्विज्यैर्वृणीतेति । तं जायोवाच हंत पत इम एव कुल्माषा इति तान् खादित्वाऽमुं यज्ञं विततमेयाय । तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोपाविवेश स ह प्रस्तोतारमुवाच । प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति । एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वान् उद्गास्यसि मूर्धा ते निपतिष्यतीति । एवमेव प्रतिहर्त्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदद्विवान् प्रतिहरिष्यसि मूर्द्धा ते निपातिष्यति । ते ह समारतास्तूष्णीमासांचक्रिरे । अथ हैनं यजमान उवाच । भगवंतं वा अहं विविदि-

षाणीत्युषस्तिरास्मि चाक्रायण इति होवाच । स होवाच भगवंतं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैशिषं भगवतो वा अहमवित्त्वाऽन्यानवृषि" ॥ छां० उ० ॥

इति श्रीकृष्णचरिते उषस्त्युपाख्याननिरूपणं नाम पंचविंशत्युत्तरशततमः स्तवकः ॥ १२५ ॥

वसुदेवः—देव ! कथय सत्यप्रतिष्ठाम् ?

नारदः—शौरे ! "सत्यमेव जयते नाऽनृतम् । सत्येन पंथा विततो देवयानः" अत्राऽऽख्यायिका । "सत्यकामो ह जाबालो जबालां मातरमामंत्रयांचक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रोऽहमस्मीति । सा हैनमुवाच नाहमेतद्वेद तात ! यद्गोत्रस्त्वमसि बह्वहं चरंती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाऽहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रवीथा इति । स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति । तꣳ होवाच किं गोत्रो नु सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि अपृच्छं मातरꣳ सा मा प्रत्यब्रवीद् बह्वहं चरंती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाऽहमस्मि सत्यकामो नाम त्वमसीति सोऽहꣳ सत्यकामो जाबालोऽस्मि भो इति । तꣳ

होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधꣳ सौम्याहरोप त्वानेष्ये न सत्यादगा इति ।" ततो गुरुकृपया स वेदवेदांगपारगो भूत्वा राजसभायां सर्वेषां प्रश्नानां समाधानं कृत्वा च महतीं प्रतिष्ठां धनं च समवाप्तवान् ।

इति श्रीकृष्णचरिते सत्यकामजाबाल्युपाख्यानं नाम
षड्विंशत्युत्तरशततमः स्तवकः ॥ १२६ ॥

वसुदेवः—देव ! प्रकृतिविषयं प्रतिपादय ?

नारदः—शौरे ! प्रकृतिः, शक्तिः, माया, अविद्येत्यस्या एव नामानि । "सत्त्वराजस्तमसां साम्यावस्था प्रकृतिः" । एषाऽघटनघटनानिपुणा प्रसिद्धा ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥
श्वे० उ० ॥

भाष्यम्—द्वेत्यादिषु सुपां सुलुगित्यनेन औङ आकारादेशः । द्वौ जीवेश्वरौ सुपर्णौ गमनसाधनतया पर्णशब्दोक्तपक्षतुल्य ज्ञानादिगुणवन्तौ सयुजौ नित्यसंबधिनौ सखायौ समानख्यातौ परस्पराऽविनाभूतौ वा समानमेकं वृश्च्यते छिद्यते इति वृक्षस्तं वृक्ष-

वच्छेदनयोग्यं शरीरं परिषस्वजाते परिष्वज्य वर्तेते। तयोर्द्वयोर्मध्ये अन्यः शरीराद्भिन्नो जीवस्तत्रासक्तः सन् पिप्पलं शरीरसम्बन्धकृतकर्मफलं स्वादु यथा तथा अत्ति भुनक्ति । अनश्नन्नन्यो, द्वाभ्यां भिन्नः द्वयोर्नियन्तृ तया वर्तमानः परमात्मा तत्राऽनासक्तस्तत्फलान्यनश्नन्नेव प्रकाशते । अत्र वृक्षादि शब्देषु योगवशाच्छरीरादिप्रतीतिर्नतु रूपकाऽतिशयोक्तिरिति ।। निम्बा० भा० छाया ।।

इयं अपरापरेति भेदाद् द्विविधा । अत्र स्मृतिः ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीये मे भिन्ना प्रकृतिरष्टधा ।।
अपरेयमिति त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ! ययेदं धार्यते जगत् ।।

साकारदेवोपासका हरहरिरविविरंचिगणपतिप्रभृति देवान् पुरुषरूपेण पूजयंति ।

"य एषोऽन्तरादित्ये हिरण्यमयः पुरुषो दृश्यते ।
हिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात् सर्व एव सुवर्णः ।।"

एवं देव्युपासकाः गायत्रीसावित्रीसरस्वतीपुरस्सरा देवीरर्चयंति । "अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः" ।

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।। मा० पु० ।।

गौरतेजो विना यस्तु श्यामतेजः समर्चयेत् ।
जपेद्वा ध्यायतो वाऽपि स भवेत्पातकी शिवे ॥ गो० म० ॥

यथा देवेषु भेदबुद्धिं न रक्षंति विद्वांस एवं देवीष्वपि तारतम्यं न गणयंति ।

इति श्रीकृष्णचरिते मायालक्षणनिरूपणं नाम
सप्तविंशत्युत्तरशततमः स्तवकः ॥ १२७ ॥

वसुदेवः—देव ! समुपदिशाऽऽत्मज्ञानम् ?

नारदः—शौरे ! शृणु, सावधानतया ।

नाऽयमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥
क० उ० ॥

कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा ? येन वा (रूपं) पश्यति । येन वा (शब्दं) शृणोति । येन वा गंधानाजिघ्रति । येन वा वाच्यं व्याकरोति । येन वा स्वादु चाऽस्वादु च विजानाति ॥ ऐ० उ० ॥

"स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा बंधनमेवोपश्रयत एवमेव खलु सौम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनꣳ हि सोम्य मन इति ।" "इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दंते

पश्चात् प्रतीच्यस्ताः समुद्रात समुद्रमेवापि यंति समुद्र एव भवंति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति । एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद् भवंति तदा भवंति । स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ! इति ॥" छां० उ० ॥

"अस्य सोम्य ! महतो वृक्षस्य यो मूलेऽभ्याहन्यात् जीवन् स्रवेद्यो मध्येऽभ्याहन्याज्जीवन् स्रवेद्योऽभ्याहन्याज्जीवन् स्रवेत् स एष जीवेनाऽऽत्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति । अस्य यदेकां शाखां जीवो जहाति अथ सा शुष्यति द्वितीयां जहाति अथ सा शुष्यति तृतीयां जहाति अथ सा शुष्यति सर्वं जहाति सर्वं शुष्यति एवमेव खलु सोम्य विद्धीति होवाच । जीवाऽपेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत् त्वमसि श्वेतकेतो इति।" "न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व इवेमा धाना भगव इत्यासामंगैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति । तं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्येषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति । श्रद्धत्स्व

सोम्येति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति ।"

"पुरुषꣳ सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति । अथ यदा वाङ्मनसि संपद्यते मनः प्राणे प्राणश्चेतसि तेजः परस्यां देवतायामथ न जानाति । स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत् सत्यꣳ स आत्मा तत् त्वमसि श्वेतकेतो इति ।"

"आत्मनः प्राण आत्मन आशाऽऽत्मनः स्मर आत्मन आकाश आत्मनस्तेज आत्मन आप आत्मन आविर्भावतिरोभावौ आत्मनोऽन्नं आत्मनो बलमात्मनो विज्ञानं आत्मनो ध्यानम् आत्मतश्चित्तमात्मनः संकल्प आत्मतो मन आत्मनो वाक् आत्मनो नाम आत्मतो मंत्रा आत्मतः कर्माण्यात्मत एवेदꣳ सर्वमिति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवाऽमुत्र पुण्यजितो लोकः क्षीयते । तद्य इहात्मानमननुविद्य व्रजंति एताꣳश्च सत्यान् कामाꣳस्तेषाꣳ सर्वेषु लोकेषु अकामचारो भवति य इहात्मानमनुविद्य व्रजंत्येताꣳश्च सत्यान् कामाꣳस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ।"

"स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न

वा अरे पुत्राणां कामाय पुत्राः प्रिया भवंत्यात्मनस्तु कामाय पुत्राः प्रिया भवंति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवंत्यात्मनस्तु कामाय लोकाः प्रिया भवंति । न वा अरे देवानां कामाय देवाः प्रिया भवंत्यात्मनस्तु कामाय देवाः प्रिया भवंति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवंत्यात्मनस्तु कामाय भूतानि प्रियाणि भवंति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः । मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम्" । बृ० उ० ।

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत् तत् केन कं जिघ्रेत् तत् केन कं पश्येत् तत् केन कꣳ शृणुयात् तत्केनकमभिवदेत् केन कं मन्वीत तत् केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति ॥

वसुदेवः—देव ! पृथिव्यादिभ्य आकाशो ज्यायान् । कस्मिन्नु खलु स आकाश ओतश्च प्रोतश्चेति ?

नारदः—शौरे ! याज्ञवल्क्य उवाच । एतद्वै तदक्षरं गार्गि ! ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाय-मतमोऽवाय्वनाकाशमसंगमरसमगंधमचक्षुष्कमश्रोत्रमवागमनोऽते-जस्कमप्राणममुखममात्रमनंतरमवाह्यं न तदश्नाति किंचन न तदश्नाति कश्च न । एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्या-चंद्रमसौ विधृतौ तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गि ! द्यावापृथिव्यौ विधृते तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गि ! निमेषा मुहूर्ता अहोरात्राणि अर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठंति । एतस्य वा अक्षरस्य प्रशासने गार्गि ! प्राच्योऽन्या नद्यः स्यंदंते । श्वेतेभ्यः पर्वतेभ्यः प्रतीच्यो-ऽन्या यां यां च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ! ददतो मनुष्याः प्रशंसंति यजमानं देवा दर्वी पितरोऽन्वायत्ताः ।

वसुदेवः—देव ! आत्मज्ञानफलं ब्रूहि ?

नारदः—शौरे ! समाकर्णय । "यो वा एतदक्षरं गार्ग्य-विदित्वाऽस्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्य-न्तवदेवास्य तद्भवति । यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लो-

कात् प्रैति स कृपणोऽथ य एतदक्षरं गार्गि ! विदित्वास्माऽल्लोकात् प्रैति स ब्राह्मणः । बृ० उ० ॥

इति श्रीकृष्णचरिते आत्मनिरूपणं नाम सप्तविंशत्युत्तरशततमः स्तवकः ॥ १२७ ॥

वसुदेवः—देव ! ब्रह्मविषयं समुपदिश ?

नारदः—शौरे ! शृणु श्रुतिवाक्यानि ।

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥

यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मनमन्या वाचो विमुंचथ अमृतस्यैष सेतुः ॥

अदृष्टमभ्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपंचोपयशमं शांतं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेयः ॥

यतो वा इमानि भूतानि जायंते । येन जातानि जीवंति । यत् प्रयंत्यभिसंविशंति । तद्विजिज्ञासस्व । तद् ब्रह्मेति ॥

यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातꣳ स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । यथा सौम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सर्वम् ॥

"एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अंतः ।
स एव जातः स जनिष्यमाणः प्रत्यग्जनांस्तिष्ठति सर्वतोमुखः ॥
यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ॥
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्याऽस्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवान् तस्मात्सर्वगतः शिवः ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो धृत्वाऽत्यतिष्ठद् दशांगुलम् ॥
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौजहाति ॥"

इति श्रीकृष्णचरिते ब्रह्मनिरूपणं नाम
अष्टाविंशत्युत्तरशततमः स्तवकः ॥ १२८ ॥

वसुदेवः—देव ! लोकविषयं वद ?

नारदः—शौरे ! यथाऽग्नेर्ज्वलतो विस्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रातिष्ठंते । प्राणेभ्यो देवा देवेभ्यो लोका इति । यः सच्चिदानंदस्वरूपोऽनंतशक्तिसंपन्नश्च परमेश्वरोऽस्ति स सत्त्वगुणमवलम्ब्य सात्त्विक्या प्रकृत्या लब्ध्या

सह विष्णुस्वरूपं धृत्वा वैकुण्ठे विराजते । रजोगुणमवलंबितो राजस्या प्रकृत्या सावित्र्या सह स एव ब्रह्मा भूत्वा ब्रह्मलोकमधितिष्ठति । एवं स एव तमोगुणं समाश्रित्य तामस्या प्रकृत्या पार्वत्या सह शिवलोकमलंकरोति ।

वसुदेवः—देव ! कैः कैः पुण्यैर्जीवात्मा काँस्कांल्लोकानवाप्नोति ? कृपया समाचक्ष्व ?

नारदः—शौरे ! मातृपितृगुरुपूजकोऽत्रैव दिव्यान्भोगान्भुंक्ते। सत्यवक्ता जलदाता च वरुणलोकसुखमनुभवति। "समूलो वा एष परिशुष्यति योऽनृतं वदति । अनृते वै क्रियमाणे वरुणः कुप्यति।" परोपकारेच्छया विद्यादाता वायुलोकमेति । औषधिदाताऽन्तरिक्षलोकं याति । कौशेयादिदिव्यवस्तुदाता हरिभजनकर्ता च देवतासन्निधौ गंधर्वलोकमवाप्नोति। गायत्रीजपशीलो ब्रह्मचारी परिव्राड् रणेऽभिमुखोहतश्चादित्यलोकं लभते । दक्षिणादाताऽहिंसाव्रतपालकश्च चन्द्रलोकं गच्छति । न्यायशीलः पशुरक्षापरायणश्च नक्षत्रलोकमेति । दीनपालको दानधर्मरतश्च देवलोकमवाप्नोति । अन्नदाताऽग्निहोत्रनिरतश्चेन्द्रलोकं याति । गोदाता कन्याप्रदश्च प्रजापतिलोकमवाप्नोति। शिवभक्तः शिवाऽवतारार्चको योगी च शिवलोकं याति । वेदवेत्ता श्रौतकर्मनिरतो ब्रह्मावतारभक्तश्च ब्रह्मलोकं याति । विष्णुभक्तो विष्णोरवतारपूजकः परोपकारदीक्षितश्च विष्णुलोकं गोलोकाऽपरनामकं धाम गच्छति।

सकामो जीवात्मा भक्त्या स्वेष्टदेवमाराध्य तस्यैव लोकं याति । निष्कामश्च भक्तिप्रभावादवाप्य ज्ञानं स्वस्वरूपमधिगच्छति ।

वसुदेवः—देव ! मुक्तिविषयं प्रतिपादय ?

नारदः—शौरे ! सालोक्यसारूप्यसामीप्यसायुज्यभेदाच्चतुर्विधा मुक्तिः। श्रीमद्भगवतो वेदपुरुषस्य निःश्वासभूता ये सुविस्तरा वेदा जाताः । तेषु तिलेषु तैलवद्वेदान्तः सुप्रतिष्ठितोऽस्ति। तत्रादौ प्रणवरामादिभगवन्नामजपाज्जीवो मुक्तिं लभते । महेश्वरः काश्यां मरणसमये जंतोर्दक्षिणकर्णे तारकमंत्रं समुपदिशति । तेन विगतकल्मषो जीवो मुक्तिं लभते । ये वेदविद्याव्रतस्नातदेशिकस्य मुखादुपदेशं श्रुत्वा दशोपनिषत्पाठं शांतिपुरस्सरं कुर्वंति ते प्रारब्धक्षयपर्यंतं जीवन्मुक्ता भवंति । योगमीमांसोपासनादिभिर्दिव्यलोकप्राप्तिर्भवति । कैवल्यप्राप्तिस्तु ज्ञानमार्गेणैवाऽस्ति । पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणाश्चित्तधर्मः क्लेशरूपत्वाद्बंधो भवति। तन्निरोधनं जीवन्मुक्तिः। उपाधिविनिर्मुक्तघटाकाशवत् प्रारब्धक्षयाद्विदेहमुक्तिः । यथा पुत्रकामेष्टिना पुत्रं वाणिज्यादिना वित्तं ज्योतिष्टोमेन स्वर्गं तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणमनननिदिध्यासनजनितज्ञानद्वारा जीवन्मुक्त्यादिलाभो भवति । सर्ववासनाक्षयात्तल्लाभः । वीतरागजन्माऽदर्शनात् ।

पौरुषं द्विविधं। उच्छास्त्रं शास्त्रितं चेति। तत्रोच्छास्त्रमनर्थाय शास्त्रितं च परमार्थाय भवति । ततो वासनाव्यूहोऽपि द्विविधः।

शुभोऽशुभश्चेति । शुभेन वासनौघेन भागवतं पदं लभते । अशुभो भावः संकटे पातयति । बालकवत् चंचलं चित्तं पौरुषेण प्रयत्नेन लालयेत् । उक्तं च—

जन्मान्तरशताभ्यस्ता मिथ्या संसारवासना ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥

वासनाग्रस्तं मनो बद्धं तथा च त्यक्तं मनो मुक्तं कथ्यते । सम्यगालोचनात् सत्याच्च वासना विलीयते । ततो दीपवच्चेतः सच्चिदानंदस्वरूपे भगवति शममायाति । अस्य चित्तवृत्तस्य प्राणस्यन्दनवासने द्वे बीजे स्तः । तयोरेकस्मिन् क्षीणे द्वे अपि-क्षिप्रं नश्यतः । न्यायशास्त्रे—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः" ।

अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ।
तीर्थेन शुद्धिरेकस्य द्वितीयस्यात्मचिंतनात् ॥

तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततम् ॥ यजु० । अ० ६ । ५ ॥

महीं० भाष्यम्—यूपकटकं प्रेक्षमाणं यजमानं वाचयेदिति मन्त्रार्थः । सूरयः विद्वांसो वेदान्तपारगा विष्णोः तत् परमं पदं स्वरूप सदा पश्यंति । कीदृशम् । दिवि आकाशे निरावरणे चक्षुरिवाततं व्याप्तम् । यद्वा यत् दिवि चक्षुरादित्यमण्डलमाततं

विस्तारितम् । इवोऽनर्थकः । चक्षुः शब्देनाऽन्यत्राऽपि मण्डल-मुच्यते । "चक्षुर्मित्रस्य वरुणस्य" तच्चक्षुर्देवहितम् इति ॥

तद्विप्रास्ते विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदं ॥ यजु० । अ० ३४ । ४४ ॥

उव्व० भाष्यम्—तद्विप्रासः तस्य विष्णोर्यज्ञस्य यत् परमं पदं ब्रह्मलक्षणम् तत् विप्रासः ब्राह्मणा विपन्यवः मेधाविनः जागृवांसः असुप्ताः अप्रमत्ताः ज्ञानकर्मसमुच्चयकारिणः समिंधते संदीपयंति उपासनैर्निर्मली कुर्वंति ॥

वसुदेवः—देव ! सालोक्यादीनां प्राप्तिः कथं भवति ?

नारदः—शौरे ! वापीकूपतडागादीनां पूर्तकर्मणां कर्ता सालोक्यं देवार्चनादाष्टकर्मकर्ता सारूप्यं अखंडब्रह्मचर्यादिव्रत-पालकः सामीप्यं अनन्यभक्तो वेदांतविचारेण सर्वत्र समदर्शी भूत्वा सायुज्यमोक्षमवाप्य च पुनर्न निवर्तते । अत्र श्रुति—

वेदांतविज्ञानविनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यंति सर्वे ॥
गताः कलाः पंचदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवंति ॥

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥

इति श्रीकृष्णचरिते मुक्तिवर्णनं नामैकोनविंशत्-
शततमः स्तवकः ॥ १२९ ॥

एवमाकर्ण्य नारदमुखादात्मज्ञानं वसुदेवः कृतार्थो बभूव। सोऽथ कृतांजलिर्मुनिवरं प्राह देवर्षे! सफलोमनोरथः। प्रकाटिताः खल्वानंदांकुरकोटयः विनष्टमद्य च विघ्नवनं। देव! संप्रत्यहं विप्रशापाद्ध्वस्तं यदुकुलं विलोकयितुं नेच्छाम्यतो वनगमनाय समादिश माम्। तच्छ्रुत्वा मुनिवर्यः प्राह। यदुपुंगव! शोभनोऽयं विचारः। राजर्षिधर्मस्त्वेवमेव। यथा—

विद्या अवाप्य सकलाः सुगुरोः प्रसादात्,
पूर्वे वयस्यथ कुलीनवधूसहायाः।
ते पूर्वजा गृहसुखान्यनुभूय चांते,
राज्यं विहाय तपसे प्रययुर्वनान्तम् ॥
न पश्याम्यन्यं श्रीहृदयदयिताद्विश्वसुहृदो,
दयाब्धेर्दीनार्तप्रणतजनवात्सल्यविवशात्।
महाविष्णोरस्मिन् जगति भवतो दुःख दलनं,
ततस्तं श्रीशौरे! श्रय प्रणयतो मोहरहितः ॥ धु० ना०

एवमादिश्य गते मुनिराजे देवकीवसुदेवौ समाहूय रामकृष्णौ प्रोचतुः। वत्सौ ! पूर्णमनोरथावावां परलोकयात्रार्थं वनं गच्छावः। मरणं प्रकृतिः शरीरिणामिति विज्ञाय गमनायाऽनुमतिं दत्तम्। एतन्निशम्य मातापित्रोर्वाक्यं दूरदर्शिनौ यदुनंदनौ सविनयं जगदतुः। पूज्यपादौ ! आवान्त्वाज्ञापालकौ न दातारौ भवतामुपकारान् गणयितुं सर्वथैवाऽसमर्थावावाम्। ततः शुभस्य शीघ्रमित्यभिधाय दत्त्वा च शुभाशीर्वादांस्ताभ्यामुभौ समाजुह्वतुर्ब्राह्मणवृन्दम्। अथ देवकी भोजयित्वा द्विजपत्नीस्ताभ्यो वस्त्रालंकारांश्च वितताार। अत्रान्तरे वसुदेवोऽपि विधिवद् ब्राह्मणान् संपूज्य मिष्टान्नपानैः संतर्प्य च गोदानपूर्विका विपुला दक्षिणाः प्रादात्। ततो लब्धाशीर्वादौ देवकीवसुदेवौ तपोवनं प्रययतुः। केचित्परिजनास्तावनु जग्मुः। अथ कमपि रैवतकसंलग्नं पर्वतमवाप्य शौरिर्भार्यामुवाच। देवि ! रम्योऽयं प्रदेशो मह्यं रोचते। यत्र सिंहशिशवो हरिणशावकैः सह ससुखं क्रीडंति। नकुलाः स्वाभाविकं वैरं विहाय सर्पैः साकं विहरंति। श्येनमयूरवायसकपोता एकत्रिताः क्षेत्रे कणानदंति। चटकाः कृमीन् न खादंति। शिक्षिताः कपयो मुनिपाकशाला रक्षंति। उपाध्यायानां गृहपंजरस्थाः शुकसारिकाः स्वतः प्रमाणानां वेदानां परतः प्रमाणानां पुराणेतिहासादीनां च मानुषगिरा उच्चारणं कुर्वंति। तत्रत्या मुनयः शिक्षकाः शास्त्राणाम्, वक्तारो वेदानाम्, उपदेशका उपनिषदाम्,

प्रचारकाः पुराणानाम्, स्मर्तारः स्मृतीनाम्, दक्षाश्च दयादानधर्मप्रकरणानाम्, किं बहुना—तत्रैवं लिखितमासीत् ।

विप्रोऽपि यो भवेन्मूर्ख आश्रमाद्बहिरस्तु सः ।
ज्ञानवान् कुंभकारोऽपि वसतिं कर्तुमर्हति ॥

अतः श्रीजैगीषव्यादेशेन धर्मप्रचारोऽभूत् । अथ विलोक्य मुनिजनवसतिं अधित्यकायां देवकीवसुदेवावपि तत्रैव स्थितिं चक्रतुः । ततोऽन्येद्युः कृतनित्यकृत्य आनकदुंदुभिर्भार्यामुवाच । देवि ! भुक्तभोगी पूर्णायुः कृतार्थश्चाऽहं समाधिद्वारा कलेवरं त्यक्तुमिच्छामि । त्वं कस्याश्चिदपि वार्तायाश्चिन्तां मा कुरु ! एषा विप्रमण्डली भविष्यति तव संरक्षिणी । एतन्निशम्य वाक्यं वृद्धाऽपि देवकी सहसा मुमोह । ततो धैर्यमवलंब्य प्रत्यवदत् । कृपानिधान ! एषा भवदीया व्रतकर्शिता दास्यपि अनुसरिष्यति । अथोभावपि प्रसन्नाननौ सरित्तीरमवाप्य बद्धपद्मासनौ ध्यानपरायणा बभूताम् । ततो नारदमुनिकथितरीत्याऽऽदिपुरुषं ध्यायतो वसुदेवस्य जीवात्मा सहसैव ब्रह्मरन्ध्रद्वारा निर्गत्य ज्योतिः स्वरूपेण सह मिलित्वा च सायुज्यपदमवाप । हृष्टादेवाः पुष्पवृष्टिं चक्रुः । अथ भग्नध्यानादेवकी समुत्थाय हा ! प्राणनाथ !! क्वमां विहाय गतोऽसीत्यभिधाय पतिमनुगमनाय मतिमकरोत् । अत्रान्तरे विदितवृत्तौ रामकृष्णावपि तत्राऽऽजग्मतुः । अथ साध्वी देवकी कृतप्रणामौ तौ गद्गदगिरा प्रोवाच । वत्सौ !

तातस्तु गतो गोलोकम् । ममाऽपि वासस्तत्रैव भवत्वित्यभिधाय मौनमभजत् । ततः शोकाविष्टायाः उपोषितायाः भगवद्ध्याना सक्तायाश्च जीवात्मा पश्यतो रामकृष्णयोः दिव्यलोकमगात् । अथ गगनात्कुसुमवृष्टिरभवत् । वर्णनातीतः खलु पतिव्रतामाहिमा ।

तिस्रः कोट्योऽर्धकोटिश्च यानि रोमाणि मानुषे ।
तावत्कालं वसेत् स्वर्गे भर्तारं याऽनुगच्छति ॥

अत्रान्तरे वृद्धौ यशोदानंदराजावपि वानप्रस्थाश्रमिणौ यमुनातटे हरिं स्मरन्तौ देवलोकमवापतुः । ततो रामकृष्णौ विलपंतौ मातापित्रोरौर्द्ध्वदैहिकीं क्रियां कृत्वा च तयोः प्रियकाम्यया गवां ग्रामाणां च समूहं ब्राह्मणेभ्यो दानमकुर्वन् ।

इति श्रीकृष्णचरिते देवकीवसुदेवयोः परमपदलाभनिरूपणं नाम त्रिंशदुत्तरशततमः स्तवकः ॥ १३० ॥

अथ भागवतोत्तमे उद्धवे बदरिकाश्रमं गते हरिः सुधर्मायां सभायां समासीनान् सभ्यानुवाच । महाशयाः ! दिवि भुवि अंतरिक्षे च महोत्पाता विलोक्यंते । अतो मुहूर्तमात्रमपि युष्माभिर्नाऽत्र स्थेयम् । बालका वृद्धाःस्त्रियश्च सत्वरमितः शंखोद्धारं व्रजंतु । यत्र प्रत्यक् सरस्वती वहति वयमपि च तत्र प्रभासे यास्यामः । ततस्तत्र स्नात्वा उपोष्य च देवान् संपूजयि-

ष्यामः। अथ ब्राह्मणान् भोजयित्वा तेभ्यो गोभूमिहिरण्यवासांसि च वितरिष्यामः। उक्तं च—

विधिरेषो ह्यरिष्टघ्नो मंगलायनमुत्तमम्।
देवद्विजगवां पूजा भूतेषु परमोभवः॥

एवमाकर्ण्य श्रीकृष्णादेशं यदुवृद्धाः तथेत्युक्त्वा केचिन्नौभिरपरे रथैश्च प्रभासं ययुः। ततो यादवास्तत्र यथाशक्ति दानधर्मादिकं चक्रुः। अत्रान्तरे दैवमोहिताः केचित् मैरेयकं मधु पीत्वा विगतविवेका बभूवुः। उक्तं च—

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
मरणान्तानि वैराणि कुकर्मान्तं यशो नृणाम्॥

अथ पूर्वं तु विवादोऽभवत्। ततो मिथो दण्डादण्डि केशाकेशि हस्ताहस्ति युद्धं भवितुमारब्धम्। एतदालोक्य क्रोधाकुलाः केचित् खड्गगदाभल्लतोमरादिभिर्युयुधिरे। ततः साम्बप्रद्युम्नौ भोजाऽक्रूरौ सात्यक्यनिरुद्धौ सुभद्रसंग्रामजितौ दाशार्हवृष्ण्यन्धकसात्वतार्बुदाश्चाऽपि मिथो युद्धं कर्तुमारेभिरे। विचित्रा गतिः खलु दैवस्य?

पुत्रा अयुध्यन्पितृभिर्भ्रातरो भ्रातृभिस्तथा।
मित्राणि मित्रैः सुहृदः सुहृद्भिर्युयुधुस्तदा॥

अथ क्षीयमाणेषु शरेषु भज्यमानेषु शरासनेषु खण्डितेषु शस्त्रेषु विस्मृतेष्वस्त्रेषु च मुष्टिभिरेव युयुधिरे। अत्रान्तरे केचिदेरकान्नीत्वा

समरेऽवतीर्णाः । तस्मिन् समये तृणोपमा अप्येरका वज्रतुल्या बभूवुः । किं बहुना । स्वयं श्रीकृष्णचंद्रेण वार्यमाणास्ते तमपि हंतुमुद्यता अभूवन् । उक्तं च—

ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनाम् ।
स्पर्धाक्रोधः क्षयं निन्ये वैष्णवोऽग्निर्यथा वनम् ॥

एवं सर्वेषु कुलेषु नष्टेषु हरिर्भूभारमवतीर्णं मेने। अत्रान्तरे रामः समुद्रवेलायां पौरुषं योगमास्थाय आत्मन्यात्मानं संयोज्य च मानुष्यं कलेवरं तत्याज । रामपत्न्यस्तद्देहमालिंग्य चिताऽग्नौ विविशुः । प्रहृष्टा देवास्तत्र कुसुमान्यवाकिरन् ।

इति श्रीकृष्णचरिते यदुकुलसंहारनिरूपणं नामैक-
त्रिंशदुत्तरशततमः स्तवकः ॥ १३१ ॥

अथ भगवान् देवकीनंदनो रामनिर्वाणं समालोक्य धरोपस्थं पिप्पलमासाद्योरौ दक्षिणं पादं निधाय च तूष्णीं निपसाद । अत्रान्तरे मुशलावशेषलोहखंडकृतेषुर्जराऽभिधानो लुब्धको मृगशंकया हरिणाकारं तच्चरणं शरेण विव्याध । सोऽथ समीपमागतस्तं महापुरुषं विलोक्य भीतः शिरसा प्रणमंस्तत्पदपंकजयोर्न्यपतत् । ततोऽवाप्य सावधानतां गद्गद्गिरा प्रोवाच। मधुसूदन! मयाऽजानता यत्पापं कृतं तत् क्षमस्व ! विशुद्धबुद्धयो महानुभावा दुष्टजनकृतमपराधं सद्य एव विस्मरंति । देव ! क्व

गोब्राह्मणप्रतिपालको भवान् क्वाऽहं च कठोरहृदयो मृगयुः ।

यस्याऽनुस्मरणं नृणामज्ञानध्वान्तनाशनम् ।
वदंति तस्य ते विष्णोर्मयाऽसाधुकृतं प्रभो ! ॥

यदुपते ! पापकर्माणं मामाशु जहि । येनाऽहं पुनरीदृशं सदतिक्रमं न कुर्याम् । एतदुपाकर्ण्य व्याधवचनं हरिः प्रत्युवाच । जरे ! त्वमुत्तिष्ठ । माऽभैः । यन्मया चिन्तितं तदेव जातम् । नाऽत्र तव दोषलेशः । सांप्रतं मदनुज्ञातस्त्वं स्वर्लोकं याहि । एवं जनार्दनेनादिष्टो मृगयाजीवी मुहुर्मुहुर्दयालुतां प्रशंसन् त्रिःपरिक्रम्य प्रणम्य च सपदि विमानेन दिवलोकमगात् । अत्रान्तरे श्रीकृष्णपदवीमन्विच्छन् दारुकस्तुलसिकामोदवायुं समाघ्राय सहसा तत्राऽऽजगाम। सोऽश्वत्थमूले कृतनिकेतनं पतिमालोक्य स्नेहप्लुतात्मा रथादवतीर्य च तच्चरणयोर्निपपात । ततो वाष्पलोचनः सोऽब्रवीत् । कृपानिधान ! निशापतावस्ते रजन्यां पांथस्य या गतिर्भवति सा स्थितिर्मदीया त्वच्चरणसरोरुहेऽपश्यतो जाता । अत्रान्तरे विष्णुप्रहरणसहितो रथो दिवमुत्पपात । अस्मिन्नेव दिने सुखसुप्ताया राधिकाया अपि मनः सहसैव संकुचितं बभूव । एतदालोक्य वृषभानुतनया ध्यानपरायणा बभूव । साऽथ प्राणेश्वरं गोलोकातिथिं विज्ञाय स्वयमपि परित्यज्य सर्वकृत्यं समाधिनिरताऽभूत् । भगवदिच्छया तस्याः पुनीतात्मा सहसैव नश्वरं देहं परित्यज्य गोलोकमयात् । प्रसन्ना देवास्तस्याः

शवोपरि पुष्पवृष्टिं चक्रुः। व्रजस्थाः सर्वे लोका राधास्नेहं मुक्तकण्ठं प्रशशंसुः। अथ दारुको हरिं सविनयं जगाद। कृपानाथ! सदुपदेशेन मामप्युद्धर! तच्छ्रुत्वा हरिरुवाच। साधो! मयि गते कलिरायास्यति सत्वरम्।

दारुकः——प्रभो! कृपया तन्निराकरणोपायान्वद?

हरिरुवाच——तत्रादौ प्रणवादीन्यनन्तानि मम नामानि संति। भक्तो यथारुचि तेष्वेकं हृदयप्रियं निर्धार्य जपेत्। यद्यपि बीजाक्षराणि संति बहूनि परं तेषु प्रधानानि चत्वारि यथा 'ऐं' वाग्बीजं 'क्लीं' कामबीजं 'श्रीं' लक्ष्मीबीजं 'ह्रीं' च लज्जाबीजं जानीयात्।

दारुकः——प्रभो! विष्णुशिवयोर्मध्ये कः श्रेष्ठः?

श्रीहरिः——भद्र! यो विष्णुः स शिवः। यः शिवः स विष्णुः। उक्तं च व्यासादिभिर्महामुनिभिः।

शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः।
एवं रामः कृष्णहृदि कृष्णो रामहृदि स्थितः॥

दारुकः——प्रभो! शिवं लोकाः श्मशानवासिनं वदंति किमत्र तत्त्वम्?

श्रीकृष्णः——भद्र! शवाः शेरते यत्र तत् श्मशानं। प्रलये सर्वमिदं जगतीतलं श्मशानमेव भवति। अधुनाऽपि यत्र यत्र जीवा

म्रियंते तत्र तत्र श्मशानमेव । विष्णुरपि वृन्दाचितायां लुलोट ।

दारुकः——प्रभो ! शिवाय भंगादिमादकद्रव्यसमर्पणं उचितं न वा ? कृपया कथय ?

श्रीकृष्णः——भद्र ! मादकद्रव्यसमर्पणेन शिवो न प्रसीदति ।

दारुकः——प्रभो ! शिवलिंगपूजनं सिद्धं निषिद्धं वा ?

श्रीकृष्णः——भद्र ! लिंग्यतेऽनेनेति लिङ्गम् । शब्दस्याऽस्य प्रवृत्तिर्बहुष्वर्थेषु भवति । यथा विष्णोरघटितं लिङ्गं शालग्राम-शिला तथा शिवस्याऽघटितं लिंगं नार्मदीशिला । उभयविध एव लिंगे विष्णुशिवयोरनन्तत्वं सूचयतः । भेदबुद्धिर्देवपूजाफलं सम्यङ् न लभते ।

दारुकः——प्रभो ! विष्णुप्रसादवच्छिवप्रसादो ग्राह्यो न वा ?

श्रीकृष्णः——भद्र ! कथं न ग्राह्यः ? देवाय समर्प्याऽन्नं पूर्वं गुरवे विनिवेद्य तत उपभोक्तव्यम् । तृप्तितोऽधिकमवशिष्टम-भ्यागताय साधवे विद्यार्थिने वाऽनुच्छिष्टं देयम् ।

दारुकः——प्रभो ! सर्वसाधारणपूजामाख्याहि ?

श्रीकृष्णः——भद्र ! प्रत्यक्षदेवः सूर्यनारायणः । सर्वे वर्णिन आश्रमिणश्च प्रत्यहं उत्थाय तं प्रणमेयुः अर्घचतुष्टयं च दद्युः । एकेन देवानां सत्कारो द्वितीयेन ऋषीणां तृतीयेन पितॄणां चतुर्थेन च समस्तप्राणिनां भवति परितोषः ।

दारुकः—प्रभो ! ऊर्ध्वपुण्ड्रत्रिपुण्ड्रयोः को विनोदः ?

श्रीकृष्णः—भद्र ! भक्तः स्वेष्टदेवतानुसारं वेशं रचेत् । सृष्टिरियं त्रिगुणात्मिका । अतस्त्रिरेखायुतं सबिन्दुं द्विरेखायुतं च तिलकं कुर्युर्लोकाः । तत्र प्रथमारेखा ब्रह्मणः । द्वितीयारेखा वा बिन्दुः, मायायाः । तृतीया च जीवस्य । यदा भगवत्प्रसादान्मध्यमा माया तुष्टा वा विलीना भवेत्तदैव जीवो मोक्षपदं लभते । रेखाद्वययुक्तमूर्ध्वपुण्ड्रं गोशृंगतुल्यं गोभक्त्या गोलोकप्राप्तिर्भवतीति सूचयति । नारी भवति बिन्दुधारिणी । मध्येललाटं बिन्दुध्यानाद् योगसिद्धिरपि सुलभा । एवं शंखचक्रादिचिह्नधारणमपि युक्तं न वा ? युक्तं । परंतु दग्धांगेन न भाव्यम् । चंदनादिनाशीतलमुद्रा श्रेयस्करी । उक्तं चाऽस्तिकस्मृतौ ।

शंखचक्रांकितौ हस्तौ मनुष्यस्य स्वभावतः ।
अतः कोऽस्ति धरापृष्ठे यो न श्री वैष्णवोमतः ॥
रामरामेतिक्रन्दन्तं दग्धागं तप्तमुद्रया ।
भक्तं विलोक्य श्री विष्णुर्न कदाऽपि प्रसीदति ॥

दारुकः—प्रभो ! शैवानां कर्णस्फाटनविधिरुचितो न वा ?

श्रीकृष्णः—भद्र ! कर्णलोळयोर्मध्ये छिद्रं कृत्वा रुद्राक्षधारणं योग्यं किन्तु मध्यभागं छित्त्वा काचमुद्रार्थं वृथा व्यथोत्पादनं न समीचीनम् । प्राणी सुखमिच्छतिनाऽसुखम् ।

दारुकः— देव ! भस्मधारणं कर्तव्यं न वा ?

श्रीकृष्णः—भद्र ! यज्ञविभूतिर्नाऽस्ति सामान्या मृत्तिका । "यज्ञो वै विष्णुः" । अतो यज्ञप्रसादस्त्ववश्यमेव ललाटे धार्यः ।

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥ य० अ० ३ । ६२ ॥

भाष्यम्—त्र्यायुषम् त्रीण्यायूंषि समाहृतानि बाल्ययौवन-स्थविराणि त्र्यायुषम् । यत् जमदग्नेः हुतभक्षणशीलस्याऽग्निदेवस्य त्र्यायुषं, कश्यपस्य (वर्णविपर्ययात् पश्यकस्य) सूर्यस्य यत् त्र्यायुषम् यच्च देवेषु लोकपालेषु त्र्यायुषम् अस्ति । तत्सर्वं त्र्यायुषं न अस्माकं यजमानानां अस्तु भवत्वित्यर्थः । शैवा अनेन मंत्रेण विभूतितिलकं कुर्वन्ति कुंकुमादिना च वैष्णवा-ऊर्ध्वपुंड्रम् । ललाटे त्रिपुण्ड्राकाराः तिस्रोरेखाः स्वतः सिद्धाः संति ।

दारुकः—प्रभो ! रोगनिवारणाय वैदिकमंत्रं कथय ?

श्रीकृष्णः—भद्र ! शृणु ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् ॥ य० अ० ३-६० ॥

भाष्यम्—सुगंधिं दिव्यगंधोपेतं मर्त्यधर्मरहितं पुष्टिवर्धनम् धनधान्यादिपुष्टेर्वर्धयितारं त्र्यम्बकं नेत्रत्रयोपेतं रुद्रं यजामहे

पूजयामः। ततो रुद्रप्रसादात् मृत्योर्मुक्षीय स्वर्गरूपान्मुक्ति-रूपाच्चामृतान्मामुक्षीय मुक्तो मा भूयासम्। एकवचनं बह्वर्थे। मुक्ता मा भूयास्मेत्यर्थः। अभ्युदयनिःश्रेयसरूपात् फलद्वयान्मम भ्रंशो माऽभूदित्यर्थः। अत्र दृष्टान्तः—यथोर्वारुकं कर्कन्ध्वादेः फलं अत्यंतपक्वं सत् बंधनात् स्ववृन्तात् प्रमुच्यते तद्वत्। महामृत्युनिवारकोऽयं मंत्रः। जपेन होमेनवाऽवश्यं कृतविभूति तिलको रोगमुक्तो भवति यजमानः।

दारुकः—प्रभो! संन्यासदीक्षाविधौ को विचारो भवतः?

श्रीकृष्णः—भद्र! मानवेन्द्रेण मनुना येभ्यो यज्ञोपवीत-संस्काराज्ञा दत्ता त एव संन्यासाधिकारिणः। ब्रह्मचर्याद् गृही भवेत्। गृही भूत्वा वनी भवेत्। वनी भूत्वा संन्यसेत्। अथवा गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतिशासनम्। भद्र! भक्तः सर्वाणि कर्माणि मामनुस्मरन मदर्थं च कुर्यात्। मय्यर्पितमनो मच्चरितं शृणुयात्। मद्भक्तैः साधुभिः संश्रितान् पुण्यान्देशानाश्रयेत्। स्वयमेकाकी किं वाऽन्यैर्भक्तैः सह मिलित्वा पर्व दिनेषु गीतनृत्याद्यैः ससंभारान् महोत्सवान् कारयेत्। सर्व-भूतेषु वहिरंतरपावृतं मामेव पश्येत्। विमलाशयः स आत्मन्या-त्मानमीक्षेत। ज्ञानमाश्रित्य सर्वभूतहितेरतः समदर्शी स्यात्। एवं कृतेऽस्मिन्नेव जन्मनि समेषु स्पर्धा, उत्तमेष्वसूया, हीनेषु तिरस्कारः स्वस्मिन्नहंकारश्चैतेदोषा शनैः शनैः स्वयं नश्यंति।

निशम्यैतद्भगवद्वचनं दारुकोऽवदत् । दयानिधेऽनुगृहीतोऽस्मि । संप्रत्याज्ञाप्रदानेन कृतार्थी करणीयोऽयं जन इति वाक्यं श्रुत्वा हरिरुवाच । साधो ! द्वारावतीं गत्वा बंधुभ्यो ब्रूहि, यत् भोजान्धकदाशार्हसात्वतप्रभृतीनां यादवानां याः षट्पंचाशत् कोटयः (शाखाः) आसंस्ताः सर्वा मिथः कलहं कृत्वा कथाशेषतां याताः । अथ श्रीबलभद्रः स्वर्गपुरातिथिर्बभूव । ममाऽपि प्रस्थानकालं समाचद्व । अपरं च मयि गते सागरोऽयं कल्लोलमालाभिः पुरीमिमां सत्वरं संप्लावयिष्यति । अतो जीवितेच्छुभिरत्र न स्थातव्यम् । अर्जुनेनाऽऽविता गमिष्यथ यूयमिन्द्रप्रस्थम् ।

त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ।
मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥

अथ गते दारुके स्वप्रभया दिशो वितिमिराः कुर्वन्तम् घनश्यामं सुंदरस्मितवदनं राजीवलोचनं स्फुरन्मकरकुंडलं श्रीवत्साकं चतुर्भुजं च पुरुषोत्तमं गोलोकयात्रार्थं प्रस्थितं विलोकयितुं इन्द्राद्या देवाः समुपाययुः । ततस्ते विकिरन्तः पुष्पाणि तुष्टुवुः ।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
यजुः ॥

म० भाष्यम्—हिरण्ये हिरण्यपुरुषरूपे ब्रह्माण्डे गर्भरूपे-

णावस्थितः प्रजापतिर्हिरण्यगर्भः भूतस्य प्राणिजातस्य अग्रे समवर्तत प्राणिजातस्य उत्पत्तेः पुरा स्वयं देहधारी बभूव । स च जातः उत्पन्नमात्र एक एवोत्पत्स्यमानस्य सर्वस्य जगतः पतिरीश्वर आसीत् । स एव पृथिवीमन्तरिक्षं द्यां द्युलोकमुतापि चेमां भूमिं लोकत्रयं दाधार धारयति कस्मै काय प्रजापतये देवाय वयं हविषा विधेम हविर्दद्मः । अथ भगवानपि आत्मन्यात्मानं संयोज्य पद्मनेत्रे निमीलयामास ।

लोकाभिरामां स्वतनुं, धारणाध्यानमंगलम् ।
योगधारणयाऽग्नेय्याऽदग्ध्वा धामाऽविशत् स्वकम् ॥

सत्यादयोऽद्भुतगुणा हरिमनुययुः । ततो दुंदुभयो दिवि नेदुः । गगनात्पुष्पवृष्टिरभूत् । देवाश्चकिता मिथः प्रोचुः । सहृदयाः ! यथाऽऽकाशेऽभ्रमंडलं हित्वा यात्याः सौदामिन्या गतिर्नलक्ष्यते तथा श्रीकृष्णगतिरपि नाऽस्माभिरालोकिता । अथ देवा भगवद्गुणावलीं गायन्तः स्वं स्वं लोकं ययुः ।

अथ दारुको द्वारकामेत्य तत्रत्येभ्यो यदुवृद्धेभ्योयदुपतिसंदेशमावेदयामास । तच्छ्रुत्वा सहसैव ते शोकमूर्छिता बभूवुः । ततस्ते मिथः प्रोचुः । हाऽद्य धर्मदिवाकरोऽस्तं गतः । नयचन्द्रोऽमावास्यां प्राप्तः । गोब्राह्मणभक्तिः स्वर्गलोकमगात् । धर्मकल्पतरुर्नंदनवनमगमत् । निराश्रया यादवा

उन्नतिशिखरमारुढा अपि तृणोपमा जाताः । ततो भगवद्विरहातुराः श्रीकृष्णपत्न्यो रुक्मिणीप्रभृतयो विद्युत्पाताहताः कल्पलता इव मूर्छामवापुः । अथ चेतनामवाप्य भो आर्यपुत्र ! क्वाऽस्मान् विहाय गतोऽसि देवलोकम् । हाऽद्य गतं गौरवं भूमण्डलस्य । देववेदपूजा परित्यज्य भरतखण्डमगात् पाताललोकम् । हा गोपालं विना कस्त्रास्यते गोवृन्दम् । अनाथा ब्राह्मणाश्च कं शरणमुपयास्यंतीत्यभिधाय चितामारुरुहुः । काश्चित् समुद्रे प्रक्षिप्यात्मानं रमणमनुसस्रुः । इतरा हा शशिवंशमणेऽद्य क्षत्रियकुलं जातं नतमस्तकमिति भाषमाणा जीवितं तत्यजुः । प्रभासस्था अपि यादवांगनाः पतीनुपगुह्य चितायां चुकूर्दुः । कासांचित् कृष्णपत्नीनां तु हरिर्गोलोकमितिशब्दश्रवणमात्रेणैव प्राणपक्षिण उदडीयन्त । अथ कृष्णविरहातुरोऽर्जुनः स्मारं स्मारं गीतोपदेशं कथंचिदात्मानं सांत्वयामास । ततः श्रीकृष्णभक्तः पार्थो नष्टगोत्राणां यादवानां परलोकसाधनं दाहपिण्डोदकदानादिकं कर्म विधिवत्कारयामास । अत्रान्तरे लंघितमर्यादो जलनिधिः महालहरैर्हरिमंदिरं विहाय सम्पूर्णां द्वारावतीं स्रावयामास । ततो धनंजयो हतशेषान् स्त्रीबालवृद्धान् समादाय इन्द्रप्रस्थं प्रतस्थे । मार्गे दस्यवो यादवाङ्गना हर्तुमारेभिरे । वीरांगना हतसाहसं पार्थं दृष्ट्वा स्वयमसिधेनुकाभिर्दुष्टानां संहारं चक्रुः । ततो युधिष्ठिरादयोऽर्जुनमुखाद्भगवतो गोलोकयात्रावृत्तं श्रुत्वा सहसा मुमुहुः ।

ततस्ते लब्धप्रबोधा यदुराज्ये वज्रं स्वराज्ये च परीक्षितं स्थापयामासुः। अथ महापथं गतेषु पाण्डवेषु धर्मेण देवरातः प्रजाः पर्यपालयत्।

इति श्रीकृष्णचरिते श्रीकृष्णगोलोकप्राप्तिनिरूपणं नाम त्रयत्रिंशदुत्तरशततमः स्तवकः ॥ १३३ ॥

अथ पुण्यश्लोकस्य पौत्रो भूपपरीक्षितो वज्रनाभं भ्रातृवत् स्वराजधान्यां सुखपूर्वकमरक्षीत्। ततः परितुष्टो वज्रनाभो मधुपुरीं द्रष्टुमियेष। राजा तं नीत्वा मथुरां जगाम। वज्रनाभो विलोक्य मथुरास्थितिं भृशं व्यसीदत्। अथाऽभिमन्युनंदनो महर्षिं गार्ग्यं शाण्डिल्यं कुलपुरोहितं समाहूय तं संपूज्य च तस्मै सर्ववृत्तमावेदयामास। तच्छ्रुत्वाऽतितुष्टो गुरुर्यदुनंदनपौरोहित्य मङ्गीचकार। अथेन्द्रप्रस्थं निवृत्ते सम्राजि गुरुवर्यानुमत्या राजा ध्वस्तां यदुपुरीं पुनरावासयामास। अथैकदा भूपालोयादवेन्द्रस्य श्रीकृष्णचन्द्रस्य महिमानं समाकर्ण्य प्रमुदितमना मुनिवरपृच्छत्। ऋषिराज! कथमुन्नतिर्भवेदस्य व्रजमण्डलस्य? निशम्यैतद् भूपवचनं गुरुरुवाच। राजन्! पुरा मथुरापुरी भूपाला मधुविद्याविशारदा अभूवन्। उग्रसेनपर्यन्त्वेषा प्रथाऽऽसीत् प्रचलिता किन्तु कंसोऽभवदसुरमार्गानुसारी येन सर्वं विनष्टम्। तच्छ्रुत्वा राजाऽवदत्। कृपासागर! देहि मह्यं मधुविद्याम्। ततो मुनिवरो नृपं दीक्षितं कृत्वा तस्मै दध्यङ्ङाथर्वणोपदिष्टां विद्यां प्रपच्छन्

प्राह । राजन् ! मासा द्वादश । तेषामधिष्ठातारो द्वादशादित्याः । तेषां प्रीत्यै ऋचयाऽनया कर्तव्यो होमः ।

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाꣳ हसस्पतये स्वाहा ॥ यजुः अ० २३ । ३१ ॥

मधुमतीर्न इषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा स्वाहोर्वन्तरिक्ष मन्वेमि ॥ यजुः अ० ७।२॥

मधु वाता ऋतायते मधु क्षरंति सिन्धवः माध्वीर्नः सं त्वोषधीः ॥ मधुमान्नो वनस्पतिर्मधुमाँऽ अस्तु सूर्यः । माध्वीर्गावो भवंतु नः ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः । मधु द्यौरस्तु नः पिता ॥ यजुः अ० २३।२०।२८।२९॥

उपर्युक्त मंत्रैर्जुहुयात् । सायं प्रातर्वाऽऽदित्यसम्मुखः प्रार्थयेत् । एषा स्वेष्टदेवतासन्निधौ प्रार्थनाऽपि शोभनफलप्रदा भवति । मधुविद्यार्थी मधुरं वदेत् । सर्वभूतहितेरतः स्यात् । स्वप्नेऽप्यनृतं न वदेत् । मनसा वाचा कर्मणा च हिंसां निन्दां द्रोहं च नाऽचरेत् । रूक्षं पर्युषितं उच्छिष्टं अन्नं नाऽद्यान्न वा दद्यात् । रविवासरे सलवणभोजनं न कुर्यात् । आदावन्ते च मधुरं ग्रासम-

श्रीयात् । अमावास्यां पितृदिनं ज्ञात्वा कुमारेभ्यः कुमारीभ्यश्च मिष्टान्नं दद्यात् । पूर्णमासीं देवदिनं ज्ञात्वा परित्यज्याऽनृतभाषणं सत्यनारायणादि व्रतं कुर्यात् । ब्राह्मणानतिथीन् सुवासिनीवर्गं च मिष्टान्नं भोजयेदित्यादिश्य वृन्दावनं जगाम । ततो राजा मुनिसकाशान्मधुविद्यां गृहीत्वा सुखसमन्वितः तत्प्रभावेण धनधान्यसंतानसंयुतो कृतकृत्यश्च बभूव । प्रजा अपि तत्पुण्यप्रभावेण सर्वसमृद्धियुता अभूवन् । यद्यपि विषयोऽयमतीन्द्रियस्तथाऽप्युक्तं अथैकदा भूपतिर्गुरुदर्शनार्थं वृन्दाविपिनमगात् । तत्र मुनिना सत्कृतस्तस्थौ । अथाऽन्येद्यू राजा पप्रच्छ । देव ! कृपया नीतिशिक्षां देहि तच्छ्रुत्वा मुनिरुवाच । तत्रादौ स्वेष्टदेवं प्रणम्य ततः कार्याणि समारभेत । ब्राह्मे मुहूर्ते समुत्थाय सदैव धर्मार्थावनुचिन्तयेत् । दानाध्ययनादिसत्कर्मभिर्दिवसमवन्ध्यं कुर्यात् । कालविभागं कृत्वा सदैव नियतसमय एव कार्याणि कर्तव्यानि । अकालसहं कार्यं विलम्बेन न कुर्यान्मेधावी । कपर्दिकोपेक्षी धनी क्षणोपेक्षी विद्वान् वीर्यविन्दूपक्षी च बलवान्न भवति । शरीरमाद्यं खलु धर्मसाधनं गणयेत् । लाभकाले कलहं भोजनवेलायां च क्रोधं परिहरेत् । अति नम्रेऽतिप्रियंवदे च न विश्वसेत् । स्वातंत्र्यदायिनीं कृषिं राजसेवातो विशेषमहत्त्वशालिनीं गणयेत् । यथाशक्ति दानं दद्यात् किंतु स्पर्धां कृत्वा मासीदेत् । लक्ष्मीर्न्यायं विना नाऽऽयाति गृहकलहं विना च न

गच्छति । मितभाषी, मितभोजी, मितभोगी, मितव्ययी च कष्टं नाऽऽप्नोति । धनं दद्यात् किंतु प्रतिभूर्न भवेत् । अन्यायोपार्जितं धनं पूर्वसंचितमपि नाशयति । वरमद्य कपोतः श्वोमयूरात् । स्त्रियै स्वातंत्र्यं दत्त्वा कष्टं न क्रेतव्यम् । योऽधिकं कुसीदं गृह्णाति स मूलधनमपि गमयति । फलानुमेयः प्रारंभो बुधो भवेत् । शत्रुं हस्तगतं विवशं कृत्वा तिष्ठेत् । बालकाय स्त्रियै च रहस्यं नाऽख्येयम् । बलवता सह वैरकरणं मृत्यवे निमंत्रणप्रेषणम् । शतं वद परमेकं मा लिख । आदौ साम ततो दानं ततो भेदोऽनंतरं च दण्डस्याऽवश्यकता भवति । गुह्यं दिवा निरीक्ष्य वक्तव्यं रात्रौ तु नाऽऽख्येयम् । चारचक्षुर्नृपो नाऽवसीदति । विजये संदिग्धे संधिप्रस्तावः सुखाय भवति । युद्धसमये शत्रुकृतां मायां सत्वरमपाकुर्यात् । भीतः सैनिकः स्वामिकार्यं नाशयति । विधर्मिणे शरणागताय विचार्य रक्षा देया । शत्रुमित्रोदासीनानां परिचितिः हितमावहति । स्वधर्मिणेऽधिकारं दद्यान्नहि परधर्मिणे । शत्रुषु विश्वासकर्ता चिरं न नन्दति । अवनतान् स्ववर्गीयानु-ज्ञातिदिनेषु मेधावी यथाशक्ति समुद्धरेत् । परकृतमुपकारं स्मरेन्नाऽपकारम् । कृतज्ञो भवेन्नहि कृतघ्नः । ईर्षाऽसूयावान् सदैव दुःखमनुभवति । सन्मित्रवानसाध्यानप्यर्थान् सुखेन साधयति । प्रभुतामवाप्य गर्वं न कुर्यात् । संसारं स्वप्नोपमं च मत्वा परपीडां परित्यजेन्मतिमानिति कथयित्वा मुनिवरो विरराम ।

ततो राजाऽब्रवीत् । देव ! यादवकुलक्षयं विचिन्त्य विभेम्यहं पापेभ्यः । अतः कृपया कर्मविपाकं श्रोतुमिच्छामि । तच्छ्रुत्वा गुरुरुवाच । नरनाथ ! समीचीनोऽयं संकोचः । मार्कण्डेयमुनिमुखाद्यच्छ्रुतं तच्छ्रावयिष्यामि ।

वज्रनाभः—गुरो ! नरकविषये कथय ?

शाण्डिल्यः—राजन् ! नृत्यति क्लेशं प्रापयतीति नरकः । कूटसाक्षी, पक्षपाती, अनृतभाषी, भ्रूणहा, गोघ्नः, ब्राह्मणहंता, स्त्रीघातकः, सुरापी, स्वर्णस्तेयी, भूतद्रोही, संसर्गीचैतेषामेते रौरवं नरकं यांति । राजद्रोही, वैश्यघाती, गुरुतल्पगः, स्वसृगामी, स्त्रीविक्रेता, सेवकदुःखदाता, गुरुद्रोही, वेदविदूषकः, देवनिन्दकः अगम्यागामी चैतेकुंभीपाकनरके पतंति । अतिथिसत्कारविरोधी बाणकर्ता, असत्प्रतिग्रहोपजीवी, अयाज्ययाजकः, मर्यादा-दूषकश्चेतेऽधोमुखं नरकं यांति । रसविक्रेता, गोविक्रेता, कन्या-विक्रेता ब्राह्मणोऽपिचाऽधोमुखे नरके पतति । मित्रघ्नः, अंगारदाही, वेश्याधनोपजीवी, विहगविक्रेता, मधुहा, ग्रामहंता वृथा वनच्छेदी चैतेऽसिपत्रं नरकं यांति । भूतद्रोही, परधनहर्ता, परकलत्रहारी, पराऽपत्यहर्ता चैते तामिस्रे नरके पतंति । मातृ-द्रोही, पितृद्रोही, स्वोदरार्थं प्राणिवधकर्ता मिथ्या कलंकारोपी चैते कालसूत्रं नरकं प्राप्य कष्टान्यनुभवंति ।

वज्रनाभः—प्रभो ! पापो येन येन पापेन यां यां योनिं प्राप्नोति तदपि कथय ?

शांशिल्यः—नरकान्मुक्तः अध्यायव्यलीकं कृत्वा तज्जायां च मनसा वांछन् गर्दभो जायते । मित्रापकारी शारिका माता पितरौ पीडयित्वा कच्छपयोनिं लभते । स्वामिनोऽहितं कृत्वा वानरयोनिमेति । न्यासापहारी कृमिः, असूयको राक्षसः, विश्वासघाती मीनः, यवचौरो मूषकः, परस्त्रीगामी वृकः, भ्रातृभार्याप्रसंगी कोकिलः, यज्ञदानविवाहेषु विघ्नकर्ता कृमिः, पूज्यस्त्रीगमनकर्ता शूकरः, अदत्त्वा स्वयं भोक्ता वायसः, अशस्त्रं हत्वा खरः, स्त्रीबालहंता कृमिः, विद्यापहारी मूकः, छिद्रान्वेषी पिपीलकः, उत्कोचग्राही च सर्पो भवति । एवमसंख्याता नरकाः संख्यातीता योनयोऽगणितानि च पापानि संति । प्रत्यक्षे मृत्युर्यमो रोगा यमदूता यातनाश्च नरकाः संति । परोक्षे यमः शास्ता चित्रगुप्तो मंत्री संयमिनी तस्य दक्षिणस्यां दिशि नगरी दुःखभोग-स्थानानि च नरकाः कथ्यंते ।

वज्र०—देव ! केन कर्मणा को रोगो भवति कृपया कथय

शांडिल्यः—(१) यः किल धनवानपि कुटुम्बं न पालयति न च सुपात्रेभ्यः किमपि ददाति प्रत्युत देववेदगुरून् निन्दति सोऽन्यस्मिञ्जन्मनि दरिद्रो भूत्वा क्षुत्पिपासापीडितोऽत्यन्तं कष्टं लभते । अतो यथाशक्ति प्रतिदिनं दद्यात् ।

(२) यः पतिव्रतामृतुस्नातां पत्नीं नोपगच्छेत् । साध्वीं परपत्नीं वा स्वधर्माच्च्यावयेत् स मृतस्तामिस्राख्यं नरकमवाप्य पुनर्मानुषयोनिमवाप्याऽर्शरोगपीडितो भवति ।

(३) यो गोपालनविरोधी भवति । गोदातारं च निन्दति । स मरुस्थले क्रमेलकयोनिमवाप्नोति । ततश्च मानुषयोनिमवाप्य बहुपुत्रोऽपुत्रो वा जायते ।

(४) यो हि तृषार्तां गां वारिपानरतां निवारयति । जलदानविरोधं च करोति । सोऽनेनैव पापेन स्वल्पजीवितं संतानमवाप्नोति । अपुत्रो वा भवति ।

(५) गुरुनिन्दकः, हरिहरभक्तनिन्दकः, मातृपितृनिन्दकः, वेदनिन्दकः, स्वामिनिन्दकः, धर्मनिन्दकश्चैते पुरीषाख्ये नरके पतंति, ततश्च मानुष्यमवाप्य उन्मादरोगग्रस्ताः भवंति ।

(६) दीपकचौरः, कामतः परस्त्रीप्रेक्षकः, पररतिदर्शनकारी च नेत्ररोगेण पीडितो भवति ।

(७) यस्तु ऋतुस्नातां भार्यां क्रोधादप्रीत्या वा नोपगच्छति । स मृतः पूयशोणितसंमिश्रे नरके पतति । ततश्च मानुषत्वमवाप्य असरीरोगाक्रान्तो भवति ।

(८) यः पूज्यपूजाऽतिक्रमं करोति । गुरुं, मातरं, पितरं, ब्राह्मणं, वृद्धं, साधुं, देवप्रतिमां च दृष्ट्वा नाऽभिवादयेत् । स श्मशाने वृक्षो जायते । ततश्च मनुष्यो भूत्वा कुब्जत्वमवाप्नोति ।

(२३) जीवंतं पतिं त्यक्त्वा परपुरुषरता नारी नरककष्ट-मनुभूय मानुषी भूत्वा च वेश्या भवति ।

(२४) या खलु यौवनगर्विता विरूपं सदाचारिणं पतिं दिवा निन्दति रात्रौ च शय्यां न भजते आज्ञप्ता च रुष्टा भवति सा जन्मान्तरं प्राप्य वैधव्यदुःखदुःखिता भवति ।

(२५) पशुहिंसकः, पुराणकथाबाधकः, निषिद्धप्रतिग्रही, शास्त्रार्थे पक्षपाती चैतेश्वासरोगग्रस्ता भवंति ।

(२६) यः किल लोभाद् द्वेषाद्वा परपीडाप्रदायको भवेत्, यस्तु प्रजानां मर्मव्यथां जनयेत् स मृतो दुःसहं नरकमधिगम्य कर्मान्तेऽतिदारुणेन हृद्रोगेण पीडितो भवति ।

वज्रनाभः—देव ! कृपया संक्षेपेण प्रायश्चित्तमपि कथय ?

शांडिल्यः—राजन् ! गजं विहाय पशुघाती हीनाङ्गो भवति। गोदानाद् गायत्रीजपाद् गंगास्नानाच्च शुद्ध्यति । गोत्रहा, गोवधी च कुष्ठी निर्वंशश्च जायते । शतप्राजापत्य व्रतं चरित्वा ब्राह्मणाय भूमिं दक्षिणां दत्त्वा च रामायणमहाभारते शृणुयात् । पितृहंता । चेतनाहीनो भवति। राजदंडाऽभावे स त्रिंशत् प्राजा-पत्यानि कृत्वा पक्षपरिमितां स्वर्णनावं कारयित्वा ताम्रपात्रे रूप्यमयं कुंभं स्थापयित्वा निष्कपरिमितं स्वर्णनिर्मितं विष्णुं पटवस्त्रेण संवेष्ट्य विधानतः पूजयेत् । ततस्तत् सर्वं ब्राह्मणाय

दत्त्वा तं विसर्जयेत् । अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात् । मातृहंता अंधो भवति । पितृहत्यावत् प्रायश्चितं कुर्यात् । बालघाती मृतवत्सो भवति । ब्राह्मणोद्वाहनं यथाविधि हरिवंश-श्रवणं च कुर्यात् । महारुद्रजपान् कारयेत् । तद्दशांशेन अयुत-संख्यक दूर्वया च हुत्वा दक्षिणासहितनिष्कपरिमितैकादशस्वर्णानि द्विजानुसारत एकादशपलानि च दद्यात् । अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् । तत आचार्यो वरुणदैवतमंत्रैर्दंपती: स्थापयेत् । यजमान आचार्याय वस्त्रालंकरणानि दद्यात् ।

ब्रह्महा पाण्डुकुष्ठी भवति । यजमानश्चतुर्दिक्षु पंचपल्लव पंचवर्णसंयुक्तान् चतुरः कलशान् संस्थाप्य तन्मध्ये कुंभोपरि रौप्य-मष्टदलपद्मं न्यस्य तदुपरि पलार्द्धपरिमित सुवर्णनिर्मित दशहस्तं चतुर्मुखं विन्यस्य प्रत्यहं त्रिकालं पुरुषसूक्तेन पूजयेत् । ततः पूर्वादि कुंभेषु ब्रह्मचारिणो ब्राह्मणा ऋग्वेदप्रभृतीन् स्वस्ववेदान् शनैः शनैः पठेयुः । ततो मध्यकुंभे तिलाक्तघृतहेमाभिर्ग्रहशांति पुरस्सरं दशांशेन होमं कुर्यात् । ततो ब्राह्मणो द्वादशाहेनेदं कर्म समाप्य तत्र पीठे यथाविधि यजमानमभिषिंचेत् । ततो यजमानो ब्राह्मणेभ्यो यथाशक्ति गोभूमिहेमतिलोदकानि दत्त्वा कुंभादीन् आचार्याय निवेदयेत् ।

भ्रातृहा मूको भवति । चान्द्रायणव्रतं चरित्वा—

सरस्वति ! जगन्मातः ! शब्दब्रह्माधिदेवते !
दुष्कर्मकरणात् पापात्पाहि मां परमेश्वरि !

इमं मंत्रमुच्चार्य पलपरिमितसुवर्णसहितपुस्तकं ब्राह्मणाय दत्त्वा तं विसर्जयेत् । मार्जारहा पीतपाणिर्भवति । निष्कमितस्वर्णनिर्मितं कपोतं दद्यात् । राजहंता क्षयरोगी भवति । गोभूमिहिरण्यमिष्टान्नजलवस्त्राणि घृतधेनुं तिलधेनुं च दद्यात् । वैश्यहंता रक्तार्बुदी भवति । चत्वारि प्राजापत्यव्रतानि चरित्वा सप्तधान्यान्युत्सृजेत् । शूद्रहन्ता दण्डापतानकः । एकं प्राजापत्यं चरित्वा सदक्षिणां धेनुं दद्यात् । स्त्रीहंता अतिसारी भवति । दशाश्वत्थवृक्षान् रोपयेत् । शर्कराधेनुं दद्यात् । शतं ब्राह्मणांश्च भोजयेत् । अभक्ष्यभोक्ता । कृमिकोदरः । भीमपंचकोपवासं कुर्यात् । अस्पृश्यस्पृष्टान्नभोक्ता । कृमिलोदरः । त्रिरात्रमुपवसेत् । गर्भपातकर्ता । यकृत्प्लीहजलोदररोगी । पलत्रयमितसुवर्णरौप्यताम्रान्वितजलधेनुदानं कुर्यात् । द्रव्ये सति कदन्यदः । मंदोदराग्निः । प्राजापत्यत्रयं कृत्वा शतं विप्रान् भोजयेत् । धूर्तः अपस्मारी । ब्रह्मकूर्चमयीं धेनुं दत्त्वा सदक्षिणां गां दद्यात् । प्रतिमाभंगकारी अप्रतिष्ठो भवति । वत्सरत्रयपर्यंतं अश्वत्थसेचनानंतरं गृह्योक्तविधिना समां गम्यामुद्वाहयेत् । गणपतिं च संस्थापयेत् । चाण्डालीगामी हीनमुष्कः । मातृगामीवत् प्रायश्चित्तं कुर्यात् । पितृष्वसृगंता दक्षिणांशव्रणी ।

शक्तितोऽजां दद्यात् । पुत्रजायाऽभिगामी कृष्णकुष्ठी । स्वसुतागमनप्रायश्चित्तार्द्धं घृताक्ततिलकरणकदशांशहोमं च कुर्यात् । भ्रातृजायाभिगामी गुल्मकुष्ठी । मातुलानीगामी पृष्ठकुब्जः । कृष्णाजिनं दत्त्वा गंगास्नानं सपादलक्षगायत्रीजपं च कुर्यात् । मातृगामी लिंगहीनः । उत्तरतः कृष्णमालं कृष्णवस्त्राच्छादितं कुंभं विन्यस्य तदुपरि कांस्यपात्रं निष्कषट्कपरिमितसुवर्णनिर्मित नरवाहनकुबेरं पुरुषसूक्तेन यजेत् । अथर्ववित् ब्राह्मणस्तत्र अथर्वोक्तकर्म कुर्यात् । ब्राह्मणाय विंशतिनिष्कपरिमितसुवर्णनिर्मित पुत्रिकां निष्पापोऽहमिति ब्रुवन दद्यात् ।

निधीनामधिपो देवः शंकरस्य प्रियः सखा ।
सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु ॥

इति मंत्रेण तं कुबेरमाचार्याय दद्यात् । कुमारीगंता व्याघ्रादिहतः, परकन्यां विवाहयेत् । गुरुघाती शय्यामृतः । निष्कमितसुवर्णनिर्मितपात्रस्थितविष्णुविभूषितशय्यादानं कुर्यात् ।

गंगास्नानं धेनुदानं तीर्थस्नानं तथैव च ।
जपोपवासौ होमाद्याः कार्याः पापाऽपनुत्तये ॥

वज्रनाभः—देव ! श्राद्धं कर्तव्यं न वा ?

शाण्डिल्यः—राजन् ! वयमास्तिकाः वेदानुयायिनः परलोकमंतारश्च । अतोऽवश्यं कर्तव्यम् ।

वज्रनाभः—देव ! किमत्र प्रमाणम् ?

शाण्डिल्यः—राजन् ! समाकर्णय ! जीवन्तः पितरो बर्हिषदः । मृताश्चाग्निष्वात्ता भवंति ।

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । तआगतावसा शंतमेनाथा नः शं योररपोदधात ।

यजुः अ० १९ । ५५ ॥

म० भाष्यम्—अतो बर्हिषदां पितॄणां तृचः । बर्हिषदः बर्हिषि दर्भे सीदंतीति बर्हिषदः । हे बर्हिषदः पितरः ते यूयं ऊत्या अवनेन निमित्तेन अर्वागागत आगच्छत । किमर्थमिति चेत् । वो युष्माकमिमा इमानि हव्या हव्यानि वयं चक्रिम कृतवन्तः तानि यूयं जुषध्वं सेवध्वम् । अथाऽनंतरं शंतमेन सुखयितृतमेन अवसाऽन्नेन तर्पिताः संतो नोऽस्माकं शं सुखं रोगशमनं यो भयपृथक्करणमरयः पापाभावं च दधात धत्त स्थापयत ।

आहं पितॄन्त्सुविदत्राँ २॥ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ५६ ॥

अहं पितॄन् आ अवित्सि आभिमुख्येन वेद्मि विदितवान् । कीदृशान् पितॄन् सुविदत्रान् सुष्ठु विशेषेण ददतीति सुविदत्राः तान् कल्याणदानान् । किं च वेवेष्टि विष्णुः तस्य विष्णोः

व्यापनशीलस्य यज्ञस्य 'यज्ञो वै विष्णुः' । १ । १ । ३ । १ । इति श्रुतेः तस्य नपातं विक्रमणं च वेद्मि । नास्ति पातो यत्र स नपातो देवयानपथः । यत्र गतानां पातो नास्ति । विविधं-क्रमणं विक्रमणं गमनागमनं यत्र स विक्रमणः पितृयानपथः । यत्र गतानां पुनर्भोगान्ते पुनः पतनं यज्ञसंबंधिनौ देवयानपितृयाणौ पंथानौ वेद्मीत्यर्थः । उदूगामिनः पितॄंश्च । अतो ब्रवीमि । ये वर्हिषदः पितरः स्वधया सवनीयलक्षणेनाऽन्नेन सह सुतस्य अभिषुतस्य सोमस्य पित्व पानं भजंतः भजंते सेवंते । ते इह यज्ञे आगमिष्ठाः आगच्छंतु ।

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । त आगमंतु त इह श्रुवन्त्वधिब्रुवंतु तेवन्त्वस्मान् ॥ ५७ ॥

हे पितरः ! इह यज्ञे आगमंतु आगच्छंतु । ते श्रुवंतु अस्मद्वचः शृण्वंतु । श्रुत्वा च अधिब्रुवंतु पितृभिः पुत्राणां यद्वक्तव्यम् तद् वदन्तु । ते अस्मानवंतु । कीदृशाः पितरः । प्रियेषु अभिरुचि तेषु हविःषु उपहूता सोम्यासः सोम्याः । कीदृशेषु प्रियेषु वर्हिष्येषु वर्हिषि भवानि बर्हिष्याणि तेषु बर्हिषि सादितेषु तथा निधिषु निधिभूतेषु निधिवत् स्थापनीयेषु ॥

आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान् ॥५८॥

चतस्र ऋचोऽग्निष्वात्तानां पितॄणाम् । नोऽस्माकं पितरः देवयानैः पथिभिर्मार्गैः आयन्तु आगच्छंतु । देवैः सह यांति पितरो येषु ते देवमार्गाः तैः । कीदृशाः पितरः सोम्यासः सोम्याः सोमपानार्हाः । अग्निष्वात्ताः अग्निना स्वात्ताः स्वादिताः अग्निर्यान् दहन् स्वादयति । श्रौतस्मार्तकर्मानुयायिनः । येषां पुत्रादिभिः एतत्कर्माऽनुष्ठीयते । तदुक्तम्—

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥

किं च पितर आगत्याऽस्मिन् यज्ञे स्वधयाऽन्नेन मदन्तस्तृप्यन्त-स्तुष्टाः संतो नोऽस्मानधिब्रुवन्तु अधिकान् वदंतु । तद्वाक्यात्तथैव वयमधिकाः स्यामेत्यर्थः । ते पितरोऽस्मानवंतु पालयंतु ।

अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः । अत्ता हवीᳪंषि प्रयतानि बर्हिष्यथा रयिᳪं सर्ववीरं दधातन ॥ ५९ ॥

हे अग्निष्वात्ताः पितरः ! इह यज्ञे यूयमागच्छत । आगत्य च सदः सदः प्रतिगृहं सदत उपविशत । कीदृशा यूयम् । सुप्रणीतयः शोभना प्रणीतिः प्रणयनं येषां ते । ततः सदस्युप-विष्टाः सन्तः हवींषि अत्त भक्षयत । कीदृशानि हवींषि बर्हिषि दर्भे प्रयतानि नियमपूर्वकं स्थापितानि प्रकर्षेण यम्यंते नियम्यंते

तानि प्रयतानि अथानंतरं तृप्ताः संतः सर्ववीरं रयिं दधातन स्थापयत । सर्वेवीरा वा यत्र तम् ।

ये अ॒ग्नि॒ष्वा॒त्ता ये अन॑ग्निष्वात्ता मध्ये॑ दि॒वः स्व॒धया॑ मा॒दय॑न्ते । तेभ्य॑ः स्व॒राडसु॑नीतिमे॒तां य॑थाव॒शं त॒न्वं कल्पयाति ॥६०॥

ये पितरः अग्निष्वात्ता अग्निना दग्धाः विधिवदौर्ध्वदेहिकं प्राप्ताः । ये चाऽनग्निष्वात्ता न अग्निना स्वादिताः अदग्धाः श्मशानकर्म न प्राप्ताः सन्तः दिवः स्वर्गस्य मध्ये स्वधयाऽन्नेन स्वकर्मोपार्जितेन मादयन्ते तृप्यंति सुखं सेवंते । स्वराट् स्वेनैव राजते स्वराट् यमः तेभ्यः पितृभ्योऽर्थे यथावशं वशोऽभिलाषः यथाकाममेतां मनुष्यसंबंधिनीं तन्वं शरीरं कल्पयाति कल्पयतु । तेभ्यो नरशरीरं यमो ददात्वित्यर्थः । कीदृशं तन्वम् । असुनीतिम् असून् प्राणान् नयति प्राप्नोति इत्यसुनीतिः प्राणयुक्ता चिरकाल-जीविनीत्यर्थः । ते यथा पुनः स्तंभनं कुर्वन्ति ।

अ॒ग्नि॒ष्वा॒त्तानृ॑तु॒मतो॑ हवामहे नाराशं॒से सो॑मपी॒थं य आ॒शुः । ते नो॒ विप्रा॑सः सु॒हवा॑ भवंतु व॒यꣳस्या॑म पत॑यो र॒यी॒णाम् ॥ ६१ ॥

अग्निष्वात्तान् पितॄन् वयं हवामहे आह्वयामः । कीदृशान् । ऋतुमंतः ऋतवो विद्यंते येषु ते ऋतुमंतः तानृतुयुक्तान् आह्वयामः । ये पितरो नाराशंसे चमसे सोमपीथं सोमपानमाशुः

अश्नंति स्म । ते पितरो नोऽस्माकं सुहवाः स्वाह्वाना भवंतु । अस्मदाहूताः शीघ्रमायान्त्वित्यर्थः । एवं पितृष्वाहूतेषु वयं रयीणां धनानां पतयः स्वामिनः स्याम भवेम ॥

वज्रनाभः—देव ! स्वर्गलक्षणं कथय ?

शांडिल्यः—राजन् "स्वरिति गीयते इति स्वर्गः" ।

यन्नदुःखेन संभिन्नं, न च ग्रस्तमनंतरम् ।
अभिलाषोपनीतं यत्, तत् सुखं स्वः पदास्पदम् ॥

तत्र दिव्यानि भवनानि सर्वकामफलैर्वृक्षैः शोभितानि पुण्यान्युद्यानानि रुचिराणि विमानानि च संति । अप्सरोगणैः परितानि सुकृतिनो नरा यथासुखं तत्र विचरंति । सत्यवक्तारः, तपस्विनः, दयावंतः, क्षमापराः, यज्वानः, दानशीलाः, शूराः, ब्रह्मचारिणश्च तत्र गच्छंति । नृशंसाः पिशुनाः कृतघ्ना नास्तिका अभिमानिनश्च न यांति । रोगः शोकः जरा मृत्युः हिमादय ऋतुधर्माः ग्लानिः क्षुत् पिपासा च तत्रत्यान्न बाधते । एषा कर्मभूमिः सा च भोगभूमिर्वर्तते । तत्रत्याः परश्रियं दृष्ट्वा असंतोषं प्रकटयंतीत्येष एक एव तत्र महान्दोषोऽस्ति । अपरं च पुण्ये क्षीणे पुनर्मृत्युलोकं विशंति स्वर्गस्थाः ।

वज्रनाभः—देव ! वैकुण्ठलक्षणं कथय ?

शांडिल्यः—राजन् ! विविधा कुण्ठा माया विद्यतेऽस्य वैकुण्ठः (विष्णुरिति वैष्णवाचार्याः) । विविधा कुण्ठा गतेः प्रतिहतिः तस्याः कर्ता विष्णुरिति (शंकराचार्याः) । वैकुण्ठः साक्षाद्भगवान् विष्णुः श्रीकृष्णरूपेणाऽत्रावतीर्ण, अतः श्रीकृष्ण-भगवानपि वैकुण्ठः इति श्रीकृष्णोपासका आचार्याः । उक्तं च—

अमृतंशाश्वतं नित्यमनंतं परमं पदम् ।
हिरण्मयं मोक्षप्रदं ब्रह्मानंदसुखाह्वयम् ॥
न तद्भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तंते तद्धाम परमं हरेः ।
महात्मानो महाभागा भगवत्पदसेवकोः ।
ताद्विष्णोः परमं धाम यांति ब्रह्मसुखप्रदम् ॥

निशम्यैतन्मुनिवर्यवचनं कृतार्थोऽभवद्राजा । ततो दानमानादिभिः पूजिते गुरौ स्वसदनं च याते भूपतिः पुनाराजकार्येषु दत्तावधानो बभूव । मथुरा तस्य शासनसमये पुनः समृद्धिमवाप । राजा त्रिवर्गं सदाऽसेवत । नगर्यां तस्यां बहुश्रुता धर्मज्ञा आहिताग्नयो वेददेवगोविप्रभाक्तिपरायणा नराः स्वैः स्वैर्धनैश्च संतुष्टा अभूवन् । कामी कदर्यः नृशंसः राजद्रोही च कश्चिन्नासीत् । किम्बहुना । सर्वे नरा नार्यश्च धर्मशीलाः सुसंयता अभूवन् । राजा स्वयं प्रजानामावेदनश्रोता बभूव । मंत्री राजाज्ञामनुससार । राजा च मंत्रिमतं मन्यते स्म । न्यायालयस्थाः कार्यकारिण उत्कोच-

स्पर्शमपि नाऽकुर्वन्। मार्गे फलवंतो वृक्षानारोपयामास भूपालः। मार्गेषु पांथशालानां सर्वत्र सम्यक् प्रबंध आसीत्। सिंहव्याघ्र-वराहादि हिंस्रजंतूनां प्रजापार्थनेनैव हिंसां राजाऽकरोत्। वर्करा अपि भारं नीत्वा प्रजाहितमकुर्वन्। अंकितवृषभेभ्यः सर्वे एव घासदानमकुर्वन्। यथा चिकित्सालयेषु मनुष्यचिकित्सा भवति तथा पशूनामपि हितार्थं चिकित्सालयाः स्थापिता आसन्।

रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तथा।
योधानामपि संग्रहोऽथतुलया मानव्यवस्थापनम्।
साम्यं लिंगिषु दानवृत्तिकरणं त्यागः समानेऽर्चनं।
कार्याण्येत्र महीभुजां प्रशमनान्येतानि राज्ये नव॥

कुष्ठिनां पोषणाय ग्रामाद्बहिः निवासा रचिता आसन। अंध-शालासु विनैव याचनां प्रज्ञाचक्षुभ्र्योऽन्नं नागरिकाः प्रेषयामासुः। यथा बालकशिक्षाऽनिवार्या तथैव बालिकाशिक्षाऽप्यनिवार्याऽऽसीत्। दासप्रथाऽतिकष्टदायिनी न बभूव। रामराज्यवत् वज्रनाभराज्यं सर्वसुखनिधानं बभूव। राजा प्रजाजनान् पुत्रवत् पालयामास। प्रजा राजानं देवबुद्ध्या समपूजयन्। तस्मिन् भूपतौ शासति नरा नार्यः पशवो पक्षिणस्तु निर्भया आसन् एव किन्तु वृक्षा अपि छायावन्तः फलवंतः पुष्पिताश्च व्यराजन्त। पर्जन्यः कामवर्षी पृथ्वी च शस्यश्यामलाऽभवत्।

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवाऽवशिष्यते ॥

माता यस्य तु जानकी भगवती श्रीवद्रिलालः पिता ।
भ्राताऽऽज्ञापरिपालकः सुमतिमान् श्रीरामदत्ताऽऽभिधः ।
विद्वत्सु प्रथिता गुणाढ्यगुरवः श्रीशालग्रामाह्वयाः ।
तस्येयं रचनाऽऽशु तुष्यतु तया साम्बः शिवः शंकरः ॥

वसुग्रहनिधीन्द्वब्दे मार्गशीर्षे सितेदले ।
पूर्णमास्यां बुधेवारे ग्रन्थोऽयं पूर्णतामगात् ॥

इति श्रीराजस्थानमण्डलान्तर्गताजमेर्वभिजनेन दधीचिवंशावतंसेन त्रिपाठ्युपाख्यराजगुरु-पण्डित वदरीलालात्मजेन जानकीगर्भ-समुद्भवेन साहित्योपाध्यायेन काव्य-तीर्थेन शिवदत्त-त्रिपाठिना विरचितं श्रीकृष्णचरितं समाप्तम्

ॐ शांतिः शांतिः शांतिः

अथ श्रीकृष्णचरित्रे परिशिष्टम्

एकदा महर्षिः कृष्णद्वैपायनो* जान्हवीतटे विराजमान आसीत्। तत्राऽकस्माद् देवर्षिर्नारदः समुपागमत्। पाराशर्यः सहसोत्थाय तं प्रणिपत्य विधिवत् संपूजयामास। अथ कुशल-प्रश्नानंतरं मुनिवरो वेदव्यासस्य मानसीं व्यथां विज्ञाय प्रोवाच। ऋषिराज! महाभारते भवता युद्धवर्णनं कृतम्। संप्रति भगवतो वासुदेवस्य मंगलाद्यं, मंगलमध्यं, मंगलान्तं च श्रीकृष्णविरुदं

---

* तारुण्ये वेदव्यासः पृथ्वीप्रदक्षिणां चकार। यात्रायां स ईरान देशमपि ययौ। पारसीकपण्डितो मेहरजी मामवोचत्। यत्तस्य संक्षिप्तचर्चा पारसीकग्रंथेषु समुपलभ्यते। श्रीमद्भगवतो वासुदेवस्य गोलोकप्रस्थानंतरं कलिप्रसारमालोक्य व्यासमुनिः स्वशिष्यमण्डलीं धर्मप्रचारार्थं द्वीपेषु उपद्वीपेषु च संप्रेषयामास। अथ तच्छिष्या यत्र तत्र गत्वा तत्रत्यानितिहासान् संगृह्य च परमपूज्याय श्रीगुरुवर्याय समर्पयाम्बभूवुः। उत्तरध्रुवसमीपस्था लोकाः सूर्यमेव प्रधानदेवं मत्वा तं पूजयामासुः। शीतप्रधानेषु देशेषु अग्निरेव मुख्यदेवत्वमवाप। जलप्रचुरप्रदेशेषु वरुणदेवपूजा प्रचलिता बभूव। महाभा-रतलेखनसमये व्यासदेवो गणपतिं सस्मार। किं वदन्त्येषा सर्वत्र प्रसिद्धै-वाऽस्ति। सरस्वतीपूजा तु महाभारतस्य प्रथमश्लोकेनैव विज्ञायते।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥

वर्णय । पुराण-पुरुषोत्तमः सोऽवश्यं भवदीयां भवबाधामपनेष्यतीत्यभिधाय वीणापाणिर्मुनिर्यथाऽभिमतं देशं जगाम । अथ मुनिवर आद्यकवि श्रीवाल्मीकिमुनिकृतं मंगलमयं श्लोकयुग्ममस्मरत् ।

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौंचमिथुनादेकमवधीः काममोहितम् ॥
जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन् गुणात्मना ॥

सोऽथ वेदमातरं गायत्रीं ध्यात्वा "जन्माद्यस्य यत" इति ब्रह्मसूत्रमुपक्रम्य च श्रीमद्भागवताख्यं महापुराणं रचयामास । वेदेषु कर्मकाण्ड प्रधानो यजुर्वेदः । तस्य देवता ब्रह्माऽस्ति, 'नमोब्रह्मणे नमस्ते वा यो' । इत्यादि श्रुतिवाक्यानि प्रमाणम् । उपासना प्रतिपादकः सामवेदस्तस्य मुख्यदेवता विष्णु विद्यते । वेदानां सामवेदोऽस्मीति, भगवद्वचनात् । ज्ञानकाण्डनिरूपक ऋग्वेदः । तस्य प्रधान देवता महेश्वरः । विद्याकामस्तु गिरिशमिति भागवते व्यासवाक्यम् । अथर्ववेदे प्रकृतिपरिचयात् तस्य प्रधानदेवता शक्तिरभवत् । इत्थं चतुर्णां वेदानां चतस्रो देवताः प्रधानाजाताः । ततः कृष्णयजुषः सूर्योपासनया प्रस्फुरणात्तस्य प्रधानदेवता सूर्योऽभवत् । गृह्यसूत्रकाराणां याज्ञवल्क्यादिस्मृतिकाराणां चादेशेन गणपतियूजनारंभो जातः । देवतेयमुपनिषत्सु प्राधान्यमवाप । एवं पंचदेवोपासना प्रचचाल । श्रीमान् रघुपतिः

स्वानुजाय भरताय राजप्रातिनिधि स्वरूपे पादुके प्रददौ । अनेन चरणपूजा प्रचारमवाप । यथा—

पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ॥ वा० रा० ॥

अथ विजयकामो रघुनंदनः समाप्ते सेतौ तत्र सैकतं शिवलिङ्गं रचयित्वा तं सम्पूज्य च पुनर्लंकां प्रतस्थे । ततः कृतार्थः समीतः पुष्पक विमानमारुह्य निवर्तमानो वैदेहीमुवाच । प्रिये ! पश्य पश्य !

अत्र पूर्वं महादेवः प्रसादमकरोद्विभुः ।
सेतुबंध इतिख्यातो महापातकनाशनः ॥ वा० रा० ॥

महाभारते बहुषु स्थलेषु शिवभक्तिर्लिखिताऽस्ति । श्रीमद्भागवतकारः शिवार्चनविरोधं नैच्छत् । अतएव तेन दक्षयज्ञप्रकरणं लिखितम् । शिवविरोधिनो दक्षप्रजापतेः तत्सहायकानां च कीदृशी दुर्दशा जाता । विवाहात् पूर्वदिने श्रीमती रुक्मिणी गौरीपूजनार्थं देवीमंदिरमगात् । ततो यदुपुंगवस्तां जहार । अनेन देवीपूजनं सिद्धमेव । स्यमंतकमणिमानेतुं हरिर्यदा जांबुवतो गुहां प्रविवेश तदाऽनागतं प्रभुं ज्ञात्वा स्वयं रुक्मिणी शोचति स्म ।

दुर्भगाया नमे धाता नाऽनुकूलो महेश्वरः ।
देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ॥

निषादराजसुत एकलव्यो गुरुवर्यस्य श्रीद्रोणाचार्यस्यमृण्मयीं

मूर्तिं रचयित्वा तां पूजयन् धनुर्विद्याऽभ्यासं च कुर्वन्नप्रतिमधनुर्धरो बभूव। तत्रादौ ज्ञाननिधिर्महर्षिः कपिलदेवो लोकोपकाराय षड्विंशतितत्त्वनिरूपणसमेतं सांख्यशास्त्रं प्रणिनाय। ततो महर्षिर्गौतमः षोडशपदार्थैरेव जीवेश्वरादिसमस्तपदार्थप्रतिपादनपुरस्सरं न्यायशास्त्रप्रणयनमकरोत्।

अथ महामुनिः पतंजलिरष्टभिः साधनैः संपन्नं योगशास्त्रं रचयित्वा मुक्तिमार्गं परिमार्जितं चकार। ततो मुनिवरः कणादः षड्भिः पदार्थैः कार्यकारणसिद्धिपूर्वकं जीवानां परमहितावहं वैशेषिकशास्त्रं रचयामास। अथ मुनिराजो जैमिनिः कर्मोपासनाज्ञानाख्यैस्त्रिभिः काण्डैः समेतं वेदमूलकं मीमांसाशास्त्रं विरच्य यज्ञाऽनुष्ठानद्वारा स्वर्गादिलोकप्राप्तिं प्रदर्शयामास। ततो ब्रह्मर्षिर्वेदव्यास एकमेवाऽद्वितीयं ब्रह्मेति व्याहरन्, ब्रह्मनिरूपणात्मकं ज्ञाननिधानं वेदान्तशास्त्रं प्रतिपादयामास। अत्रान्तरे वेदकल्पान् ब्राह्मणग्रंथान् समालंब्य नारदशाण्डिल्यादयः सुरर्षयो भक्तिसूत्राणि, आश्वलायनप्रभृतयो महामुनयः श्रौतसूत्राणि, गोभिलपारस्करादयो महर्षयो गृह्यसूत्राणि रचयामासुः। उपरिकथितशास्त्राणां ज्ञानामृतं पीत्वाऽगणितजीवा भवसागरं तेरुः। य आरोहति स एवाऽवरोहतीति प्राकृतानियमेन शनैः शनैः कल्पवृक्षोपमस्याऽस्य सनातनधर्मस्य शाखाः शुष्कतां प्राप्तुमारब्धाः। येषां महामुनीनां ग्रंथानधीत्य लोका मोक्षं करामलकवद् ददृशुस्तेषामेव

वंशधराः अज्ञानान्धकारे पतित्वा प्रतिपदं कष्टमनुभवितुं लग्नाः। एतदालोक्य तत्कालीना विद्वांसो यज्ञवेदिकास्थाने देवतायतनानि रचयित्वा तेषु वैदिकदेवतानां प्रतिमाः संस्थाप्य पूजयंतो ररक्षुर्धर्मम् । ततः प्रकृतिपुरुषयोर्वर्णनं सांख्यशास्त्रे दृष्ट्वाऽन्ये श्रीस्वयंभूसावित्र्योः श्रीलक्ष्मीनारायणयोः श्रीउमामहेश्वरयोः श्रीसीतारामयोः श्रीराधाकृष्णयोश्च मूर्तिस्थापनं कृत्वाऽर्चयितुं प्रारभंत । ध्यानमार्गं पतंजलिमुनेर्जगृहुः । "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति जैमिनिशासनमनुसृत्याऽऽहुतिस्थाने नैवेद्यं समर्प्य स्वेष्टदेवतां विविधोपचारैः पूजयित्वा प्रसादं कुटुम्बिभ्योऽभ्यागतेभ्यश्च दत्त्वाऽऽनंदमवापुः । तत्र द्वैतवादिनो हरिहरादिदेवभक्तिं चक्रुः । पश्चात् ज्ञानाऽधिकारिणश्चाऽद्वैतवादमवलम्ब्य रागद्वेषरहिताः सन्तः परमपदलाभं हस्तगतं चक्रुः । अत्रान्तरे व्यायामविद्याभ्यासवेदपाठविप्रसेवावेदान्तविचाराख्यानां पंचवकारादिकृत्यानां स्थाने शक्त्युपासकाः शूद्रा मद्यमांसमैथुनमिथ्याभाषणमार्जारवृत्त्यनुसरणाख्यानि पंचमकारात्मकानि कृत्यानि स्वीचक्रुः । तस्मिन्नेवाऽवसरे श्रीकृष्णविरोधिनां शिशुपालादीनां वंशजाः श्रीरामकृष्णाद्यवताराणां निन्दां कर्तुमारेभिरे । किं बहुना । बुद्धिमान्द्यात्ते निरीश्वरवादं प्रचारयितुमारब्धाः । न सुरोऽस्तीति योऽवदत् सोऽसुरसंज्ञामवाप । द्याति खण्डयति वेदवाक्यं स दैत्यनामको बभूव । रक्षति हिंसयाऽऽत्मानं स राक्षस

ख्यातो बभूव। पिंशिते गोमांसमश्नातीति पिशाचोऽभवत्। ततो नास्तिक्यप्रधाना लोका एवमवोचन्—

अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथाऽनिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः॥
न स्वर्गो नाऽपवर्गो वा नैवाऽऽत्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुंठनम्।
बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता॥
पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते॥
मृतानामिह जंतूनां श्राद्धं चेत् तृप्तिकारणम्।
गच्छतामिह पांथानां व्यर्थं पाथेयकल्पनम्॥
स्वर्गास्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।
प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते॥
यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥
यदि गच्छेत्परं लोकं देहादेष विनिर्गतः।
कस्माद्भूयो न चाऽऽयाति बंधुस्नेहसमाकुलः॥
ततश्च जीवनोपायो ब्राह्मणैर्विहितास्त्विह।
मृतानां प्रेतकार्याणि न त्वन्यद् विद्यते क्वचित्॥

त्रयो वेदस्य कर्तारो भाण्डधूर्त्तनिशाचराः ।
जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम् ॥
सर्व० द० सं० ॥

अत्रैव गणानां त्वेति मंत्रस्य विरुद्धार्थं कृत्वा वेदमंत्रार्थमनिन्दन् । तत्राऽश्वमेधप्रकरणे यजमानस्याऽश्वसंज्ञास्ति यजमानपत्नी चाऽश्वा कथ्यते । यदि यज्ञदिनेषु पत्नी ऋतुमती भवेत्तदा "ऋतौ भार्यामुपेयाद्" इति शास्त्रवचनमनुपालयन् यष्टा वीर्यदानं कुर्यात् । काऽत्राश्लीलता ? एवमेव श्रोत्रियाय अभ्यागताय महोक्षं महाऽजं वा निर्वपन्ति गृहमेधिन इति । यथाऽद्यत्वे पितृकार्ये वृषोत्सर्गं कुर्वन्ति गोवंशविवर्धनाय तथैव प्राचीनसमये श्रीपूज्यागमनं लक्षीकृत्य पर्वसु वृषभमजं वाऽङ्कितं चक्रुर्लोकाः । अंकितवृषभाद् गोवंशवृद्धिर्भवति । अंकितादजात् अजावंशवृद्धिर्जायते । अजप्राणरक्षार्थिनो जना यदि पालयेयुरजान् तथा तैर्भारोद्वहनादीनि कार्याणि कारयेयुस्तदाऽनायासेनैव तेषां रक्षा भवितुमर्हति । पार्वतीयप्रदेशेषु जनतायाः सर्वाणि कार्याण्यजा एव कुर्वन्ति । अत्राजशावकानामुपयोगो नाऽस्त्यत एव पालनमजानां निषिद्धं गणयन्ति लोकाः । अजाक्षीरपानात् अजशावकैः सह स्थित्या वा प्राणापहारिणः क्षयरोगस्य स्वत एव निवृत्तिर्भवति । अजवच्छब्दोच्चारणान्महादेवस्तुष्यति । नग्नप्रतिमापूजनमवलोक्यैव शाक्ताः शूद्रावाममार्गसृष्टिं चक्रुः । नग्नो नग्नं सवस्त्रश्च सवस्त्रं देवं पूजयेत् । ततोऽन्येऽपि चार्वाकादिनास्ति-

कमतपोषका अभूवन् । तेषां कथनम्—सर्वं क्षणिकम् क्षणिकम् । दुःखं दुःखम् । शून्यम् शून्यम् । क्षणभंगुरं विश्वमिति कथयांबभूवुः । जीवाऽजीवाख्ये द्वे तत्त्वे स्तः । तत्र बोधात्मको जीवः । अबोधात्मकस्त्वजीवः । ईश्वरविषये त्वेषामयं विचारः । भ्रान्ता ईश्वरमंतारः । उक्तं च—

कर्ताऽस्ति नित्यो जगतः स चैकः
स सर्वगः सन् स्ववशः स सत्यः ।
इमाः कुहेयाः कुविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वम् ॥

अथ विश्रामं प्राप्तेषु वेदध्वनिषु, यंत्रितेषु यज्ञेषु, सुप्तासु स्मृतिषु, रुष्टे रामायणे, भीतायां गीतायाम्, पलायनपरेषु च पुराणेषु "धर्म एषः सनातन" इति मनुराजर्षिवचनं कथनमात्रमवशिष्टमभून । किं बहूक्त्या—

किरातहूणांध्रपुलिंदपुल्कसा,
आभीरकंका यवनाःखसादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रयाः,
शुद्ध्यंति तस्मै प्रभविष्णवे नमः ॥

यस्य भगवतः प्रशंसायां वीतरागः श्रीशुकाचार्य एवमाह तं पुरुषोत्तमं श्रीयदुकुलनलिनदिनेशं तु भ्रान्तबुद्धयो नरकगामिनं श्रीबलभद्रं च स्वर्गाधिकारिणमलिखन् । सनातनधर्मस्त्वेवमाह—

"विद्वेषादपि गोविंदं दमघोषात्मजः स्मरन्। शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः"। एवमधर्मप्रधाने कलौ श्रीसदाशिवगणेष्वेकः परमशैवः समवतीर्य सोऽथशंकराचार्य संन्यासदीक्षां जग्राह। निगमागमपारगो वेदान्तविद्यावारिधिः स श्रीगीताब्रह्मसूत्रदशोपनिषदामद्वैतसिद्धान्तपुष्टिकरं भाष्यं रचयित्वा दिग्विजयं कुर्वन्नुज्जयिन्यां सुधन्वभूपालसभायां नास्तिकैः सह शास्त्रार्थमकरोत्। यदा नास्तिकाः शब्दप्रमाणं नाङ्गीचक्रुस्तदा प्रत्यक्षप्रमाणेन स्वपितुः सिद्धिं कुरुत इति पूर्वपक्षं ररक्ष। ततो मातृवचनेन पितृसिद्धिर्भवतीति कथनेन नास्तिकान् पराजित्य वेदानां प्रामाणिकतामाचार्यः प्रदर्शयामास। अथ नास्तिकाः प्रोचुः। जले जीवः, स्थले जीवः वायौ जीवः, आकाशे जीवः, अन्ने जीवः, औषधे जीवः, वनस्पतौ जीवः, पत्रे जीवः, पुष्पे जीवः, फले जीवः, देहे जीवः, रक्ते च जीवः, किं बहुना सर्वत्र जीव एव दृश्यते। काऽऽस्ते ईश्वरः? अनादिकालादेतत् सृष्टिचक्रं परिभ्राम्यति। तच्छ्रुत्वाऽऽचार्योऽवदत्। भद्र! नैवं वद। जले ब्रह्म, स्थले ब्रह्म, वायौ ब्रह्म, आकाशे ब्रह्म, अन्ने ब्रह्म, औषधे ब्रह्म, वनस्पतौ ब्रह्म, पत्रे ब्रह्म, पुष्पे ब्रह्म, फले ब्रह्म, त्वयि ब्रह्म मयि च ब्रह्म। किं बहुना सर्वत्र ब्रह्मैव। तदव्यतिरिक्तं किमपि वस्तु नाऽस्ति। अत्र श्रुतिः—"सर्वं खल्विदं ब्रह्म, नेह नानास्ति किंचन"। अपरं च—

जले विष्णुः स्थले विष्णुः, विष्णुः पर्वतमस्तके।
ज्वालामालाकुले विष्णुः, सर्वं विष्णुमयं जगत्॥ स्मृतिः॥

जगदिदं सकर्तृकम् कार्यत्वाद् घटवत् "कारणाऽभावात्कार्याऽभाव" इति दार्शनिकानां निर्णयः। सूर्यस्य समयेऽभ्युदयं समये चाऽस्ताचलगमनं प्राणिनां क्रमपूर्विकां शरीररचनां विलोक्य च प्रतीतिर्जायते यदस्य विश्वस्य कोऽपि नियन्ताऽवश्यमेवाऽस्ति। नियन्तारं विना नियमो न चलति। सर्वेऽपि जीवाः स्वेच्छानुसारं फलं न लभन्ते। कर्मकरणे स्वातन्त्र्यं फलभोगे च पारतन्त्र्यमस्ति। उक्तं च—"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्"। सर्पो दण्डाकारोऽस्ति। स यदोपविशति तदा कुंडलाकारः संजायते। सर्पस्त्वेक एव। एवं यदा स "एकोऽहं बहु स्याम्" इतीच्छति तदा नानारूपधरो भवति। वस्तुतः स निर्विकार एव। वेदान्तिनो जीवब्रह्मणोरौपाधिकं भेदं मन्यन्ते। द्वैतवादिनश्च वास्तविकभेदम्। भद्र! "न तत्र वाग्गच्छति न चक्षुर्न मन" इत्यादीन्याप्तवाक्यानि प्रमाणभूतान्यत्र।

> इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
> मनसस्तु परा बुद्धिर्यो बुद्धेः परतश्च सः॥

चिदेव सत्यम् नाऽन्यत्। ब्रह्मैव सत्यम् प्रत्यक्षसिद्धम्। विश्वमेतद् ब्रह्मण्यारोपितम्। यथा रज्जुः रज्जुस्वरूपाऽज्ञानात् सर्पवत्प्रतिभाति तथा ब्रह्मस्वरूपाऽज्ञानात् विश्वं वस्तुवत् प्रतिभाति। प्रकृतिर्जीवश्चाऽपि पर्यवसाने ब्रह्मैव। ब्रह्मणोऽन्यत् सद्वस्तु नाऽस्ति। उक्तं च भगवद्गीतायाम्—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत !
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

यदि जगत् सत्यमस्ति तर्हि लोके कः स्थिरः ? मायैषा नर्तयति । संसारो दीर्घस्वप्नः । ज्ञानमेव समवलंबनीयम् ।

द्वितीयाऽप्रतीतौ नाऽनर्थः किन्त्वानन्दो महानिति ।
अत्र लौकिकदृष्टांतः स्त्रीवाक्येनेरितः श्रुतौ ॥
स्त्रिया वियुक्तस्तद्भेदं पश्यन् कष्टेन पीड्यते ।
आलिंगितस्तथैकत्वं प्राप्यानंदेन जीवति ॥

तच्छ्रुत्वा केचित्तु वेदमार्गं सत्यं मत्वाऽऽस्तिकाः अभूवन् । पक्षपातग्रस्ताश्च परित्यज्य शास्त्रार्थस्थानमितस्ततः पलायांचक्रिरे । ततो राजा मनुवचनमनुसृत्य प्रतिग्रामं देवमंदिराणि कारयामास । उक्तं च मनुना—

तडागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासंधिषु कार्याणि देवतायतनानि च ॥

विद्वांसो ब्राह्मणा यतः श्राद्धनिन्दोत्थिता तत्रैव गयाक्षेत्रे पितृणां विजयदुंदुभिं वादयामासुः । उत्कले श्रीजगन्नाथप्रसादस्य भेदभावं परित्यज्य चातुर्वर्ण्यस्य प्रीतिं विद्वांसो देशकालौ विचिंत्य प्रदर्शयामासुः ।

अथाऽऽचार्यः श्रीजगन्नाथरामनाथद्वारकानाथवदरीनाथानां पुण्यप्रदस्थलेषु विद्याप्रचारार्थं मठान् संस्थापयामास । तेषु क्रमेण संन्यासाश्रमं प्राप्ता विद्वांसो महात्मानो न्यवसन् । ततो

धर्मसम्मेलनार्थं प्रयागनासिकहरद्वाराऽवन्तिकासु च कुंभमहोत्सवप्रचारिणीं पद्धतिं संजीवयामास । ततः सावधाना ब्राह्मणा निजबुद्धिवैभवेन धर्मरक्षां चक्रुः । अत्रान्तरे शुष्कवेदान्तिनां शैवानां च मतं शनैः शनैश्चचाल । प्रसुप्ता नास्तिकाः पुनरुत्थिता अभूवन् । एतदालोक्य श्रीसुदर्शनाऽवतारो, महामुनीन्द्रः श्रीनिम्बार्काचार्यो नैष्ठिकब्रह्मचारिणां सेनां सज्जीकृत्य ब्रजमंडले सुप्तप्रायां श्रीराधामाधवभक्तिं संजीवयामास । महाऽनुभावस्याऽस्य मतमस्ति द्वैताऽद्वैतसंज्ञकम् । श्रीमध्वाचार्यः केवलं द्वैतमेव निश्चित्य परमानंददायिनीं श्रीराधावल्लभार्चां लोके प्रचारयामास । महामतिः श्रीगौरांगमहाप्रभुः सुदाम्नोऽवतारस्तीर्थाटनं कुर्वन् श्रीकृष्णभक्तिं विशेषतो वंगप्रान्तेषु पत्रपुष्पफलवतीं चाऽकरोत् । अत्रान्तरे शेषावतारः कुशाग्रबुद्धिः श्रीरामानुजाचार्यः प्रादुर्भूय द्रविडदेशे दिग्विजयं कुर्वन् मार्गे नास्तिकानां दर्पदलनं कृत्वा च श्रीमल्लक्ष्मीनारायणभक्तिं चतसृषु दिक्षु प्रसारयामास । श्रीवैष्णवाचार्यस्याऽस्य मतमस्ति विशिष्टाऽद्वैतम् । श्रीमद्रामानंदाचार्यः श्रीरामचन्द्रभक्तः प्रायेणाऽस्यैव महाभागस्य पंथानमनुससार । अथाऽन्यावतारः श्रीवल्लभाचार्यमहाप्रभुः मध्यभारतेऽवतीर्य कलियुगाक्रान्तं कालं निजाऽनुपमशक्त्या श्रीकृष्णचन्द्रसमयसदृशं ब्रजमंडलेऽकरोत् । विद्यमानसमये या श्रीकृष्णभक्तिः गुर्जरत्रातदेशे जागर्ति साऽस्यैव महापुरुषस्य वंशजातानां पुरुषार्थेनैव । महाऽनुभावस्यास्य मतमस्ति श्रीविष्णुस्वामिना दर्शितं

शुद्धाऽद्वैताभिधानम् । श्रीमद्वसुगुप्ताचार्यादिभिः स्थापितं शैवमतं काश्मीरप्रान्ते यष्टिधारी वृद्ध इव मंदगत्या चलति । बाह्यार्थस्तु संक्षिप्तरीत्या पुस्तके लिखित एव। आभ्यंतरार्थः श्रीकृष्णोपनिषदः समुद्धृत्य लिख्यते ।

श्रीमान् रघुपुंगवो यदा वनवाससमये ससीतः सलक्ष्मणश्च मुनीनामाश्रमेषु जगाम, तदा तत्सौंदर्याकृष्टाः केचिदूचुः । राजीवलोचन ! भवदीयां मनोहरमूर्तिमवलोक्य पुरुषा अपि यदाऽऽलिङ्गितुमिच्छंति तदा स्त्रीणां तु कथैव का ? तच्छ्रुत्वा श्रीदाशरथिः प्रोवाच । महानुभावाः ! भवान्तरे गोप्यो गोपालाश्च भूत्वा मामालिंग्य च कृतार्था भविष्यंति । अथ देवा गोपरूपेणाऽवतीर्णाः । देवांगनाश्च गोप्यो बभूवुः । तत्र परमानंदो नंदः, यशोदा मुक्तिः, देवकी दया, धर्मो वसुदेवः, वेदो वासुदेवः, ऋचो गोप्यः, प्रकृतिः राधा, कृष्णपत्न्य उपनिषदः, वेदार्थः संकर्षणः, रोहिणी अहिंसा, पृथ्वी सत्यभामा, लक्ष्मीः रुक्मिणी, काश्चिदृचः गावः, गोकुलं स्वर्गः, वृंदावनं वैकुण्ठः, यष्टिर्ब्रह्मा, वंशो रुद्रः, शृंगमिन्द्रः, तपस्विनो वृक्षाः, गोलोकदेवता यमुना, देवमाया ब्राह्मण्यः, दैत्यमाया राक्षस्यः, देवबलं ज्ञानम्, दैत्यबलमज्ञानम्, द्वेषश्चाणूरः, मत्सरो मुष्टिकः, दर्पः कुवलयापीडः, गर्वो बकासुरः, महाव्याधिरघासुरः, कलिः कंसः, शमः सुदामा, दमोऽक्रूरः, संतोष उद्धवः, विष्णुः क्षीरसागरसंभूतः शंखः, भाण्डो दुग्धोदधिः, कश्यप उलूखलः, रज्जुर-

दितिः, कालिका गदा, अश्वाश्चत्वारः पदार्थाः, माया शार्ङ्गधनुः, जगद्बीजमब्जकाण्डम्, वटो गरुडः, क्रिया बुद्धिः, वृन्दा च भक्तिरस्ति । 'गोपवधूटीदुकूलचौराय' गां पाति रक्षतीति गोपो मनः । तस्य वधूटी बुद्धिः, तस्या दुकूलं अज्ञानं यो हरति परमेश्वरः श्रीकृष्णः तस्मै यः प्रणामं समर्पयति स त्रिविधपापैः क्लेशैश्च प्रमुच्यत इति ।

परममान्यग्रंथे वेदे चत्वारो वर्णा लिखिताः । संसारेऽस्मिन् यावंतः प्राणिनः संति ते तस्य विराट्संज्ञकस्य परमपुरुषस्यांगानि विद्यंते । तत्राऽस्य ब्राह्मणो मुखस्थानीयः । अस्य कार्यमस्ति विद्यामधीत्य शिक्षादानम् । भुजस्थानीयस्य क्षत्रियस्य धर्मोऽस्ति बलवृद्ध्या प्रजारक्षणम् । जंघास्थानीयस्य वैश्यस्य प्रधानकर्मास्ति धनार्जनम् । स च कृषिगोरक्षावाणिज्यादिभिः पदार्थान् समुत्पाद्य तद्द्वारा धनं संगृह्य ब्राह्मणेभ्यो धर्मसेवार्थं समर्पणं, क्षत्रियेभ्यो रक्षार्थं, शूद्रेभ्यः सेवार्थम्, अवशिष्टं च स्वजीवनार्थं रक्ष्यम् । चरणस्थानीयस्य शूद्रस्य प्रधानकर्माऽस्ति सेवा त्रयाणां वर्णानाम् । एवं विद्याबलधनसेवानां विनिमयेन प्रजानां हितमभूत् । अत्रोच्चनीचभावस्य लेशोऽपि नास्ति । विद्यासमये विद्यायाः प्राधान्यं, बलसमये बलस्य, धनसमये धनस्य, सेवासमये च सेवायाः प्राधान्यमभूत् । यदाप्रभृत्युच्चनीचभावा लोकानां हृदयेषु समुत्पन्नास्तदाप्रभृत्येव कलहबीजमुत्पन्नम् । तत्रादौ ब्राह्मणा वाह्यप्रपंचेषु लग्ना अभूवन् तदा क्रमशः सर्वेषामेव शनैः शनैः पतनमभवत् ।

न जातिर्जन्मना ज्ञेया न हि ज्ञेया च कर्मणा ।
यत्र द्वयोः समावेशः शुद्धा सा ज्ञातिरुच्यते ॥

एवं जन्मपक्षपातिनो लोकाः परानानिंदन्, देवमंदिरादिषु प्रवेशं न्यवारयन्, तदा तंतुवायतूलकंपकादिजातिषु समुत्पन्नाः शूद्राचार्या नवीनमतानि कल्पयित्वा श्रुतिस्मृतिपुराणप्रतिपाद्यं सनातनधर्मं दूषयितुमारब्धाः । अथ ब्राह्मणेषु येऽग्रगंतारः पथप्रदर्शकाश्चाऽऽसन् ते प्रणामलोलुपाश्चरणपूजेच्छवश्च बभूवुः । एवमेषामसावधानतां स्वार्थपरायणतामालोक्य विधर्मिण एषां मूलोच्छेदं कर्तुमारब्धाः । पुरा यथा द्रौपदीचीरहरणमासीत् तथा हिन्दुजातेः प्रतिदिनं चीरहरणलीला भवति । क्वचिदेषां देवप्रतिमाः प्रक्षिप्यंते । क्वचिदेषां धर्ममहोत्सवो निराक्रियते । क्वचिदेषां विधवाऽपह्रियते । क्वचिद्बालक एतेषां विधर्मी विधीयते । एषां समयस्तु बहुधा स्त्रियाः पुरुषस्य वा जातिबहिष्कारे लगति । केषांचित् समय इमं देवं पूजय, इमं मा पूजयेति कथयन् गच्छति । केचिद्देवनिंदां ब्राह्मणनिन्दां च परमधर्मं गणयंति । अतः परित्यज्य क्षुद्राशयं विद्वांसो हिन्दवो यथाशक्ति निजजातिकल्याणाय समुत्तिष्ठन्तु । श्रुतिवाक्यानि चाऽनुसरत । 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इति ।

(१) पुरा भारतीयाः सरलेन मार्गेण चलित्वाऽत्यानंदं लेभिरे । आधुनिकाः परित्यज्य सुपथं कष्टमनुभवंति । संप्रति

वर्णधर्माः आश्रमधर्माश्च परिष्कृता भवेयुस्तर्हि पुनः सुखप्राप्ति-र्भवितुमर्हति । तत्रादौ वर्णविषये लिख्यते । प्राधान्येन दशविधा ब्राह्मणाः कथ्यंते । यथा—

सारस्वताः कान्यकुब्जा गौडा उत्कलमैथिलाः ।
पंचगौरा इति ख्याता विन्ध्यादुत्तरवासिनः ॥
कार्णाटकाश्च तैलंगा द्राविडा महाराष्ट्रकाः ।
गुर्जराश्चैव पंचैते द्राविडा विन्ध्यदाक्षिणे ॥ ब्रा० मा० ॥

एषामवान्तरभेदेनाऽसंख्याता जातयो ब्राह्मणानां संजाताः ।

सूर्यवंशश्चंद्रवंशः अग्निवंशस्तथैव च ।
एवं क्षत्रियवृन्दस्य त्रयो वंशाः प्रकीर्तिताः ॥
माहेश्वरोऽग्रवालश्च तथा खंडेलवालकः ।
विजयवर्गीय इत्येते राजस्थाने महाजनाः ॥
चतुर्णामेव वर्णानां सांकर्याच्छूद्रजातयः ।
असंख्यास्तेषु श्रेष्ठत्वं प्राप्ता विदुरवंशजाः ॥

ब्राह्मणेषु यत्र यत्र भोजनव्यवहारस्तत्र तत्र कन्याव्यवहारो-ऽपिभवेत्तदा शोभनं भवितुमर्हति । राजस्थाने षड्ज्ञातीया ब्राह्मणा मिलंति । एषां पूर्वजाः षड्दर्शनकारा अभूवन् । विषयोऽयं स्पष्टीक्रियते । तत्रादौ श्रीदाधीचाः (दाहिमा) । वैशेषिकशास्त्र-प्रणेता कणादमुनिर्महर्षिदधीचसुतः पिप्पलादोऽभवत् । मरु-भूमिरेतेषां जन्मभूमिः । श्रीमती दधिमथी च कुलदेवी । योगशास्त्र-

रचयिता महामुनिः पतंजलिः सरस्वतीतीरनिवासी बभूव । *श्रीसारस्वता अपि तत्रत्याः । पंचापदेशो मरुस्थलान्निकटवर्ती विद्यते । अत एतेषां मिथः कन्याव्यवहारोऽपि भवितुमर्हति । षड्ज्ञातीयेषु गौडानां सारस्वतानां च क्षेत्रं विस्तीर्णमन्येषां च संकुचितमस्ति । पुनश्च सनाढ्यैः सह गौडानां संबंधो भवत्यत एतेषु विरला एवाऽविवाहितास्तिष्ठंति । श्रीपारीकानां मूलपुरुषः पराशरमुनिः । महर्षिर्वेदव्यासः पाराशर्योऽभवत् । व्यासमुनिर्वेदान्तसूत्राण्यरीरचत् एषां जन्मस्थानं शिखावत्प्रदेशः । यत्र सिकतावती भूमिः । एषां निकटवर्तिनः श्रीखंडेलवालाः । अत्राऽऽख्यायिका । एकदा श्रीजामदग्न्यः परशुरामो लोहार्गले बृहद्यज्ञमकरोत् । निर्लोभा याजका यदा दाक्षिणादानं नैच्छन् तदा कश्यपमुनिसंकेतात्परशुरामो हेममयीं वेदीं खंडयित्वास्याः खंडान् कृत्वा च ब्राह्मणेभ्यः प्रादात् । अतः खण्डं लात्याददातीति खंडलः, योगसूत्रव्याख्याता व्यासः खाण्डल इति केचित् । तद्वंश्याः खाण्डलाः । खांडला एव खंडेलवालसंज्ञका बभूवुः । यद्येतेषां श्रीपारीकैः सह मिथः कन्याव्यवहारोऽपि भवेत्तदा विशेषा वंशवृद्धिर्भवितुमर्हति । श्रीगुर्जरगौडानामादिपुरुषो गौतममुनिः । अस्याऽपरं नामाक्षपादः । विज्ञानविशारदोऽयं न्यायशास्त्रं रचया-

---

* महाकविर्बाणभट्टो निजकृतहर्षचरिते महर्षिदधीचस्य पुत्रः श्रीसारस्वताख्यो मुनिरभवदिति लिलेख । बहवो मुनयः समाननामका अभूवन् । निर्णयोऽत्र कठिनः ।

मास । एषां गौतमवंशजानामाधिक्यं हाडोतीप्रान्ते वर्तते । शिक्षा एव बलं येषान्ते शिक्षाबलाः । भाषायां शिखवालाः । मूलपुरुष एतेषामृष्यशृंगः । महामुनिर्जैमिनिरस्यैव वंशो जातः । महर्षिः ऋष्यशृंगः कर्मकाण्डाचार्यो बभूव, अस्याऽनुयानं मीमांसाचार्यो जैमिनिश्चकार । श्रीशिखवालानां प्राचुर्यं मेदपाटदेशे वर्तते । हाडोतीसन्निधावेव मेवाडदेशः । यद्येतेषां मिथो वैवाहिक-सम्बन्धो भवेत्तर्हि सौकर्यं भवितुमर्हति । लंबहस्ताः खलु क्षत्रियाः । विवाहविषये चतसृषु दिक्षु प्रसार एतेषाम् । यदीमे मद्यपानं त्यजेयुः वृथा हिंसां च न कुर्युस्तदा त्वेषां सान्निधौ दुःखं कदाऽपि नोपसर्पेत् । उक्तं च—

ब्राह्मणेषु महावैरं स्पर्धा क्षत्रियजातिषु ।
वैश्येषु च महालोभस्तेनेदं वर्तते जगत् ॥
पंचास्येषु महालस्यं सर्पेषु च महाभयम् ।
स्थानमोहश्च नक्रेषु तेनेदं वर्तते जगत् ॥

अग्रवालजातिषु वहवो नास्तिकमते प्रविष्ठाः । ते स्ववर्गे नेतव्याः । भविष्ये सत्यवसर अग्रवाला माहेश्वरैः सह विजय-वर्गिणश्च खण्डेलवालैः सह संबंधं स्थापयेयुस्तदा वैश्यजातेरपि संगठनं भवितुं शक्नोति । स्मृतिकारो मनुस्त्वेवमाह——

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञश्च ताश्च स्वाश्चाऽग्रजन्मनः ॥

अर्थात् ब्राह्मणश्चतुर्णां वर्णानां कन्या ग्रहीतुं शक्तः । क्षत्रियस्त्रयाणां वर्णानां, वैश्यो द्वयोर्वर्णयोः शूद्रश्च शूद्रांकन्यामुद्वहेत् ।

(२) तीव्रवैराग्योदयं विना द्विजोऽपि संन्यासदीक्षां न गृह्णीयात् । वहवो लोकाः अर्धदग्धाः शूद्राचार्याणां शिष्या भूत्वा श्रुतिस्मृतिपुराणानां वचनानि परित्यज्य कपोलकल्पितान् ग्रंथान् पठंति । तेन हितस्थानेऽहितमेव भवति । उक्तं च—

अपूज्या यत्र पूज्यंते पूज्यानां च विमानना ।
त्रीणि तत्र भविष्यंति दुर्भिक्षं मरणं भयम् ॥

(३) यावत् चित्ते रागद्वेषौ तावत् अहं ब्रह्माऽस्मीति ज्ञानकाण्डस्य पराकाष्ठासूचकं वाक्यं न वक्तव्यम् । उक्तं च भगवता गीतायाम्—

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

एवं द्वैतवादिनोऽप्यद्वैतं न निन्देयुः । यतः सर्व एवाचार्याः स्वमतैः सहाऽद्वैतशब्दं नात्यजन् ।

(४) वर्णव्यवस्थायां तु जन्मनः प्राधान्यम् कर्मणो गौणत्वम् । आश्रमव्यवस्थायां च कर्मणः प्राधान्यं जन्मनश्च गौणत्वं रक्षणीयम् । यावत्कनककामिनीमोहस्तावत् काषायवसनधारणं प्रतारणमेव ।

(५) तिलकमवश्यं करणीयम् । स्वेष्टदेवताऽर्चनस्य चिह्न-मेतत् । परन्त्वन्यदेवतातिलकेनापराधशंका न कर्तव्या । एवं जपमालाऽपि मनोऽनुकूला रक्षणीया । आसनेऽप्ययमेव विचारः ।

(६) कर्णस्फाटनं शैवस्य यथा संन्यासचिन्हम् तथा द्वारावतीं गत्वा तप्तमुद्रादिधारणं वैष्णवस्याऽपि संन्यासचिन्हम् । ज्ञात्वैवं गृहस्थः पितृकार्यार्थं दग्धगात्रो न स्यात् । दग्धगात्रः श्राद्धतर्पणादीनि पैतृककृत्यानि कर्तुं न शक्नोति । सौभाग्यवत्यपि दग्धगात्रा न भवेत् । विचारोऽयं प्राचीनो न नवीनः ।

(७) शाक्तो मद्यसेवनं मांसभक्षणं च स्वधर्मं न गणयेत् । शीतप्रधानदेशस्था भवंति बहुधा मांसभक्षकाः । स्पृश्याऽस्पृश्य-विचारस्य भक्ष्याऽभक्ष्यविचारस्याऽपि मूलकारणमेतदेव । निरा-मिषभोजिनो मांसभक्षकैः सह भोजनं नेच्छंति । सर्वे देवा मादकद्रव्यसेवनं निषेधंति ।

(८) पंचदेवोपासकाः अवतारार्चकाः अवतारकृपापात्रा-र्चकाश्चैते सर्वे एकस्यैव परमेश्वरस्य पूजकाः संति । योऽन्यदेवतां निन्दति स स्वदेवनिन्दार्थं द्वारमुद्घाटयति । एकदेवोपासको भूत्वा यः पंक्तिभेदं करोति, स वंचकः । नहि स देवताभक्तः । तत्र त्वैकतैव सयुक्तिका प्रशस्याऽत्र श्रुतिः—

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

(९) व्रतोपवासादिषु भिन्नमतत्वं विलोक्योपहसंति विधर्मिणः । श्रीकृष्णजन्माष्टमीविषये चत्वारो विवादाः समुत्तिष्ठंति । प्रथमो वदत्यष्टमी ग्राह्या । द्वितीयः कथयति रोहिणीं गृहाण । तृतीयः कथयति सिंहसंक्रान्तिर्गृहीतव्या । चतुर्थो भाषते बुधवासरो भवेत्तदा वरम् । वराक्या एकादश्या भाग्ये तु विवादो लिखित एव । होलिकादीपमाले तु कथयतः, यदावयोरग्रे कस्याऽपि न चलति । अत्र तु जनतावाक्यमेव प्रमाणम् । द्वादशी विष्णोस्तिथिरस्ति । अतः पारणायां सा ग्राह्या । किन्तु पक्षपातमवलंब्य दशम्युक्ताऽनिष्टकारिणीति कथनं तु विभीषिकैव ।

(१०) यद्यपि सनातनधर्माऽनुयायिनोऽसंख्याता जनास्संति तथाऽपि अनाथविधवारक्षणे ते दत्तावधाना न भवंति । अतः प्रतिवर्षं सहस्रशो बालका विधवाश्च विधर्मे प्रविश्य गोहत्याप्रचारकसंख्यां वर्धयंति । विषयेऽस्मिन् श्रुतिरेवं व्याहरति—'देवरः कस्माद् द्वितीयो वर उच्यत इति', निरुक्तकारो यास्काचार्य आह—

"कुहस्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ" ॥

दुर्गा० भाष्यम्—हे अश्विनौ ! "कुहस्विद् दोषा" "क्व" नु युवां "रात्रौ भवथः" "कुह वस्तोः" "क्व" वा "दिवा" भवथः युवाम् ? येन नापि रात्रौ अस्माकं दर्शनमुपगच्छथः

नापि दिवा स्विदिति परिदेवनायाम् ईर्ष्यायां वा। "कुह" "क्व" च "अभिपित्वम्" "अभिप्राप्तिं" स्नानभोजनार्थम् "कुरुथः ?" "क्व" वा "ऊषतुः" वसथः ? सर्वथा न विज्ञायते वामागमनप्रवृत्तिः। किंच "को वां शयुत्रा" कतमो युवां यजमानः। शयुत्रा "शयने" किम् "विधवा इव देवरं" यथा विधवा मृतभर्तृका काचित् स्त्री शयने रहसि अतितरां यत्नवती देवरमुपचरति, नहि परकीयत्वात् नार्या दुराराध्यतरो भवतीति यत्नेनोपचर्यते. न तथा निजो भर्ता। तस्मात् तेनोपमिमीते अश्विनौ। तथा "मर्यं" मनुष्यं देवरं सैव मृतभर्तृका "योषा" "आ" "कृणुते" आभिमुख्येन कुरुते। को वाम् एवं आभिमुख्येन "सधस्थे" सहस्थाने समाने सहयोगिनावात्मना कृत्वा परिचचार ? येनेह नोपगतवंतौ स्थोऽस्मद्दर्शनमिति ॥ एवमस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते, विधवया च यजमानः।

(११) कुबंधुः, कुनृपो, भिक्षुः, लंपटः, श्रुतिदूषकः।
हिन्दुस्त्रियाः पुनर्भूत्वं, नैते वांछंति स्वार्थिनः॥
यद् गृहाद् दुःखिता धावेद्विधवाऽन्नाद्यभावतः।
गृहस्वामी महादुःखमवप्राप्य व्रजत्यधः॥

अतो बांधवशिशूनामनाथानां विधवानां च भोजनाच्छादनादिभिः पालनं कार्यम्।

(१२) भारतभूमिर्हिन्दूनामार्याणां वा जन्मस्थानम्।

अत्र निवासमात्राद्धिन्दुत्वमार्यत्वं वा समागच्छति । श्रीगंगादितीर्थेषु ये स्नान्ति ज्ञानतोऽज्ञानतो वा तेष्वपि हिन्दुत्वमायाति । उक्तं च—

गंगागंगेति यो ब्रूयाद्योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

शिखाछेदनात् हिन्दुत्वं न गच्छति । यतोऽसंख्याताः शिखारहिताः हिंदवः संति । मद्यमांससेवनादपि हिन्दुता नाऽपयाति । यतोऽगणिता मद्यमांससेवका हिन्दवो विद्यन्ते । भ्रान्ता लोका एकत्र जन्मनः प्राधान्यं मन्यंतेऽपरत्र च कर्मणः । यो वंशक्रमागतो हिन्दुः हिन्दुवीर्यादुत्पन्नो हिन्दुस्त्रिया च गर्भे धृतः स कदाऽपि जलपानादुच्छिष्टभोजनाद्वा विधर्मी भवितुं नार्हति । धर्मशास्त्रकारैः संस्काराः प्रायश्चित्तानि च कथं लिखितानि ? जीविकार्थं अगणिता ब्राह्मणा वैश्यवृत्तिं शूद्रवृत्तिं च कुर्वंति । यदि कर्मण एव प्राधान्यं तर्हि तेषां गणना शूद्रेषु कथं न क्रियते ? यदि जन्मनः प्राधान्यं तर्हि जन्मतः प्रारभ्य मरणपर्यन्तं ब्राह्मणो ब्राह्मण एव । क्षत्रियः क्षत्रिय एव । वैश्यो वैश्य एव । शूद्रश्च शूद्र एव स्वीक्रियते । एवं संगठने संजाते हिन्दुजातौ जीवनं समायास्यति । यत्र जन्मकर्मणोः समता तत्र सुखनिवासः । एवं स्त्रीणां शुद्धिविषयेऽपि लिखितं महर्षिणा याज्ञवल्क्येन—

व्यभिचाराद्दतौ शुद्धिः, गर्भे त्यागो विधीयते ।
गर्भभर्तृबधादौ च तथा महति पातके ॥

अर्थः—स्त्रीव्यभिचाराद्दतुसमये शुद्धा भवति । यदि सपिण्डस्य सगोत्रस्य सजातीयस्य वा गर्भस्तदा तु स जातिसम्मिलितो भवितुमर्हति । यद्यसवर्णस्याऽपरिचितस्य वा भवेत् तदा प्रसवाऽनंतरं गर्भस्य तस्याऽन्यस्मै दानं कथितम् । भ्रूणहत्या न कर्तव्या । तथा गर्भभर्तृबधादौ राज्ञाऽकृतदंडां महापातकिनीं जपोपवासादिभिः शुद्धां कृत्वा निरुंध्यादेकवेश्मनि न तु गृहान्निष्कासनं तस्याः । दण्डिता तु शुद्धिसंपन्ना भवत्येव ।

(१३) पुरा दिवालग्नप्रथाऽऽसीत् । गर्भाऽऽधानं विहाय सर्वे संस्कारा अह्न्येवाऽभूवन् । मुख्यसंस्कारो विवाहो दिने कथं न क्रियते ? वंगद्रविडपंचापमहाराष्ट्रादिशिक्षितदेशेषु संप्रत्यपि दिवालग्नमेव भवति । कन्यादानं कृत्वैव भोक्तव्यमिति नियमः स्पष्टतया दर्शयति यत् भोजनसमयात् प्रागेव विवाहान्निवृत्य कृतभोजना बभूवुर्लोकाः । उक्तं च—

दिवालग्नं स्वर्णसमं, गोधूली राजतं मतम् ।
कांस्यतुल्यं रात्रिलग्नं, नैशीथं लोष्टवत् स्मृतम् ॥
पुत्रवान् पलितो दोषी, परिणीतोऽतिवित्तदः ।
संबंधच्छेत्ता च न ह्येते दिवालग्नस्य पोषकाः ॥

सत्यामावश्यकतायां रात्रिलग्नमपि कार्यम्, किन्तु दिवालग्नं निंदितं न गणनीयम् ।

(१४) अद्यश्वो बहवो ब्राह्मणा वैश्याश्च धनाऽभावात्

कन्याविक्रेतारो भवंति । यदि सजातीया मुद्राशतकं द्विशतकं वा कार्यार्थं स्पष्टतया नियतं कुर्युस्तदा उभयपक्षीयाः संबंधिनः पापभाजो न भवेयुः । कार्यार्थं धनग्रहणं श्रीराजर्षिणा मनुनाऽपि लिखितम् । "एकं गोमिथुनं दद्याद्वरादादाय धर्मतः" इति जातिभोजनादिकृत्येषु धनव्ययो भवत्यतो लोका धनं गृह्णंति । सामान्यवस्त्राणां, सामान्यभूषणानां, सामान्यभोजनपदार्थानां च रीतिः प्रचलिता भवेत्तदा कोऽपि किमपि न गृह्णीयात् ।

(१५) केचित् धनलोलुपा अबोधाः क्षत्रियास्तु टीकाव्याजेन कन्यापितुः पुत्र्या सह तस्य प्राणानप्यपकर्षंति । यद्यपि महानुभावैः कुरीतिनिवारणाय सभाऽपि स्थापिता, तथाऽप्यर्थी दोषं न पश्यतीति लोकोक्तिं चरितार्थां करोति कश्चित् । कोचित्तु शक्तिमंतोऽपि टीकालोभेन द्वितीयं तृतीयं वा विवाहं कृत्वा स्वर्गोपमं पूर्वजानां सदनं कलहागारं कुर्वन्ति । राजर्षिर्दशरथः समर्थोऽपि बहुविवाहं कृत्वाऽऽपदमवाप, आधुनिकानां तु कथैव का ? तेषु मद्यपानप्रथाऽप्यनन्तदुःखदायिकाऽस्ति । तेषां कृतेऽसंख्यातास्तरुण्यो वैधव्यकष्टमनुभवंति । दासीप्रीतिः वेश्यासक्तिरपि क्षत्रियाणां हानिकारिका । परमेश्वरस्तेभ्यः सुमतिं दद्यात् ।

(१६) दिनेष्वेतेषु धनाऽभावः सर्वान् बाधते । विशेषतो ब्राह्मणान् । यतस्तेषां जीविका स्वल्पाऽवशिष्टा । सजातीयानां

सेवा त्ववश्यं करणीया, किन्तु स्वल्पव्ययेन। उक्तं च शास्त्रज्ञैः—
'ऋणग्रस्ताः किमपि कर्तुं न प्रभवंति'। उक्तं च श्रीबृहस्पतिना—
'आयादल्पतरो व्ययः। सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः'।

सहृदयाः! यथामति मया स्वाऽभिप्रायो निवेदितः। बुधा अस्याऽसारं त्यक्त्वा सारमात्रं गृह्णंतु।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

इति भगवद्वचनं स्मृत्वा सर्वं भारं तदग्रे स्थापयामीति शम्।

सर्वे भवन्तु सुखिनः सर्वे संतु निरामयाः।
सर्वे भद्राणि पश्यंतु मा कश्चिद् दुःखभाग् भवेत्॥

प्रार्थयिता—

संं० १९९८
श्रीशिवरात्रिः

साहित्योपाध्याय, त्रिपाठि शिवदत्तः, काव्यतीर्थः
(भूतपूर्व प्रधान संस्कृताध्यापकः गवर्नमेन्ट हाईस्कूल, अजमेर)
श्रीजानकीनिवासः, पुष्करम् (अजयमेरु)

☞ परिशिष्टस्य अष्टादशपत्रेण सहाऽस्य प्रसंगस्य संबंधः। श्रीपौष्करणाः श्रीमालिनो द्विजा अपि च मिलेयुः। एवमार्यावर्ते सर्वत्र द्विजातिषु संगठनं भवेत्तदाऽस्य सनातनधर्मस्याऽभ्युदयो भूयादिति शम्।